उपसर्गार्थचन्द्रिका

A thesaurus of Sanskrit prepositional verbs

Vol. I

प्र - सम्

उपसर्गार्थचन्द्रिका

(A THESAURUS
OF
SANSKRIT PREPOSITIONAL VERBS)

सेयं

वाक्यपदीयस्य मञ्जूषाकर्त्र्या श्रीगान्धिचरिताऽनुवादकला-प्रस्तावतरङ्गिणी-शब्दाप-
शब्दविवेक-वाक्यमुक्तावली-व्याकरणचन्द्रोदय-वाग्व्यवहारादर्शादीना-
मनेकेषां ग्रन्थानां निर्मात्रा व्याकरणमहाभाष्यस्य विवरीत्रा
श्रीरामकृष्णतनुजनुषा
श्रीचारुदेवेन शास्त्रिणा प्रणीता

तत्रायं प्रथमः खण्डः

(प्र———सम्)

स एष

भारतीय-विद्या-प्रकाशनस्य

दिल्ली-वाराणसीस्थस्या-
ध्यक्षेण स्वेन व्ययेन प्राकाश्यं नीतः ।

प्रकाशक :

भारतीय विद्या प्रकाशन

१. १ यू० बी० बँग्लो रोड, जवाहर नगर
दिल्ली—११०००७

२. पो० बा० १०८, कचौड़ी गली
वाराणसी—२२१००१

द्वितीय संस्करणम् १९६७ वत्सरे

कृतिरियं पञ्चभिः खण्डैः परिसमाप्स्यति ।

मूल्यम् प्रथमखण्डस्य : ६०.००

मुद्रक: तरुण आफसेट प्रिन्टर्स, दिल्ली-53

PREFACE

It was in the Pre-partition days (previous to 1947) when I was yet in the service of the D.A.-V. College, Lahore that I conceived a plan of writing a comparatively small book on the use and function of the Sanskrit Preposition. Little did I imagine then that it would assume the dimensions that it has. I set myself the task of studying the vast Sanskrit literature, both Vedic and Classical, in my quest of the appropriate uses of the Sanskrit Prepositions. I endeavoured to discover their true meanings with the help of the commentaries, wherever available, which I have quoted in this work in extenso. But I have not allowed my regard for the old commentators to prevail over my sense of judgment. I have on occasions discarded the meanings offered by them in favour of my suggestions, for which I have invariably given reasons. I have also gone into textual criticism, wherever it was called for.

Though an arduous task, I have never felt it as such. The study of the Sanskrit prepositions has been a fascinating one for me. Indeed the more I studied them, the more fascinated I was. I have roamed all these years in the realm of the Vedic literature, the Saṁhitās, the Brāhmaṇas, the Sūtras (Śrauta, Gṛhya and Dharma). The language of these ancient works is rich with prepositions. The seers have a predilection for the use of the prepositions. They would use a single root and prefix to it a preposition to express an action or a modification of it. For each additional modification, they would have an additional preposition; thus a root carries sometimes as many as five prepositions. There is little like it in the later literature, termed classical. Prepositions there are, but they are few and far between. The wealth of meanings is missing here. Strikingness too is gone.

The Epics, the Rāmāyaṇa and the Mahābhārata match with the Vedic Texts in the use of the Sanskrit Prepositions. Here we find a copious use of the prepositions with an abounding variety of sense, almost as striking and charming as that met with in the Vedic literature. I have pored over the pages of the Epics for years and studied all available commentaries and embodied in this work the varying comments offered therein.

In the introduction to this work, I have discussed threadbare the time-honoured several theories about the function of the Sanskrit preposition. I have brought to bear on the subject quite new material, fresh lively evidence, for a correct appraisal. There is a fresh approach. All that goes to elucidate these theories is summed up here within a short compass of 40 pages.

To my predecessors in the field, I owe a deep debt of gratitude, especially, to the great Savants, Roth and Böhtlingk, the renowned authors of the Wörterbuch, the unsurpassed Sanskrit-German Lexicon. I have freely drawn upon the pertinent material contained therein.

Needless to say that I have gone far beyond the material utilized by the authors of the Wörterbuch. A host of works, both Vedic and Classical, such as the Jaiminīya Brāhmana, the Arthaśāstra of Kauṭalya, Bhāsa Nāṭakacakra, the Tattvasaṁgraha of Śāntarakṣita, the Kāśyapa Saṁhitā (Āyurveda)—to mention a few—were not known when the Wörterbuch was compiled. Many of the Sūtragranthas also, such as the Laugākṣi, the Āgniveśa appeared later. I have tried to make the present work as comprehensive as possible. The entire work when completed is expected to cover nearly 1000 pages in print. It is proposed to issue it in 5 fasciculi of nearly 200 pages each. The first fasciculus is being issued.

I have retained the traditional order of prepositions, *pra*, *parā*, *apa*, etc. The roots are, however, listed in the alphabetical order.

I have based my observations on tha text preserved in the Bombay Recensions of the Epics. The amplified Epics, with

all their accretions go back to a very early age of the Sanskrit Literature. Since I wanted to take notice of the usage that prevailed up to their final redaction, the distinction between the earlier and later layers being immaterial for me, I have not used the critical editions with a mass of genuine Sanskrit Speech scored out. Some of the quotations in the Rāmāyaṇa are drawn from the editions by Schlegel and Gorresio. The references to chapter and verse would not therefore accord with the Bombay recension. Some of the quotations from the Mahābhārata too as recorded in the Wörterbuch are not traceable to the Vulgate.

My thanks are due to Dr. Jiya Lal Kamboja, my old pupil, now Lecturer in Sanskrit in the Hindu College, Delhi University for his labour of love he did for me in checking the references and going through the proof-sheets.

I am currently running the 81st year of my life. My only prayer is that God may grant me the requisite physical strength and mental alertness to carry on my literary activities without a pause to the end of my earthly sojourn.

मा तन्तुश्छेदि वयतो धियं मे
मा मात्रा शार्यपसः पुर ऋतोः (ऋ० २।२८।५)।

Charudeva Shastri

Surabhi, 3/54,
Roop Nagar, Delhi.
27th September, 1976.

किञ्चित्प्रास्ताविकम्

अद्य वर्षपूगमुपसर्गार्थचन्द्रिकायाः प्रकृतायाः कृतेः प्रणीत्यां व्यापृतस्य मे। याऽस्य राष्ट्रस्य सप्तचत्वारिंशदुत्तर नवशत्यधिकसहस्रतमे ख्रिस्तसंवत्सरे विभक्तिरजनि ततः प्रागेव लवपुरस्थे श्रीदयानन्दकालेजे विधिवदौपाध्यायकं कुर्वाणस्य मे मनस्यभूदुपसर्गार्थविषयिणी काचित्पुस्तिका प्रणेयेति। नाहं तदाऽस्फुटावभासमपि समबीभवम् इदमियत्ताक एवंबृहन्नेष ग्रन्थो भवितेति। तत्र तत्रार्थे प्रयुक्तपूर्वाञ्शिष्टैः शीलितानुपसर्गान्पर्येषितुं प्रवृत्तो वैदिकं लौकिकं च वाङ्मयमवहितचेताः प्राधीतोऽहमद्योपपञ्चदशान्हायनांस्तत्रानारतं रमे रंस्ये च कृतेरस्याः प्रकाशनादा। तैस्तैष्टीकाकृद्भिः कृतै विवरणैः सहायैरुपसर्गकृत्यमञ्जसा व्यवासिषमुपसर्गार्थांश्च साधीयो व्यज्ञासिषम्। परं तेषु बह्वाद्दतोप्यहं न तत्कृतानि विवरणान्यनतिशङ्क्य श्रद्धाजाड्येन पर्यग्रहीषम्। यथापेक्षं निपुणं तानि परीक्ष्यासाधूनि कानि चिदिति निराकार्षम्। युक्तीश्च पुष्कलास्तत्र तत्र निराक्रियायां न्यास्थम्। क्वचित्क्वचित्प्रचरतो मूलपाठानपि यथामनीषमशूशुधम्।

यद्यपि दुर्भरोऽयं भरः कात्स्न्र्येनोपसर्गार्थगवेषणं नाम तथापि नायं मे खेदाय कनीयसे वा क्लमायाऽभूत्। नाहं क्षणमपि तस्मै पर्यग्लासिषम्। अत्यन्ताय रुचिकरमिदं कृत्यमित्येवान्वभूवम्। यत्सत्यं यथा यथोपसर्गार्थान्पर्यैक्षिषि तथा तथा प्राकृष्यत तत्राभिरुचिर्मे। इमानि हायनानि विशेषादाभोगवति वैदिकसाहित्यारामे तत्तदुपसर्गार्थसुमनसामवचायेऽविश्रान्तं व्यापृषि। अत्र साहित्ये यदुपसर्गप्राचुर्यं यच्चोपसर्गकृतमर्थनानात्वं तदन्यत्र सुदुर्लभम्। ऋषयः किलोपसर्गप्रिया इत्यवितथं वचः। तत्तदर्थविवक्षया प्रणुन्नास्ते यं कमप्येकं धातुमुपाश्रित्य नानोपसर्गासञ्जनेन वक्तुं प्रक्रमन्ते। अर्थाभ्युच्चयायोपसर्गाभ्युच्चयं कामयन्ते। आविकाऽक्षं पञ्चषैरप्युपसर्गैर्धातुं सम्पादयन्ते। न तावत्येवोपरमन्ते। तत्तन्नामधेयप्रकल्पनायामपि तथा प्रवर्तन्ते। ततोऽर्वाचीने लौकिके साहित्ये तु नेत्थम्भूतं किञ्चिदस्ति। सुदूरं सान्तरे अत्र विषये लोकवेदयोः प्रचरन्त्यौ वाचौ। सन्त्यत्रोपसर्गा नाम, परं विरलास्ते विप्रकृष्टान्तराश्च। विच्छिन्ना सम्प्रत्युपसर्गकृतार्थविच्छित्तिरर्थविविधता च।

श्रीरामायणमहाभारतयोस्तु च्छन्दोवत्कवयः कुर्वन्तीति भाष्योक्तिमन्वर्थयन्नुपसर्ग उपसर्गार्थे च चित्रीयाकरः संवादश्छान्दसैः। सैवेह प्रायतो-

पसर्गाणां सैव चार्थरुचिरता चकास्ति । शब्दवित्तमो व्यास इति भण्यते, वाग्वृषभश्च वाल्मीकिरिति तयोः कृती अध्येतुं शब्दतोऽर्थतश्च ग्रहीतुं तास्ताष्टीका आमूलचूलमालुलोचमुपसर्गे च साविशेषमवहितोऽभूवम् ।

अत्रोपोद्घातेऽहमुपसर्गा द्योतका इत्यादीन् प्रथितान्परम्परीणान्वादान् वितत्य गुणदोषतः पर्यच्छित्सि । अत्रानासादितचरं नवनवोन्मेषकरं पक्षविपक्षयोः प्रकर्षापकर्षप्रदर्शकं प्रमाणजातं समग्रहीषि नवां च वर्तनीं पर्यग्रहीषि । यत्सत्यमप्रहृत एष पन्था यो मयाऽऽस्थितः । उपसर्गकृत्यमधिकृत्य यावद् वक्तव्यं भवति तावदखिलेनेह चत्वारिंशता पत्रपार्श्वैरुक्तमिति नन्दिष्यन्ति कृतिनः ।

येऽत्र पूर्वाणस्तेभ्यो बहु धारयामि । विश्वस्मिन्नस्मिन् प्रथामितस्यानतिशयितस्य संस्कृतशार्मण्यकोषस्य प्रणायकयोर्विद्वच्छेखरायमाणयोर्मुनिशार्दूलयोर्मर्त्ययोरप्यमर्त्ययोः श्रीरोथबोत्लिङ्गयोर्विशिष्याधमर्णोस्मि । तदिदं कोषरत्नमत्र कृत्यां बहुलमुपयुक्तवानस्मि । परं नाहं तावन्तमेव ग्रन्थराशिभुपायुक्षि, ततो भूयांसमुपादिधीति नाधिकार्थवचनम् । एतत्कोषप्रणयनादूर्ध्वं भूयस्य ऋषिकृतयः कविकृतयश्चास्तंगताश्चिरमविदिता वा मातृकासु वा स्थिता इदम्प्रथमं प्राकाश्यमयुः । जैमिनीयब्राह्मणं कौटलीयमर्थशास्त्रं भासनाटकचक्रं तत्त्वसङ्ग्रहः काश्यपसंहितेतिप्रभृतयः प्रभूता ग्रन्थोद्धाः कालान्तरे प्रादुरभवन् । ततः सर्वत उपादेयार्थमुपादिधीत्यनेनापि कृतार्थता मे क्रियायाः ।

इयं मे कृतिर्यथोपपादं बह्वर्थव्यापिनी सर्वाङ्गीणा स्यादिति प्रायसम् । प्रत्येकं द्वे शते पृष्ठानि व्यश्नुवानैः पञ्चभिः खण्डैः कृतिरेषा क्रमशः प्रकाशयिष्यत इति प्राचिक्लृपम् । प्रथम एष खण्डः सम्प्रति प्राकाश्यमेति ।

इहोपसर्गाणां प्र परा अपेत्यादिः साम्प्रदायिकः क्रम आस्थितः । धातवस्त्वकारादिक्रमेणानुक्रान्ताः ।

सदसद्विवेचनचणाः परिणतप्रज्ञाः शास्त्रपरपारदृश्वानोऽत्र कमपि गुणं चेत् पश्येयुः कृतिनमात्मानं कलयेय । उपसर्गार्थविषयमनुसन्धातॄन् समुद्धर्षयिष्यति व्यवसाययिष्यति चेयं कृतिरिति बलवदाशासे ।

अद्याहमेकाशीतितमं वत्सरं वयसोऽनुभवामि । इदञ्चाभ्यर्थये भगवन्तमीशं शास्त्रशीलने नव्यभव्यार्थोन्नयनेऽमन्दमेधोऽप्रहीणशक्तिर्यथापुरमनन्तरायं प्रवर्तेय यावद् धिये । नातः परं मे काम्यमस्ति । एतदर्थाभिवादिनम् इममर्घर्चमभ्युच्य विरमाम्यहं विदुषामाश्रवश्चारुदेवः शास्त्री ।

मा तन्तुश्छेदि वयतो धियं मे
मा मात्रा शार्यपसः पुर ऋतोः (ऋ० २।२८।५) ।

उद्धृतग्रन्थ-संक्षेप्य-संक्षिप्तनाम्नां

सङ्केतिका

अग्निपु०	अग्निपुराणम्
अत्रि०	अत्रिस्मृतिः
अथर्व०	अथर्वसंहिता शौनकीया
अथर्व० पि०	अथर्वसंहिता पैप्पलादी
अमरः	अमरकोषः
अमरु०	अमरुशतकम्
अमरोद्घाटनम्	क्षीरस्वामिकृतममरकोषविवरणम्
अवदा०	अवदानजातकमाला (आर्यशूरकृता)
अवि०	अविमारकम्
अष्टा० हृ०	अष्टाङ्गहृदयम्
आप० गृ०	आपस्तम्बगृह्यसूत्रम्
आप० श्रौ०	आपस्तम्बश्रौतसूत्रम्
आपि० शि०	आपिशलिशिक्षा
आश्चर्य०	आश्चर्यचूडामणिः
आश्व० गृ०	आश्वलायनगृह्यसूत्रम्
आश्व० श्रौ०	आश्वलायनश्रौतसूत्रम्
ईश० उ०	ईशोपनिषद्
उत्तर०	उत्तररामचरितम्
ऊरु०	ऊरुभङ्गम्
ऋ०	ऋक्संहिता
ऋतु०	ऋतुसंहारम्
ऐ० आ०	ऐतरेयारण्यकम्
ऐ० उ०	ऐतरेयोपनिषद्
ऐ० ब्रा०	ऐतरेयब्राह्मणम्
औ० पदा०	औणादिकपदार्णवकोषः
कठ० उ०	कठोपनिषद्
कतकः	माधवकृता रामायणटीका
कथा०	कथासरित्सागरः
कर्म०	कर्मप्रदीपः
काठक०	काठकसंहिता
का० श्रौ०	कात्यायनश्रौतसूत्रम्
का०	कादम्बरी
का० प्र०	काव्यप्रकाशः
का०नी०सा०	कामन्दकनीतिसारः
का० मी०	काव्यमीमांसा
काम०	वात्स्यायनीयं कामसूत्रम्
काव्या०	काव्यादर्शः
काव्यानु०	काव्यानुशासनम्
का०सू०वृ०	काव्यालङ्कारसूत्रवृत्तिः
का०सू०टी०	कामसूत्रटीका
काशिका	अष्टाध्यायीवृत्तिः
का० सं०	काश्यपसंहिता (आयुर्वेदे)
कि०	किरातार्जुनीयम्
कु०	कुमारसम्भवम्
कुन्द०	कुन्दमाला

कुल्लू०	कुल्लूककृतमनुटीका
कृ० क० त०	कृत्यकल्पतरुः
कृष्ण०	कृष्णामृतम्
केशवः	नानार्थार्णवसंक्षेपनाम्नः कोषस्य कर्ता
खा० गृ०	खादिरगृह्यसूत्रम्
कौ० अ०	कौटलीयमर्थशास्त्रम्
कौ० ब्रा०	कौषीतकिब्राह्मणम् (शाङ्खायनब्राह्मणम्)
कौ०ब्रा०उ०	कौषितकिब्राह्मणोपनिषद्
कौ०सू०	कौशिकसूत्रम्
गीत०	गीतगोबिन्दम्
गीता	श्रीमद्भगवद्गीता
गृह्या०	गृह्यासंग्रहभाष्यम्
गो० गृ०	गोभिलगृह्यसूत्रम्
गो० ब्रा०	गोपथब्राह्मणम्
गो० स्मृ०	गोभिलस्मृतिः
गौड०	गौडपादीयसाङ्ख्यकारिकाः
गौ० ध०	गौतमधर्मसूत्रम्
चरके	चरकसंहितायाम्
चाणक्य०	चाणक्यसूत्राणि
चारु०	चारुदत्तम्
चौर०	चौरपञ्चाशिका
छां० उ०	छान्दोग्योपनिषद्
जानकी०	जानकीहरणम्
जै० गृ०	जैमिनीयगृह्यम्
ज०न्या०वि०	जैमिनीयन्यायविस्तरमाला
जै० ब्रा०	जैमिनीयब्राह्मणम्
जै०ब्रा०उ०	जैमिनीय ब्राह्मणोपनिषद्
तन्त्र०वा०	तन्त्रवार्तिकम्
तन्त्रा०	तन्त्राख्यायिका
तर्क०	तर्कभाषा
तर्क०	तर्कसङ्ग्रहः
ताण्ड्य ब्रा०	ताण्ड्यब्राह्मणम्
तिलकः	रामकृता रामायणटीका
तै०आ०	तैत्तिरीयारण्यकम्
तै० उ०	तैत्तिरीयोपनिषद्
तै० प्रा०	तैत्तिरीयप्रातिशाख्यम्
तै० ब्रा०	तैत्तिरीयब्राह्मणम्
तै० सं०	तैत्तिरीयसंहिता
दशकु०	दशकुमारचरितम्
दुर्गः	दुर्गाचार्यकृतं निरुक्तभाष्यम्
दुर्गा०	दुर्गासप्तशती
दूत०	दूतवाक्यम्
द्रा० गृ०	द्राह्यायणगृह्यम्
नल०	नलोदयः
ना० स्मृ०	नारदस्मृतिः
नि०	यास्कीयं निरुक्तम्
नै०	नैषधीयचरितम्
न्यायभा०	वात्स्यायनकृतं न्यायभाष्यम्
न्यासः	जिनेन्द्रबुद्धिकृता काशिकाविवरणपञ्जिका
पञ्च०	पञ्चरात्रम्
पञ्चत०	पञ्चतन्त्रम्
पञ्चविंश०	पञ्चविंशब्राह्मणम्
प० म०	पदमञ्जरी
परिभाषा	परिभाषेन्दुशेखरः

प० ल० म०	परमलघुमञ्जूषा
पाद०	पादताडितकम्
प्र० उ०	प्रश्नोपनिषद्
प्र० च०	प्रबोधचन्द्रः
प्रतिज्ञा०	प्रतिज्ञायौगन्धरायणम्
प्रतिमा	प्रतिमानाटकम्
बा० च०	बालचरितम्
बालबो०	बालबोधिनी
बा० रा०	बालरामायणम्
बुद्ध०	बुद्धचरितम्
बृ० उ०	बृहदारण्यकोपनिषद्
बृ० दे०	बृहद्देवता
बृ० श्लो०	बृहच्छ्लोकसङ्ग्रहः
बौ० ध०	बौधायनधर्मसूत्रम्
बौ० श्रौ०	बौधायन-श्रौतसूत्रम्
ब्र० वै० पु०	ब्रह्मवैवर्त्तपुराणम्
ब्र० सू०	ब्रह्मसूत्रम्
ब्र०शां०भा०	ब्र० सू० शाङ्करभाष्यम्
भट्टि०	भट्टिकाव्यम्
भा०	महाभारतम्
भर्तृ०	भर्तृहरिकृतं शतकत्रयम्
भा०गृ०	भारद्वाजगृह्यसूत्रम्
भा० पु०	श्रीमद्भागवतपुराणम्
भा० वि०	भामिनीविलासः
भा० श्रौ०	भारद्वाजश्रौतसूत्रम्
भोज०	भोजप्रबन्धः
मनु०	मनुस्मृतिः
मल्लिनाथः	मल्लिनाथकृता शिशुपालवधटीका
महाना०	महानारायणौपनिषद्
महावीर०	महावीरचरितम्
मानवश्रौ०	मानवश्रौतसूत्रम्
मार्क० पु०	मार्कण्डेयपुराणम्
मालती०	मालतीमाधवम्
माल०	मालविकाग्निमित्रम्
मिताक्षरा	याज्ञवल्क्यस्मृतिटीका
मी० सू०	मीमांसासूत्रम्
मी० सू०-शा० भा०	मीमांसासूत्रशाबरभाष्यम्
मु० उ०	मुण्डकोपनिषद्
मुद्रा०	मुद्राराक्षसम्
मृच्छ०	मृच्छकटकम्
मेघ०	मेघदूतम्
मै० सं०	मैत्रायणी संहिता
याज्ञ०	याज्ञवल्क्यस्मृतिः
यो० वा०	योगवासिष्ठम्
यो० सू०	योगसूत्राणि
यो०सू०भा०	योगसूत्रभाष्यम्
रघु०	रघुवंशम्
रत्ना०	रत्नावली
रा०	श्री रामायणम्
राम०	रामचरितम्
राज०	राजतरङ्गिणी
ल०वि०स्मृ०	लघुविष्णुस्मृतिः
लाट्या०श्रौ०	लाट्यायनश्रौतसूत्रम्
लीला०	लीलावती
लौगाक्षि०	लौगाक्षिगृह्यसूत्रम्
वक्रोक्ति०	वक्रोक्तिजीवितम्
व० ध०	वसिष्ठधर्मशास्त्रम्
वा० गृ०	वाराहगृह्यसूत्रम्
वा० प०	वाक्यपदीयम्

वा० पु०	वामनपुराणम्	शां० गृ०	शाङ्खायनगृह्यसूत्रम्
वायु० पु०	वायुपुराणम्	शां० श्रौ०	शाङ्खायनश्रौतसूत्रम्
वाररुच०	वाररुचसङ्ग्रहः	शि० भा०	शिवभारतम्
विद्ध०	विद्धशालभञ्जिका	शिशु०	शिशुपालवधम्
वि० पु०	बिष्णुपुराणम्	शुक्र०	शुक्रनीतिः
विश्व:	विश्वप्रकाशः	शृं० ति०	शृङ्गारतिलकम्
विश्वगु०	विश्वगुणादर्शचम्पूः	श्लो० वा०	श्लोकवार्तिकम्
वेणी०	वेणीसंहारम्	श्वे० उ०	श्वेताश्वतरोपनिषद्
वे० सा०	वेदान्तसारः	षड्विंश०	षड्विंशब्राह्मणम्
वैद्य०	वैद्यजीवनम्	सर्व०	सर्वदर्शनसङ्ग्रहः
वैशारदी	योगभाष्यटीका	सां० तत्त्व०	साङ्ख्यतत्त्वकौमुदी
वैशेषिक०	वैशेषिकसूत्रम्	सि० कौ०	सिद्धान्तकौमुदी
व्या० म०	व्याकरणमहाभाष्यम्	सां०सू०भा०	साङ्ख्यसूत्रभाष्यम्
शं० दि०	शङ्करदिग्विजयः	सू० सि०	सूर्यसिद्धान्तः
शङ्ख०	शङ्खलिखितस्मृतिः	सौन्दर०	सौन्दरनन्दम्
श० ब्रा०	शतपथब्राह्मणम् (माध्यन्दिनीयम्)	स्वप्न०	स्वप्नवासवदत्तम्
		सुश्रुते	सुश्रुतसंहितायाम्
शा०	अभिज्ञानशाकुन्तलम्	हरि०	हरिवंशम्
शाता०	शातातपस्मृतिः	हर्ष०	हर्षचरितम्
शा० दी०	शास्त्रदीपिका	हित०	हितोपदेशः

ओ नमः परमात्मने ।
नमो भगवते पाणिनये ।
नमः शिष्टेभ्यः । नमः पूर्वेभ्यः पथिकृद्भ्यः ।

उपसर्गा निषिञ्चन्ति वाच्यपूर्वां मनोज्ञताम् ।
इत्युपसर्गवाल्लभ्यमृषीणां सम्प्रसिध्यति ॥१॥

अतो वाचो विवेक्तारो वक्तारो वाग्मिनः किल ।
धातूपसर्गयोगेण तं तमर्थं प्रचक्षते ॥२॥

संहितासु सभाष्यासु निषत्सूपनिषत्सु च ।
भारते चादिकाव्ये च कल्पेषु स्मरणेषु च ॥३॥

यः प्रायो ह्युपसर्गाणां काव्यनाटकयोस्तु सः ।
गद्ये समासभूयिष्ठेऽथो विमृग्यक्रिये कुतः ॥४॥

आसंहितं समाहारं समाहारमुदाहृतोः ।
आकाव्यनाटकं चायमुपसर्गार्थसङ्ग्रहः ॥५॥

प्राक्तनान्नूतनाच्चापि वाङ्मयात्संप्रणीयते ।
शिष्टप्रयुक्तिपद्यायाः प्रव्यक्तं प्रतिपत्तये ॥६॥

उपसर्गा द्योतकाः केचिद्वाचकाश्चाप्यमी स्मृताः ।
अनर्थकाश्चापि लक्ष्यन्ते केचिद्वस्तुस्वभावतः ॥७॥

धातूपसर्गयोरैक्यं वादिनः केचिदास्थिताः ।
सम्भूयाप्यर्थवाचित्वं ते नः सूक्ष्मदृशो मताः ॥८॥

इतीदं पक्षनानात्वं सम्प्रधार्यावधारितम् ।
सङ्ख्यया पश्चिमः पक्षो गुणैरेष ह्यपश्चिमः ॥९॥

कृत्यामास्वादमास्वादमेतस्यां वर्तनिं नवाम् ।
नवार्थस्यातिसन्तृप्ताः सम्प्रेष्यन्ते विपश्चितः ॥१०॥

अनिशं भासमानां ते चकोराः शब्दवित्तमाः ।
प्रत्यग्रां चन्द्रिकां चेमां निषेष्यन्ते समुत्सुकाः ॥११॥

अथोपसर्गार्थचन्द्रिका

तत्रेदमुपोद्घन्मः—

उपसर्गार्था यथातथं प्रतिपन्ना बहूपकुर्वन्ति वाचं प्रतिपित्सूनामिति पण्डिताः प्रतिपन्नाः। सम्यक् प्रयुक्ताश्चोपसर्गा यथोपस्कुर्वते वाक्यविन्यासस्य न तथेतरत्किञ्चित्। इमे हि यां सुषमां प्रसुवते सा सचेतसां सुमेधसामेव गम्या, यं च वाचि लोकोत्तरं निषिञ्चन्ति रसपीयूषप्रकर्षं सोपि तन्मात्रगोचरो न प्राकृतैश्चर्वणीयो भवति। न केवलं बन्धस्य सुभगंकरणा उपसर्गा इत्यर्थतः प्रयोगतश्च परिचेतव्या विदुषा च विविदिषावता च। बहु नामोपकुर्वन्त्युपसर्गाः सम्यक् परिचिता विनेयस्य विशेषतः। अल्पैरेव कैश्चिद् धातुभिरुपसर्गसहचरितैः साधीयो निर्वक्ष्यति तस्यार्थ इति नेदानीं तस्यामकृद् घोषयतो रूपजातमुपदास्यते स्वरः क्षेष्यते च कायः। बाढं शब्दसौष्ठवं बन्धस्य तस्येष्टं नैककियोक्तिपाटवं च, तस्योभयस्य कनीयसा यत्नेन चारुतरेण चोपयिकेन प्रसिद्धेर्नासौ फलव्यतिरिक्तं घटिष्यते। 'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेद्' इति हि लौकिका आभणन्ति। तस्मादुपसर्गप्रयोगेऽभिविनेया विनेयाः प्रयत्नतो विनेतृभिः।

इदं चाक्षिलक्षी भवति निःसामान्याऽभिरुचिरुपसर्गप्रयोगेषु पूर्वेषां वाग्योगविदाम्। तथा हि त एकस्मादेव धातोर्नानोपसर्गासञ्जनेन तत्तन्नामधेयं कल्पयन्ति। वायोः सप्त नेमयः स्मर्यन्ते पुराणकारैः। त एतैर्नामभिः कूर्ममहापुराणे (पूर्व० ४१।६) कीर्त्यन्ते—आवहः प्रवहश्चैव तत्रैवानुवहः पुनः। संवहो विवहश्चैव तदूर्ध्वं स्यात्परावहः। तथा परिवहश्चैव वायोर्वै सप्त नेमयः॥ तत्रैव हिरण्यकशिपोरात्मजा एभिर्नामभिरुद्दिश्यन्ते—हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः।...प्रह्लादश्चानुह्लादश्च संह्लादो ह्लाद एव च (कूर्म० पु० १६। ४६-४७)॥ विष्णु पुराणे (१।१५।१४२) एतान्येव नामधेयानि निर्दिष्टानि। ब्राह्मणकारा याज्ञवल्क्यादयो महर्षय एतज्जातीयकां प्रवृत्तिमासेवन्ते। चत्वारो ह वा अग्नयः। आहित उद्धृतः प्रहृतो विहृतः (श० ब्रा० ११।८।२।१)। अत्रोपसर्गत्रययोगेण हरतिनैकेनाग्नित्रेता समाख्याता। कथाकारा अपि प्राच ऋषीननुविदधति—तेषीत्थं वयसां नामानि घटयन्ति—तस्य चान्वयागताः पञ्च सचिवाः। तद्यथा—उद्दीपो। सन्दीपो। आदीपो। प्रदीपो। चिरजीवी चेति (तन्त्रा० ३)।

इदमत्रोपसर्गविषये निचाय्यम्—धातुना सम्प्रयुक्त उपसर्गस्तं तमर्थमाह। परं नहि यः कश्चिदुपसर्गो येन केन शक्यो धातुना योक्तुम्। कश्चिदेव तु केन चिदर्हति योगम्। प्रतिनियतविषयाः शब्दा भवन्तीति नात्र प्रायोक्त्री विवक्षा प्रभवति। अवाद्ग्रः (पा० १।२।५१) इति सूत्रे गिरतेरिति वक्तव्यम्। न वक्तव्यम्। प्रयोगाभावात्। न चावपूर्वस्य गृणातेः प्रयोगोस्तीति भाष्यमत्र लिङ्गम्। न सम्पूर्वस्य स्यातेस्तिङि प्रयोगोऽस्तीति च न्यासकारवचोपि। उपपूर्वो जानातिराद्यज्ञानमाह न तूपपूर्वो वेत्तिः। तस्य तथाभूतस्य प्रयोगाभावात्। तस्माच्छब्दशक्ति स्वाभाव्यं सम्यग् विभाव्य प्रयोगविषयतां च निपुणं निरूप्य प्रवर्तनीयं सन्दर्भशुद्धिमभीप्सता सुमेधसा।

इदमप्युपसर्गस्वालक्षण्यं विभाव्यताम्। केचिदुपसर्गाः कृति प्रत्यये यमर्थमाहुर्न तं तिङि—प्रश्रित इत्याद्तो विनीतो वा भवति, प्रश्रयत इति तु प्रतिश्रयणपूर्वकं निषदनमाचष्टे प्रायेण। कुड्यं प्रश्रयते कुड्यं संश्रित्य निषीदतीत्यर्थः। आग्रह इति निर्बन्धो भवति। आगृह्णातिस्तु तुरगसंयमने वर्तते न जातु निर्बन्धे। भवति च दाशतये प्रयोगः—**आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा** (ऋ० ८।४५।३९)। आहारो भोज्यं भवति। आहरति इति तु भुङ्क्त इत्यत्रार्थे न क्वचित्प्रयुज्यते। प्रयतः पूतो भवति। प्रयमिस्तिङन्तस्तु न क्वचित्पवने पूतीभावे वा दृष्टः। आश्रव इति वचने स्थित इत्युच्यते। आशृणोतिस्तु न तत्रार्थे प्रसिध्यति। न ह्याशृणोतीत्युक्ते वशंवद इत्यर्थो गम्यते।

वैयाकरणानां निकाये उपसर्गा द्योतकाः, उपसर्गा वाचकाश्चेति द्वौ वादौ प्रथेतेतराम्। उपसर्गाश्च पुनरेवमात्मकाः ससाधनां क्रियामाहुरिति भाष्यं (५।२।२८) विवृण्वानः कैयटः प्राह—क्रियोपसर्जनं साधनमाहुः। अतो वैयाकरणा अपि पार्थगर्थ्यं नैव निह्नुवते। **स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा। शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥** (वा०प०२।१८८) इति हर्युक्तेश्च।

द्योतका उपसर्गा इति तावद् ब्रूमः—

न निर्बद्धा उपसर्गा अर्थान्निराहुरिति। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति इति निरुक्ते। अयमर्थः। चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च। यथा नामाख्यातयोर्निपातस्य च वाक्ये पृथक्पदत्वेन प्रयोग उपलभ्यते न तथोपसर्गस्य। उपसर्गस्य धातुयुक्तस्यैव प्रयोगोपलम्भात्तस्य स्वकः कोऽप्यर्थो नास्तीति कल्प्यते। धातोरेवार्थविशेषं द्योतयन्त्युपसर्गास्तेनैवार्थवन्तो भवन्तीति शाकटायनाचार्यस्य दर्शनम्। तदिदं दर्शनं धातुष्वनेकार्थेषु सत्स्वेवोपपद्यते इति तावद् धातूनामनेकार्थतोपपाद्यते। अत्राहुरभियुक्ताः—**क्रियावाचित्वमाख्यातुमेकैकोर्थो निदर्शितः। प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः॥** इति। एतदुक्तं भवति—धातुपारायणेऽर्थनिर्देशो निदर्शनाय कृतो न परिगणनाय। निर्दिष्टार्थेभ्यो व्यतिरिक्ता अपि धात्वर्था भवन्तीति। अत एव

कलिवली कामधेनू इति प्रथते प्रामाणिकोक्तिः। किञ्च धातुपाठेऽन्तरप्यनेकार्थताया लिङ्गमस्ति। कगे नोच्यते, वनु च नोच्यत इति यद्विशिष्यार्थो नोक्तस्तत्र धातूनामनेकार्थता हेतुरिति तद्व्याख्यातारः। कुर्द खुर्द गुर्द क्रीडायामेवेत्येवकारोऽप्यत्र लिङ्गमस्ति। राधोऽकर्मकाद् वृद्धावेवेति चापि लिङ्गान्तरमुक्तार्थोपस्तम्भकम्। अत्र एवकारो भिन्नक्रमः। यदा राधिरकर्मकस्तदैव श्यनं लभते यथा वृद्धाविति तदर्थः। तेनान्यत्रार्थेऽप्ययमकर्मकः सञ्श्यनं लभते यथा दैवपर्यालोचने—देवदत्ताय राध्यति गर्ग इति। दृश्यन्ते च प्रयोगा अनिर्दिष्टार्थेषु धातूनामिति नैतद् रिक्तं वचः। तद्यथा वपिर्बीजसन्ताने पठितश्छेदनेऽपि वर्तते—वपति केशानिति। करोतिः करणेऽभूतप्रादुर्भावे पठितो निर्मलीकरणेऽपि दृश्यते—पृष्ठं कुरु। उन्मृदानेति गम्यते। ईडिः स्तुतौ पठितः प्रेरणायामपि प्रयुज्यते—अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्तीति। चर्चयतिरध्ययने कीर्तितः—**न केवलं चर्चापदानि** व्याख्या भवतीति। विलेपनेऽपि वर्तते, **चन्दनचर्चितभालः। चर्चा चार्चिक्यं स्थासक** इति चामरः। किर्तिर्निवासे रोगापनयने च पठितः—**निकेतयति** निवसत्यत्रेति **निकेतनं गृहम्। चिकित्सति मन्दं वैद्य** इति। भिषज्यतीत्यर्थः। ज्ञाननिग्रहनाशननिमन्त्रणेष्वपि दृश्यते—**केतयत्यनेनेति केतनं केतुः। शत्रुं चिकित्सति**। नाशयतीत्यर्थः। **सस्यार्थे क्षेत्रे तृणानि चिकित्सति**। उन्मूलयतीत्यर्थः। **श्राद्धे केतयति विप्रम्**। निमन्त्रयत इत्यर्थः। **केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तम** इति च मानवे धर्मशास्त्रे (३।१९०)। शंसतिः स्तुतौ पठितो हिंसायामपि वर्तते—**नृञ्शंसति हिनस्तीति नृशंसः। नृशंसो घातुकः क्रूर** इति चामरः। चक्षिङ् व्यक्तायां वाचि पठितः। हिंसायामपि वर्तते— **नृचक्षा राक्षस इति** चक्षिङः ख्याञ् (३।४।५४) इति सूत्रे काशिका। कृपूः सामर्थ्ये पठितो ऽन्यत्रार्थे कर्तनेपि व्यवह्रियते—**क्लृप्तकेशश्मश्रुर्यतिरिति**। वसतिर्निवासे पठितोऽशनेपि वर्तते। **तिसृणां वसतीनां हि स्थानं परमदुश्चरमित्यत्र** भारते (वन० २९६।५) तथा दर्शनात्। **अश्यर्थस्य नेति** वार्तिकलिङ्गाच्च। एवं स्थिते उपसर्गैः किं क्रियते। तेन तेन धातुना सहोक्ता उपसर्गास्तत्तद्धात्वन्तर्हितांस्तांस्तान् अर्थानुद्भावयन्तीत्यत्रैव पर्यवस्यति तेषां कृत्यम्, न कृत्यान्तरमस्ति। **वधो घातो भवति विवधश्च वीवधश्च विहङ्गिका**। हन हिंसागत्योरिति धातोर्विशब्देन गत्यर्थता समुद्भाव्यते। विशिष्टो वधो गमनमत्रेति व्युत्पत्तेः। तमिममर्थं रुचिरया कविपद्धत्या निबध्नाति शास्त्रकोविदः कविर्माघः—

सन्तमेव चिरमप्रकृतत्वादप्रकाशितमदिद्युतदङ्गे।
विभ्रमं मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थम्॥ (१०।१५)

भङ्ग्यन्तरेणापि द्योतकतोपसर्गाणां शक्या प्रसाधयितुम्। यदि नामोपसर्गसहकारेण यं यमर्थं धातवो ब्रुवन्ति तं तं केवला अपि ब्रुवीरंस्तदोपसर्गा

द्योतका इत्यर्थादापद्यतेऽनेकार्थता च धातूनां प्रसिध्यतितराम् इति काश्चिद् दिशोऽनेकार्थवाचितायाः उदाहरामः । चरतिर्गतिभक्षणयोः पठितः, विपूर्वस्तु भ्रमणे पर्यटने वर्तते—**अधिज्यधन्वा विचचार दावम्** (रघु० २।८) । केवलोपि तत्रार्थे दृश्यते—**वयं हंसाश्चरामेमां पृथिवीं मानसौकसः** (भा० ८।४१।१३) । चिञ् चयने इति धातुः प्रेणोपेन वोपसृष्टो वृद्धौ वर्तते, **प्रचीयन्तेऽस्य गात्राणि, उपचीयन्ते वा** । केवलोपि— **क्षीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः** (मुद्रा० १।५) । विपूर्वोऽयं मार्गणेऽन्वेषणे वर्तते **विचितश्चैष समन्तात् श्मशानवाटः** (मालती० ५) । अन्तरेणापि व्युपसर्गं तमर्थमाह—**पुरराष्ट्राणि चिन्वन्तो नैषधं सह भार्यया** (भा० वन० ६८।६) । भज सेवायाम् इति विपूर्वो वण्टने वर्तते— **विभजन्ते दायं भ्रातरः** । केवलोपि तमर्थमाह—**अजादिकं सैकशफं न जातु विक्रमं रुजेत्** (मनु० ९।११९) । उपपूर्वो वसिरपोहणेऽशने वर्तते, **उपवसति गृही पाप्मानं निर्णुदामीति** । केवलोपि तत्रार्थे प्रयोगमवतरन्दृष्टः— **अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः । पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चविधिः स्मृतः ॥ शुचिः पुरोधास्त्र्यहोषितः स्नात** इति च वराहमिहिरसंहितायाम् (४६।१५) । विलग्नशब्दः कृशापरपर्यायो दृष्टः, **वेदिविलग्नमध्या** (कु०४।४५) । **विलग्नमध्यश्च स नाभिदेशे** (भा० वन० ११२।४) । **विविरहिसोऽपि—तं प्रादेशमात्रं पृथुबुध्नं मध्ये लग्नं (महावीरं) करोति** (बौ०श्रौ०९।३) । अयमेवास्यार्थ इत्यापस्तम्बतो विजानीमः—**महावीरं करोति प्रादेशमात्रमूर्ध्वसानुमुपरिष्टादासेचनवन्तं मध्ये सन्नतं वादित्यप्रकारमिति** । प्रसव इत्यभ्यनुज्ञानमाह, सवोपि—**सवं देवस्य सवितुर्जुषाणाः** (ऋ० ७।३८।४) । **देवस्य सवितुः सवे कर्म कृण्वन्तु मानुषाः** (अथर्व० ३।२३।३) । सृज विसर्गे इति विपूर्व उत्पूर्वो वा त्यागे वर्तते, विसृष्ट उत्सृष्टो वा वृषः । केवलोपि— **सृष्टप्राणो भृशतरं तेन चेत्सङ्गमो मम** (भा०सभा० ८०।४७) । सृष्टः=उत्सृष्टः=त्यक्तः । **सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः** (मनु० ३।२५५) । सृष्टिरकार्षण्येनान्नादिविसर्ग इति कुल्लूकभट्टः । यतिः प्रतियत्ने पठितः सम्पूर्वः स्पर्धायां वर्तते, **देवाश्चासुराश्च संयत्ता आसन्** इत्यत्र यथा । केवलोपि तत्रार्थे दृश्यते—**वैश्वानरो यतते सूर्येण** (ऋ० (१।९५१) । वैश्वानरः संयतते सूर्येणेति निरुक्तम् ; संयतते संगच्छत इति च दुर्गः । यतमानो रश्मिभिः सूर्यस्य (ऋ० ५।४।४) । इण् गतौ धातुरपशब्दसाहित्येनापायमाचष्टे—**पथोऽपैति** । अपमन्तरेणापि तमर्थं ब्रवीति— **न सत्यादगा** इति छान्दोग्योपनिषदि (४।४।५) । ह्वलति वा एष यो यज्ञादेति (श०ब्रा० ५।१।३।६) । एति=अपैति । अथो हास्य पौर्णमासात्तन्त्रादनितं भवति (शां ब्रा० १।४) । अनितमनपेतम् । यत निकारोपस्कारयोर्धातुः । निर्यातनं विशोधनं भवति वैरस्य ऋणस्य वा । यातनं यातना वाप्युपसर्गवैधुर्येणापि तमर्थं

मुक्तसंशयं ब्रूते। **अहमस्य करोम्यद्य सदृशीं वैरयातनाम्** (भा० शां० १३६। १८)। **पन्नगानां सुघोराणां कृत्वा तां वैरयातनाम्**। (हरि० ३।५।८)। **क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थम्** (आप० ध० १।१४।१)। वैरं पापं तस्य यातनं निर्हरणमित्युज्ज्वलायां हरदत्तः। **अयातयित्वा वैराणि** (भा० वन० ३५।७)। **यो न यातयति वैरमल्पसत्त्वोद्यमः पुमान्** (भा० वन० ३५।८)। किरतिर्विक्षेपे पठितः। विपूर्वोऽवपूर्वो वा विक्षिप्तेनार्थेनाच्छादने परिवेष्टने वा वर्तते। **रजोभिर्विकिरति अवकिरति** वा वाटिकां वातः। केवलोऽपि तत्रार्थे दृष्टः—**किरद्भिरिव तत्रस्थान् नागान् पुष्पाम्बुवृष्टिभिः** (भा० आदि० २७। ७)। **दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा** इति शाकुन्तले। **जटानां कीर्णया केशैः संहत्या परितः सितैः**रिति किराते (११।३)। वह प्रापणे इति धातुर्विपूर्व उत्पूर्वो वा परिणयने उपयमने वर्तते, केवलोऽपि—**वधूर्यिं पतिमिच्छन्त्येति य ईं वहाते** (ऋ० ११।५।३७)। स्मृतिषु च बहुलम्—**वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्**। पद्लृ विशरणादिष्विति धातुर्निपूर्व उपवेशने आसने वर्तते—**उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी** (विक्रम० २।७३)। **निषेदुषीमासनबन्धधीर** इति च (रघु० २।६)। केवलोऽपि तमर्थमभिधत्ते—**अग्ने देवाँ इहावह सादया योनिषु त्रिषु** (ऋ० १।१२।३)। हन्तिरुत्पूर्व उत्क्षेपे प्रसिध्यति, केवलोऽपि तत्रार्थे दृष्टः—**तुरगखुरहतस्तथा हि रेणुः** (शा० १।२७)। परिपूर्वः आप्लृ व्याप्ताविति धातुः पर्याप्तौ पुष्कलायां वर्तते। केवलोऽपि—**यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः** (मनु० ७।७६)। भूरिदक्षिणैरित्यर्थः। **संस्थाप्य धर्मान्। मर्त्येषु यज्ञैरिष्ट्वाऽऽप्तदक्षिणैः** (हरि० २।१०२।३१)। प्लुङ्गताविति धातुर्विपूर्वो विप्लवे विनाशे वर्तते। **अकर्णधारा जलधौ विप्लवेतेह नौरिव** (हित० ३।२)। विप्लवेत=विरुद्धां दिशं गच्छेत् नश्येत्। **राज्यविप्लव** इत्यादिषु यथा। विशब्दमन्तरेणापि स एवार्थ उदितो भवति—**कथं स्वपिति घर्मान्ते बुध्यते चाम्बुदप्लवे** (हरि० १।४६।५)। अम्बुदप्लवो मेघनाशः। **वेदप्लावी यवाश्यब्दं त्यक्त्वा च शरणागतम्** (याज्ञ० ३।२८८)। वेदप्लावी वेदस्य श्रंशयिताऽनध्यायेऽध्येता। रुहिर्बीजजन्मनि पठितः। आङ्पूर्वो हि रुहिराक्रमणे वर्तते—आरोहति पर्वतम्। अन्तराप्याङम्—**उत्तरामुत्तरां शाखां समालम्भं रोहेत्** (श० ब्रा० ६।३।३।६)। **रोहति सप्त स्वर्गाँल्लोकान् य एवं वेद** (ऐ० ब्रा० ५।१०)। **यजमानाः स्वर्गं लोकं रोहन्ति** (श० ब्रा० १४।२।१। २)। **स्वर्गस्य हैष लोकस्य रोहो यन्निविद्** (ऐ० ब्रा० ३।१६)। सोपानमार्गो रोहः स्याद् रुहेर्घञ् करणे कृतः (इति षड्गुरु०)। अवगुण्ठित इति प्रायिकः प्रयोगः। गुण्ठित इत्यवविधुरोपि तेन समानार्थको दृष्टः—**भस्मना गुण्ठितः पादो येन मे मूर्ध्नि पातितः** (हरि० २।१२१।३२)। **मुखं ते दृश्यते वत्स**

गुण्ठितं रणरेणुना (भा० द्रोण० ७८।३)। हरतिः प्रापणे पठित **उपपूर्वः** समर्पणे करादिदाने दृष्टः। बलीनुपहरन्ति प्रजाः प्रजेशाय। नानाप्युपशब्दं तत्रार्थेऽवतरन्दृष्टः—**अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्** (बलीनां प्रदात्रीः) (ऋ०१०।१७३।६)। **हरन्त्यस्मै विशो बलिम्** (तै० ब्रा० २।७।१८।३)। उत्पूर्वं उन्नयने उत्थापन उद्ग्रहणे वा वर्तते—**उद्धृत्य दक्षिणं बाहुम्**। विनाप्युदं तमर्थं निर्बाधमाचष्टे। **तस्मादयं पशुरक्षणाय पदो हरति** (श० ब्रा० ३।८।३।२७)। प्रपूर्वः करोतिः क्रियारम्भे वर्तते—वाचि शिक्षमाणस्य प्रथम-वैयाकरणस्य माचिव्यं किमपि चिकीर्षामीति वाक्यमुक्तावल्यां प्रकृतोऽस्मि (मत्कृतौ वाक्य-मुक्तावल्याम्)। प्रशब्दात्पृथगपि केवलः करोतिस्तत्रार्थे दृष्टः—**प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरीम्** (रा०२।६।१०)। प्रपूर्वस्य सम्पूर्वस्य वा चरतेर्योर्थस्तं केवलोपि चरतिराचष्टे—**प्रतिबोधोपि ते देवि महाँल्लोके चरिष्यति** (रा० २।३५।३०)। पत्लृ गताविति धातुरुत्पूर्व उड्डयने प्रसिद्धः विनाप्युदं तमर्थमाह—**अग्निः पक्षी भवति। नह्यपक्षः पतितुमर्हति** (तै०सं०५।२।५।१)। **अपि शक्या गतिर्ज्ञातुं पततां खे पतत्त्रिणाम्** इति कौटलीवैऽर्थशास्त्रे (२।६। २७)। पतन्निति पक्षिपर्यायः—पतत्त्रिपत्रिपतगपतत्पत्ररथाण्डजा इत्यमरः। **यातानि परराष्ट्राणि नृपा भुक्ताश्च दासवत्** (भा० शल्य० ६४।२२)। यातान्यभियातानीत्यर्थः। **यातव्याय प्रहिणुयाद् दूतम्** इति कामन्दके (१२।१)। यातव्यशब्दोऽभियातव्यशब्देन समानाभिधेयः। प्रपूर्व इष् गतौ दिवादिर्ण्यन्तो विसर्जने प्रस्थापने वर्तते, **प्रेषयति दूतं नृपः**। केवलोपि तत्रैवार्थे प्रयोग-मवतरति—**देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम** (ऋ० १०।१६५।१)। गत्यर्थकः पद्लृतिर्विपूर्वोऽवपूर्वो वा मरणे दृष्टः, केवलोपि —**मरन्नग्नि पुरीष्यं मा पाद्यायुषः पुरा** (वा० सं० ११।४६)। **सो अग्नेरन्ते वृषलः पपाद** (ऋ० १०।३४।११)। **महान्वत नो वीरोऽपादि** इति च **शतपथे** (१४।१।१।१०)। अवपूर्वः पतने वर्तते—**ये गर्भा अवपद्यन्ते** (अथर्व०५।१७।७)। **अत्रा कर्तमवपदात्यप्रभूः** (ऋ०९।७३।९)। केवलोपि—**यदा वै पशोर्दन्ताः पद्यन्ते (पेदिरे अपत्सत)** इति (ऐ०ब्रा०७।१४)। उत्पूर्वो नयतिरुन्नयने उद्धरणे वर्तते, केवलोपि—**यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम्। नयेत्तथानुमानेन** इति भृगुप्रोक्तायां मनुसंहितायाम् (८।४४)॥ नारदीयमनुसंहितायामपि स्मर्यते— **यथा मृगस्य विद्धस्य मृगव्याधः पदं नयेत्। कक्षे शोणितलेशेन तथा धर्मपदं नयेत्** (१।३२)॥ पदानि नयत्युन्नयतीति **पदनीः**। **नवनीतं** नवोद्धृतम् इत्यमरः। नमिः प्रह्वत्वे शब्दे च पठितः परिपूर्वः परिवृत्तौ वर्तते केवलोपि—**ऋकाररकार-षकारा नकारं समानपदेऽवगृह्य नमन्ति** (=नमयन्ति) इत्यृक्प्रातिशाख्ये (५।२०)। नमयन्ति दन्त्यं मूर्धन्यं कुर्वन्तीति नामिन इत्यृक्प्रातिशाख्ये उवटः

(१।१७)। उत्पूर्व ईरयतिरुच्चारणे वर्तते, **उदीरितोऽर्थः पशुनापि गृह्यत** इत्यत्र यथा। विनाप्युदं तदर्थको दृष्टः—**निबोध चेमां गिरमीरितां मया** (सावि० ५।२३)। **इतीरयन्तीव तया निरैक्षि** (नैषध० १४।२१)। ईर्यमाणेन सततं सर्वतः (भा० वन० २३।२)। धृतराष्ट्रस्य पुत्रेण श्रुत्वा वचनमीरितम् ब्रह्मघोषेण (भा० आदि० १४२।५)। **ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥** ईरणा व्यपदेशः। प्रपूर्वकः स्थापयतिर्विसर्जने प्रेरणे वर्तते **प्रस्थापयति दूतं नृपः**। केवलोपि—**अभिरामम्हं रामं स्थापयिष्यामि दण्डकान्** (रा० २।१३।१०)। प्रतिपूर्वो हन्तिः प्रतिरोधे वर्तते—**प्रतिहन्यतेऽस्य दुर्मेधसो गतिर्व्याकरणे**। केवलोपि—**यदचिन्त्यं तु तद् दैवं भूतेष्वपि न हन्यते** (रा० २।२०।२०)। अभिपूर्वो हन्तिस्ताडने वर्तते। **ततः शङ्खाश्च भेर्यश्च सहसैवाभ्यहन्यन्त** (गीता० १।१३)। अन्तरेणाप्यभि तत्रार्थे प्रवर्तते—**त्रिः सामा हन्यतामेषा दुन्दुभिः शत्रुभीषणा** (भा० वन० २०।१०)। दशने वर्तमानो दशतिः सम्पूर्वः प्रायेण बन्धने वर्तते, **सन्दंशः, सन्दष्टजिह्व** इत्यत्र यथा। विनाप्युपसर्गं समं तत्रार्थे दृष्टः—**दंशितो व्यूढकङ्कट** इत्यमरः। दंशितो बद्धकवच इत्यर्थः। भिदिर् विदारणे पठितः सम्पूर्वः संयोजने वर्तते—**गङ्गायमुनयोः सम्भेदः**। केवलोपि तत्रार्थे दृश्यते—**अङ्गुष्ठनखांशुभिन्नया... अच्छस्फटिकाक्षमालयेति** माघे (१।६)। **भिन्नेषु रत्नकिरणैः किरणेष्विवेन्दोः** (४।४६)। इति च सः। **पुष्पोच्चयः पल्लवभङ्गभिन्न** इति च कुमारे (३।६१)। प्रपूर्वो युजिर्व्यवहारे रूढः, **प्रयुङ्क्ते शब्दान्**। केवलोपि—**प्रशस्ते कर्मणि यथा सच्छब्दः पार्थ युज्यते** (=व्यवह्रियते) इति गीतासु (१७।२६)। **तस्मादनुष्टुब्गया मुख्या युज्यते सर्वेषां सदनानाम्** (ऐ०ब्रा० ३।१३) प्रयुज्यत इत्यर्थः। दो अवखण्डने इति सम्पूर्वो बन्धने दृष्टः, **सन्दितचरण** इत्यत्र यथा। अन्तरेणापीममुपसर्गं बन्धनमर्थमाह निरवग्रहम्—**दामेति** दोहनकाले पशुबन्धनरज्ज्वां वर्तते। दीयते बध्यतेऽनेनेति व्युत्पत्तेः। **धाताब्जयोनिर्द्रुहिण** इत्यमरे धातेति विधातारमाह। वेरर्थो धातुनैवोक्तः, उपसर्गाणां द्योतकत्वाद् इत्यमरोद्घाटने स्वामी। प्रतिपूर्वः शृणोतिः प्रतिज्ञाने वर्तते। विप्राय गां प्रतिश्रृणोति। केवलोपि तत्रार्थे दृष्टः—**तदवश्यं त्वया कार्यं तदनेन श्रुतं मम** (रा० २।१८।२१)। ओविजी भयचलनयोरिति तुदादिषु पठितः। प्रायेणायमुपपूर्वकः। **सम्मानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव** (मनु० २।१६२)। परं विनाप्युदं प्रयुज्यते—**आयुधेभ्यो ह स्मास्य विजमानः पराङ्वैति** (ऐ०ब्रा० ७।१६)। **काश्चित्सवत्सा गावः पतिताः शीकरवेजिताः** (हरि० २।१८।२३)। शिल्पकार्यं **उभयेन वेजिताः** (रघु० १६।३५)। **अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः** (ऋ० १।७६।१२)। सेधति=अपसेधति, उत्सारयति। दूरं गमयति। **अनन्तरत्नान्यादाय स जहार महाक्रतुम्** (भा० आदि०

१२१।१६)। **जहार**=आजहार। आङ् द्योतकस्त्यक्तः। वाचकश्चेत् स्यान्न त्यज्येत। उपपूर्वो हरतिः प्राभृतीकरणे वर्तते। विनाप्युपशब्दं तमर्थमाह—**आजग्मुः खाण्डवप्रस्थमादाय हरणं बहु** (भा० आदि० २२१।३३)। **बहु हरणमुपहारजातम्, औपहारिकम्**। दिश अतिसर्जन इति धातुः। अयमुच्चारणक्रियोपि भाष्यकारवचनात्। उच्चारणक्रियां तूपादय उपसर्गा द्योतयन्ति। तेन **मनोवाक्कर्मभिः शुद्धा पतिदेशानुवर्तिनी** (शुक्र० ४।१२) इत्यत्रादेशार्थे देशशब्द उपपन्नो भवत्याङा द्योतकेन विसंयुक्तोपि। सृज विसर्ग इत्यनेकार्थोऽयं धातुः प्रयोगेषु तथा दर्शनात्। त्यागार्थस्य द्योतनाय प्रायेण विपूर्व उत्पूर्वो वाऽयं प्रयुज्यते। विनापि व्युदौ। तथा च भारते प्रयोगः—**सर्गं मूत्रपुरीषयोः** (भा०अनु० १६२।३५)। **कालपर्यय** इति कालात्ययः कालपरिवासो भवति। **कालविपर्ययश्च** कालवैपरीत्यं समयप्रातिकूल्यम्। विशब्दोऽधिको वैपरीत्यं द्योतयति। विना विनापि तदर्थगतेः। **पश्य कालस्य पर्ययम्** (भा० आश्रम० ११।१२) इत्यत्र यथा। **धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम्** (भा० आदि० १४१।६)। **अपि बोद्बन्धनादीनि परीतानि व्यवस्यति** (भा०आश्व०१७।१३)। इत्यत्र च विर्वैपरीत्यस्य द्योतकः। केवलस्य सारयतेः प्रसारणमप्यर्थः, प्रशब्दः प्रयुज्यमानस्तदर्थस्य द्योतकः। अत एव **यदा सारणिकान्राजा पुत्रवत् परिरक्षति** (भा०शां०६१।३६)। इत्यत्र सारणिकानित्युपपद्यते प्रयोगः। प्रसारिणीप्रधानान् वणिज इति तदर्थ इति नीलकण्ठः। षह मर्षण इति धातुरनेकार्थः शक्त्यु्त्साहाभिभवेषु वर्तते। प्रशब्दसाहाय्येनाभिभवमाह। अन्तरेणापि प्रशब्दं तमर्थमाह। उपसर्गाणां द्योतकत्वात्। तथा च शौनकसंहितायामाम्नायते—**सहस्व नो अभिमातिं सहस्व पृतनायतः** (अथर्व० १९।३२।६)। सहस्व प्रसहस्व। द्रु गताविति धातुर्गतिसामान्ये पठितस्तास्ताः क्रियाः स्यन्दनादिका ब्रवीत्युपसर्गसहकारेण, केवलोपि। प्रद्रवतिः पलायने प्रसिध्यति, केवलोऽपि। प्रशब्दो द्योतकः। **द्रवतां ननु पृष्ठमीक्षते द्रवतां सोपि न जातु विद्विषाम्** (शिशु० १६।६०)। द्रवतां प्रद्रवताम्। षु प्रसवैश्वर्ययोरिति प्रपूर्वः प्रसवेऽभ्यनुज्ञाने वर्तते, केवलोपि। प्रशब्दो द्योतकः। तद्यथा—**सवं देवस्य सवितुर्जुषाणा** (ऋ० ७।३८।४)। **सवितोऽसि सत्यसवः** (तै० सं० १।८।१६)। सत्याभ्यनुज्ञ इत्यर्थ इति भट्टभास्करः। अय गताविति निःपूर्वो निष्क्रमणे वर्तते केवलोपि। **आस्याद् यदयते** (छां० उ० १।२।१२)। अयते निरयते निष्क्रामति। **नानुरूपमहं मन्ये त्वयि जीवति कौरव। द्रोणे चास्त्रविदां श्रेष्ठे सपुत्रे समुहुज्जने। कृपे चैव महेष्वासे द्रवते यद् विरूथिनी** (भा०भीष्म०५८।२४-२५)। **अलं द्रुतेन वः शूराः** (भा० द्रोण० १६।१८)। उभयत्र विशब्दः प्रशब्दो वा द्योतकस्त्यक्तः। द्रुतेन विद्रुतेन प्रद्रुतेन पलायनेनेत्यर्थः। धारणपोषणयोः पठितो धाञ् विपूर्वः क्रियायां

वर्तते, सत्यधिके प्रतिशब्दे च प्रतिक्रियायाम् । परमसत्यपि तस्मिंस्तमर्थमाह— **ततस्तेषां विधातव्यं सर्वमेवाप्रमादतः** (भा० शां० ८६।२२) । सर्वं (चिकीर्षितं) प्रतिविधातव्यमित्यर्थः । गम्लृ गताविति गतिसामान्ये पठितो गमिरनुसाहचर्येणानुसरणमाह, विनाप्यनुं तमर्थमाचष्टे । अनुद्योतकः । **म्रियते यदि कुष्ठेन पुनर्जातेपि गच्छति** (सुश्रुते निदान० ५।२४) । तिष्ठतिरनुना सहकृत आचरणे वर्तते, अननुरपि । **सर्वभूतहितं तिष्ठ धर्मं चैव प्रतिस्मरन्** । (भा० शां० १५१।१६) । अनुद्योतकः । **न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः** (भा० शां० १५।३६) । इत्यत्रापि तथा । क्रमिः प्रारम्भादिष्वर्थेषु वर्तमान उपादीनपेक्षते न चापेक्षते । तस्मात्त उपादयो द्योतकाः । **आ गर्भोच्छेदनात्क्रान्तस्तवा मां मन्युराविशत्** (भा० आदि० १८०।६) । क्रान्त उपक्रान्तः । अतिपूर्वो गमिर्लङ्घने प्रसिद्धः, केवलोपि । **कमुपादाय शवयेयं गन्तुं कष्टापवुत्तमा** (भा० आदि० २३०।११) । गन्तुमतिगन्तुमित्यर्थः । तेनातिर्द्योतकः । प्रणिपातेऽर्थे उपसङ्ग्रहणशब्दः प्रसिध्यति, केवलोपि ग्रहणशब्दः । उपसमौ द्योतकौ । **तयोर्ज्जगृहतुः पादौ राजा राज्ञी च मागधी** (रघु० १।५७) । चरतिर्गतिभक्षणयोः पठितो विपूर्वो विहरणे भ्रमणे वा वर्तते, विनापि वि तत्रार्थे दृष्टः— **शर्यातो ह वा इदं ग्रामेण चचार** (श० ब्रा० ४।१।५।२) । **चचार लोकान् विप्रर्षिः प्रेक्षमाणो मनोजवः** (भा० शां० २६१।४) । **कान्तैर्वनान्तपवनैः परिस्पृश्यमानः शक्नश्चरेद् भवनकाननदीर्घिकासु** (सुश्रुते उत्तर० ४७।३७) । तस्माद्द्योतकः । विशरणगत्यवसादनेषु पठितः सदिरुच्छब्दसहकारेण विशरणमाह, केवलोपि । **अत्यर्थं पुनरुत्सर्गः सादयेद् दैवतानपि** (भा० उ० ३६।५३) । सादयेद् उत्सादयेत् । उत्सर्गो विषयेष्वनिरुद्धं प्रवर्तनमिति नीलकण्ठः । **ब्राह्मणानां परिक्लेशो दैवतान्यपि सादयेत्** (भा० वन० २।४) । अत्रापि तथा । ऊह वितर्क इति समुपसर्गेण सहायेन समूहमाचष्टे, केवलोपि । **अक्षाद्वूहिन्याम्** इति वार्तिकम् । **अक्षाणामूहिनी** अक्षौहिणी । ऊहः समूहः । मन ज्ञाने इत्यनुपूर्वो ऽभ्युपगमे वर्ततेऽननुपूर्वोपि । **ते वयं साधु पञ्चालान् गच्छाम यदि मन्यसे** (भा० आदि० १६८।६) । **तदुपाकर्तुमिच्छामि मन्यसे यदि पार्थिव** (भा० वन० ७७।१७) । अनुद्योतकः । सम्पूर्वः ससुट्कः करोतिर्भूषणे प्रसिद्धः, केवलोपि तत्रार्थे दृष्टः । करोतिः सर्वधात्वर्थानुवादीति मतम् । तेन समो भूषणार्थस्य द्योतकता प्रसिध्यतितराम् । इदमत्रोदाहरणम्—**केशाञ्जानाम्यहं कर्तुम्** (भा० वि० ६।१८) । कतुँ भूषयितुं प्रसाधयितुम् । परिपूर्णतार्थे आपिः परिशब्दमपेक्षते द्योतकं न चापेक्षते । उभयथा प्रयोगा लक्ष्यन्ते । **न्यूनस्याप्त्या अतिरिक्तस्यानतिरिक्त्यै व्यृद्धस्य समृद्धयै** (श० ब्रा० ६।५।२।१) । जानातिर्ज्ञानसामान्ये वर्तते । अभिपूर्वः प्रत्यभिपूर्वश्चायं स्मरणे स्मरणपूर्वकेऽवबोधने वा वर्तते

—**अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः** (पा० ३।२।११२ सूत्रवृत्तौ) **नूपुरे त्वभिजानामि** (रा० ४।६।२३) । **सप्रत्यभिज्ञमिव मामवलोक्य** (मालती० १।२७) । केवलोपि तत्रार्थे दृष्टः—**तां हायं ज्ञात्वाभिपरोवाद** (श० ब्रा० ११।५।१।६) । उपसर्गा द्योतका इति । अनुपूर्वश्चैषोऽनुमतौ वर्तते—**अनुजानीहि मां गमनाय** । अन्तरेणाप्यनुं तमर्थमाचष्टे—**तद्वा जज्ञौ तद्वा न जज्ञौ** (श० ब्रा० १।८।१।८) । अनुजज्ञावित्यर्थः । **ततो देवा न जज्ञुः** । **त ऋतवो देवेष्वजानत्स्वसुरानुपावर्तन्त** (श० ब्रा०१।६।१।२) । अत्र जानातेरनुजानातेश्च समानेऽर्थे प्रयोग उक्तमर्थमुपोद्बलयति । प्रपूर्वो वृतिः प्रवाहे वर्तते । प्रेण विनापि तत्र दृष्टः । तेन प्रशब्दो द्योतको न वाचकः । **अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः** (अथर्व०५।१९।१३)। वावृतुः प्रववृतिरे प्रवहन्ति स्म । **तमसा सोमविक्रयिणमर्पयति** (तै० सं० ६।१।१०।४) । **यं द्विष्यात्तं ध्यायेत् शुचैवैनमर्पयति** (तै० सं० ६।२।७) । उभयत्र संयुनक्तीत्यर्थः । **स्थिरं हि नूनं हृदयं ममायसं न भिद्यते यद्बुभुवि नो विदीर्यते** । **अनेन दुःखेन च देहमर्पितं ध्रुवं ह्यकाले मरणं न विद्यते** (रा०२।२०।५१)॥ अर्पितं समर्पितं संगतम् । सम्पूर्वः क्रामतिः प्रदेशान्तरसञ्चरणे वर्तते । **पुत्रसङ्क्रान्तलक्ष्मीकैः** (उत्तर० १।२२) । विनापि समं तत्रार्थे दृष्टः—**दायादान्न च रिक्थवत्क्वचन भोः शौर्यक्रिया क्रामति** (वा० रा० ८।२८) । व्यक्तं सम् द्योतकः । सदिर्नानार्थ इत्युक्तचरम् । अवसादनेऽर्थेऽवमपेक्षते न चापेक्षते । तथा च वाजसनेयिनः पठन्ति—**जहामि सेदिमनिराममीवाम्** (वा० सं० १२।१०५) । असंशयमवो द्योतकः । गतिसामान्ये पठितः सरतिरपपूर्वोऽपसर्पणे विदूरगमने पलायने वा वर्तते, वर्जयित्वाप्यपं तत्रार्थे दृष्टः—**न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च । यत्र यातान्न नो हन्युः पाण्डवाः किं सृतेन वः** (भा०) ॥ शंसु स्तुतौ इति धातुरनुपसृष्टः प्रायेण कथने कीर्तने वर्तते । स्तुत्यर्थस्य द्योतनाय प्रशब्दमपेक्षते । **प्रशंसा प्रशस्तिरित्यादिषु** तदर्थस्य प्रसिद्धेः । परं प्रवर्जमपि स्तुत्यर्थे प्रवृत्तिर्बहुला—**दरिद्रं पातकं लोके न तच्छंसितुमर्हति** (भा० शां ८।१४) । क्रुश आह्वाने रोदने चेति धातुः । आङ्पूर्व उपपूर्वो वाऽयमपवादेऽभिशापेऽपभाषणे वा वर्तते । **आक्रुष्टः कुशलं वदेत्** (मनु० ६।४८) । **प्राणैः किमुपक्रोशमलीमसैर्वा** (रघु० २।५३) । केवलोपि तमर्थमाह—**दीर्घसूत्रोऽनृजुः क्रुष्टः** (भा० शां० १६८।७) । व्यक्तमुपाङौ द्योतकौ । दिश अतिसर्जने आङ्पूर्व आज्ञापने वर्तते । विनाप्याङं तत्रार्थे प्रयोगमवतरति । **दिदेश । तान्यनीकानि प्रयाणाय महीपतिः** (भा० उ० १९६।६) । आङ् तत्र तात्पर्यग्राहकः । अञ्जूरिति व्यक्तिप्रक्षणकान्तिगतिषु पठितः । व्यक्त्यर्थव्यक्तये विशब्दमपेक्षते द्योतकं न चापेक्षते—**पुरुदस्मो विषुरूप इन्दुर्महिमानमानञ्ज धीरः** (वा० सं० ८।३०) । आनञ्ज व्यानञ्ज । सदिर्गत्याद्यर्थकः

प्रसिद्धः । गत्यर्थावगमनाय निशब्दमपेक्षते न चापेक्षते । **यद् गुरु तन्निषीदति** । अधोगच्छतीत्यर्थः । निशब्दपरिहारेणापि स एवार्थः—**दुर्योधने चापि विवर्धमाने कथं न सीदत्यवनिः सशैला** (भा०) । **पङ्के गौरिव सीदतीति** हितोपदेशे च । षिध गत्याम् इति भूवादिषु पठ्यतेऽपूर्वोऽपाकरणे वर्तते, केवलोपि—**अपसेधन्रक्षसो यातुधानान्** (ऋ० १।३५।१०) । **ते सेधन्ति पथो वृकम्** (ऋ० १।१०५।११) । सेधन्ति=अपसेधन्ति । निकृष्टसंनिकृष्टशब्दयोः समानार्थत्वे बाढं सम्शब्दः सामीप्यस्य द्योतकः । भवति च निकृष्टशब्दस्य संनिकृष्टशब्दस्यार्थे प्रयोगः—**निकृष्टयुद्धं संसक्तं महदासीत्सुदारुणम्** (भा० द्रोण० १८७।१५) । निकृष्टयोः संनिकृष्टयोर्युद्धं निकृष्टयुद्धम् । वैमत्ये विप्रलापे वाऽर्थे विपूर्वस्य वदेः प्रसिध्यति प्रयोगः । अन्तरेणापि विशब्दम्—**अथातो मनसश्चैव वाचश्च ब्रह्मभद्र उदितम्** । **मनश्च ह वै वाक् चाहम्भद्र ऊहाते** (श० ब्रा० १।४।५।८) । व्यक्तं विशब्दो द्योतकः । आङ्पूर्व इण् आगमनेर्थे वर्तते । आङं विनापि—**यथा ह वा इतं पितरं प्रोषिवांसं पुत्राः प्रत्यागच्छन्ति** (आप० श्रौ० ६।७।२५।४) । इतम्=आगतम् । आङ् द्योतक इति परित्यक्तः । अवपूर्वस्तरतिरवगाहने वर्तते । **नदीमवतीर्णः=नदीमवगाढः** । अवेनानुपसृष्टोपि । **उपस्पृश्य नदीं तरेत्** (भा०शां० १९३।४) । अवतरेदित्यर्थः । प्लुङ् गतावित्याङ्पूर्वः सर्वतो गतौ व्याप्तौ प्रपूरणे वा वर्तते **रुधिराप्लुत** इत्यादौ यथा । आङ्वर्जितो पि तमर्थमाह—**ततो जाम्बुनदीः पात्रीः प्रादान्मधुघृतप्लुताः** (भा०शां० १७१।१७) । आङ् द्योतक इति त्यक्तः । **नानाशनः स्यान्न महाशनः स्यादलोलुपः साधुभिरागतः स्यात्** (भा० शां० २६९।२६) । आगतः समागतः सङ्गतः । सम्शब्दः साहचर्यस्य द्योतक इति परिहृतः । वहतिः प्रापणे प्रसिध्यति । निर्वहतिश्चान्तगमने समापने । निःशब्दमन्तरेणापि वहतिस्तत्रार्थे दृष्टः—**तत्र सर्वात्मना युक्तो दक्षैः कार्यं परन्तप** (भा० कर्ण० ३५।४२) । निर्वक्ष्य इत्यर्थः । गतिज्ञानप्राप्त्यो गमेरर्थाः । ज्ञानार्थावगमनाय गमिरवमुपसर्गमपेक्षते द्योतकम् । **तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्** (गीता १०।४१) । अवमन्तरेणापि ज्ञानार्थं गमयति— **नावां दोषेण गन्तव्यौ** (भा० अनु० १।६५) । दोषेण युक्तौ नावगन्तव्यावित्यर्थः । **यथा त्वां पुरुषव्याघ्र लोको दोषेण गच्छति** (भा० आदि० २०३।१५) । **मा वासवं मा च गुरुमात्मानं मा वपुष्टमाम् । गच्छ दोषेण कालो हि सर्वथा दुरतिक्रमः** (हरि० ३।५।३५) ॥ उक्तोऽर्थः । श्यैङ् गताविति धातुरवपूर्वस्तुषारपतने वर्ततेऽवश्यायत इति । **अवं वर्जयित्वापि** तत्रार्थे प्रवृत्तो दृश्यते—**स यदैतयोर्बलिष्ठं श्यायति** (श० ब्रा० ४।३।१।१९) । एतयोर्मासयोर्भूयानवश्यायः पततीत्यर्थः ।

अलं पल्लवितेन । एतावता प्रसिद्धि गतानेकार्थता धातूनां तदनुषक्ता च

द्योतकतोपसर्गाणाम् । अनेकार्थेषु धातुष्वेकस्य कस्यचिदर्थस्य तात्पर्यग्राहकत्वमेव द्योतकत्वमिति तद्विदः । तेन तत्रैवोपसर्गाणां द्योतकत्वमुपेयतां कामम् । न वयं विरुन्ध्मः । न च सर्वे धातवोऽनेकार्था इत्यकामेनापि वाचकतोपसर्गाणामभ्युपेया । न वयं प्रयोगेष्वनेकार्थतामुपलभामहे । ब्रूञ् व्यक्तायां वाचि, मन्त्रि गुप्तपरिभाषणे, मृङ् प्राणपरित्यागे, मन ज्ञाने, मनु अवबोधने, चुर स्तेये, डुक्रीञ् द्रव्यविनिमये, मुष स्तेये, बन्ध बन्धने, हिसि हिंसायाम्, मन्थ विलोडने, अश भोजने, पा पाने, पुष पुष्टौ, ज्ञा अवबोधने, तुद व्यथने इत्यादयः शतशो धातवः केवला उपसर्गैरसम्पृक्ता न जात्वनेकार्थका दृष्टाः । यच्च भगवन्तो भाष्यकारा आहुः—**तिष्ठतिरेव व्रजिक्रियामाह तिष्ठतिरेव च व्रजिक्रियाया निवृत्तिम्** इति । तत्रोच्यते इदं नाम सर्वे सर्वार्थवाचका इतिवत्प्रत्यग्दृशां भगवतां तेषां प्रत्यक्षं स्यान्नास्मादृशामर्वाग्दृशाम् । वयं तु प्रयोगेषु क्वचनापि केवलं तिष्ठति गत्यर्थमाचक्षाणं नेक्षामहे ।

यद्युच्येत अब्राह्मण एष यस्तिष्ठन् सूत्रयतीत्यत्र तिष्ठतिर्गतिमाचष्ट इति तदसत् । ऊर्ध्वस्थितिरेव विवक्ष्यते न स्थानान्तरसंक्रमः, तद्रूपा च गतिर्गतिनिवृत्ताविति धात्वर्थेभिसंहिता । अन्यथा तिष्ठन्ति पर्वता इत्यत्रापि गतिः प्रतीयेत ।

यच्च काशिकायां वेः पादविहरणे इति सूत्रे धात्वर्थनिर्देशाद् धातूनामनेकार्थकत्वमुन्नीतं तदपि दुरुन्नयम् । न हि पादविहरणं पादविक्षेपमात्रं भवति, किन्तु अश्वादीनां गतिविशेषो विक्रमणम् । तस्यार्थस्य विपूर्वे क्रमौ दर्शनात् केवले चादर्शनादन्वयव्यतिरेकाभ्यां यदत्र गतौ वैशिष्ट्यं तदुपसर्गस्यैव वाच्यं न धात्वर्थः ।

वाचका अप्युपसर्गा भवन्ति ।

एवमनेकार्थतायां धातूनां विघटितायां सोपसर्गकाणां चानेकार्थतायामुपलभ्यमानायामुपसर्गाणां वाचकताऽर्थादापद्यते । सेयं वाचकता नास्माभिरुपज्ञायते । पूर्वेऽप्येमां शब्दतोऽर्थतश्च प्रतिपेदिरे । आह भगवान् यास्काचार्यः—**उच्चावचाः पदार्था भवन्तीति गार्ग्यः । तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम्** इति । **उपसर्गो विशेषकृदिति** ऋक्प्रातिशाख्यकारः शौनको भगवान्भाष्यकारश्च । अधिरुपरि वर्तते इति च भूवादयो धातव इति सूत्रे भाष्यमपि कण्ठरवेणोपसर्गाणामर्थवत्तामूरी कुरुते ।

धातूपसर्गयोर्नैकविधः सम्बन्धः । क्वचिद् विशेषणविशेष्यभावः क्वचिच्च बाध्यबाधकभावः । केवलस्योपसर्गस्य वाक्ये स्वातन्त्र्येण प्रयोगो नेति न तावता तस्य वाचकता विहन्यते । यथा प्रत्ययस्य कर्मादिकारकसङ्ख्याकालादीनां वाच-

कत्वेपि पृथक् प्रयोगो नास्ति प्रत्ययो वाचकत्वेपि केवलो न प्रयुज्यत इति हर्युक्तेः, प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थाभिधायित्वनियमाच्च, तथैवोपसर्गा अनिर्बद्धास्तं तमर्थं मा स्म वोचन् धातुतः प्राक् प्रयुक्तास्ते ब्रुवीरन्नित्यभ्युपगमः कुतो न स्यात् । तेन प्रादीनां वाचकत्वे भूयान्प्रकर्षः कीदृशो निश्चय इतिवद् भूयान्प्रः कीदृशो निरित्यपि स्यादिति चोद्यमचोद्यम् ।

स न मन्येतोपसर्गाणां वाचकत्वे अनु भू इत्यादौ भवतेः क्रियावाचित्वाभावाद् धातुत्वं न स्यात्, अकर्मकत्वाच्च कर्मणि लकारो न स्यादिति । न वयं ब्रूम उपसर्गाः क्रियाया वाचका इति, किन्तर्हि विशेषस्य धातुवाच्यायां क्रियायामाधेयस्य वाचकाः, तेनैव च विशेषेण सकर्मकत्वापादका इति सुतरामुपपद्यते कर्मणि लकारोत्पत्तिः । भवतेश्च सत्तैकार्थत्वात्किन्नामोपसर्गेणानुना द्योत्येत । अनुः प्रायेण व्याप्तिमाह । व्याप्य विषयान् इन्द्रियाणां भवनमेवानुभव इत्यनुः सार्थकः ।

भू सत्तायाम् इति सत्तायां पठितो भवतिर्नार्थान्तरे क्वचिद् दृष्टः । अनुपूर्वश्चेदयं लक्षणयाऽनुभवार्थमाचक्षीत, अनुनोपसर्गेण तत्र किं क्रियते ? अनेकार्थतायां सत्यामेव तात्पर्यग्राहकतोपपत्तिरुपसर्गाणाम्, सैव च द्योतकतेति सम्प्रतिपन्नोऽर्थः ।

धात्वर्थं बाधते कश्चिदित्यभियुक्तोक्तिः । बाधो नाम धात्वन्तर्हितस्यार्थस्योद्भावनं द्योतनं वेति न शक्यमास्थातुम् । विरोधात् । यद्युपसर्गाणां स्वकः कश्चिदर्थो न स्यात्तदा केन सामर्थ्येन ते तं सर्वत्र प्रसिध्यन्तं धात्वर्थं बाधेरन् । पुराणकारोप्यर्थबाधमनुमनुते यदाह—

प्रकाशितायोधनसौष्ठवोऽथ मायासुरोऽन्यविपक्षलोकम् ।
विरुद्ध एकोऽधिरणं बबाधे प्रसह्य धात्वर्थमिवोपसर्गः ॥ (दुर्गा० ४८।६१)

मितेन सन्दर्भेणायमर्थबाधो निबध्यते—

श्रमु तपसि खेदे चेति पठितो धातुः । विपूर्वस्तु खेदाभावे कार्यविरामजनिते क्लमविनोदे वर्तते । **अव्यवहितायां भूमौ विश्राम्यति सुखं श्रमी** । तिष्ठतिर्गतिनिवृत्तौ पठितः, प्रपूर्वस्तु प्रयाणे गमनोपक्रमे दृश्यते—**प्रतिष्ठते चैत्रः स्वगृहानिति** । सम्पूर्वोऽयं परिसमाप्तौ मरणे च प्रयुज्यते । **सन्तिष्ठते यज्ञः । नियतमायुः प्राणिनामिति न कश्चिदकाले सन्तिष्ठते** । सोऽयमर्थबाधः । प्रयाणस्य परिसमाप्तेर्मरणस्य च स्थितिविरोधात् । ईक्षतिर्दर्शने पठितः, उपपूर्वस्त्वदर्शने दर्शनपरिहारे वा वर्तते—**तदल्पमपि नोपेक्ष्यं दुष्टं काव्ये कदाचनेति** काव्यादर्शे । भिदिर् विदारणे दो अवखण्डने, दंश दशने, दान खण्डने इत्येवं पठिता भिदिद्यतिदशतिदानयतयः समुपसृष्टाः संयोजने संगमने वर्तन्ते । अयमप्यर्थबाधः । **सम्भेदो गङ्गायमुनयोः । हर्षोद्वेगसम्भेदः । सम्भिन्नसर्वाङ्गः**

कूर्मः (संहृतसर्वावयव इत्यर्थः) । सम्भिन्नबुद्धिः सम्मिश्रितबुद्धिर्नास्तिक इति यावत् । सं. परमान्त्समवमानथो सं द्यामि मध्यमान् इत्यथर्वसंहितायाम् (६।१०३।२) । शृङ्खलासन्दितचरणः । सन्दंशः । सन्दष्टजिह्वः । सन्दष्टवस्त्रेष्वबलानितम्बेष्विति रघौ (१६।६५) । शृङ्खलासन्दानिताङ्घ्रिः । सन्दानिनी (गोष्ठमित्यर्थः) इति क्रमेणोदाहरणानि । रमिः क्रीडायां पठितः, व्युपसृष्टस्तु क्रियामात्रनिवृत्तौ प्रयुज्यते—**विरमति क्रीडाया** इति । उपपूर्वोऽयं निधनेपि वर्तते । निधनं सर्वचेष्टाऽभावपर्यायः । **उपरतो महात्मेति तमशोच्यमपि शोचन्त्यर्थार्थिनो लोकाः** । अस्यतिः क्षेपणे पठितः । निपूर्वस्तु निक्षेपे निधाने वर्तते । **प्रवत्स्यन्निक्षिपति धनं वणिजि** । स्मरतिश्चिन्तायां पठितः प्रपूर्वो विपूर्वश्च तद्विपर्यये दृष्टः । **प्रस्मरतिर्विस्मरणार्थ** इति काव्यालङ्कारसूत्रवृत्तौ वामनः । लषतिरिच्छायां पठितः । अपपूर्वस्त्वनिच्छायाम्—**प्रलापिनो भविष्यन्ति कदा न्वेतेऽपलाषिण** इति भट्टौ (७।१२) । तत्रापलाषिणोऽपलषणशीला व्यपगतकामा इति जयमङ्गला । एवं काक्षिरित्यपीच्छायां पठितः, विपूर्वस्तु तद्विपर्यये प्रसिध्यति—**न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम्** इति श्रीरामायणे (२।७३।१८) । **पृष्ठमारोह मे देवि मा विकाङ्क्षस्व शोभने** (५।३७।२६) इति च । अन्यत्रापि विशब्दो बाधमाह—**तद्यथा कथं न तद् विजानीयां किमु भाति विभाति** वेति कठोपनिषदि (५।१४) । अत्र विभाति न भातीत्यनेन समानार्थकम् । **निर्ज्ञातार्थस्य समाप्तिर्वा भवति विसमाप्तिर्वेति** (५।३।६७) सूत्रे भाष्ये । अत्र नञर्थो विशब्द इति कैयटः । **अस्ति तु ज्ञानमर्थविसहचरं स्वप्नादौ कल्पितम्** (४।१४ योगसूत्रभाष्ये) । अर्थेनासहचरितमित्यर्थः । **यदि विप्रत्ययो ह्येष तदिदं दर्शयामि ते** (भा० शां० १११।५५) । विप्रत्ययः प्रत्ययाभावोऽविश्वासः । **तयोर्विवाहः सख्यं च न तु पुष्टविपुष्टयोः** (भा० आदि० १३१।१७) । विपुष्टोऽपुष्टः ।

अयं चापरश्चित्रीयाकरोऽर्थबाधः—**अवपालितावकर्णिताऽवज्ञाताऽवगणितेष्ववोऽर्थविपर्यये** । तथा ह्यवपालितोऽपालितो भवत्यवकर्णितोऽनाकर्णित ईषदाकर्णितो वा । एवमवज्ञातावगणितावनादृतौ भवतः । इहापि स्पष्टमेवावशब्दोऽर्थविपर्यासकृत् । यो नाम न ज्ञायते न संस्तूयते न गण्यते कोऽसौ कतमोऽसाविति स आत्मानमवहेलितम्मन्यते ।

विशेषं वैशिष्ट्यं प्रकर्षमपकर्षं वापि धात्वर्थं आदधात्युपसर्गस्तेनाप्ययं वाचक इत्युपपद्यते वक्तुम् । ब्रूञ् व्यक्ताक्षरे भाषणे पठितः प्रोपसृष्टः प्रकर्षेण भाषणे व्याख्याने वर्तते—**सूत्रं प्रब्रवीति । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवत्यागमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति** च भाष्ये पस्पशायाम् । सरतिर्गतौ प्रयुज्यते प्रसरतिस्तु

व्यतिरिक्तायां गतौ प्रथने—**शीतसंशीनं (सुप्तं) न मे पाणिपादं प्रसरति। प्रसरति किंवदन्तीति।** त्रित्वरा संभ्रमे। अत्रापि प्रशब्दः प्रकर्षमाह। तद्यथा। **यद्वै क्षिप्रं तत्सूर्त्तम्। अथ यत्क्षिप्रात्क्षेपीयस्तत्प्रतूर्त्तम्** (श० ब्रा० ६।३।२।२) । एवं चरतिरपि गतिसामान्ये पठितः प्रपूर्वः साधीयसि गमने प्रथने वर्तते—**यावत्स्थास्यन्ति गिरयः सरितश्च महीतले। तावद् रामायणकथा लोकेषु प्रचरिष्यति** (रा० १।२।३६)॥ उत्पूर्वोनिक्रमणे वर्तते —**धर्ममुच्चरते।** ऊर्ध्वगमनेपि—**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्** (ऋ० ७।६६।१६) । व्यधिकश्चोदीरणे दृश्यते—**ओङ्कारमुच्चारयति।** समुत्तरश्च यौगपद्योपलक्षिते बहुकर्तृके तस्मिन् —**व्यक्तवाचां समुच्चारणे** (पा० १।३।४८) । वस निवास इति धातुः प्रपूर्वो विप्रकृष्टान्तरे निवासमाह—**प्रोषितभर्तृकेत्यत्र यथा।** साधयतिः सम्पादने वर्तते, प्रपूर्वस्तु साधीयः सम्पादनेऽलङ्करणे—**प्रसाधयति शिरोरुहान्। प्रसाधनी कङ्कतिका भवति।** रप लप व्यक्तायां वाचीति धातुपाठः। केवलो लपिर्व्यक्तायां वाच्येव वर्तते प्रयोगेषु यथा वचिः। आङाद्युपसृष्टस्यास्य ते ते लपनविशेषा वाच्याः। अनुक्रान्ताश्च तेऽमरेण—

स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः।
अनुलापो मुहुर्भाषा विलापः परिदेवनम्॥
विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः।
सुप्रलापः सुवचनमपलापस्तु निह्नवः॥

व्यक्तमत्रालापादिषु यो यो लपनविशेषः स स धातुवाच्येऽर्थे उपसर्गेणाहित इत्युपसर्गवाच्य इत्यवश्यमुरसिकरणीयम्। आह च भगवान्भाष्यकार **उपसर्गो विशेषकृदिति।** अयं च तथा रूढि गतोऽर्थो यथार्थशास्त्रकारः कौटल्योऽपीममनुवदति—**क्रियाविशेषकाः प्रादय उपसर्गाः** (२।१०)। **आश्रय आश्रयणमास्थानं वक्ति। व्याश्रय** इति नानापक्षसमाश्रयम्। **षष्ठ्या व्याश्रये** (३।४।४८) इति सूत्रे तथार्थापनात्। भगवतो भाष्यकारस्य प्रयोगश्च—**व्याश्रिताश्च भवन्ति केचित्कंसभक्ताः केचिद् वासुदेवभक्ताः।** अवशब्दः क्रियाया वैकल्यमपूर्णतामाह। **अवदाघ** इति पूर्वो ग्रैष्मो मासः, निदाघ इति चोत्तरः।

क्वचिदुपसर्गविशेषयोगे योऽर्थः सोऽभ्युच्चितेनोपसर्गान्तरेणान्यथात्व नीयते। तदप्युपसर्गाणां वाचकत्वे लिङ्गम्। तत्सङ्ग्रहेण ब्रूमः। **अवहरतिरित्युपसंहरणे वर्तते—प्रस्थमवहरति स्थाली प्रास्थिकी। संभवत्यवहरति पचति** (५।१।५२) इत्यनेन तद्धितविधिः। अभेरभ्युच्चयेऽभ्यवहरति **भुङ्क्त** इत्यनर्थान्तरं भवति। अहो अर्थवैचित्र्यम्। आङ्पूर्वो ददातिरादाने ग्रहणे प्रत्येषणे वा वर्तते। **सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।** अभ्यधिकोऽयं क्रियोपक्रममाचष्टे।

ओमभ्यावाने (पा० ८।२।८७) इति सूत्रे यथा । अवधत्ते नीचैर्निधत्त इति समानार्थके । विशब्दे व्यतिरिक्ते सति मध्यगेनार्थेन पृथक्करणे तिरस्करणे वा वर्तते । **न वयं कुड्यादिना व्यवहितं वस्तु पश्यामः** । सङ्ग्रहणं समुच्चयनं संक्षेपणं वा भवति । **उपसङ्ग्रहणमिति तु** वन्दनोद्देश्यके चरणपीडने वर्तते । स्मर्यते चोपसङ्ग्रहणविधिस्तत्र तत्र स्मृतिकारैः । **आलम्भः** स्पर्शो भवति । **समालम्भश्चन्दनादिस्पर्शविशेषो** विलेपनम् । **व्याहरणं** व्याहारो लपितं भवति । **अनुव्याहरणं** तु शापः । आङ्पूर्वः ख्या प्रकथनान्न किंचिद् व्यतिरिक्तमाह । अभ्यधिकेनाभिनोपसृष्टस्त्वभिशंसने दूषणे वर्तते । **अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः सम्मीशन** इत्यादि (तै० उ०१।११।४) । **अथाभ्याख्यानं मिथ्याभिशंसनम्** इत्यमरे मिथ्येति पदं सुत्यजम् ।

धातूपसर्गयोः संभूय धातुत्वम् इत्यपि ।

वस्तुत उपसर्गश्च धातुश्चेति द्वयमपि सम्भूय धातुरेव । धातुना क्रोडीकृत उपसर्गस्तदवयव एवेति परमार्थः । अत एवाऽनुभू इत्यस्य धातुत्वे तदेकदेशेन भू इत्यनेनानुभवनमर्थोऽपि क्वचित्प्रत्याय्यते—**इन्द्रोऽब्रवीद् भवतु भवानपां पतिर्यमः कुबेरश्च मयाऽभिषेकम्** (भा० उ० १६।३१) । भवतु=अनुभवतु । उक्तं च वाक्यपदीये—

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।
धातूपसर्गयोः शास्त्रे धातुरेव स तादृशः ॥ (२।१८०) इति ।

अड्द्विर्वचनव्यवस्थार्थं केवलं धातवः पृथगुपदिष्टाः, वस्तुतः पुनर्विशिष्टक्रियावचना एव त इति सोपसर्गाणामेव धातुत्वम् ।

तथा हि सङ्ग्रामयतेः सोपसर्गाद् विधिः स्मृतः ।
क्रियाविशेषाः सङ्घातेः प्रक्रम्यन्ते तथाविधाः ॥ (२।१८१)

असंग्रामयत, सिसङ्ग्रामयिषते सोपसर्गस्यैवाड्द्विर्वचनदर्शनात् सोपसर्गस्यैवास्य धातुत्वम् । अत एवोपक्रम एवाख्याते सङ्घातेर्धातूपसर्गसमुदायैर्विशिष्टैव क्रियाऽभिधीयते ।

कुत एतदित्यत्र हेतुमाह—

कार्याणामन्तरङ्गत्वमेवं धातूपसर्गयोः ।
साधनैर्याति सम्बन्धं तथाभूतैव सा क्रिया ॥ (२।१८२)

उपसर्गसम्बन्धाधीना स्वार्थव्यवस्था धातूनाम् । स्वार्थसम्बन्धे च निर्वृत्ते सम्बन्ध्यन्तरेण संनिधातव्यम् । यथा करोतेरुपसर्गेण योगे निष्पन्ने सुडादय आसज्यन्ते । आह च सूत्रकारः—**सम्परिभ्यां करोतौ भूषणे । उपाच्च प्रतियत्नवैकृतवाक्याध्याहारेषु** । धातूपसर्गसमुदायवाच्यैव सा विशिष्टा क्रिया साध्या

सती साधनैः कारकैः सम्बन्धं याति । धातूपसर्गयोः कार्यमन्तरङ्गम्, तस्मिन् सति बाह्यैः साधनैः कर्तृकर्मादिभिः सम्बध्यते धातुरिति च युक्तम् । उक्तं च भाष्ये **पूर्वं धातुरुपसर्गेण युज्यत** इति ।

अस्मिन्पक्षे अनुभूयत इत्यत्र कर्मणि लकारः सिध्यति । तथा **षत्वतुकोरसिद्ध** (पा०६।१।८६)। इत्यारम्भणीयं भवति । धातूपसर्गयोः कार्याणामन्तरङ्गत्वे हि अधीत्येत्यत्र दीर्घत्वे तदसिद्धत्वे च तुकः सम्भवो नेतरथेतीष्ट एष पक्षो भगवतः पाणिनेः । तथा **चाडभ्यासव्यवायेऽपीति** वार्तिकं नारम्भणीयं भवति । अडुत्पत्तेर्लकारोत्पत्त्युत्तरकालभावित्वेन ततः प्रागेव धातूपसर्गयोः सम्बन्धे षत्वसिद्धेः ।

ननु **पूर्वं धातुः साधनेन युज्यते तत उपसर्गेणेत्यपि** पक्षो भाष्ये स्थितः । हरिणा च—

प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशिष्यते ।
प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते ॥ (वा०प०२।१८३)

इति कारिकायां समर्थितः । इदमुक्तं भवति—लब्धात्मा क्रिया विशेष्यभावमुपगन्तुमर्हति । धातुषु सिद्धः स क्रियार्थ उपसर्गादिभिर्भेत्तव्यो विशेष्यो भवति । साधनसम्बन्धात् पूर्वं क्रियाऽनिर्वृत्ता निरात्मिका सती द्योतकेनोपसर्गेण सह विशेषण-विशेष्यसम्बन्धं नोत्सहते प्रतिपत्तुम् । एवं हि भाष्यकार आह—**साधनं क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टीति** ।

अस्मिन् पक्षे **अडभ्यासव्यवायेऽपीत्यारम्भणीयम्** । **षत्वतुकोरसिद्ध** इति च तुकि कर्त्तव्ये एकादेशासिद्धत्वं न वक्तव्यं भवति । प्रतिपूर्वादिणोऽचि प्रत्ययेऽन्तरङ्गत्वात्साधनाभिधायकार्धधातुवाश्रयो गुणः प्रवर्तत इति गुणेऽयादेशे च सवर्णदीर्घाप्राप्त्या यणः प्राप्त्या च प्रत्ययशब्दसिद्धिर्भवति । **गेर् अध्ययने वृत्तम्** (पा०७।२।२६) अध्ययनतोऽविप्रकृष्टाख्यायाम् (पा०२।४।५) इत्यादिषु अध्ययनशब्दं प्रयुञ्जानस्य भगवतः सूत्रकारस्याप्यभीष्ट एष पक्ष इति न दुरुन्नयम् । अत्रापि पूर्ववत् पूर्वं साधनयोगे गुणादिप्रक्रिययाऽध्ययनशब्दनिष्पत्तिः सम्भविनी नान्यथेति प्रव्यक्तम् ।

एवं स्थिते पूर्वं धातुरुपसर्गेण युज्यत इत्यस्य का गतिरित्यत्रोच्यते—

धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा ।
धातुत्वं कर्मभावश्च तथान्यदपि दृश्यताम् ॥ (वा०प० २।१८४)

क्रियावचनो धातुरित्युक्तम् । प्राक् क्रियानिर्वृत्तेरसम्भवाद् यथा **धातोः कर्मणः समानकर्तृकाद् इच्छायां वेत्यत्र** भाविसाधनसम्बन्धसमाश्रयणेनोपक्रम एव धातुसंज्ञा क्रियते, कर्म यो धातुरितीषिकर्मत्वस्य भावित्वाद

उपक्रम एवेषिकर्मत्वमुक्तं तथाऽन्यदपि भाविसाधनसम्बन्धादुपक्रम एव विशिष्ट-क्रियावचनत्वं दृश्यताम् । को दोष इति पुण्यराजः ।

उपक्रम एवासौ क्रिया विशिष्टैवाभ्युपगन्तुं युक्तेति दृष्टान्तप्रदर्शनपूर्वं-माह—

बीजकाले तु सम्बद्धा यथा लाक्षारसादयः ।
वर्णादिपरिणामेन फलानामुपकुर्वते ॥ (वा०प०२।१८५)
बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः ।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ॥ (वा०प०२।१८६)

लाक्षारसादिवद् धातूपसर्गयोर्बुद्धिस्थादभिसम्बन्धाद् न तु वस्तुतः धातू-पसर्गसमुदायस्य वस्तुतो धातुत्वेन धातूपसर्गविभागस्याडादिकार्यार्थं कल्पितत्वेन बाह्यस्य तयोरभिसम्बन्धस्यासंभवे बौद्धस्यैव तस्य संभवात् । अन्तर्लीनोऽव्यक्तं प्रतीयमानः क्रियाविशेषः साधनसम्बन्धोत्तरं पदनिष्पत्तिकाले प्रकाशते ।

एवमन्वादीनां वाचकत्वे शिष्टस्य भ्वादेरक्रियावचनत्वप्रसङ्गः कर्मलकारानु-पपत्तिप्रसङ्गश्चेत्यादिचोद्यस्यानवतरः । धातूपसर्गसमुदायस्य वाचकत्वेपि क्रियावाचित्वं धात्वंशनिष्ठम् । विशेषवाचकत्वं चोपसर्गगतम् उभयस्य विशिष्ट-क्रियावाचित्वमित्यभ्युपगम एवोत्तरः पक्षः ।

आतश्च धातूपसर्गसमुदायस्य धातुत्वम् । केचन धातव उपसर्गविशेषमन्त-रेण न प्रयोगमवतरन्ति । इङ् अध्ययने इति धातुर्न जातु व्यभिचरत्यधिमुप-सर्गम् । आङः शसि इच्छायाम् आङः शासु इच्छायामिति सङ्ग्राम युद्धे इति तु सोपसर्गा एव पठिता इति व्यभिचारशङ्कैव नोदेति । एवंन्यासः सत्युप-सर्गयोगे समुदायस्यैव धातुत्वमिति मुक्तसंशयं व्यवसाययति ।

किञ्च । येपि नाम धातवो निरुपसर्गाः पठितास्तेषां केचनोपसर्गमन्तरेण न प्रयोगमवतरन्ति—चायृ पूजानिशामनयोरिति चायतिरर्थद्वये पठितः । न च केवल एकतरस्मिन्नप्यर्थे वर्तते । अपोपसृष्ट एवायं पूजामाह कृति प्रत्यये । अप-चाय्यः पूज्यो भवति न तु चाय्यः । केवलेन तदर्थस्याप्रतीतेः । तिङि तु क्वाचित्को दृश्यते प्रयोगः—**अपो दिव्या अचायिषम्** (अथर्व० ७।८६।१) । निचाय्य एव च निशाम्यो द्रष्टव्यो भवति न केवलश्चाय्यः । स्वच्छन्दवाच ऋषयोपि **निचाय्य तं मृत्युमुखात् प्रमुच्यत** इत्येवं प्रयुयुजिरे । अयमत्र निर्गलितोऽर्थः—पूजानिशा-मनयोः पठितोऽपि चायतिरशक्तोऽनुपसृष्टः पूजानिशामने अभिधातुम् । तत्रापि **प्रत्यर्थमुपसर्गविशेषमपेक्षते** ।

इदमत्र तत्त्वम्—यथानुबन्धा एकान्ता अनेकान्ताश्चेति पक्षद्वयं यथा वाऽनु-करणशब्दाः सार्थका अनर्थकाश्चेत्युभयमप्यास्थीयते तथैवोपसर्गा वाचका द्योत-काश्चेति यथालक्ष्यमुभयः कृतान्त इति स्थितम् ।

अनर्थका अपि केचिदुपसर्गा भवन्ति ।

उपसर्गव्यापारं निरूपयद्भिर्वाचि विचक्षणैरभियुक्तैर्यदभ्युक्तं—कश्चित्तमनुवर्तत इति तत्र कोऽभिसन्धिस्तेषाम् । न ह्यनुवर्तनं नाम कयापि युक्त्या वाचकत्वं भवति न च द्योतकत्वम् । विशेषानभिधानात् । अत्र पक्षेऽनर्थका एवोपसर्गा अनर्थान्तराभिधायिनः । न हि ते धात्वर्थस्य किमप्युपस्कुर्वते । शब्दोपजन एव भवति नार्थोपजनः ।

अनर्थकत्वं चामीषां केषाञ्चिदाचार्योऽपि कण्ठरवेणाभ्युपैति यदधिपरी अनर्थकाविति (१।४।९३) सूत्रयति । अनुवृत्तेस्तावत् कतिचिदुदाहरणानि स्थूलोच्चयेनोच्यन्ते—अर्थयतिरुपयाच्ञायां पठ्यते, प्रपूर्वोऽपि तमेवार्थमभिधत्ते, सम्प्रपूर्वोऽपि—**उपाध्यायमर्थयते प्रार्थयते सम्प्रार्थयते क्षितीश** इति । द्विष अप्रीताविति धातुरपपूर्वकोऽपि तदर्थक एव—**स मामपद्विष्टे, अहं च न जातु तं द्विषे** । यमर्थं शृणोतिराह तमेव संशृणोतिरपि । एवं विशतिः प्रविशतिना समानार्थः । क्रदि आह्वाने रोदने च पठितः । केवलोऽप्याह्वाने वर्तते—**क्रन्दत्यविरतं सोथ भ्रातृमातृसुतानथ** इति मार्कण्डेयपुराणे (१०।६०) । आङ्पूर्वोऽपि—**आपन्न आक्रन्दत्यभ्युपपत्तारम्** । णिजिर् शौचपोषणयोः केवलोऽपि शौचं शोधनं प्रक्षालनमाह निःपूर्वोऽपि—**अप्सु निक्त्वा तण्डुलान्** (कौशिकसूत्रे ५१) । **अश्वो न निक्तो नदीषु** (ऋ०८।२।२) । निःपूर्वस्तु प्रसिद्धचतितरां प्रयोगेषु । षदॢ विशरणगत्यवसादनेष्विति धातुः केवलोऽप्यवसादे वर्तते, अवोपसृष्टोऽपि—**प्रतायन्तां वाचो निमितविविधार्थामृतरसा न सादः कर्तव्यः कविभिरनघे स्वविषये** इति ध्वन्यालोके (४।१७) तथा दर्शनात् । पृची सम्पर्के इति धातुः प्रायेण समुपसृष्टः प्रयोगमवतरति । धात्वर्थनिर्देशेऽपि समुपात्तः । अन्तरेणापि समं तमेवार्थमाह—**तस्मित्पृणक्षि शवसोत राया** (ऋ० ६।१५।११) इत्यत्र यथा । कत्थ श्लाघायामिति धातुपाठः । **इक्ष्वाकूणां विशेषेण बाहुवीर्ये न कत्थनम्** (भा० ३।९९।४८) । **गर्जितेन वृथा किं ते कत्थितेन च** (भा० १।१९९५) । विपूर्वोऽपि तमेवार्थमभिधत्ते—**नात्मना विकत्थते** । वृहू उद्यमनमुत्पाटनमुन्मूलनमाह । **विनाप्युदं तत्रार्थे दृष्टः—मूलं तूलं वृहति दुर्विवक्षतुः** (आप० ध० १।३२।२४) । आगामिनी सम्पत् तूलमिति हरदत्तः । शसु हिंसायामिति धातुपाठः । **तस्मिंस्तथा मया शस्ते** (भा० द्रोण० १९७।२८) । विशसितविशसनविशसित्रादिष्वपि धात्वर्थो वाच्यः । **स्पष्टं विशब्दोऽनर्थकः । न तु मात्राभिशप्तानां मोक्षः क्वचन विद्यते** ( ) । शापोऽभिशापः । शब्दोपजनो नार्थोपजनः । **सिद्धिं समभिसम्प्राप्ताः पुण्येन महतान्विताः** (भा० वन० ८२।२६) । अत्र प्रकर्षे साकल्ये वाऽभिधित्सिते समादीनामेवं तमेनैव सिद्धेः शिष्टमुपसर्गत्रयमपार्थकम् । **उपोपविष्टा मञ्चेषु द्रष्टुकामाः स्वयंवरम्** (भा० आदि० १८५।

१५)। **प्रसमुपोदः पादपूरणे** (पा० ८।१।६) इत्युपशब्दः पादपूरणो नार्थविशेषमभिधत्ते। **कूलं रोधश्च तीरं च तटं त्रिषु** (इत्यमरः)। तीरप्रतीरे दीपप्रदीपवद् इति स्वामी। यमर्थं तीरशब्द आह तमेव प्राधिकस्तीरशब्दः। **चन्द्रोपरागं प्रति तु केनापि विप्रलब्धासि** (मुद्रा० १)। **मया प्रलब्धो ब्रह्मर्षिर्नारदः सुमहातपाः** (भा० वन० ६६।५)। **गृधिवञ्च्योः प्रलम्भने** (पा० १।३।६९)। प्रलम्भनं वञ्चनं भवति। समानेर्थे विप्रलम्भे विशब्देन तत्र किं क्रियते। **कुशलं त्वां महाप्राज्ञः सर्वतः परिपृच्छति** (भा० आदि० २०६।१८)। सर्वत इत्यनेन परिपृच्छतीत्यत्र परिशब्दो गतार्थः। **सर्वतः परिरक्षेच्च यो महीं भोक्तुमिच्छति** (भा० शां० १०२।४१)। इहापि तथा। **सङ्कल्पजेनाभिपरिप्लुताङ्गाः** (भा० आदि० १८७।३)। अभिपर्योरेकतरः शक्यस्त्यक्तुम्। **असन्तुष्टाश्च्युताः स्थानान्मानात् प्रत्यवरोपिताः** (भा०शां०१११।७७)। प्रतिरनर्थकः। अवरोपिता इत्यनेनैव विवक्षितार्थलब्धेः। **विव्यास वेदान्यस्मात्स तस्माद् व्यास इति स्मृतः** (भा० आदि० ६३।८८)। विभक्तवानित्यर्थः। स च व्यासेत्यनेनैवोच्येत, किं विना। **येऽसितः परिजज्ञिरे** (अथर्व० १०।७।२५)। परिशब्दो धात्वर्थाद् व्यतिरिक्तं न किञ्चिदाह। आनर्थक्ये च अधिपरी अनर्थकाविति सूत्रं (पा०१।४।९३) मानम्। **न्यग् वातोऽववाति** (ऋ० १०।६०।११)। अनर्थकोऽवशब्दः, न्यग् इत्यनेन गतार्थः। **सम्प्राक्रुष्टे रुदितस्त्रीकुमारे** (भा० द्रोण० २२।१)। आङश्चारितार्थ्येपि सम्प्रयोरेकतरस्य वैयर्थ्यं विस्पष्टम्। **अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः** (भा०)। अभिशब्दोऽनर्थकः। उपायाभ्युपाययोर्नार्थे विशेषः कश्चिदस्ति। **न्यङ्ङुत्तानोऽवपद्यते न** (ऋ० ४।१३।५)। अवशब्दस्याऽधोलक्षणोर्थ इह न्यङ् इत्यनेनैवोक्तः। **अपरिह्वृताः सनुयाम वाजम्** (ऋ० १।१०२।११)। अपरिह्वृता अकुटिलगतयः। पर्यर्थो धात्वर्थेनोपसङ्गृहीत इति परिरपार्थकः। **एवं व्युत्थापिते धर्मे बहुधा विप्रबोधिते** (भा० आश्व० ४९।१३)। विशब्दोनर्थकः। बहुधेत्यनेन तदर्थगतेः। **पर्यन्वेष्टुमितस्ततः** (भा० आदि० ४०।१४)। अनर्थकः परिः। इतस्तत इत्यस्मिन्त्सति किं तेन। **रक्षसा विप्रमुक्तोऽथ स नृपस्तद्वनं महत्। तेजसा रञ्जयामास...**(भा० आदि० १७७।२८)॥ मुक्त इत्येव पर्याप्तं नार्थो विप्राभ्याम्। **अहमेनं त्वया दष्टं जीवयिष्ये भुजङ्गम** (भा० आदि० ४४।३)। **अहं तं संजीवयिष्यामि पश्यतस्ते भुजङ्गम** (भा० आदि० ४४।८)। उभयत्र समानोऽर्थः। तेन सम्शब्दोऽनर्थकः। **आरात् तिष्ठत मा मह्यं समीपमुपसर्पत** (भा० आदि० १७०।१२)। अनर्थक उपशब्दः। **ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति** (मनु० २।१२०, भा० उ० ३८।१)। ऊर्ध्वमित्युक्तेरुच्छब्दोनर्थकः।

जरयाऽभिपरीतेन शत्रुभिर्व्यसितेन वा (भा०शां०१०।१७)। अनर्थकोऽभिः।

परीतः परिगतः। अभिपरी समानार्थौ प्रसिद्धौ। तस्मादिह व्यतिरिच्यतेऽभिः। **भुञ्जानो मनुजव्याघ्र नैव शङ्कां समाचरेत्** (भा० अनु० १०४।१००)। समानार्थः। न हि सम्यक्त्वमभिप्रेयते। **तेजसः प्रतिसंहारमात्मनः स चकार ह** (भा० आदि० २३।२७)। **तस्मात्तेजस्तु संहरे** (भा० आदि० २४।२)। उभयत्र समानोऽर्थः। तेन प्रतिरनर्थकः। **अनिष्टस्याभिनिर्वृत्तिम्।** (भा० शां० २२०।२०)। तेन निर्वृत्तम् (पा०४।२।६८)। उभयत्राभिन्ना सिद्धिरूपा क्रियोच्यते। अभिना नार्थान्तरं किमपि गम्यते। **तमः श्वभ्रनिभं दृष्ट्वा वर्षबुद्बुदसंनिभम्** (भा० शां० ३०१।६०)। समानेऽर्थे सम्शब्देन किं क्रियते। **ज्ञात्वा शूलं च देवेशः पाणिना समनामयत्। आनतेनाथ शूलेन...**(भा० शां० २८६।१७-१८)॥ स्पष्टमिह सम्-सहितस्याप्यानमेः स एवार्थो यः केवलस्यानमेः। **आत्मना विप्रहीणानि काष्ठकुड्यसमानि तु** (भा० शां० ३०१।८७)। विप्रावनर्थकौ। न ह्याभ्यां प्रकर्षः कश्चिदाधीयते क्रियायाम्। **लङ्कायामभिगुप्तायां सागरेण समन्ततः** (रा०)। अभिना नार्थः, समन्तत इत्यनेन तदर्थगतेः। **रूपसम्पत्समायुक्ता सर्वस्य प्रियदर्शना** (वि० पु० १।१५।६६)। आङा नार्थः। संयोगस्य समैवोक्तत्वात्। **बहुगोकुलसंकुलम्।** (भा० शां० ३२५।२०)। **नरनारीसमाकुलम्** (भा० शां० ३२५।२३)। उभयत्र समानोऽर्थः। एकत्रानर्थक आङ्। **उदक्रोशन्नरव्याघ्राः शब्देन महता तदा** (भा० द्रोण० १८।२)। **उच्छब्दवाच्यमुच्चैस्त्वं महतेतिशब्देनैवोक्तमित्युच्छब्दोऽनर्थकः। पुत्रीकृतो राजपुत्रः पर्याप्तं पर्यवर्धत** (राज० ३।१०७)। पर्याप्तमित्यनेन पर्यर्थस्योक्तत्वात्परिरनर्थकः। **इति संचिन्त्य मनसा कृत्वा चाभिप्रदक्षिणम्** (भा० शां० ३४३।४१)। अभिशब्दः पादपूरणः। **आनन्त्यमुपसम्प्राप्ताः सन्तोषादिति वैदिकम्** (भा० शां० २७०।२५)। इहोपसर्गत्रयमप्यनर्थकम्। आप्तिरेवाभिप्रेता। **निकामे निकामे नः पर्जन्यो वर्षतु** (वा० सं०२२।२२)। निकामः कामः। निशब्दो विशेषकृन्न। **अन्यं वरं वृणीष्वं वै यादृशं सम्प्ररोचते** (भा० कर्ण० ३३।१०)। सम्शब्दोऽनर्थकः। **कच्च सुस्वागतं तेऽस्तु** (भा० आदि० ७६।२१)। प्रसमुपोदः पादपूरणे (पा० ८।१।६) इति सम्शब्दः पादपूरणोऽनर्थकः। गद्येऽद्यतनाः केचित्सुस्वागतं प्रयुञ्जाना भ्रान्ता इत्युपेक्ष्याः। **कच्चिद् धर्मसुतो राजा त्वया प्रत्यभिनन्दितः** (भा० आश्रम० २८।७)। प्रतिशब्दोऽधिकः। **परिवार्य च विश्वेशं पर्यासत दिवौकसः** (भा० उ० ४६।४)। पर्यासतेत्यत्र परिशब्दोऽनर्थकः। परिवार्येत्यनेन तदर्थगतेः। **विनीतमोहो व्यपनीतकल्मषः** (भा० शां० २४५।३५)। अपेन नार्थः।

प्रयुञ्जते हि शिष्टा अन्यत्रापि नामभिः सहचरिताननर्थकान्प्रादीन्—सुमेरुः, प्रतीरम्, प्रदीपः, प्रलम्बः, प्राग्रम्, विस्फुलिङ्गः, विलोचनम् इत्यादिषु।

स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा।
शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥ (वा०प०२।१८८) ॥

इत्यत्र कारिकायामुपसर्गाणां केषाञ्चिच्छक्त्याधानलक्षणं सहकारित्वमुक्तं हरिणा। शक्तिमात्रमुपसर्गः कुरुत इत्यर्थाभिधाने सहकारिण उपसर्गा इत्येवं व्याख्यातं च पुण्यराजेन। **कश्चित्तमनुवर्तत** इत्यस्यैवायमनुवाद इत्युक्तं भवतीति च व्याहृतं तेन। वाचकत्वद्योतकत्व-व्यतिरिक्त एष पक्ष इति कारिकायाः प्रकृतायाः स्वरसः। इदं नो बुद्धि नोपारोहति यो नामोपसर्ग आत्मनाऽनर्थकः स केन सामर्थ्येन धातावर्थाभिधाने शक्तिमादधीत। प्रागेव चासौ धातुश्शक्तः स्वार्थाभिधाने, इति तस्य शक्त्यपह्नवः कथमाञ्जस्यमश्नुवीत? तेन लक्ष्यानुरोधात् केचिदनर्थका उपसर्गा इत्यपि नापलाप्यं भवति। कथं वात्र सूरयः पश्यन्ति?

वेदे धातूपसर्गयोगः

तत्तदर्थविवक्षया प्रणुन्ना ऋषयस्तत्तदर्थवचनान्धातूनप्रयुज्योपसर्गसहकारेण तं तमर्थमाहुरित्यमीषां शीलम्। तथाहि वैदिकाः पिङ्गलादयो महर्षयश्छन्दोजातीनां तास्ताः संज्ञाश्चिकीर्षन्तो धातुं साधारणीकृत्योपसर्गविशेषैर्विशेषं विवक्षन्ति। तद्यथा—**कृतिः प्रकृतिराकृतिरुत्कृतिरिति च्छन्दोजातय** इति प्रतिजानते। एवं स्थिते वेदे यदुपसर्गप्राचुर्यं व्यवहारवशगमक्षिलक्षी भवति न तदन्यत्र। शब्दतोऽर्थतश्च चित्रीयाकर एष धातूपसर्गयोग इति तमुपपरीक्षामहे।

प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा (तै० सं० १।४।३५)। इत्थमत्रोपसर्गकृतमर्थभेदमभ्यूहते भट्टभास्करः—प्रयासः प्रकृष्टो यासः क्रियायागादिः। आयासः शास्त्रपूर्वकः प्रयासः, अर्थार्जनादिः। वियासो विविधो व्यापारो हसितकण्डूयितादिः। संयासः समीचीनप्रयत्नः परोपकारादिः। अवयासो निकृष्टव्यापारो दुष्कर्म। **यतोऽयं पवते। यदभिपवते। यदभिसम्पवते** (तै० ब्रा० २।३।६।१)। अभिपवतेऽभिलक्ष्य वाति। अभिसंपवते तस्मिन्नभिलक्ष्ये वस्तुनि यत्सम्यग्वाति। **दिशः प्रदिश आदिशो विदिश उद्दिशः** (तै० सं १।३।१०)। प्रधानभूता दिशः प्राच्यादयः प्रदिशः। आस्थिता दिश आदिशः, या जन्तुभिरास्थीयन्ते, आगता अधोदिशो मध्यदिशश्च। उद्गता दिश उद्दिशः, ऊर्ध्वं दिशः। विगता विविधस्वयाना वा दिशो विदिशः। **ऋतेनास्य निवर्तये। सत्येन परिवर्तये। तपसास्यानुवर्तये। शिवेनास्योपवर्तये। शग्मयेनास्याभिवर्तये** (तै०ब्रा०१।५।५।१-२)। निवर्तये निवृत्तान्करोमि (यजमानस्य केशान्)। परिवर्तये परितः परित्यक्ता-

न्करोमि । अनुवर्तयेऽनुकूलान्करोमि । उपवर्तये समीपे केशमूले क्षुरस्य वर्तनं कुर्वे । अभिवर्तयेऽभितः क्षुरं व्यापारयामि ।

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाऽभ्यञ्जते (अथर्व० १८।३।१८) । अत्र मन्त्रेऽञ्जिरेको धातुः, उपसर्गश्चानेकः । अञ्जनेन यजमानस्याक्षणोरञ्जनमुच्यते, तदेव विना विशेष्यते । इदं हि दिव्यं कर्म मानुषाद् भिद्यते । यजमानस्य पूर्वं दक्षिणमक्ष्यञ्जन्त्यृत्विजः, मनुष्यास्तु पूर्वं सव्यमञ्जन्ति । अभ्यञ्जनेन तु शारीरोभ्यङ्ग उच्यत इत्येवमुपसर्गभिदा सूपपन्ना भवति ।

राद्धिः प्राप्तिः समाप्तिर्व्याप्तिर्महि एधतुः । अत्याप्तिरुच्छिष्टे भूतिराहिता निहिता हिता (अथर्व० ११।७।२२) ॥ अत्रापि आप्लृ व्याप्ताविति धातौ तत्तदुपसर्गासङ्गो धात्वर्थविशेषणतया सार्थकः । समाप्तिः सम्यगाप्तिर्भवति, व्याप्तिश्च विविधा प्राप्तिः, अत्याप्तिश्चातिक्रान्ताऽऽप्तिरिति विशदम् । एवं दुधाञाऽऽङाद्युपसर्गयोगोऽप्यर्थान्तरकृदिति बहु विज्ञाप्यं भवति । आभिमुख्येन स्थापिता भूतिः समृद्धिराहिता भवति, निक्षिप्ता च सैव निहिता भवति ।

उपमितां प्रतिमितामथो परिमितामुत । शालाया विश्ववाराया नद्धानि विचृतामसि (अथर्व० ९।३।१) ॥ अत्र डुमिञ् प्रक्षेप इति धातोरुपादिभिरुपसर्गैः सहचारोऽर्थविशेषाय भवति । सोऽर्थविशेषो दुरवधारो नाम । उपमिताऽवलम्बिता, प्रतिमिताऽवष्टब्धा, परिमिता चाभिसंहिता भवतीति केषाञ्चिदभ्यूहः ।

विजावति प्रजावति वि ते पाशांश्चृतामसि (अथर्व० ९।३।१३) । अत्र विजाशब्देन विजननं गर्भमोचनमुच्यते प्रजाशब्देन च प्रसूतिर्जातमपत्यम् ।

परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः (ऋ० १।१२३।१३) । अत्र परापूर्वं इण् गताविति धातुर्निवृत्तौ वर्तते आङ्पूर्वस्तु स एवावृत्तावाभिमुख्येनागमने । यातेरप्येतदुपसर्गद्वये तादृश एवार्थः— **परा यात पितर आ च यात** (अथर्व० १८।३।१४) ।

वि मे पुरुत्रा पतयन्ति कामाः (ऋ० ३।५५।३) । अत्र ऋचि विपतन्तीत्यस्य नाना दिक्षु गच्छन्तीत्यर्थः ।

हविषः प्रस्थितस्य वीतं वृषणा हर्यतं जुषेथाम् (ऋ० १।९३।७) । अत्र अग्नीषोमौ देवते प्रार्थ्येते । प्रपूर्वस्तिष्ठतिरत्र प्रवृत्ति स्पन्दनलक्षणामाह, याऽन्यत्र वेदे 'पवते' इत्यनेनाभिधीयते । सायणस्त्वन्यथा गृह्णाति—होमार्थमाहवनीयं प्राप्तस्य हविष इत्येवमर्थापयते । **द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत** (वा० सं० २९।२२) । अत्र प्रपूर्वस्तिष्ठतिः प्रवृत्तौ व्यापारे वर्तते ।

अभ्यूर्णोति यन्मगं भिषक्ति विश्वं यत्तुरम् (ऋ० ८।७६।२)। अभिपूर्वं ऊर्णुञ् अभित आच्छादने वर्तते। **द्यूर्णवती दाशुषे वार्याणि** (ऋ० ५।८०।६)। अत्र विपूर्वं ऊर्णोतिर्विवरणे उद्घाटने वर्तते।

प्रपूर्वस्तारयतिर्लोके वञ्चनायां दृश्यते। प्रतारको वञ्चक इत्यनर्थान्तरम्। वेदे त्वन्य एवार्थः—**गयस्फानः प्रतरणः सुवीर इति गवां नः स्फावयिता प्रतारयितेत्याह** (ऐ० ब्रा० १।१३)। प्रतारयिता उत्तारणहेतुरिति सायणः। पापादित्यध्याहारः। अवपूर्वस्तु तरतिर्विनाशे दृष्टः। अयमप्यलौकिकोऽर्थः। **आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः** (ऋ० ६।२५।२)।

अग्ने हंसि न्यत्रिणम् (ऋ० १०।११८।१)। नितरां हंसीत्यर्थः। लोके तु निहन्तीति निघातं नीचैः करणमाह प्रायेण।

तान्येकयर्चाऽवारुरुत्सत (ऐ० ब्रा० १।१२)। अवरुधिः स्वायत्तीकरणे वर्तते। लोके तु गोष्ठादौ निरोधने गोपने च दृश्यते। **व्रजमवरुणद्धि गाम्**। अवरोधो नामान्तःपुरं भवति यत्र राजयोषितोऽवरुध्यन्तेऽसूर्यम्पश्याः। **षाण्ड-वास्त्रयोदश वर्षाण्यवरुद्धा विचेरुः** (संवृताकारा इत्यर्थः)। अपपूर्वस्तु वेदेऽपसारणे वर्तते—**अनुव्रतामप जायामरोधम्** (ऋ० १०।३४।२)।

यस्त ऊरू विहरत्यन्तरा दम्पती शये (ऋ० १०।१६२।४)। **तस्मात् स्त्र्यूरू विहरति** (ऐ०ब्रा० २।३५)। **अग्नीदग्नीन् विहर** (तै० सं० ६।३।१।२, मै० सं० ३।८।१०)। अत्र सर्वत्र विहरतिर्विश्लेषणे पृथक्करणे वर्तते। लोकेऽदूरविप्रकर्षेणायमेवार्थः क्वचिदुच्यते। **अश्रूणि विहरति**। प्रमार्ष्टीत्यर्थः। **कीर्तिं बहुभ्यो विहर द्विराजे** (अथर्व० ५।२०।६)। अत्र विहरतिर्विभजने विभज्य दाने वर्तते।

पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् (ऋ० १०।२५।६)। अत्र विष्ठितशब्देनावस्थितमुच्यते, न तु स्थानाच्च्युतम्। अद्यत्वे लोका स्थानात् प्रच्यावितं विष्ठापितशब्दं व्यवहरन्ति। सोऽर्थः शब्दमर्यादया दुर्लभ इति न विजानन्ति। **यावत् सप्त सिन्धवो वितष्ठिरे** (अथर्व० ४।६।२)। अत्र वितष्ठिर इति विततास्तस्थुरित्यर्थमाह।

सुप्रायणा अस्मिन्यज्ञे विश्रयन्ताम् (वा० सं० २८।५)। विश्रयन्तां विविशन्ताम् इत्यनर्थान्तरम्। **देवीर्द्वारो विश्रयध्वम्** (ऋ० ५।५।४)। अत्राप्युक्तपूर्व एवार्थः। **या न ऊरू उशती विश्रयाते** (ऋ० १०।८५।३७)। अत्रापि विपूर्वः श्रयतिर्विवरणे वर्तते। अवश्यमयमेवार्थोऽभ्युपेयः, तस्मात्स्त्र्यूरू विहरतीत्युक्तचर्या ऐतरेयश्रुत्या संवादाय। सायणस्तु नः पुंसामूरू कामयमाना विशेषेण श्रयत इत्याह। सोऽस्य भ्रमः।

अहश्च कृष्णमहरर्जुनं च विवर्तेते (ऋ० ६।६।१)। **विवर्तेते**=**पर्यावर्तेते**। **विवर्तेते अहनी चक्रियेव** (ऋ० १।१८५।१) इत्यत्रापि स एवार्थः। शाङ्कराणामद्वैतिनां विवर्तार्थस्त्वृषेरविदितः।

उरौ पथि व्युते तस्थुरन्तः (ऋ० ३।५४।६)। अत्र ऋचि पनितार इति कर्तृपदम्। विपूर्वाद् वेञो निष्ठायां व्युतमिति रूपम्। विविक्तमिति चार्थः। लोके आङ्पूर्वः प्रपूर्वो वायं धातुः प्रयोगमवतरन्द्रष्टुः।

व्यब्रवीद् वयुना मर्त्येभ्यः (ऋ० १।१४५।५)। **कद्ध रत्नं वि नो वोचः** (ऋ०४।५।१२)। **अस्ति स्विन्नु वीर्यं तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः** (ऋ०६।१८।३)। **वि लोके अप्सु तनये च सूरेऽवोचन्त चर्षणयो विवाचः** (ऋ० ६।३१।१)। अत्र सर्वत्र विपूर्वो ब्रूञ्व्यक्तायां वाचीति धातुर्विशिष्य भाषणे व्याख्याने वर्तते। लोके तु विपरीतभाषणे प्रसिद्धः—**अब्रुवन् विब्रुवन्वापि नरो भवति किल्बिषीति** मनुसंहितायां (८।११) यथा।

वायुर्वो विविनक्तु (वा० सं० १।१६)। वस्तण्डुलान् व्रीहिभ्यः पृथक् करोत्वित्यर्थः। (**मरुतः**) **विविञ्चन्ति वनस्पतीन्** (ऋ०१।३६।५)। **विविच्य सन्ध्यक्षराणामकारं प्लावयेत्** (आश्व० श्रौ० १।५।६)। लोके प्रायेण सदसद्विवेचने विपूर्वो विचिर्वर्तते। कृत्सु तु वेदोक्तोऽर्थः समुपलभ्यते। विविक्तं सेवते। विविक्तासन इत्यत्र यथा।

वि वात वाहि यद्रपः (ऋ० १०।१३७।३)। अत्र हे वात वांस्त्वं यन्मयि दूषणं तद् दूरे गमयेत्यर्थो विवक्षितः। उपसर्गसहकारेण धातुः सकर्मकः संवृत्तः। लोके तु विपूर्व एष दिक्षु विदिक्षु सञ्चारमेवाह—**वायुर्विवाति हृदयानि हरन्नराणाम्** (ऋतुसं० ६।२२)।

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् (ऋ०१०।९०।११)। **पाङ्क्तो योऽयं पुरुषो पञ्चधा विहितः, लोमानि त्वङ्मांसमस्थि मज्जा** (ऐ० ब्रा० ६।२६)। अन्नमशितं त्रेधा विधीयते (छां० उ० ६।५।१)। अत्र सर्वत्र विधाञ् विभजने वर्तते। लोके तु प्रायशो विधानेऽनुष्ठानेऽर्थे प्रयोगः प्रचरति। **एतदधिविधाय ऋषिरवोचत् पाङ्क्तं वा इदं सर्वम्** (तै० उ० १।७।१)। अत्र अधिविधायेत्यधिकृत्यशब्दार्थमाह। लोके त्वधिविपूर्वस्य धात्रः प्रयोग एव दुर्लभः।

स्यन्दन्तां कुल्या विषिताः पुरस्तात् (ऋ०५।८३।८)। **ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः** (ऋ० ६।६।४)। अत्रोदाहृतिद्वये विपूर्वः षिञ् बन्धने इति धातुर्मोचने वर्तते। सोऽयमुपसर्गकृतोर्थबाधः।

वि पिबध्वं कुशिकाः सोम्यं मधु (ऋ० ३।५३।१०)। अत्र विपूर्वः पिबतिर्विविधे पाने काले कालेऽभीक्ष्ण्ये वा पाने वर्तते।

वि पृची स्थो वि मा पाप्मना पृङ्क्तम् (वा० सं० ६।४, १६।११)। पृची सम्पर्के इति धातुर्लोके सम्पूर्वकः क्वचित्केवलो वा प्रयुज्यते, विपुर्वो वियोजने वर्तमानस्तु न क्वापीतिच्छन्दोमात्रगोचरोऽयं प्रयोगः।

आसिञ्चोदकमवधेट्येनम् (अथर्व० ६।५।५)। अधो धेहीत्यर्थः। **पचनमवधाय महावीरमवदधाति** (श० ब्रा० १४।१।२।२१)। अवदधाति अधः श्रयतीत्यनर्थान्तरम्। **त्रितः कूपेऽवहितो देवान् हवत ऊतये** (ऋ०१।१०५।१७)। अवहित इत्यधः पतितमाह। **उत देवा अवहितं देवा उन्नयथा पुनः** (ऋ० १०।१३७।१)। लोके त्विदमादिरर्थो बहुविदामप्यविदितः।

ये गर्भा अवपद्यन्ते (अथर्व० ४।७।१७)। **अनायतो अनिबद्धः कथाऽयं न्यङ्ङुत्तानोऽवपद्यते न** (ऋ० ४।१३।५)। **जामिमृत्वा माऽवपत्सि लोकात्** (अथर्व० ६।१२०।२)। **त्राध्वं कर्तादवपदो यजत्राः** (ऋ० २।२६।६)। **अत्रा कर्तमवपदात्यप्रभुः** (ऋ० ६।७३।६)। अत्रोदाहृतिषु सर्वत्रावपूर्वः पदिः प्रपतने भ्रंशने वर्तते। उत्तमायामृचि चायं सकर्मक इति विशेषः।

विमुच्या वयोऽबसायाश्वान् (निरुक्ते १।१७)। अत्रावपूर्वः षो अन्तकर्मणीति विमोचने वर्तते। लोके त्ववपूर्वः स्यतिरवसानमेवाह।

निर्वै क्षत्रं नयति हन्ति वर्चः (अथर्व० ५।१८।४)। अत्र निर्णयतिरपनयनेऽपवाहने वर्तते। सोऽयमर्थो लौकिकानामत्यन्तमविदितः।

एवा त्वं दशमास्य सहावेहि जरायुणा (ऋ० ५।७८।८)। अत्र अवपूर्व इण् गताविति धातुरधोगमने निष्क्रमणे वर्तते। अवस्याधोर्थे प्रसिद्धेः। **अग्निर्वै देवानामवमो बिष्णुः परमः** (ऐ० ब्रा० १।१)। इत्यत्र यथा। लोके त्वयं नियमेनावगमने बोधने वर्तते। **अवैमि ते सारम्** (कु० ३।१३)। **केनेमां भूमिमौर्णोत् केन पर्याभवद् दिवम्** (अथर्व० १०।२।१८)। अत्र परिभवतिः परिवेष्टने वर्तते। लोके तु परिभवनं तिरस्करणं नाशो वा भवति।

शिक्षानरः समिथेषु प्रहावान् वस्वो राशिमभिनेतासि भूरिम् (ऋ० ४।२०।८)। अत्राभिनयतिराहरणेऽभिमुखं प्रापणे वर्तते लोके त्वङ्गविक्षेपेण तत्तद्भावाविष्करणे प्रसिद्धः।

पूर्वो राज्ञोऽभिवदति (श० ब्रा० ३।३।४।१४)। अत्राभिवदिराभिमुख्यसम्पादनपूर्वके भाषणे वर्तते। **यत्कर्म क्रियमाणमृगभिवदति** (निरुक्ते)। अत्राभेर्विशिष्टोऽर्थो नास्ति।

वेद मासो धृतव्रतो द्वादश प्रजावतः । वेदा य उपजायते (ऋ० १।२५।८) । अत्र उपपूर्वो जनिरधिकोत्पत्तौ वर्तते । यथोपजनशब्दे ।

द्रवन्त्वस्य हरय उप नः (ऋ० ४।१६।१) । उपगच्छन्त्वित्यर्थः । लोके तूपद्रव उपप्लवो विघ्नो भवति । उपद्रवतीत्याक्रामतिनाऽपि समानाभिधेयो दृश्यते ।

तं हेम उपोदुर्दास्या वै त्वं पुत्रोसि (शां० ब्रा० १२।३) । उपपूर्वो वदिरपपूर्वस्य परिपूर्वस्य वा वदेरर्थे वर्तते ।

यदीं.....नमस्यन्त उपवोचन्त भृगवः (ऋ०१।१२७।७) । प्रैरयन्तेत्यर्थः ।

देवासुरा यज्ञमुपावसन्नस्मभ्यमनुवक्ष्यत्यस्मभ्यमिति (ऐ० ब्रा० २।१५) । अत्रोपवसिः प्रतीक्षायां वर्तते ।

असन्धेयमिति ह विश्वामित्र उपपपाद (ऐ० ब्रा० ७।१७) । युक्तिभिरुपपादितवानित्यर्थः ।

प्राणो वातमपिपद्यते (श० ब्रा० ३।४।२।६) । अत्रापिपदिरप्यये वर्तते । प्राणस्तमपीतो भवतीत्याह ।

येन सूक्तेन निविदमतिपद्येत न तत् पुनरुपनिवर्तेत, वास्तुहमेव तत् (ऐ० ब्रा० ३।११) । अतिपद्येत=अतिक्रामेत्=परित्यजेत् ।

ओष्ठोपसंहार उवर्णे (तै० प्रा० २।२४) । ओष्ठोपसंहार इत्योष्ठसङ्कोचमाह ।

यदाप उच्छ्वयन्ति वायुमेवापियन्ति (छां० उ० ४।३।२) । स्वकारणे वायौ लीयन्त इत्याह ।

देवकृतस्यैनसोऽवयजनमसि (वा० सं० ८।१३) । अवपूर्वो यजिर्नाशने वर्तत इत्युवटः । **अव देवानां यज हेडो अग्ने** (अथर्व० १९।३।४) । देवानां क्रोधं नाशय शमयेत्याह । **अव यक्ष्व नो वरुणं रराणः** (ऋ० ४।१।५) । वरुणकृतं जलोदरादिरोगं विनाशयेत्याह ।

परा शृणीहि हरसा यातुधानान् (ऋ० १०।८७।१४) । हिंसित्वा परावपेत्याह । परापूर्वः शृणातिर्बहुलं प्रयुयुज इत्यत्र पराशरशब्दे परेत्युपसर्गयोगो मानम् ।

अपीव योषा जनिमानि वव्रे (ऋ० ३।३८।८) । इहापिवृणोतिरावरणे वर्तते । लोकेऽस्योपसर्गस्य वृणोतौ योगो न दृष्टः ।

परा हि मे विमन्यवः पतन्ति वस्य इष्टये (ऋ० १।२५।४) । अत्र पराशब्दो

वैदूर्यमाचष्टे । परापतन्ति दूरतरं गच्छन्ति पराङ्मुखाः पुनरावृत्तिरहिता इत्यर्थः । **पक्षिणः परापातमासते** (काठक० ३४।८) । परापातम्=दूरं गत्वा । **पूर्णा दर्वि परापत सुपूर्णा पुनरापत** (वा० स० ३।४६) । अत्रापि दूरगमनरूप एवार्थः । तस्य रेतः परापतत् (तै० ब्रा० १।१।३।८) । अत्र परापतिः स्कन्दने वर्तते । **परा शुक्लानि पातय** (अथर्व० १।२३।२) । अपगमयेत्यर्थः ।

अपान्यदेत्यभ्यन्यदेति विषुरूपे अहनी संचरेते (ऋ० १।२३।७) । अत्रापेतीति अभ्येतीति च प्रतियोगिनी पदे । **सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्** (ऋ० १।११५।२) । अत्राभ्येतिः प्रत्यनन्तरीभूयानुगमने वर्तते ।

त्वाष्ट्रस्य त्रीणि शीर्षा परावर्क् (ऋ० १०।८।६) । परापूर्वो वृजिश्छेदने वर्तते । परा पूर्वेषां सख्या वृणक्ति (ऋ० ६।४७।१७) । मा नो अस्मिन्महाधने परावग्भारभृद्यथा (ऋ० ८।७५।१२) । अत्रोभयत्र परावृजिः परासने पराकरणे वर्तते ।

सं पूषन् विदुषा नय यो अञ्जसाऽनुशासति (ऋ० ६।५४।१) । सन्नयेति संगमयेत्यर्थमाह । लोके समाङ्पूर्वो नयतिः प्रायेण प्रयोगस्य विषयः ।

यस्ते गर्भममीवा दुर्णामा योनिमाशये (ऋ० १०।१६२।२) । अत्राङ्पूर्वः शीङ् आस्थान आश्रित्य स्थितौ वर्तते ।

यावदेष विष्णुरभिशेते तावद् वो दध्नः (श० ब्रा० १।२।५।१) । यावतीं भुवमावृत्य तिष्ठतीत्याह ।

निर्गा ऊपे यवमिव स्थिविभ्यः (ऋ० १०।६८।३) । अत्र निर्वपतिरर्पणे वर्तते यथा निरुक्ते—**अगस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः सम्प्रदित्साञ्चकार** (१।५।१३) इत्यत्र ।

परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयति (तै० सं० १।५।२।१) । परापूर्वो वपिर्वेदे बहुलं प्रयुज्यते परासनाद्यर्थं च ब्रूते । **ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः** (अथर्व० १८।२।३४) । परोप्ता विकीर्णा इति यावत् । **त्वं कल्याण वसु विश्वमोपिषे** (ऋ० १।३१।६) । अत्राङ्पूर्वो वपिराहरणे वर्तते । अयं परावपतेर्विपरीतमर्थमाह । **सोम राजन् संज्ञानमावपैभ्यः** । (अथर्व० ११।१।२६) । संज्ञानशब्देन मधूच्यते । आवपेत्यानिधेहीत्यर्थमाह ।

आशिषश्च प्रशिषश्च संशिषो विशिषश्च याः ।
चित्तानि सर्वे संकल्पाः शरीरमनुप्राविशन् ॥ (अथर्व० ११।८।२७)

आशिषः प्रार्थनानि भवन्ति, प्रशिषः प्रशासनानि शास्त्रीयाणि विधिवाक्यानि, विशिषो व्याख्यानानि भवन्ति । संशिष इत्यनेन किं विवक्षत्यृषिरिति

न विद्मः। वस्तुतोऽस्यामृच्युपसर्गकृतो विशेषो दुरुन्नयः। सायणोप्यत्रोपसर्ग-वशाद् धात्वर्थस्य भेदोऽवगन्तव्य इति ब्रुवन्नपि नात्मनाऽपपारत्नं विवरीतुम्।

शरीरं सर्वे प्राविशन्नायुजः प्रयुजो युजः (अथर्व० ११।८।२५)। अत्रापि सायणेन समं वयमपि विवक्षितेऽर्थे व्यामुह्यामः।

ये दग्धा ये चोद्धिताः (अथर्व० १८।२।३४)। उद्धिता इत्यवहिता इत्यस्य प्रतिद्वन्द्विनमर्थमाह। अत उद्धिता इत्युत्खाता इत्यनेन समानार्थकम्। उत्पूर्वाद् धात्रो निष्ठायां रूपम्।

आ हि ष्मा सूनवे पितापिर्यजत्यापये सखा सख्ये वरेण्यः (ऋ० १।२६।३)। आङ्पूर्वो यजिर्दाने वर्तते। **यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम्** (ऋ० १।९४।२)। अत्राप्युक्तपूर्व एवार्थः।

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते (ऋ० १०।१६२।१२)। अत्र निपद्यतिः सकर्मकः संविशतीत्यर्थः। मिथुनी भवतीति यावत्।

यत्त्रिषु यूपेष्वालभेत (तै०ब्रा०१।८।६।१)। **प्रातर्वै पशूनालभन्ते** (श०ब्रा० ३।७।२।४)। वशामालभ्य संज्ञपयन्ति (श०ब्रा०४।५।२।१)। अत्र सर्वत्र आङ्पूर्वो लभिर्बन्धने वर्तते।

ता आलम्बमिष्टकामिष्टकामुपदध्यात् (काठक० २२।८)। अत्रोपरिदध्यादित्यर्थ इत्युप उपसर्ग उपर्यर्थे वर्तते। यथोपवर्हापरपर्याय उपधानशब्दे।

मित्रो जनान् यातयति ब्रुवाणः (ऋ० ३।५९।१)। मित्रो जनानायातयति प्रब्रुवाण इति यास्कः (निरुक्ते १०।२२)। प्रवर्तयतीत्यर्थः। **आयातनमारम्भः। तद्यथा भोजनमायातितमनेनेति दुर्गः।**

अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती (ऋ० १।१६४।४०)। अत्राङ्पूर्वश्चरतिर्विचरणे वर्तते। लोके तु दुर्लभोऽयमर्थः। **आ च परा च चरति प्रजानन्** (ऋ०१०।१७।६)। आचरति इतोऽभिवर्तते संनिकर्षे वर्तते। पराचरति परागच्छति विप्रकर्षे गच्छति। **भूम्या अन्ते पर्येके चरन्ति** (ऋ०१०।१४।१०)। परिचरन्ति। परिभ्रमन्ति। लोके परिचरतिः शुश्रूषायां प्रसिध्यति। **अधि यदपां स्नुभिश्चराव** (ऋ० ७।८८।३)। अपामुपरि नौभिश्चरावेत्युक्तं भवति। अधिचरतिरुपरिप्लवने वर्तते। **अव द्वे अव त्रिका दिवश्चरन्ति भेषजा** (ऋ० १०।९५।९)। अत्रावचरतिरवतरणे वर्तते। लोके त्ववोपसृष्टस्य चरतेः प्रयोग एव दुर्लभः, दूरेऽर्थः। बाढमष्टाङ्गहृदये (सूत्र०१६।१४) **युक्तघाऽवचारयेत्स्नेहं भक्ष्याद्यन्नेन वस्तिभिरित्यत्र** ण्यन्तस्यावचारेः प्रयोगो दृश्यते। अवचारयेत् आसिञ्चेत्।

आस्थाता ते जयतु जेत्वानि (ऋ०६।४७।२६)। आस्थातेत्याश्रयितारं रथारोहमाह ।

अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः (ऋ० १।३३।१)। आवर्जते=आवर्जयति=प्रापयति । **देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः** (ऋ० ८।१०१।१६)। पर्यावृक्त=पर्यावर्जयति, प्रतिषेधतीत्यर्थः ।

यास्ते रुहः प्ररुहो यास्त आरुहो याभिरापृणासि दिवमन्तरिक्षम् (अथर्व० १३।१।६)। अत्र प्ररुह उपर्युपर्याक्रमणानि भवन्ति, आरुहः समन्ताद् उपरिगमनानीत्यभिप्रैत्यृषिः ।

कश्छन्दसां योगमावेद धीरः (ऋ० १०।११४।६)। आवेदनं साकल्येन वेदनं भवति ।

पशूनां वाच आजानाति (पञ्च० ब्रा० १०।२।७)। य एवाविदेरर्थः स एवाजानातेः ।

असौ वै लोकः प्रतिमैष ह्यन्तरिक्षलोके प्रतिमित इव (श० ब्रा० ८।३।३।५)। प्रतिमितः प्रतिबिम्बित इति यावत् !

यस्य गार्हपत्याहवनीयावन्तरेणानो वा रथो वा श्वा वा प्रतिपद्येत (ऐ०ब्रा० ७।१२)। प्रतिपद्येत=आगच्छेत् ।

युष्मान् दिवा हवामहे युष्मान् प्रयत्यध्वरे (ऋ०८।७।६)। अत्र प्रपूर्व एतिः प्रवृत्तौ वर्तते । प्रयति प्रवर्तमाने इत्यर्थः । अयमर्थो लोके दुर्लभः ।

मेन्द्रो नो विष्णुमरुतः परि ख्यन् (ऋ०७।६३।८)। परिपूर्वश्चक्षिङ् दर्शनविषये वर्जने वर्तते । अस्मान्परित्यज्यान्यान्मा द्राक्षुरित्यर्थः । **प्रतिचक्ष्व विचक्ष्वेन्द्रश्च सोम जागृतम्** (ऋ० ७।१०४।२५)। प्रतिचक्ष्व नः प्रत्येकं पश्येत्याह । विचक्ष्व विविधं पश्येत्याह ।

मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः (ऋ० १०।४७।१)। अत्र प्रगामेत्यत्र प्रशब्दो विप्रकर्षे वर्तते । यथा प्रवास इत्यत्र । यथा वा प्रगत आचार्यः प्राचार्य इत्यत्र ।

तृतीयेन ज्योतिषा संविशस्व (ऋ० १०।५६।१)। अत्र संविशिरकर्मकः । संगच्छस्वेत्यर्थः ।

यथा श्रेयस्यायाति पापीयान्प्रत्यवरोहेत् (श० ब्रा० ४।१।२।६)। अत्र प्रत्यवपूर्वो रुहिः प्रत्युत्थाने वर्तते। पापीयान् इति जघन्यमवरमाह न त्वेनस्विनमागस्विनं वा ।

तेनो श्रीः प्रत्युपोदिता (पञ्च० ब्रा० १०।७।२)। प्रत्युपवदिरत्रावमाननेऽर्थे प्रयुक्तः। लोके तूपवदिरुपसंभाषायामुपसान्त्वने वर्तते **कर्मकरानुपवदत** इत्यत्र यथा, उपमन्त्रणे रहस्युपच्छन्दने वा, **परदारान् उपवदत** इत्यत्र यथा।

आयुर्मा निर्वादिष्टम् (वा० सं० ५।१७)। अक्षशब्देन मा निराकार्ष्टमित्याह। **वाचं विषस्य दूषणीं तामितो निरवादिषम्** (अथर्व० ४।६।२)। निरवादिषम् उदचीचरम् इत्याह।

निरुक्तमेनः कनीयो भवति (श० ब्रा० २।५।२।२०)। निरुक्तं **प्रख्यापितमित्यर्थः। अपस्कम्भस्य शल्यान्निरवोचमहं विषम्** (अथर्व०४।६।४)। निरवोचं वचसा निरगमयम् इति वक्ति। **उतापवक्ता हृदयाविधश्चित्** (ऋ०१।२४।८)। अपवक्ता=निराकर्ता। धात्वर्थस्तु निराक्रियायां क्रियायामध्यवसीयते। लोकेऽपवक्ताऽपवदिता भवति। **तत्रा न इन्द्रावरुणाधि वोचतम्** (ऋ० ७।८३।२)। अस्मत्पक्षपातवचनौ भवतम् इत्याह।

यथा वातेन प्रक्षीणा वृक्षाः शेरे न्यर्पिताः (अथर्व० १०।३।१५)। निरूपूर्व ऋच्छतिरधोगमने वर्तते। तेन न्यर्पिता इत्यधोगमिता इत्याह। ऋच्छतेरयमर्थो निर्ऋतिशब्देऽसन्देहं स्थितः।

मा त्वा निकन् पूर्वचित्ता निकारिणः (अथर्व० ७।८२।३)। **न त्वा निकर्तुमर्हति** (अथर्व० १०।१।२६)। उभयत्र निकरोतिर्न्यक्करणेऽधस्पदे निधाने वर्तते। **योऽमियातो निलयते त्वां रुद्र निचिकीर्षति** (अथर्व० ११।२।१३)। इत्यत्रापि पूर्वेण समानोऽर्थः।

यथा पुंसो वृषण्यतः स्त्रियां निहन्यते मनः (अथर्व० ६।७०।१)। अत्र निहन्तिनिखनने प्रयुक्तः। क्वचिल्लोके निशब्दमन्तरापि हन्ति निखनने प्रयुञ्जते कुशलाः प्रयोक्तारः। **सोम्नि पुष्कलको हतः**। (निमित्तात्कर्मसंयोग इति वार्तिक उदाहरणम्)। सीमाप्रदेशे शङ्कुर्निखात इत्यर्थः।

तं वृक्षा अपसेधन्ति छायां नो मोपगा इति (अथर्व०५।१९।९)। अपसेधन्ति दूरे गमयन्ति। निषेधन्तीति यावत्। **यमदूतांश्चरतोऽपसेधामि सर्वान्** (अथर्व० ८।२।११)। पराणुदामीत्यर्थः।

सपत्ना ये मेऽप ते भवन्तु (अथर्व० ४।३५।७)। अपहता भवन्त्वित्याह। **नापाभूत न वोऽतीतृषाम** (ऋ० ४।३४।११)। मा स्मापगच्छतेत्याह। अपरक्ता मा स्म भवतेत्यभिसन्धित्सत्यृषिः।

पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् (श० ब्रा० १४।६।४।१)। पाण्डित्यं

वैदुष्यं निःशेषेण कात्स्न्र्येन प्राप्येत्यर्थः । अयमेवार्थः स्मृतिकारैरित्थमनूदितः— जानन्नपि हि मेधावी जडवल्लोक आचरेत् (मनु०)। **अध स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः** (ऋ० १।१२०।१२)। निर्विण्णोऽस्मीत्याह। निर्विद इत्यत्रागमशास्त्रस्य नित्यत्वान्नुम् न कृतः ।

स्नुषा श्वसुराल्लज्जमाना निलीयमानेति (ऐ०ब्रा० ३।२२)। निलीयमाना तिरोदधती सती। लीङ् श्लेषण इति धातुः ।

(वज्रेण) तेनाहमम्ं सेनां निलिम्पामि (अथर्व० ११।१०।१३)। यथा गोमयादिलेपेन भूतलादि निःशोध्यं क्रियते, अवस्कराद्यभावो निर्वर्त्यते तथा वज्रेण सेनाया अभावं निर्वर्तयामीत्यर्थः। **सर्वे साकं न्यलिप्सत** (ऋ० १।१६१।३)। **नि केतवो जनानां न्यदृष्टा अलिप्सत** (ऋ० १।१६१।४)। इहोभयत्र पराभूतिर्विनाशोऽर्थः। **सर्वे साकं न्यलिप्सत** (ऋ० १।१६१।३) इत्यृग्वर्णेन संवादायोक्तार्थ एव विवक्षर्षेरिति व्यवस्यामः ।

किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना (ऋ० ८।८।८)। लोकेत्राऽर्थेऽन्वासते उपासत इति वा व्यवहरन्ति वाग्योगविदः। अर्थे तु न कश्चन विशेषः ।

अप्रतीतो जयति सं धनानि (ऋ० ४।५०।६)। अप्रतीतोऽप्रतिगतोऽपराङ्मुखो भवति। अयमेवार्थोऽन्यत्र ऋक्षु अप्रत्यृत इति पदेनाभिधीयते, लोके त्वेष दुर्लभोऽर्थः ।

इन्द्रप्रसूता वरुणप्रशिष्टाः (देवाः) (ऋ० १०।६६।२)। प्रसूताः प्रेरिता भवन्ति। प्रशिष्टाश्च ज्ञप्ताः ।

देवान्वसिष्ठो अमृतान्ववन्दे यो विश्वा भुवनाभि प्रतस्थुः (ऋ० १०।६५।१५)। अभिप्रतिष्ठन्ते विचरन्तीत्यर्थः। अभिनाभ्यतिरिक्ते नास्यार्थस्योपलब्धिः, प्रमात्रपूर्वस्य तु तिष्ठतेः प्रयाणे रूढिः ।

विप्रुतं रेभमुदनि प्रवृक्तम् (ऋ० १।११६।२४)। इह प्रवृजिः प्रक्षेपणे वर्तते। प्रवृक्तं प्रक्षिप्तं प्रास्तम् ।

गच्छामित्रान् प्रपद्यस्व मामीषां कञ्चनोच्छिषः (ऋ० ६।७५।१६)। इह प्रपद्यतिरास्कन्दने वर्तते। लोके त्वयं शरणागतौ दृष्टः। शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् इति गीतासु। प्रपत्तिः शरणागतिरुच्यते ।

प्र वा व्रजति प्र वा धावति (श० ब्रा० २।४।१।६)। अत्र प्रपूर्वस्य व्रजतेः संन्यस्य गमनं नार्थः, त्वरितगमनमेव विवक्षितम् ।

वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन्।
पुरूतमासः पुरुहूत वज्रिवो भृति न प्र भरामसि (ऋ०८।६६।११) ॥

अत्र प्रपूर्वो भरतिरुपहरणे वर्तते । लोके प्रपूर्वस्य भृञस्तिङन्तस्य प्रयोग एव दुर्लभः । कृति प्रत्यय एव **प्रभृतिः प्राभृतं प्राभृतकमित्याद्युपलभ्यते** ।

ता वामद्य सुमतिभिः शुमस्पती अश्विना प्रस्तुवीमहि (ऋ० ८।२२।६) । प्रकर्षेण स्तुम इत्येवार्थः । लोके तु प्रपूर्वस्य ष्टुञः स्तुत्यर्थो निगीर्यते । प्रस्तावः प्रारम्भो भवत्यवसरो वा । प्रस्तावनाऽऽमुखमुच्यते । प्रस्तूयतेऽधिक्रियते प्रारभ्यतेऽनयेति ।

आदस्य वातो अनु वाति शोचिरस्तुर्न शर्याम् (ऋ०१।१४८।४) । अनुवाति अनुकूलः सन्वातीत्यर्थः ।

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा (ऋ० ४।२७।१) । अनुशब्दो व्याप्तौ रूढः । अन्ववेदं साकल्येनाजनामित्याह । **पूषेमा आशा अनु वेद सर्वाः** (ऋ०१०।१७।५) । अत्रापि पूर्वोक्त एवार्थः । **न निविदः पदे विपरिहरेत्** (ऐ० ब्रा० ३।११) । वैपरीत्येन न पठेदित्यर्थः । विपरिहरणं विपर्यासनं भवति क्रमव्युत्क्रमणं वा ।

अनु वं श्रेयांसं पर्यावर्तन्ते (ऐ० ब्रा० २।२०) । पश्चादासनं गृह्णत इत्याह ।

अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः (वा० सं० २६।१६) । इह अनुपुषिः क्रमेण वर्धने वर्तते ।

उन्नो वीरां अर्पय मेषजेभिः (ऋ०२।३३।४) । उदर्पय—उत्थापय, उल्लाघान् कुर्वित्यर्थः । अद्यापि यो गदान्निर्गतो भवति स उत्थित इति लोकभाषयोच्यते ।

पिशाचास्तस्मान्नश्यन्ति न पापमुपजानते (अथर्व० ४।३३।८) । **उपजानत** उपलभन्ते, स्वस्य बोधस्य विषयं कुर्वते । लोक उपज्ञाऽऽद्यज्ञानं भवतीति प्रतीतम् । तिङि प्रयोगस्तु दुर्लभः ।

यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते (अथर्व०२।३३।१) । निर्गमयामीत्याह । लोके तु विपूर्वस्य वृहतेः प्रयोगो दुर्लभः । **मुष्कावर्हो गवामिव** (अथर्व० ३।९।२) । मुष्कमावृहत्युन्मूलयतीति मुष्कावर्हः । पाणिनीयेऽप्याङ्पूर्वो वृहिरत्रार्थे प्रयुक्तः—**मूलमस्यावर्हि** (४।४।८८) ।

शतेन पाशैरभिधेहि वरुणैनम् (अथर्व० ४।१६।७) । **अभि तं निऋतिर्धत्तामश्वमिवाश्वाभिधान्या** (अथर्व० ४।३६।१०) । अत्र सर्वत्राभिधाञ् बन्धने वर्तते । अभिधानीति बन्धनरज्जुर्भवति । **उभोमयाविन्नुपधेहि दंष्ट्रा** (ऋ०१०।

८७।३) । उपरिधेहीत्यर्थः । **उप स्मनि दधानो घुर्याशून् त्सहस्राणि शतानि वज्रबाहुः** (ऋ० ४।२९।४) । उपदधानः संयोजयन्नित्यनर्थान्तरम् ।

ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति (ऋ० १।११६।८) । अवनीतमित्यवहितमाह । उन्निन्यथुः = निष्क्रमयामासथुः । लोके उत्पूर्वो नयतिः प्रसिध्यति प्रयोगेषु, नावपूर्वः ।

दाशराज्ञे परियत्ताय विश्वतः सुदासे (ऋ० ७।८३।३८) । परियत्तः परिवेष्टितो रुद्धो भवति । परिपूर्वस्य यतेर्लोके प्रयोगो दुर्लभः ।

अञ्जः समुद्र मवजग्मुरापः (ऋ० १।३२।२) । अत्रावपूर्वो गमिर्नीचैर्गमने वर्तते । लोके त्ववगमनं बोधनं भवति । अवगच्छति वेदार्थम् । अञ्ज इति शीघ्रार्थेऽव्ययम् ।

अपाधमदभिशस्तीरशस्तिहा (ऋ० ८।८९।२) । अत्र ऋच्यभिशस्तिशब्देन हिंसकमरिमभिप्रैति सायणः, अरिकृतां हिंसां वा । अन्यत्राऽभिशस्तिश्चारित्रदूषणं भवत्याक्षारणा वा । असकृद्धि वेदेऽभिशस्तिपा इत्येवं विशिष्यन्तेऽग्न्यादयो देवाः ।

मा वः परि ष्ठात्सरयुः पुरीषिणी (ऋ०५।५३।९) । सलिलस्य पूर्णा सरयुर्युष्मान्मा प्रत्यूहिष्ट, गतिप्रतिबन्धं मा स्म करोदित्याह । लोके तु पर्यवाभ्यामुभाभ्यामयमर्थ उच्यते । **पर्यवस्था विरोधनमित्यमरोक्तेः** ।

इन्द्रं यं विश्वा भुवनाभिसन्दधुः (ऋ० १।१०१।६) । अभिसन्दधुराभिमुख्येन स्थापयन्ति स्वेषु कृत्येष्विति सायणः । वयं तु जानीमोऽभिसन्धिरभिप्रायो भवति, तेनाभिसन्दधतेऽभिप्रयन्ति इच्छन्तीत्यर्थ इति पश्यामः ।

ब्रह्म विद्वान् ब्रह्मैवाभिप्रैति ((कौ० ब्रा० १।४) । अभिपूर्व इण् प्राप्तौ वर्तते, स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा० १।३।७२) इत्यत्र यथा । **संवर्तयंस्तमः सूर्यात्** (बृह० दे० २।६३) । निवर्तयन्नित्याह । अन्यत्र विरलतमोऽप्यमर्थः ।

विमुच्या वयोऽवसायाश्वान् (ऋ० १।१०४।१) । अवसायेति विमुच्येत्यनर्थान्तरम् । स्यतिरुपसृष्टो मोचन इति निरुक्तम् । लोके दुर्लभोऽप्यमर्थः ।

दैवीं वाचं दुन्दुभ आगुरस्व (अथर्व०५।२०।४) । उदीरयेत्यर्थः । लोके प्रायेणाङ्पूर्वो गुरी उद्यमन इति हिंसार्थं दण्डाद्युद्यमने दृश्यते ।

अमित्रा येऽत्र नः सन्ति तानग्न आ द्या त्वम् (अथर्व० ६।१०४।३) । अत्राङ्पूर्वस्य दो अवखण्डन इत्यस्य प्रयोगः । लोके त्ववपूर्व एव प्रचरति प्रयोगः ।

प्रतिशुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् (ऋ० ७।१०४।११) । प्रतिपूर्वः शुषिरत्र शोषणमात्रमेवार्थमाचष्ट इति सायणभाष्यादवसीयते । अहन्तु मन्ये प्रतिरिह सद्योऽर्थकः, नानर्थकः । यथा प्रतिधुक्छब्देन सद्यः क्षरितं पय उच्यते यथा वा प्रत्युत्पद्यते मतिः, प्रत्युत्पन्नमतिरित्यत्र च तथैव प्रकृत इति सद्यस्कशोषणमेव प्रार्थ्यमानमर्थवद् भवति ।

अयं चापरश्चित्रीयाकर उपसर्गकृतोऽर्थसङ्क्रमो वेदे—**कलिः शयानो भवति संजिहानस्तु द्वापर** (ऐ० ब्रा० ७।१५) इत्यैतरेयश्रुतौ सम्पूर्व ओहाङ्गताविति धातुः शय्यापरित्यागे वर्तते न तु सङ्गमने । गत्यर्थकानि तु धात्वन्तराणि समुपमृष्टानि साहित्यसंहितं गमनमाहुः । परिसम्पूर्व एष त्यागमात्रेऽपि । **विद्युतो ज्योतिः परिसंजिहानम्** (ऋ० ७।३३।१०) यथेह ।

निनदीभ्यां स्नातेः कौशले इति सूत्रे (पा० ८।३।८९) निपूर्वः स्नातिः प्रसिद्धः । निस्नातः, निष्णात इति । प्रस्न इत्यत्र प्रपूर्वोऽपि विदितः । उत्पूर्वो विरलं विदितोऽविदितो वेति स वेद्यते—**त उत्स्नाय रयिमभिप्रतस्थुरित्यृग्वर्णः** (२।१५।५) । उत्स्नायोत्तीर्येत्यर्थः । अन्यत्रापि (तै०ब्रा०३।५।७।३) शृत उत्स्नातीति प्रयोगः ।

परापूर्वः षिच क्षरण इति धातुः पराकरणे वर्तते । धात्वर्थस्योपसर्गेणात्यन्तं बाधात् । **मा नो गयमारे अस्मत् परासिचः** (ऋ० ९।८१।३) । **माऽहं प्रजां परासिचम्** (आश्व० श्रौ० १।११।८) ।

सम्पूर्वो ग्रहिर्लोक एकीकरणे संक्षेपणे पिण्डीकरणे वा वर्तते, वेदे तु विधारणे सन्धारणे वापि दृश्यते—**इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते** (ऋ० ३।३०।५) । संगृभ्णा समधारय इत्यर्थः । अयमेव गीतादिषु प्रथितस्य लोकसंग्रहशब्दस्यार्थः । लोकसङ्ग्रहो नाम लोकस्य सन्धारणं लोकस्थितिप्रकल्पनं भवति ।

उपसर्गवशाद् धातूनां सकर्मकत्वाकर्मकत्वे

उपसर्गो विशेषकृदित्यसकृदुक्तचरम् । उपसर्गेण च तथाजातीयको धात्वर्थे विशेष उपजन्यते यथाजातीयकेनाकर्मको धातुः सकर्मकतां याति सकर्मकश्चाकर्मकताम् । तदिदं लोकवेदयोः प्रसिध्यद्भिः प्रयोगैर्व्यक्तयामः ।

श्लिषशीङ्स्थासवसजनरुहजीर्यतयः केवला अकर्मकाः सोपसर्गास्तु सकर्मकाः । अत्र दिशः काश्चिदनुक्रामामः—

अध्ययनायोपश्लिष्यति गुरुं शिष्यः। गुरुमुपसीदति गुरौ संनिधीयत इत्यर्थः।

अद्य देवदत्तो गुरुमुपशयिष्यते, श्वो यज्ञदत्तः। एष तयोरुपशयने पर्याय उपशाय इत्यर्थः।

सुवर्गे लोकेऽप्सरस एनं जाया भूत्वोपशेरते इति व्याकरणमहाभाष्ये। **उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि** (ऋ० १०।१८।८)। उपशेषे समीपे शेष इत्यर्थः। **प्रतिशिष्ये जलनिधि विधिवत्कुशसंस्तरे** (भा० वन० २८३।३२)। अन्यत्र प्रतिशीङ् अकर्मकोपि—**अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः** (रा० ६।२१।१)। प्रतिशब्दः सामीप्ये। **अहं पतीन्नातिशये** (भा० वन० २३३।३८)। पतीनतिक्रम्य न शये, पतीनां शयनादर्वाङ् नाहं शये, नाहं संविशामीत्याह याज्ञसेनी। प्रायशोऽतिशायनशब्दोतिक्रमणमात्रं गुणादिभिराह। तत्र शीङ् गतिसामान्यमेवार्थमुपसङ्क्रान्त इति विज्ञेयम्। **ज्योगेव दीर्घं तम आशयिष्ठाः** (ऋ० १०।१२४।१)। आस्थाय शयनमकार्षीरित्यर्थः। **यस्ते गर्भमभीवा दुर्णामा योनिमाशये** (ऋ० १०।१६२।२)। अत्र शीङ् आस्थान आश्रित्यावस्थाने वर्तते। **कुसुमान्याशेरते षट्पदाः** (विक्रमोर्वश्यां २।२२ पाठान्तरम्)। **दत्तमिष्टमपि नान्वशेत सः** (शिशु० १४।४५)। दत्ते इष्टे च नान्वतप्यतेत्यर्थः। अत्रार्थेऽयमकर्मकोपि। तथा च भारविप्रयोगः—**पुराऽनुशेते तव चञ्चलं मनः** (कि० ८।८)। चपलं ते मनोऽचिरादनुशयमनुतापं भक्ष्यतीत्यर्थः।

आदित्यमुपतिष्ठते। पूजयतीत्यर्थः। **गङ्गा यमुनामुपतिष्ठते।** गङ्गा यमुनया संगच्छत इत्यर्थः।

अहरहः सन्ध्यामुपासीत। **कस्तान्युधि समासीत जरामरणवान्नरः** (भा० वन० १०।२७)। समासीतेति प्रतिरुन्धीतेत्याह। भीष्मद्रोणादयो युद्धेऽशक्याः प्रतिसमासितुम्। क्वचिदकर्मकोपि—**तव राम रणे शक्तास्तथा प्रतिसमासितुम्** (रा० ५।६७।२०) इत्यत्र यथा।

देवासुरा यज्ञमुपावसन्नस्मभ्यमनुवक्ष्यत्यस्मभ्यमिति (ऐ० ब्रा० २।१५)। यज्ञं प्रत्यैक्षन्तेत्यर्थः। **वनमुपवसन्ति यतयः।** वने वसन्तीत्यर्थः।

अनुजातो माणवको माणविकाम्। माणविकायाः पश्चाज्जात इत्यर्थः।

आश्चर्यं षड्गुर्नाम गिरिमारोक्ष्यति। उपसर्गकृतेनार्थान्तरेण सकर्मकत्वम्।

अनुजीर्णो वृषलीं देवदत्तः। वृषल्याः कृते जरां गत इत्यर्थः।

मा माने केवलोऽकर्मकः । यथा—

तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः (शिशु० १।२३)। **प्रमदादमानिव पुरे महीयसि** (शिशु० १३।२)। प्रमदो हर्षः। अमान् इति मातेः शता। नञ्। परिपूर्वस्तु सकर्मकः, **उदरं परिमाति मुष्टिना**। मिमीत इत्यर्थः।

वृतु वर्तनेऽकर्मकः। अनुपूर्वस्तु सकर्मकः। **मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः** (गीता ४।११)। निरुपूर्वोपि—कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी (तेन निर्वृत्तम् पा० ४।२।६८ इति सूत्रे वृत्तौ)।

वैदूर्यान् काञ्चनान्दान्तान्फलं ज्योतीरसैः सह।
कृष्णाक्षाँल्लोहिताक्षांश्च निर्वर्त्स्यामि मनोरमान्॥ (भा०वि० १।२५)

निर्वृतिरयं निष्पत्तिमाचक्षाणोऽकर्मकोपि क्वचित्। तद्यथा—**हस्तपाद-शिरसां पञ्च पिण्डका निर्वर्त्तन्ते** (सुश्रुते १।३२२)। **निर्वर्तेतास्य यावद्भि-रितिकर्तव्यता नृभिः** (मनु०७।६१)। सिध्येदित्यर्थः। अत एव सकर्मकत्वलाभाय णिच्प्रयोगः संगच्छते—**मङ्गलोदग्रं तदहो निर्वर्तयत्** (राज० ३।२४७)। आङ्पूर्वस्तूभयथा दृष्टः। **न च पुनरावर्तते** (छां०उ०८।१५।१)। इत्यत्राकर्मकः। **आवर्तते गृहमित्यत्र** च सकर्मकः। अतिपूर्वोपि वृतिस्तथाविधः। कालोऽतिवर्तते। अत्येति काल इत्यर्थः। पितुर्वचनमतिवर्तते। लङ्घत इत्यर्थः।

संजानातिः सकर्मकोऽकर्मकश्चार्थभेदात्। मातरं संजानाति। स्मरतीत्यर्थः। अत्र सकर्मकः। **संजानते न यतन्ते मिथस्ते** (ऋ० ७।७६।५)। अत्रायमकर्मकः। संजानते संविद्रते ऐकमत्यं प्राप्ता भवन्ति। **भृगुरपश्यद् आपो वा अस्पर्धन्त वयं पूर्वं प्रज्ञं वक्ष्याम इति ता एतयर्चा समज्ञपयत् समन्या यन्त्युप यन्त्यन्याः** (ऋ० २।३५।३) **इति ताः समजानत** (ऐ० ब्रा० २।२०)। उक्तोऽर्थः।

आङ्पूर्वः प्लवतिः सकर्मकोऽकर्मकश्चार्थभेदात्—

सवासा जलमाप्लुत्य (मनु०५।७७)। जलमवगाह्य जले निमज्ज्येत्यर्थः। **प्रथमो वार्षिको मासः श्रावणः सलिलाप्लुतः** (रा० ४।२५।१२)। सलिलेन पूर्ण इत्यर्थः। **स भीमसेनस्य रथम्...आपप्लुवे सिंह इवाचलाग्रम्** (भा० कर्ण०८४। ३६)। उत्प्लुत्यारुरोहेत्यर्थः। **आप्लुतश्च ततो यानं चित्रसेनस्य** धन्विनः (भा० द्रोण०११६।२५)। **समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा** (भा० वन० ५६।५१) इत्यादिषु सकर्मकः। **स्नातक आप्लुतो व्रती** (अमरे)। आप्लुतः कृतस्नानः, स्नात्वा समावृत्त इत्यर्थः। **गङ्गायामाप्लुतः शुचिः** (भा० वन० ४२।२०)। इत्युभयत्राकर्मकः। अतएव प्रस्नापनेर्थे णिचं प्रयुञ्जते—**माता**

कुमारमादायाऽऽप्लाव्य (पार० गृ० २।१)। **एतेषु तीर्थेषु काशिकन्याऽऽप्लावयद् गात्राणि** (भा० ५।३७। ५६)। **सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा** (मनु० ३।२४४)। अभिषिच्येत्यर्थः। **मूत्रेणाप्लाव्य सप्ताहं स्नुहीक्षीरे ततः परम्** (सुश्रुते० १।६८।१३)।

वसतिरकर्मकः। सोपसर्गकस्तु सकर्मकः। उपाऽनुभिः सहचरितस्य वसेः सकर्मकस्य प्रथन्ते प्रयोगाः। निर्पूर्वस्य तु विरलः प्रयोग इति स दर्श्यते—**कृच्छ्रवने वासमिमं निरुध्य** (भा० वन० २५।१८)। **रोहिणीं निवसत्येव प्रीयमाणो मुहुर्मुहुः** (सोमः) (भा०शल्य० ३५।५५)

अवपूर्वो लबिः सकर्मकोऽकर्मकश्चार्थानुरोधात्—**अन्तरेण तालुके य एष स्तन इवावलम्बते** (तै० उ० १।६।१)

स्कन्दिर् गतिशोषणयोः। आङ्पूर्वोऽवपूर्वश्च नैयत्येन सकर्मकः—अरातिमास्कन्दति। **पुरीमवस्कन्द लुनीहि नन्दनम्** (शिशु० १।५१)। **ते (मरुतः) स्पन्द्रासो नोक्षणोऽतिष्कन्दन्ति शर्वरीः** (ऋ० ५।५२।३)। उक्षणः=जलस्य सेक्तारः। अतिष्कन्दन्ति=अतिक्रामन्ति।

भा दीप्तावकर्मकः। सोपसर्गस्तु सकर्मकतां याति—**यं यं लोकं मनसा संविभाति** (संकल्पयति) इति मुण्डके। **एकैवोषाः सर्वमिदं विभाति** (ऋ० ८। ५८।२)। विभाति प्रकाशयति इति यावत्।

जीव प्राणधारणेऽकर्मकः, आङ्पूर्व उपपूर्वस्तु समाश्रयणे वर्तमानः सकर्मकः—यमाजीवन्ति पुरुषं सर्वभूतानि संजय (भा० उद्योग० १३३।४३)।

युध सम्प्रहारेऽकर्मकः। निपूर्वः प्रतिपूर्वश्च सकर्मकः। **तानहं नियोत्स्यामि** (भा० विराट० २।७)। **कोऽन्यो बृहन्नलायास्तान् प्रतियुध्येत सङ्गतान्** (भा०वि० ६८।४२)। **तांश्च प्रतियुध्यन्वै युद्धे राजा प्रवासितः** (रा० १।७०। २९)। प्रवासितो हत इत्यर्थः। वसेश्चौरादिकस्य स्नेहच्छेदापहरणेषु पठितस्य निष्ठायां रूपम्। अतएव प्रमापणं निवर्हणं निकारणं विशारणं प्रवासनमिति पर्यायान् पठत्यमरः।

रु शब्देऽकर्मकः, उपसर्गवशात्सकर्मकः। **सारसाभिरुताः** (नद्यः)। निनादिता इत्यर्थः। **गै शब्देऽकर्मकः**, उपसर्गवशात्सकर्मकः—**हंसकारण्डवोद्गीताः** (नद्यः) (भा० वन०)।

क्रमु पादविक्षेप इति धात्वर्थेन कर्मणा उपसङ्ग्रहादकर्मकः। आङ्पूर्वस्तु प्रायेण सकर्मकः—**आक्रान्तं न किं केन वा** (भर्तृ०)। परं ज्योतिषामुद्गमनेऽर्थेऽ

वं मंक एव—आक्रमते सूर्यः । आक्रामति धूमो हर्म्यतलात् । निपूर्वोपि सकर्मको दृष्टः—**महान्तं चिदर्बुदं निक्रमीः पदा** (ऋ० १।५।१६) ।

प्रतिपूर्वो नन्दिरभिपूर्वश्च सकर्मकतां न व्यभिचरति—(१) **तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः** (रघु० १।५७) । आशिषा वर्धयामासतुः । (२) **आत्मविडम्बनामभिनन्दन्ति** (३) । **अतस्ते वचो नाभिनन्दामि** (शा०२) । न रोचयामीत्यर्थः । (४) **तापसीभिरभिनद्यमाना शकुन्तला तिष्ठति** (शा० ४) ।

आङ्पूर्वं स्तिष्ठतिराश्रयणे प्रतिज्ञाने वा प्रवृत्तो नित्यं सकर्मकः—आस्थितनिषेधो वक्तव्यः (वार्तिकम्) । **रथमास्थितः । रथमास्थाय** । रथमारुह्येत्यर्थः । **अस्तिं सकारमात्रमातिष्ठन्ते वैयाकरणाः** । अयमर्थः । केचिद् वैयाकरणा अस भुवि इत्यपठित्वा स भुवीत्यभ्युपगच्छन्ति ।

एकं वा इवं विबभूव सर्वम् (ऋ० ८।५८।२) । नाना बभूवेत्यर्थः । विशब्दो वैविध्ये ।

क्षौतिरकर्मकः । सोपसर्गस्तु सकर्मको दृष्टः । पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् (मनु० ५।१२५) । अवक्षुतम्=उपरिकृतक्षुतम् ।

लम्बेरकर्मकस्यावस्रंसनार्थस्योपसर्गवशः सकर्मकत्वलाभो भवति न च भवत्यर्थानुरोधात्—**उर्वशी राजानमवलम्बते** । राजानमवष्टम्भमाश्रयत इत्यर्थः । **चित्रलेखाहस्तावलम्बिता शकुन्तला । हस्तेऽवलम्ब्य तम्** (कथा० ५।१२१। १७३) । **अवलम्ब्यापराः कण्ठे हरिम्** (हरि०८३।२६) । न च भवति—**अन्तरेण तालुके य एष स्तन इवावलम्बते** (तै० उ० १।६।१) । **के भवन्तोऽवलम्बन्ते गर्ते ह्यस्मिन्नधोमुखाः** (भा०आदि०१३।१६) । **वृक्षशाखास्ववलम्बन्ते चीराणि मुनीनाम्** इत्यत्राकर्मकः ।

शन्न इषिरो अभिवातु वातः (ऋ० ७।३५।४) । अस्मानभिलक्ष्य वात्वित्यर्थः । **सुखो वातोऽभिवाति माम्** (भा० ४।२२३८) ।

वाशृ शब्द इत्यभिनोपसृष्टः सकर्मकः । केवलस्त्वकर्मकः । नहि काको वाश्यत इत्यार्हीयत्वं निवर्तते इत्यत्र भाष्येऽसकृदकर्मकः प्रयुक्तः । **अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः** (ऋ० २।६।२) । इत्यत्राभिपूर्वः सकर्मकः । आक्रन्दनमाह्वानं चार्थः । वश कान्तौ इत्यस्माल्लिटि ववाशिरे इति रूपमिति भ्रमति सायणः । तथा कल्पनायां हि बह्वनुपपन्नं भवति । वाश्यते रूपस्वीकारे तु ऋज्वी प्रक्रिया ।

लीङ् श्लेषणेऽनुपसर्गोऽकर्मकः, उपेनोपसृष्टस्तु सकर्मको दृष्टः, तद्यथा—

यथा सर्वाणि भूतानि मृत्योर्भीतानि मारिष । धर्ममेवोपलीयन्ते कर्मवन्ति हि यानि च ॥ तथा कर्ण महेष्वासं तव पुत्रा नराधिप । **उपालीयन्त** सन्त्रासात् पाण्डवस्य महात्मनः (भा० कर्ण०८१।५०) ॥

उपविशिः प्रायेणाकर्मकः । सकर्मकोपि बहुत्र दृष्टोऽर्थे निर्विशेषः । तद्यथा—उपो नमोभिर्वृषभं विशेम (ऋ०८।९६।६) । तमार्तम्—उपाविशत्सा परिषत् समन्तात् (गो० सं रा० २।७९।४०) । द्रौपदी यत्र भर्तुनुपाविशत् (भा० आदि० २।३०३-४) । हौत्रब्रह्मत्वे स्वयं कुर्वन्ब्राह्मासनमुपविश्य—(खा० गृ० १।१।२४) । लङ्कामुपनिविष्टे च रामे—(रा० ६।१६।२६) ।

निपूर्वः पदिः सकर्मकोऽकर्मकश्चार्थानुरोधात्—**नारी निपद्यत उप त्वा मर्त्य प्रेतम्** (अथर्व० १८।३।१) । उपशेत इत्यर्थः । **देवा अग्रे न्यपद्यन्त पत्नीः** (अथर्व०१४।२।३२) । पत्नीभिः समभवन्नित्यर्थः । **महिषीमश्वायोपनिपादयन्ति**—(श० ब्रा० १३।५।२।२) । अत्राकर्मकःसकर्मकत्वलाभाय णिच्प्रयोगः ।

प्लवतिः केवलोऽकर्मको नैयत्येन । सोपसर्गस्तु प्राप्ति-व्याप्त्यनुगमनादि श्रुवाणः सकर्मकः सम्पद्यते । तद्यथा—**सामभिः स्वर्गं लोकमभ्यप्लवन्त** (श० ब्रा० १२।२।२।१०) । प्राप्नुवन्नित्यर्थः—**यश्चाधर्मं चरेल्लोभात्कामक्रोधानुप्लवन्** (भा० शां० २१२।७) । अनुप्लवन्=अनुप्लवमानः=अनुगच्छन् । **रजसाभिप्लुता नारी** (मनु० ४।४१) । व्यवसनाभिप्लुतेऽपि वा (याज्ञ०२।५०) । असाध्यव्याध्युपसृष्टे इत्यर्थः । अनुप्लवोऽनुचरो भवति । अनुप्लवतेऽनुगच्छति स्वामिनम् इति व्युत्पत्तेः ।

निष्क्रामतिरकर्मकः । अभिनिष्क्रामतिस्तु सकर्मकः—**स्रुघ्नमभिनिष्क्रामति द्वारं स्रौघ्नम्** (पा० ४।३।८६ सूत्रवृत्तौ) ।

निष्पदिरकर्मकः, अभिनिष्पदिस्तु सकर्मकः । **एतां दिशमभिनिष्पद्य** (श० ब्रा० १३।८।१।६) । अभिनिष्क्रम्येत्यर्थः । अतएव सकर्मकत्वलाभाय णिचं प्रयुञ्जते वाचि कोविदाः—**प्रज्ञा वर्धमाना चतुरो धर्मान् ब्राह्मणमभिनिष्पादयति** (श० ब्रा० ११।५।७।१) । **प्रापयतीत्यर्थः** ।

प्रपूर्वो वृतिरकर्मकः, अभिप्रपूर्वस्तु सकर्मकः—एतां दिशं रथोऽभिप्रवर्तताम् (ऐ० ब्रा० ८।१०) । **यत्र भागीरथीं गङ्गां यमुनाभिप्रवर्तते** (रा० २।५४।२)।

प्राङ्पूर्वः पूङ् पवने सकर्मकः—**इन्द्रस्येन्दो जठरमापवस्व** (ऋ०९।७०।१०) । **ते नः सहस्रिणं रयिम् पवन्तामा सुवीर्यम्**—(ऋ० ९।१३।५) । पवन्तां क्षारयन्त्वामित्यर्थः । केवलस्त्वकर्मकः—पवमानः पवते, वातो वातीत्यर्थः ।

संविशेद् आर्तवे स्त्रियम् (मनु० ३।४८)। मिथुनीभावे संविशिः सकर्मकः स्वापे त्वकर्मकः—संविष्टः कुशशयने निशां निनाय (रघु०१।९५)।

आङ्पूर्वः सदिः सकर्मकः—**आ वामुपस्थमव्रुहा देवाः सीदन्तु यज्ञियाः** (ऋ० २।४१।२१)। उपपूर्वश्च। **अथैनं प्रस्तोतोपससाद** (छां० उ० १।११।४)। विनयेनोपपेदे।

ष्ठा गति निवृत्तावकर्मकः। सोपसर्गस्त्वर्थवशात्सकर्मकोऽपि। **एष दात्यूहको हृष्टः.....प्रवदन्मन्मथाविष्टः स्वकान्तामनुतिष्ठति** (रा० ३।७९।१२)। क्वचिदुपसर्गासङ्गेऽपि तत्कृतं सकर्मकत्वं न। न तत्र समुह्येत्सुधीरिति तदपि कलया दर्शयामः—उपपूर्वो विशिः क्रियान्तरमुद्दिशिलक्षणं क्रोडीकृत्य तदपेक्षया सकर्मकत्वं लभते। तद्यथा—**अथ प्रायमुपवेक्ष्यामीत्यत्रापि** प्रायमनशनमुद्दिश्य कृतासनो भविष्यामीत्येवार्थः। प्रतिशब्देऽतिरिक्तेपि स एवार्थः—**आर्यं प्रत्युपवेक्ष्यामि यावन्मे संप्रसीदति**। (रा० २।११।३)।

यत्रोपसर्गकृतमर्थान्तरं यद्वशश्चाकर्मकतया प्रयोगो धातूनां सकर्मकाणां स इदानीं प्रस्तूयते विषयः—

कश्चिदेवोपसर्गः सकर्मकस्य धातोरकर्मकतां प्रकल्पयति न सर्वोऽविशेषेण। सति च तस्मिन्नेकस्मिन्नर्थविशेष एवाकर्मकत्वमुत्पद्यते नार्थान्तरे। प्रतिनियतविषया हि शब्दाः। तद्यथा **असु क्षेपणे**। स्पष्टं सकर्मकोऽयम्। उपसर्गयोगे कृतेऽर्थवैशिष्ट्ये सकर्मकत्वं न जहाति प्रायेण—कन्यां जातां परास्यन्ति। उदस्यति पुच्छं गौः। व्यास चतुरो वेदान् इति कृष्णद्वैपायनो व्यास इत्युच्यते। एकार्थीभावाय पदानि समस्यति। अभ्यस्यति वेदम्। शीलयतीत्यर्थः। **त्रिभिरभ्यस्ता षड् अष्टादश सम्पद्यन्ते**। अभ्यस्ता गुणिता आहता उच्यन्ते। **परमस्यति** विपरिपूर्वो विभ्रमे विपर्यये वा वर्तमानोऽकर्मको भवति—**स्तम्भ इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यति** (मीमांसाभाष्ये १।१।५)। **दैवेनोपहतस्य बुद्धिरथ वा पूर्वं विपर्यस्यति** (मुद्रा०६।८)। **प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः** (भर्तृ०३।१९)।

विपूर्वः करोतिरकर्मकोऽपि—ओदनस्य पूर्णाश्छात्रा विकुर्वते (पा० १।३।३५ सूत्रवृत्तौ)। **निष्फलं चेष्टन्त इत्यर्थः**।

अपपूर्वः किरतिरकर्मकः। अपाच्चतुष्पाच्छकुनिष्वालेखने (पा०६।१।४२)। **अपस्किरते वृषभो हृष्टः**। भूरिति कर्म तु प्रसिद्धेः परित्यक्तम्। परित्यागश्चापपूर्वमेव किरति गोचरयति ससुट्कं न किरतिमात्रम्।

विह उपचये सकर्मकः। **सुधया विग्धे सद्मभित्तीः**। सम्पूर्वस्तु संशये वर्त-

मानोऽकर्मकः—**ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि** (शिशु० २।१२)।

णह बन्धने सकर्मकः। सम्पूर्वकस्तु सज्जीभावे वर्तमानोऽकर्मकः। **नहि कुलशैलनिवहवाहिनो वायवः संनह्यन्ति प्रतितरले तूलराशौ** (हर्ष०)।

षो अन्तकर्मणि सकर्मकः। अवपूर्वः पर्यवपूर्वश्चाकर्मकोऽपि दृष्टः—**शक्तिर्मामवस्यति हीनयुद्धे** (कि० १६।१७)। अवस्यति=नश्यति।

सृजतिस्तौदादिको नित्यं सकर्मकः। उपपूर्वस्तूपगमने सामीप्यप्राप्तौ वर्तमानोऽकर्मकः—अनाहूतोपसृष्टानामनाहूतोपजल्पिनाम् (भा० आदि० १३६।१८)। उपसृष्टा उपगता इति समानोऽर्थः।

वेष्ट वेष्टने सकर्मकः। प्रतिसम्पूर्वकः संकोचेऽर्थेकर्मकः। **प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं यथा** (भा० उ०)।

णीञ् प्रापणे सकर्मकः। अपपूर्वस्तु मार्गभ्रंशमाचक्षाणोऽकर्मको भवति—**न कश्चिन्नापनयते पुमानन्यत्र भार्गवात्** (भा०उ०३६।३०)। अपनयते नयाद् भ्रश्यति, अपचरति दुर्वृत्तो भवतीत्यर्थः।

वृणोतिः सकर्मकः। निर्पूर्वेस्तु सोऽकर्मको दृष्टः=**निर्ववार मधुनोन्द्रियवर्गः** (शिशु० १०।३)। निर्ववार निर्वृतिं लेभे, सुखितो बभूवेत्यर्थः।

षिच क्षरणे सकर्मकः—सिञ्चति केदारं जलेन (कुल्याभिः)। उत्पूर्वस्तु दृप्तीभावमाचक्षाणोऽकर्मकः—**न तस्योत्सिषिचे मनः** (रघु० १७।४३)। नोत्सिषिचे=न जगर्व। तथा च मल्लिः—सिञ्चतेः स्वरितेत्त्वादात्मनेपदम्।

अनुपूर्वो वदिरकर्मकोऽपि। तत्र चानोरकर्मकादिति सूत्रं (पा० १।३।४६) लिङ्गम्। अनुवदते कठः कलापस्य। अनुवदति वीणा। क्वणतीत्यर्थः। **विपञ्चीं, सा तु तन्त्रीभिः सप्तभिः परिवादिनीत्यमरः**। अत्र परिवदिरप्यकर्मकः। **सम्पूर्वो** वदिर्नित्यमकर्मकः—**संवदन्त्यक्षराणि** (मुद्रा०)। **सिद्धानां न विसंवदन्ति वाचः** (अभिनन्दकृते रामचरिते १४।१००)। मिथ्या न भवन्तीत्याह।

मृष तितिक्षायां दिवादिः सकर्मकः। **मृष्यन्तु लवस्य बालिशतां तातपादाः** (उत्तर० ६)। परिपूर्वस्त्वकर्मकोऽसूयतिना समानाभिधेयो भवति—**पुरा मृष्यति दैवाय**। परेर्मृषः (पा०१।३।८२) इति सूत्रवृत्तावुदाहरणम्। परिमृष्यति=असूयति।

आङ्पूर्वो ण्यन्तो लीङ् सम्मानने पूजाधिगमनेऽकर्मकः। **लियः संमानन-**

शालीनीकरणयोश्च (पा० १।३।७०)। इति सूत्रे **जटाभिरुल्लाप्यत** इत्युदाहरणम्। पूजां समधिगच्छतीत्यर्थ इति काशिका।

हन हिंसागत्योः सकर्मकः प्रसिद्धः। यम उपरम इत्यपि। आङ्पूर्वयोरेतयोरकर्मकत्वमपि प्रसिध्यति—**भित्त्वाऽस्य शिर आहतेऽनवहितस्य। आयच्छन्ते लोहान्यूष्मसहचरितानि**। आयतानि भवन्तीत्यर्थः। सकर्मकत्वे **कः कपाटमाहन्ति, भारमुद्यच्छतीत्युदाहरणे**।

घृषु संघर्षे इति सकर्मकः। संपूर्वः स्पर्धायां वर्तमानोऽकर्मकः। तथा च रघुकारस्य प्रयोगः—**स प्रयोगनिपुणैः प्रयोक्तृभिः संजघर्ष सह सन्निधौ** (१९।३६)।

उपसम्पूर्वः पदिर्मरणे वर्तमानोऽकर्मकः:—**श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्** (मनु० ५।८१)। **प्रमीतोपसम्पन्नप्रोक्षिता हते** इत्यमरः (२।७।२६)।

निविशस्वेति दुःखार्तः सन्तानस्य चिकीर्षया (भा०आदि०४६।१४)। निविशस्वेत्यनेन दारान् परिगृहाण, गृहस्थो भवेत्याह। अतएव सकर्मकत्वलाभाय णिच्प्रयोगः सूपपन्नो भवति—**दौःष्यन्तिमप्रतिरथं तनयं निवेश्य** (शा०४)। **नैवेशिकानि च ततः श्रोत्रियेभ्यो गृहाणि च** (याज्ञ० १।३३३)। नवैशिकानि =विवाहयोग्यानि इत्यर्थ इति मिलाक्षरा। **ते चेदभिनिवेक्ष्यन्ते नाभ्युपैष्यन्ति मे वचः** (भा० उ० ७७।१७)। अभिनिविशिरिहाकर्मकोऽविवक्षितकर्माऽऽग्रहमभिनिवेशमाचष्टे। अन्यत्र कर्म श्रूयते—**सन्मार्गमभिनिविशते। गुरुभिरभिनिविष्टं लोकपालानुभावैः** (रघु०२।७५)॥ अभिनिविष्टमित्यभिव्याप्तमाह।

श्रयतिः केवलः सकर्मकः, सम्पूर्वस्त्वकर्मकोपि। तद्यथा—**अभ्राणि विद्युतो वर्षमुच्छिष्टे संश्रिता श्रिता** (अथर्व० ११।७।२१)। **चूतेन संश्रितवती नवमालिकेयम्** इति शाकुन्तले (४।१२)।

आङ्पदिरकर्मकोऽपि—**अर्थधर्मौ परित्यज्य यः काममनुवर्तते। एवमापद्यते क्षिप्रं राजा दशरथो यथा** (रा० २।५३।१३)॥ विपदमाप्नोतीत्यर्थः। **एवमापद्यते** (माल०)। इदमर्थादापन्नं प्रसक्तं सिद्धं भवतीत्यर्थः। **एष रावणिरापादि वानराणां भयङ्करः** (भट्टि० १५।५९)। आपादि आपन्नः प्राप्त इत्यर्थः। कर्मविवक्षायां तु सकर्मकोऽपि—**तस्य मत्स्यः पाणौ आपेदे**—(श० ब्रा० १।८।१।१)। निपदिरकर्मकोपि—**स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते** (ऋ० १०।१४६।१५)। शेते इत्यर्थः। **एष हीदं सर्वं गोपयत्यङ्गो न निपद्यते** (श० ब्रा० १४।१।४।९)। न निपद्यते न विश्राम्यतीत्यर्थः।

आङ्पूर्वः पतिरकर्मकोऽपि—आ ··· न इषा वयो न पप्तता (ऋ० १।८८।१)। आपप्तत=आपतत=आगच्छत। प्रबलद्वीपिनमापतन्तमुच्चैः (राज०३)।

तत्र काष्ठं कुठारेण पाट्यमानं विधेर्वशात्।
आपत्य तस्य जङ्घायां भित्त्वान्तः प्रविवेश तम्॥ (कथा० २४)

निर्वहतिः प्रायेणाकर्मकः। तद्यथा—**चर्यां विना योगोऽपि न निर्वहति।** (सर्व०द०)। न सिध्यतीत्यर्थः। **तत्कर्म निर्वहेच्च नः** (कथा० ३२।३२)। सिध्येदित्यर्थः। **गृहस्थाश्रयेण सर्वाश्रमिणो निर्वहन्ति** (मनु० ३७।७) इत्यत्र कुल्लूकः। अर्थान्तरे तु—**ओघ इमाः सर्वाः प्रजा निर्वोढा** (श० ब्रा० १।८।१।२) इत्यत्र सकर्मकः। निर्वोढेति निर्पूर्वाद् वहेर्लुटि रूपम्। प्लावयितेति चार्थः।

निविशतिरकर्मकः सकर्मकश्चार्थभेदात्। **मयि गोष्ठे निविशध्वम्** (आश्व० गृ० २।१०।६)। **पद्मेन चैव ष्ठूहेप निविशेत सदा स्वयम्** (मनु० ७।१८८)। सैन्यनिवेशं कुर्यादित्यर्थः। **द्वारवत्यां पुरा पार्थ निविशन्त्याम् इति श्रुतिः** (भा० अनु० ७०।२)। **विश्वमन्यन्नि विशते यदेजति** (ऋ०१०।३७।२)। **निवेष्टुकामस्तु पुरा अष्टावक्रो महातपाः। ऋषेरथ वदान्यस्य कन्यां वव्रे महात्मनः॥** (भा० अनु० १६।११)॥ निवेष्टुकामः=विवाहमिच्छुः=दारकर्मणा गृही बुभूषुः।

संरभिस्त्वरायां वर्तमानोऽकर्मकः। **अश्मन्वती रीयते, संरभध्वम् उत्तिष्ठत प्रतरता सखायः** (ऋ० १०।३५।८)। संरभध्वमिति त्वरध्वम् इत्याह।

अनुपूर्वोऽपि कपि चलने क्वचिदकर्मकः। सौहृदेन तथा प्रेम्णा सदा मय्यनुकम्पसे (भा० आश्वमे० २।१०)। अन्यत्र प्रायेण सकर्मकः।

एतावतोपसर्गकृते धातूनां सकर्मकत्वाकर्मकत्वे साधूपदर्शिते भवत इत्यलं विस्तरेण।

अर्थविकासक्रमः

अथेदानीमुपसर्गकृते धात्वर्थविकासे कः क्रम इति समासेन **विन्यस्य निबन्धमिममवसाययामः।**

सम्पूर्वस्तिष्ठतिर्मरणे वर्तत इत्युक्तमधस्तात्, अर्थबाधस्योदाहरणमिति चोदाहारि। अर्थान्तरसमुन्मेषस्य कः क्रम इति न प्रादर्शीति स **सम्प्रति प्रदर्श्यते।** तिष्ठतिरयं गतिनिवृत्तिमाह। सम्-शब्दश्च तस्याः परिपूर्णताम्। **अत्यन्तं निवृत्तगतिको निश्चेष्टो मृतो भवतीति संस्थितशब्देनोच्यते।**

वृतु वर्तने इति धातुः सम्पूर्वो जन्क्रियायां वर्तते। **हिरण्यगर्भः सम बर्ततेति** श्रुतेः (ऋ०१०।१२२।१)। **संवर्तिकेति नवं कुमुदकिसलयम्** इति कोषाच्च। तन्नातीव चित्रम्। जनिर्नाम प्रादुर्भावः स एव सम्यग्भवनम्। सम्शब्दः सम्यग्भावे। संवर्तत इत्युक्ते जायत इति गम्यते। संवर्तत इत्युक्ते प्रलीयत इति च। **संवर्तश्च भूतसम्प्लवः प्रलयः**। तत्कस्मादेषा विरुद्धार्थोपलब्धिः? उच्यते। **संवर्तते जनपद** एकीभवति समवैतीत्यर्थ इति वाक्यपदीयटीकायां वृषभदेवः। इह सम्शब्दः सहभावे एकीभावे वर्तते। को नाम प्रलयः। प्रपञ्चस्यास्य कार्यजातस्य कारणे लय इत्येव। कारणेन सहैकरूप्यं तदात्मनाऽवस्थानमिति यावत्। अतो युज्यते स संवर्तशब्देनाभिधीयेतेति।

डुधाञ् इति धारणपोषणयोः पठितः। अभिपूर्वश्चायं कथने वर्तते। तत्कस्मात्। उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इति चेत्। किं तद्बलमिति पृच्छामः। सति च तस्मिन् कस्मान्न धात्वर्थो यत्र तत्रान्यत्र च निरवग्रहं नीयते। किमिति विहरतिः परिक्रमणमनुक्त्वाऽऽहननं नाचक्षीत? किं वाऽनुहरतिरनुकरणमनभिधाय संहननं नाभिदधीत। न ह्युपसर्गो धात्वर्थेनात्यन्तमसम्बद्धमर्थान्तरं प्रकल्पयेत्। अवश्यमुपसर्गकारितेप्यर्थान्तरसङ्क्रमे हेतुनोपपादकेन भाव्यम्। यावत्स हेतुर्नोद्भाव्यते तावद् बलादन्यत्र नीयत इति प्रतिज्ञानमात्रेण कथं परितोषः प्रादुःष्यात्परीक्षकाणाम्? अभिपूर्वो दधातिस्तावद् बन्धनेऽर्थे प्रयोगमवतरन् दृष्टः। तद्यथा—**रशनामिर्दशभिरभ्यधीताम्** इति ऋग्वर्णः (१०।४।६)। **यस्त्वा मृत्युरभ्यधत्त जायमानं सुपाशया** इत्याथर्वणो वेदः (३।११।८)। **तेनाहमिन्द्रजालेनामूंस्तमसाऽभिदधामि सर्वान्** इति च (८।८।८)। **अश्वाभिधानीमादत्ते** इति तैत्तिरीयश्रुतिश्च (५।१।२।१)। **पतिर्यद् बध्वो वाससा स्वमङ्गमभिधित्सते** (ऋक् १०।८५।३०)। बन्धनरूपोऽयमर्थ औपदेशिकेनार्थेन न न सम्बद्धः। धारणेन धात्वो र्थेन सम्बद्धश्चायमिति न यत्नोपपाद्यः। यद्धचभितो धार्यते तद् बध्यत इति शब्दान्तरेणोच्यते। अभिधानं च शब्दैरर्थानां निबन्धनमेवेत्यभिदधातिः कथनमर्थान्तरं सङ्क्रान्तः कालेन।

प्रतिपूर्व ईक्षतिरवसरप्रतिपालने वर्तते। कः क्रमोऽत्रार्थविकासे। अयमत्र क्रमो भाति—प्रतिः प्रातिलोम्ये पराङ्भावे प्रसिद्ध आभिमुख्येऽपि। **अभिप्रती आभिमुख्य** ( ) इति वचनात्। आभिमुख्ये तावत्—**गार्हपत्यं प्रतीक्षते** (भा० श्रौ०६।१२।६)। **प्राशित्रं प्रतीक्षते** (का० श्रौ० २।२।१५)। **तत् (मधु) प्रतीक्षते** (आग्नि०गृ० १।४)। **प्रतीक्षमाणोऽभिजनं तदार्तमनार्तरूपः** (रा० २।३३।२६)। अत्र सर्वत्राभिमुखीभूयेक्षत इत्येवार्थः। अत्राभिमुख्येनेक्षण-

मेवार्थो न तु प्रतिपालनम्। प्रतिपालनं च नातो दवीयानर्थः। यतः प्रियो जन ऐष्यति तां दिशम् प्रति निदृक्षयाऽवस्थानमेव तद् भवति। प्रतिः प्रातिलोम्ये खल्वपि। प्रतिगतप्रतिपिद्धप्रतिरुद्धादिषु तथा दर्शनात्। प्रतिलोमं पराङ्मुखं भूय प्रतिनिवृत्य यदीक्षण तदपि प्रतिपूर्वं ईक्षतिराह मुख्यया वृत्त्या। तथा चापस्तम्बधर्मसूत्रे (२।६।१५।६) प्रयोगः—**ततप्रत्ययमुदकमुत्सिच्याप्रतीक्षा ग्राममेत्य।** अप्रतीक्षा अपराङ्मुखीभूय पृष्ठतोऽनिरीक्षमाणा इत्यर्थः। **अहं चाप्रतीक्षमेव सङ्ग्रामभूमिपर्यन्तमागत** इति च महावीरचरिते। अविद्यमाना प्रतीक्षा पृष्ठतोऽवलोकन यस्मिन् कर्मणि तद्यथा स्यात्तथेत्यर्थः। यं प्रतीक्षामहे तमुद्दिश्य पुरो वा पृष्ठतो वालोकयामो इशौ व्यापारयामो यावत्स नोपैति।

प्रतिपूर्व ईक्षतिः पूजामप्याह। तत्कस्मात्। अत्र प्रतिपालनं नार्थः। यच्च सादरमभिमुखमवलोकनमुपेतस्य जनस्य सा प्रतीक्षाऽतिथिपूजा। तथा च प्रयोगः—**तस्यारण्येनैवात ऊर्ध्वं होमो वृत्तिः प्रतीक्षाऽऽच्छापनं चेत्यापस्तम्बधर्मसूत्रे** (२।६।२२।१७)।

आङ्पूर्वो लभिः स्पर्शे वर्तते। **मुग्धे हि जन्तौ मृतोऽयं स्यान्न वा मृत इति संशयाना ऊष्मास्ति नास्तीति हृदयदेशमालभन्ते** इति ब्रह्मसूत्रभाष्ये (३।२।२०) भगवच्छङ्करपादाः। आलम्भनं हिंसनं भवति। अश्वालम्भो गवालम्भ इत्यादिषु प्रथितोऽयमर्थः। तत्कथमयमर्थान्तरोपसङ्क्रमोऽजनीत्युच्यते —स्पर्शो हि तैक्ष्ण्यं गुणमादाय हिंसया परिणमते इति नातिरेकणीयम्। **पदरुजविशस्पृशो घञ्** इति कर्तरि घञन्तः स्पर्शशब्दो रोगवचनः। अत्र स्पृशतिः क्लेशने व्यथने वा वर्तते, मर्मस्पृग् इत्यत्र यथा। यद्येवं प्रकृते आलभेर्हिंसनमर्थः साधूत्प्रेक्षितो भवति।

अतिपूर्वो शीङ् शय इति धातुविशेषणेऽतिक्रमणे वा वर्तते। अतिशायने तमबिष्ठनौ (५।३।५५) सूत्रे यथा। तदर्थे कथमस्य वृत्तिरभूदिति विमृश्यम्। न ह्यकस्मादर्थान्तरोपगमो भवति। भारते **नाहं पतीनतिशये** (वन० २३३।३८) इति याज्ञसेन्या वचनं स्मर्यते। तत्र पतीनतिक्रम्य न शये न स्वपिमीत्यर्थः। प्रकृते शयनलक्षणो धात्वर्थोऽतिक्रमणेन निगीर्ण इत्यतिक्रमणमात्रे वर्तते।

अवपूर्वको दधाति मनोदाने वर्तते—**अत्रार्थेऽवधानं दीयमानं प्रार्थये** इत्यत्र यथा। कुतोऽस्यार्थान्तरस्य लब्धिः। अवपूर्वकोऽयं धातुरादौ नीचैर्निधानेऽवर्तिष्ट—**त्रितः कूपेऽवहितो देवान् हवत ऊतय** इत्यत्र ऋग्वर्णे (३।१०५।१७) तथा दर्शनात्। अव इत्यधोऽर्थे रूढः। तत् पूर्वत्रान्तरङ्गस्य मनसो नीचैर्निधानमपरत्र बहिरङ्गस्यार्थस्य शरीरादेः। नीचैर्निधानं तूभयत्र समानम्। तेनाऽप्यमर्थान्तरसङ्क्रमो

न क्लिष्टकल्पना भवति ।

अवपूर्वो गमिर्ज्ञाने वर्तते । तत्कस्मात् । किं सर्वे गत्यर्था ज्ञानार्था इत्यस्मात् । नेत्याह । अवपूर्वस्य गमेश्छन्दसि निम्नगतौ वृत्तिर्दृश्यते—**अञ्जः समुद्रमवजग्मुरापः** (ऋ० १।३२।२) । **प्रवणाः सत्यः समुद्रमाप्नुवन्तीत्यर्थः ।**

उत्सेको गर्वो भवति उत्सिक्तश्च गर्वितः । दर्पाध्मातः । तत्कस्मात् । सिञ्चति नमि द्रवद्रव्यस्य कर्मत्वे क्षरणे क्षारणे वा वर्तते । **सिञ्चति जलं जलसेचः । करणत्वे** त्वार्द्रीकरणे—**अभिषिञ्चति पादपानुदकेन** । उत्पूर्वोऽयम् आवण्ठं परिपूरणे प्रयुज्यते—तथा च दाशतये प्रयोगः—**उद्वा सिञ्चध्वमुप वा पृणध्वम्** (ऋ० ७।१६।११) । **तद्धैक उत्सिच्य छर्दयन्ति** इति शतपथे च (११।४।२।६) । कर्मवाचिनि तिङि धातुरयं श्रीयमाणस्य पयसः पात्राद्बहिः संप्लवने वर्तते—**अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते** इति (भा० पु० १०।६।५) । ततो य आत्मसंभावनयाऽऽत्मनि न माति स उच्यत उत्सिच्यत इत्यर्थान्तरसङ्क्रान्तिर्न विप्रकृष्टान्तरा भवति ।

अतिसन्धानं वञ्चनं भवति । तत्कस्मात् । उच्यते । मूलतः सन्धेरतिक्रम एवातिसन्धानमभूत् । तच्च वञ्चनान्नातिरिक्तमिति कालपरिवासेनाऽविशेषेण वञ्चने प्रतारणेऽर्थे सङ्क्रान्तिः । अत्र कौटल्यवचनं मानम् । **कल्याणबुद्धिना सन्दधीत । शठं तथेति प्रतिगृह्यातिसन्दध्यात्** (कौ० ६।३।१४१) । सन्धिमतिक्रामेदित्यर्थः ।

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् (रघु० ४।८६) । **आजह्रेऽनुतष्ठौ, चकारेत्यर्थः** । आहरतिरत्रार्थे कस्मात्प्रवृत्तः । आहरणं हि मुख्यया वृत्त्या समाहरणं सम्भरणं भवति । तेनाजह्रारेत्यस्य यज्ञसंभारान् संबभारेति मुख्योर्थः । ततस्तेषां यज्ञार्थत्वादाहरणमनुष्ठाने पर्यवस्यति । अनुष्ठानमाहरणशब्देनोच्यते । तादर्थ्यात्तच्छब्द्यम् ।

अन्वेषणं विचयनं मार्गणमिति प्रसिध्यतितमाम् । कुतोऽस्यार्थस्य लब्धिः । इष गताविति दिवादि र्मुख्यया वृत्त्याऽनुसरणे वर्तते । तथा च भारते प्रयोगः—**अन्विष्यामि भर्तारमहं प्रेतवशं गतम्** (आदि० १२५।१२४) । यद्विचयनार्थमनुसरणं तदेवान्वेषणं भवति नातोऽतिरिक्तं किञ्चित् ।

सन्दोह इति समूहं सङ्घातं वक्ति । **कुन्दमाकन्दमधुबिन्दुसन्दोहवाहिना मारुतेनोत्ताम्यति** (मालती० ३) । कथमस्यार्थस्योपलम्भः । सम्शब्दः संसर्गं माह । समुदितः सम्पिण्डितो दोहः सन्दोह इति मुख्यया वृत्त्याऽर्थः । तथा च हरि-

वंशे विष्णुपुराणे च प्रयोगाः—**सर्वघोषस्य सन्दोहः क्रियतां किं विचार्यते** (हरि० २।१६।११)। **त्रिरात्रं चैव सन्दोहः सर्वघोषस्य गृह्यताम्** (हरि० २।१०।१४)। **सर्वघोषस्य सन्दोहो गृह्यतां मा विचार्यताम्** (वि०पु०५।१०।३६)। दुहि वाच्यार्थतिरस्कारेण क्रियासामान्ये वर्तमानः समा सहायेन समूहमात्रमाचष्टे। अयमेवात्रार्थान्तरसङ्क्रमे क्रमः।

शमु उपरम इति धातुर्निपूर्वः श्रवणे वर्तते। तत्कस्मात्। निशाम्यत्यत्रेति निशान्तं गेहम्। अत्र निपूर्वस्यापि शम एवार्थः। अर्थान्तसङ्क्रमे त्वयं क्रमो भाति—शान्तः प्रशान्तः समाहितचेता एव सम्यक् श्रवणायालं भवति। नितरां शाम्यति निशाम्यतीति निशमिः श्रवणार्थं सङ्क्रान्तः।

अर्थान्तरसङ्क्रमो दिङ्मात्रमिह दर्शितः। अशक्त्या विरम्यते परिच्छेद्यभूम्ना च। भूयोविद्या अभियुक्ता अत्र भूयोऽभियोक्ष्यन्त इति सम्प्रार्थये।

इत्युपोद्घातः।

अथेदानीं लौकिके वैदिके च साहित्ये स्थितान्धातूपसर्गयोगानर्थसहचरितानुक्रामामः। तत्र प्र इति प्रथममुपसर्गमुपादाय तावदुच्यते—

प्र

—**अञ्च्** (**अञ्चु गतिपूजनयोः**)। प्राणो नाम प्राग्गमनवान् नासाग्रवर्ती (वे० सा० ३८)। **प्राञ्चति अग्रे गच्छतीति प्राक्**।

—**अञ्ज्** (**अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु**)। प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा (ऋ० ५।५४।१)। **प्रानज=प्राङ्क्त=प्रापयत**। प्राञ्जनात् उत पर्णधेः (अथर्व० ४।६।५)। **प्राञ्जनात् प्रलेपात्**।

—**अद्** (**अद भक्षणे**)। यन्वेव वरुणस्य यवान् प्रादंस्तस्माद् वरुणप्रघासा नाम (श० ब्रा० २।५।२।१)। **प्रादन् निःशेषमभुञ्जतेति यावत्**।

—**अन्** (**अन प्राणने**)। ता वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्रियरे (श० ब्रा० २।५।२।२)। **प्राणत्यः=निःश्वसत्यः**।

—**अर्च्** (**अर्च पूजायाम्**)। अर्चत प्रार्चत प्रियमेधासो अर्चत (ऋ०८।६९।८)। **प्रशब्दः प्रकर्षे**। **प्रार्चत सूयः पूजयतेत्यर्थः**। प्रानर्चुरर्च्या जगदर्चनीयम् (भट्टि० २।२०)।

—**अर्ज्** (**अर्ज वर्ज अर्जने, अर्ज प्रतियत्ने**)। रेतःसेकं प्रार्जयति (नि० ३।५)। **प्रार्जनमिह वितरणं प्रवेशनं भवति**।

—**अर्थ्** (**अर्थ उपयाच्ञायाम्**)। त्वामिहैकाकिनीं दृष्ट्वा निर्जने गहने वने। प्रार्थयिष्यन्ति राजानः। (भा० उ० १७६।११)। **अत्र प्रशब्दो विशेषकृन्न। प्रार्थयिष्यन्ति (=प्रार्थयिष्यन्ते) इत्यर्थयिष्यन्ते कामयिष्यन्ते वरयिष्यन्त इत्येवाह**। न्यग्रोधस्य ततः शाखां प्रार्थयामास भारत। सन्निपत्य तु शाखायां न्यग्रोधस्य विहङ्गमः (भा० सौ० १।३६-४०)। **अत्र प्रार्थयतिर्भृगयणे विचयने वर्तते**। प्रार्थयध्वं तथा सीताम् (भट्टि० ७।४८)। **अत्रापि स एवार्थः**। यो न शक्यो बलात्कर्तुं देवैरपि सवासवैः। तं त्वं प्रार्थयसे मन्द बालश्चन्द्रमसं यथा (भा० उ० १३०।३७)॥ **प्रार्थयसे ग्रहीतुमिच्छसीत्यर्थः**। दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति (रघु० १५।५)। **प्रार्थ्यताम्=अभियाय्यताम्**। क्षमते न जनं त्वदर्पितं यमिनामिन्द्र रिपुस्तु हिंसितुम्। शशिनं मृगशत्रुराश्रितं न मृगं

प्रार्थयते हि जातुचित् (जा० ह० ४।२३)। **इह प्रार्थयतिरास्कन्दने आक्रमणे वर्तते।** असौ अश्वानीकेन यवनानां प्रार्थितः (माल० ५)। **इहापि तथा।** किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः (कि० २।२१) **अभियाति। उत्प्लवत इत्यर्थः।** यदिशब्दः प्रतिबद्धो विधायकोऽनुवादं प्रार्थयते (लौ० गृ० सू० १।२४ देवपालः)। **प्रार्थयत आकाङ्क्षति अपेक्षत इति वा।**

—**अव्** (**अव रक्षणगतिकान्त्यादिषु**)। हत्वी वस्यून् प्रायं वर्णमावत् (अथर्व० २०।११।६)। हत्वाऽऽर्यं वर्णं प्रावत्। **प्रशब्दः प्रकर्षमाचक्षीत अनर्थकतां वाऽश्नुवीत।** देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये (ऋ० ५।४६।७, अथर्व० ७।५१।१)। **अत्र प्रशब्दो नियतं प्रकर्षमाचष्टे केवलस्यावेः प्रयोगसन्निधेः।** तुजये तोकाय अपत्याय। प्र सुन्वतः स्तुवतः शंसमावः (ऋ० १।३३।७)। **शंसं प्रावः स्तोत्रेऽवाधाः, स्तवने दत्तावधानोऽभूरित्यर्थः।** मेघाः प्रावन्तु पृथिवीमनु (अथर्व० ० ४।१५।६)। **तर्पयन्त्विवत्यर्थः।**

अश् (**अश भोजने**)। प्राश्नन्ति ब्राह्मणा ओदनम् (आप० श्रौ० ५।२।७।३)। **अपि प्रशब्द आदिकर्मणि स्यात्, यथा शिशुकमधिकृत्य विहितेऽन्नप्राशनाख्ये गृह्ये कर्मणि।** प्राशितं पितृतर्पणम् (मनु० ३।७४)। वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः (मनु०)। **प्राशिताभिरन्तरास्यप्रविष्टाभिरिति कुल्लूकः। व्यक्तं प्रशब्दोऽत्रादिकर्मणि। पानेप्यश्नातिः प्रसिद्धः, अपोऽशानेत्यादिषु तदर्थस्य दर्शनात्।** अध प्राशान ऋतुथा हवींषि (ऋ० १।१७०।५)। **इह प्रशब्द आदिकर्मणि न। प्रकर्षे वर्तते। कणेहत्य भुङ्क्ष्वेत्यर्थः।**

—**अस्** (**अस भुवि**) प्र नृभिर्नृवन्तः स्याम (अथर्व० ३।१६।३)। **प्रस्याम=प्रभवेम। प्रभवः समर्था भवेमेत्यर्थः।** प्र दातुरस्तु चेतनम् (ऋ० १।१३।११)। **प्रास्तु=भूयोस्तु। चेतनस्य प्रबोधस्य भूमाऽस्तु, इतरापेक्षयाऽऽधिक्यमस्तु, अन्याभिभावि चैतन्यमस्त्वित्यर्थः।**

—**अस्** (**असु क्षेपे**)। अग्नौ प्रास्ताऽऽहुतिरादित्यमुपतिष्ठते (मनु० ३।७६)। **प्रास्ता क्षिप्ता। प्रशब्दोऽनर्थकः।** प्रास्यादात्मानमग्नौ (मनु० ११।७३)। प्रच्छिद्योदपात्रे प्रास्यति (श० ब्रा० ३।१।२।८)। **अत्र प्रशब्दः प्रकर्षमाह। स चानादरलक्षणो वेगलक्षणः कात्स्न्र्यलक्षणो वा।**

—**आप्** (**आप्लृ व्याप्तौ**)। राद्धिः प्राप्तिः समाप्तिः (अथर्व० ११।६।२२)। **प्रेप्सितस्य फलस्याधिगमः प्राप्तिरिति सायणः।** क्व प्रेप्सन्ती युवती विरूपे (अथर्व० १०।७।६)। **क्व प्रेप्सन्ती किं स्थानमाप्तुमिच्छन्ती (=इच्छन्त्यौ) इत्यर्थः।** विराटस्य रथानीकं मत्स्यस्यामित्रघातिनः। प्रेप्सन्तं समरे द्रोणं के वीराः पर्यवारयन् (भा० द्रोण० १०।७१)॥ **प्रेप्सन्तमासादयितुमिच्छन्तम् इत्यर्थः।** अप्राप्य नदीं पर्वतः स्थितः। **परावरयोगे च** (पा० ३।४।२०)

इत्यस्योदाहरणम्। अत्र प्राप्तिर्बौद्धिकी, न वास्तवी। नदीतोऽवरस्मिन्प्रदेशे पर्वतः स्थित इत्यर्थः। परेण पूर्वस्य योगो गम्यते। परनदीयोगेन पर्वतो विशेष्यते। नासिका-शब्दश्च नसं प्राप्नोति। नस्रूपां परिवृत्तिमाप्नोति। नासिकाया नस् इत्यादेशो भवतीत्यर्थः। किं क्रियाभिरिति प्रेप्सा वा (नि० ६।३२)। प्रेप्सा कल्पना भवति। प्रकृते कीकटा इति किंकृता इत्येवं निरुच्यतां किं क्रियाभिरिति वेति यास्कस्याभिसन्धिः। दुर्गस्तत्र इतिप्रेप्सा इत्येकपद्यमभिमन्यते। एवमभिप्राया नास्तिका इति चार्थापयते।

—इ (इण् गतौ) प्रेता जयता नरः (अथर्व० ३।१९।७)। प्रेता (=प्रेत) प्रतिष्ठध्वम्, प्रस्थानं कुरुत, अभियातेत्यर्थः। मा प्र गाम पथो वयम् (अथर्व० १३।१।५९)। मा परागच्छेमेति सायणः। दूरे मा भूम। सुपन्थानं मा हासिष्मेत्यर्थः। अत्र प्रशब्दो विप्रकर्षे वर्तते। पथ्ययैवेतः स्वस्त्या प्रयन्ति (ऐ० ब्रा० २।५)। प्रयन्ति प्रक्रमन्त इत्यनर्थान्तरम्। पुत्रे राज्यं समासज्य कुर्वीत प्रायणं रणे (मनु० ९।३२३)। प्रायणं स्वेच्छामरणम्। अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति। स इतः प्रयन्नेव पुनर्जायते (ऐ० उ० ४।४)। प्रैति लोकान्तरं प्रतिष्ठते, म्रियत इत्यर्थः। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति (तै० उ०३।१)। 'प्रयन्ति' इति शत्रन्तं रूपम्। प्रलयं गच्छन्तीत्यर्थः। न पुराऽऽयुषः स्वःकामी प्रेयात् (म्रियेत)। प्रायणं भगवत्प्रोक्तं भुञ्जते वाऽग्रभोजनम् (भा० शां० ३३५।२५)। प्रायणमित्युपहारमाह। रथोपस्थे प्रायगतं विशस्तम् (भा० आदि० १।२०१)। प्रायो मरणार्थमनशनम्। प्रायानाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम् (गौ० ध० सू० २।५।११) प्रायो महाप्रस्थानम्। प्राये प्राये जिगीवांसः स्याम (ऋ० २।१८।८)। प्रायो युद्धार्थं प्रस्थानम्। आजिरित्येके। इन्द्रं प्रातर्हवामहे इन्द्रं प्रयत्यध्वरे (ऋ० १।१६।३)। प्रप्रति प्रतिष्ठमाने प्रवर्तमाने। युष्मान् प्रयत्यध्वरे (ऋ० ८।७।६)। वयं हि त्वा प्रयति यज्ञे (वा० सं० ८।२०)। आ वो देवास ईमहे वामं प्रयत्यध्वरे (वा० सं० ४।५)। यदद्य त्वा प्रयति यज्ञे अस्मिन् (अथर्व० ७।१०।२।१)। अत्र सर्वत्र प्रपूर्वस्य इणः प्रवृत्तिरेवार्थः। प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति (ऋ० ९।९६।१) प्रैति=अग्रतो याति। ययोः प्रायं नान्वानशे कश्चन (अथर्व० ४।२५।२)। प्रकृष्टां ययोर्गतिं नाप कश्चिदित्यर्थः। सूर्याया वहतुः प्रागात् (ऋ० १०।८५।१३)। वहतुर्वहनं प्रासरदित्यर्थः। सा गदा तत्करान्मुक्ता प्रागाद् द्रोणजिघांसया (भा० भीष्म० ५३।१९)। उक्तोऽर्थः। सा गदा वेगवन्मुक्ता प्रायादिति पाठान्तरम्। एति प्र होता (ऋ० १।१४४।१)। प्रैति प्रक्रामतीत्यर्थः। प्र ते वज्रः प्र मृणन्नेतु (ऋ० ३।३०।६)। दूराद् दूरतरं गच्छतु इत्याह। तस्मात्तद् (रुधिरम्) आतृण्णत्प्रैति रसो वृक्षादिवाहतात्

(बृ० उ० ३।९।२८)। **ऊर्ध्वं निःक्रामति, निःसरति, प्रवहति, स्रवति, स्यन्दत इति वैकोर्थः**। **तस्य यथैव प्रायणं तथोदयनम्** (ऐ० ब्रा० ३।४३)। **प्रायणमित्युपक्रममाह**। त्रिवृत्प्रायणा हि यज्ञाः (श० ब्रा० १।३।५।६)। **त्रिवृदादय इत्याह**। **भ्रातृणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित्** (भा० पु० ६।५।३१)। **लोकयात्रां संदिधत्त इति पुराणकृतकल्पितोर्थः**। अद्य ते दर्शयिष्यामि पूर्वप्रेतान् पितामहान् (भा० भीष्म० ८४।५१)। **प्रेतान्=मृतान्**। स्वजनाश्रु किलातिसन्ततं दहति प्रेतमिति प्रचक्षते (रघु० ८।८६)। प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः (गीता १७।४)। **प्रेता योनिविशेषा ये मर्त्यानाविश्य कदर्थयन्ति**। शुश्रुवुर्दारुणा वाचः **प्रेतानामिव** भारत (भा० भीष्म० ६।४६।१९)। **प्रेता निरयालयाः, नारकिणः**। प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये (मनु० ३।१२७)। इह प्रेताः **पितर उच्यन्ते**। प्रेतिरसि धर्मणे त्वा (गो० ब्रा० उ० २।१३)। **प्रेतिः प्रस्थानमुच्यते**। **प्रेतिरिति क्तिन्नन्तम्**। प्रायोदेवता वा (नि० ७।४।१६)। **प्राय इत्यधिकार उच्यते इति दुर्गः**। प्राची प्रेतमध्वरं कल्पयन्ती (वा० सं० ५।१७)। **प्रेतम्=प्रकर्षेण गच्छतम्**।

—**इष् (इष गतौ)**। प्र वाचमिन्दुरिष्यति (ऋ० ९।१२।६)। **प्रेष्यति प्रेरयति प्रयोजयति**। अप्रैषीद् (=प्रैषीद्) राजपुत्री मां सुराहारीं तवान्तिकम् (भा० वि० १६।४) **प्रैषीद् व्यसर्जयीत् इत्याह**। **आप्टिषेणेन सृष्टा देवाप्निना प्रेषिताः** (ऋ० १०।९८।६)। (इषवः) यातुधानप्रेषिताः (श० ब्रा० ७।४।१।२९)। **प्रेषिताः प्रास्ता मुक्ता इत्यर्थः**। रथन्तरं गायेति प्रेष्यति (का० श्रौ० ४।९।७)। **प्रेष्यत्यादिशतीत्यनर्थान्तरम्**। न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे **जनाः** (रा० ५।३९।३९, ५।६८।२२)। **शिष्यन्त आज्ञाप्यन्ते इत्येवार्थः**। मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथं प्रति (भा० कर्ण० ८१।३)। **व्यसर्जयदित्यर्थः**। साश्वं ससूतं त्वरितः पार्थः प्रैषीद् यमक्षयम् (भा० द्रोण० २८।८)। **उक्त एवार्थः**। प्रेषयामि महावेगमस्त्रमस्य विनाशने (रा० ३।३५।४६)। **प्रैषिद्राक्षसः प्रासम्** (भट्टि० १५।७७)। चिन्तयित्वा तु पार्थेभ्यः प्रेषयिष्यामि संजयम् (भा० उ० २१।२०)। **ण्यन्तस्य प्रपूर्वस्य इषेः स एवार्थो योऽण्यन्तस्य**। स्निग्धं वीक्षितमन्यतोपि नयने यत्प्रेषयन्त्या तया (शा० २।२)। **प्रेषयन्त्या व्यापारयन्त्या**। स च मे प्रेषयामास शैवं धनुरनुत्तमम्।···मह्यं वै दीयतामिति (रा० १।७१।१७।)। **सतर्जनं प्रबोधयामासेत्यर्थः**। प्रेषयन्तीव वै दासीर्दासांश्च विविधान्बहून् (भा० वि० ९।९)। **प्रैषं कारयन्ती स्वामिनी सतीत्यर्थः**। इत्युक्त्वा धर्मराजाय प्रेषयामास वै तदा (भा० आश्रम० ८।१०)। **पुरुषं प्रेषयामास धर्मराजो युधिष्ठिर आकार्यताम् इहानीयतामिति**। **एषा संस्कृते भणितभङ्गी**। **अत्रावधातव्यम्**। दुःशासनाय सुबहून् प्रेषयामास सायकान्

(भा० भीष्म० ११७।४२)। **प्रास, विससर्ज, मुमोचेति वाऽर्थः**। रथं श्वेतहयैर्युक्तं प्रेषयामास संयुगे (भा० भीष्म० ८४।४७)। **आज, प्राज, अभ्याजेति वार्थः**। प्रेषितस्तदैव प्रतिपद्येत (आप० ध० १।७।२५)। **प्रेषितः शिष्टो भवत्याज्ञप्तो वा**। तथा प्रचक्रुस्तत्सर्वं राज्ञा **यत्प्रेषितं तदा** (रा० १।११।२५)। **प्रेषितं प्रैषः। राज्ञा यदादिष्टं तत्सर्वं कर्तुमारेभिर इत्यर्थः**। तमिष्टिभिः प्रैषमैच्छन् (ऐ० ब्रा० १।२)। **प्रैषमन्वेष्टुम् इत्याह। तुमर्थे णमुल्। अन्वर्थे प्रशब्दः**। इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः (होता) सूक्तवाकाय (श० ब्रा० १।६।१।१)। **प्रेषितः केतितो निमन्त्रित उच्यते**। नैते जातु निवर्तेरन् प्रेषिता हस्तिसादिभिः (भा० द्रोण० ११२।१८)। प्रेषिताः प्राजिताः।

—**ईक्ष्** (ईक्ष दर्शने)। तथा नोद्धृतसाराणि प्रेक्षते चाप्रदाय च (भा० अनु० १०४।६०)। **प्रेक्षते** (=**प्रेक्षमाणाय**) =**याचकाय। याचको हि दातृमुखप्रेक्षी भवतीति प्रपूर्व ईक्षतिर्याच्ञामाह**। प्रेक्षाकारी याति पदं मुक्तमपायः (किं० १८।२८)। **प्रेक्षा बुद्धिः, तया करोति तच्छीलः**। प्रेक्षापूर्वं मया द्यूतमिदमासीदुपेक्षितम् (भा० सभा० ७३।१४)। **नाटचशालापि प्रेक्षागारं प्रेक्षागृहं वोच्यते। अत्र प्रेक्षा दृश्यं भवति**। यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च। हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः (मनु० ८।१४)॥ **प्रेक्षमाणानां प्रत्यक्षमीक्षमाणानाम्**। गर्हये पाण्डवांस्त्वेव युधि श्रेष्ठान् महाबलान्। ये क्लिश्यमानां प्रेक्षन्ते धर्मपत्नीं (भा० वन० १२।६६)॥ **प्रेक्षन्तेऽविरुन्धाना अगर्हयन्तो वा पश्यन्तीत्यर्थः। प्रसन्नाः सन्त ईक्षन्त इति वार्थः**।

—**ईर्** (**ईर गतौ कम्पने च**)। पशवो वै पूषा। त एतस्य प्रसवे प्रेरते (श० ब्रा० ६।२।३।१२)। **प्रसवोऽभ्यनुज्ञानम्। अभ्यनुज्ञाताः सन्तः प्रचरन्तीत्यर्थः**। यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः (ऋ० १०।३७।६)। **केतुना च प्रेरते गतिमन्ति भवन्ति प्रचरन्ति संचरन्तीत्यर्थः। निविशन्ते=उपरमन्ति, निश्चलानि भवन्ति**। निशितायां (=निशायाम्) निर्वपेन्निशितायां हि रक्षांसि प्रेरते (=पर्यटन्ति) (तै० सं० २।२।२)। त्वय्युदिते प्रेरते चित्रभानो (अथर्व०४।२५।३)। **प्रेरते स्वे स्वे कर्मणि प्रवर्तन्ते**। किमुद्दिश्य काश्यपेन मत्सकाशमृषयः प्रेरिताः स्युः (शा० ४)। **प्रेरिताः=विसृष्टाः**। आत्मानमपि च क्रुद्धः प्रेरयेद् यमसादनम् (भा० वन० २६।६)। **अनन्तरोदित एवार्थः**। मुहूर्त्तं प्रेरितवती गमनागमनश्रमम् (वृ० श्लो० सं० ५।१५५)। **श्रमं विनीतवती विगमितवतीत्यर्थः**।

—**उक्ष्** (**उक्ष सेचने**)। यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितम् (वै० सू० ६।२।५)। **यज्ञियेन जलेन प्रसिच्य संस्कृतमित्यर्थः**। उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम्। न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चाऽवोक्षणं मतम् (गृ० सं० भाष्ये

१।१०३) ॥ प्रोक्षिताऽभ्युक्षिताः सौम्याः (भा० अनु० ९८।३४)। **उक्तोऽर्थः।** तं यज्ञं बर्हिषि प्रौक्षन् (ऋ० १०।९०।७)। त्रिरेवाग्नि प्रोक्षति त्रिः पर्युक्षति (कौ० सू०)।

—**उञ्छ् (उञ्छि उञ्छे)**। उञ्छः कणश आदानमिति **वैजयन्त्यां यादवः।** लिखितमपि ललाटे प्रोञ्छितुं कः समर्थः (हित० १।२१)। **प्रमार्जितुमित्यर्थः।**

—**ऊर्णु (ऊर्णुञ् आच्छादने)** वाससा प्रोर्णुवन्ति (ऐ० ब्रा० १।३)। **अविशिष्टो धात्वर्थः।**

—**ऊह् (ऊह् वितर्के)**। प्राणाय त्वेति प्राचीमुपलां प्रोहति (आप० श्रौ० १।६।२१।६)। **प्रोहति प्रापयतीत्यनर्थान्तरम्।** वाजस्य मा प्रसवेन प्रोहामि (वा० सं० २।१५)। **वाजस्य पुरोडाशादेरभ्यनुज्ञयाऽऽत्मानं प्रेरयामीत्यर्थः। अत्र** महीधर इत्थमाह—**यद्यप्यूहतिर्वितर्कार्थस्तथाप्युपसर्गवशादुत्साहार्थः।** कृष्णाजिने प्रोहति (पिष्टानि) (का० श्रौ० २।५।७)। **प्रोहति प्रक्षिपतीत्यर्थः।** येन पूषा बृहस्पतेरिति त्रिः प्राञ्चं प्रोहति (गो० गृ० २।९।१६)। **प्रोहति सवितर्कं पश्यतीति सत्यव्रतः। प्रोहति प्रेरयति क्षुरमिति तु मुकुन्दशर्मा।**

—**ऋ (ऋ गतिप्रापणयोः)**। प्र वां रथो मनोजवा इयर्ति (ऋ० ७।६८।३)। **प्रेयर्ति=प्रकर्षेणैति।** श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः (ऋ० १०।४५।५)। **प्रार्पणः प्रेरकः। अर्तेर्ण्यन्तस्य प्रयोगः।** देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे (वा० सं० १।१)।

—**कथ् (कथ वाक्यप्रबन्धे)**। यावन्निःश्रेयसं वाक्यं किंचित् प्रकथयाम्यहम् (रा० ५।१।९३)। **प्रकथयाम्युच्चारयामीत्यर्थः। अत्र प्रशब्दः संकोचे परिच्छेदे वर्तते। धात्वर्थं वाक्यप्रबन्धमुक्तिमात्रे पर्यवसाययति।**

—**कम् (कमु कान्तौ)**। न भाभूपूकमिगमिप्यायिवेषाम् (पा० ८।४।३४) इति सूत्रे प्रकमनम् इति काशिकायामुदाहरणम्। **तदिदं प्रपूर्वोऽस्य प्रयोगो व्यवहारं नातिपततीति वेदयति।**

—**कम्प् (कपि चलने)**। प्राकम्पत महाशैलः (भा० वन० १६०।१६)। **बलवद् विधुतोऽभवत्, बलात् क्षुभितोऽजायतेत्यर्थः।**

—**कल् (कल शब्दसंख्यानयोः, कल विल क्षेपे, कल गतौ संख्याने च)**। ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः (हरि० १।३।३९)। प्रशब्दः प्रकर्षे। **प्रकलयति साधु संचष्टे आयुरिति कालः। स एव लोकप्रकालनः।** प्रवृद्धमारुज्य महीप्ररोहम्। प्रकालयन्नेव स पार्थिवौघान् क्रुद्धोन्तकः प्राणभृतो यथैव (भा० आदि० १९३।५)। **प्रकालयन् प्रक्षुदन्नित्यर्थः।** प्रकाल्यमानस्तेनायं

शूलहस्तेन रक्षसा । अन्यगारं प्रति द्वारि मया दोर्भ्यां निवारितः (भा० वन० १३७।७) ॥ **उक्तोऽर्थः** । तं प्रकालयैता गा ब्रह्मबन्ध इत्यब्रवीत् (छां० उ० १८।२) । **इह प्रकालनं प्राजनं भवति** ।

—**कश्** (**कश गतिशासनयोः**) । प्रकश इत्याथर्वणे (६।१।२१) पठ्यते । द्यौः कशा विद्युत्प्रकशः । **तत्र कशप्रहार इत्यर्थः** ।

—**काश्** (**काशृ दीप्तौ**) । सनिःश्वास इवादर्शश्चन्द्रमा न प्रकाशते (रा० ३।२२।१३) । **व्यक्तिं न याति, विस्पष्टं नेक्ष्यत इत्यर्थः** । तावुभौ स्म प्रकाशेते पुष्पिताविव किंशुकौ । **किंशुकवत् प्रतीयेते इत्याह** । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः (श्वे० उ० ६।२३) । **व्यक्ता दृश्या भवन्तीत्याह** । द्वारिणं तापसा ऊचू राजानं च प्रकाशय (भा० आदि १२६।१०) । आगतान्नो निवेदयेत्यर्थः । कदाचित्कुपितं मित्रं सर्वदोषं प्रकाशयेत् (चाणक्य०) । **गुह्यं सर्वदोषं परस्मै कथयेदित्यर्थः** ।

—**काङ्क्ष्** (**काक्षि काङ्क्षायाम्**) । अन्नपानं प्रकाङ्क्षति (सुश्रुत० १।५२।६) । **विशेषेणेच्छति । वर्धते अस्याशनायापिपासे इत्यर्थः** । यथा मृगपतिर्नित्यं प्रकाङ्क्षति वनौकसः (भा० शां० ११६।२३) ।

—**कुप्** (**कुप क्रोधे**) । **प्रकृतिप्रकोपः प्रजानां राजविद्रोहो भवति । वातपित्तादिप्रकोपो वातादेः शरीरस्थस्यातोपो भवति** ।

कृ (**डुकृञ् करणे**) । किं देवदत्तः प्रपचति आहोस्वित्प्रकरोति (८।१।४४ सू० का०) । यत्त्वा क्रुद्धाः प्रचक्रुर्मन्युना पुरुषे मृते (अथर्व० १२।२।५) । **प्रकरोतिरिह हिंसायां वर्तते । प्रचक्रुर्जघ्नुरपाचक्रुरिति वार्थः** । प्रकुर्वीमहि गां सम्यक् (हरि० १।२१।११) । हिंसया साधयेमहीति नीलकण्ठः । कथं हि भीष्मात्प्रथितः पृथिव्यां भयं त्वमद्य प्रकरोषि वीर (भा० भीष्म० ८५।२५) । **प्रकरोषि=अनुभवसि, संवेत्सि** । जानन्नपि नरो दैवात्प्रकरोति विगर्हितम् (पञ्चत० ४।३५) । **प्रकरोति=करोति=आचरति** । प्रकुर्वते वारिदरोध-निर्गताः परस्परालापमिवामला दिशः (कि० ४।३०) । **इहापि प्रकरोतिः करोतेरेवार्थमाह निर्विशेषम्** । कामद्वेषसमायुक्तो मोहात्प्रकुरुते भवान् (भा० उ० १६८।१८) । **भेदं कुरुत इत्यर्थः । प्रकारो भेदो भवति (सादृश्यं च)** । या बुद्धेर्न विधेयतां प्रकुरुते (तन्त्रा० १।१३।१४५) । **प्रकुरुते साधयतीत्यनर्थान्तरम्** । स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिराञ्शुचीन् (याज्ञ० १।३१२) । **विनियुञ्जीत, अधिकुर्यादित्यर्थः** । प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान् । **अनन्तरोदीरितोर्थः** । यदि विधिरेवमपूर्वमर्थं प्रकरिष्यति (मी०शा०भा० ४।२।२४) । **प्रकरिष्यति=अधिकरिष्यति, प्रस्तोष्यति** । एतानि पञ्च रूपाणि विधिवत् क्रियन्ताम् । **साध्यन्तां निष्पाद्यन्ताम्** । तदेतत्ते कपूयचरितं प्रकरोति

लज्जाम् । **प्रकरोति जनयति** । न ह्येतदेकं वाक्यं (अथातो धर्मजिज्ञासेति) पुरस्ताच्च वेदाध्ययनाद् धर्मजिज्ञासां प्रतिषेधिष्यति परस्ताच्चानन्तर्यं प्रकरिष्यति (मी० शा० भा० १।१।१।१) । **प्रकरिष्यति विधास्यति** । तदिन्द्र प्रेव वीर्यं चकर्थ (ऋ० १।१०३।७) । **प्रचकर्थ=आविश्चकर्थ, निरुवहिथेति वार्थः** । पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यति (भा० अनु० ६।२६) । **कर्तुं प्रभविष्यति** । इत्येवमादिभिः कारणैः परस्त्रियमपि प्रकुर्वीत (कामसू०) । **प्रकुर्वीत=अभिगच्छेत्तस्यां सहसा प्रवर्तेत** । या तु कन्यां प्रकुर्यात्स्त्री (मनु० ८।३७०)। **दूषयेत्, अवमानयेत, वेश्यावृत्तिं प्रति प्रेरयेत्** । विष्णुं प्रकुरुते (भट्टि० ८।१८) । **मूर्धनि कुरुते, पूजयतीत्यर्थः** । गाथाः प्रकुरुते=**प्रकथयति** । **अत्रार्थे करोतेर्नित्यमात्मनेपदम्** । एतानि हि यज्ञे प्रतमामिव क्रियन्ते (ऐ० ब्रा० १।६) । **प्रक्रियन्तेतमाम्=बहुलं प्रयुज्यन्ते** । न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन् (पा० गृ० ३।१०) । **न कारयेयुरित्यर्थः** । **नेतरेण क्रियां प्रयोजयेयुः** । यथा दारान् प्रकुर्यात्स पुत्रानुत्पादयेद् यथा (भा० आदि० ४५।३२) । **अत्र प्रपूर्वोपि करोतिः परिग्रहे वर्तते न सहसा प्रवृत्तौ साहसिक्ये** । उत प्रकृणुते युधा गाः (ऋ० ४।१७।१०) । **विजित्य वशे कुरुते इत्यर्थः** । प्रचक्रे सहसा सहः (ऋ० ८।४।५) । **बलेन बलं जिगायेत्यर्थः** । प्र हि त्वा पूषन्नजिरं नयाम स्तोमेभिः कृण्व ऋणवो यथा मृधः (ऋ० १।१३८।२) । **प्रकृण्वः=इतोभिमुखं कुर्वः, इत आवर्तयावः** । शतं प्रकुरुते (पा० १।३।३२ का०) । **धर्मार्थं शतं विनियुङ्क्त इत्यर्थः** । **अत्रार्थे करोतेरात्मनेपदं नियतम्** । पार्श्वतः करणं प्राज्ञो विष्टम्भित्वा प्रकारयेत् (भा० शां० १४२।६) । **पश्चात्करणीयं विशिष्टमधिकं कुर्यादित्यर्थः** । अत्र प्रशब्दो वैशिष्ट्यमाधिक्यमाह । द्वौ नञौ प्रकृतार्थं गमयतः । **प्रक्रान्तमप्रतिषिद्धमर्थमाहतुरित्यर्थः** । पुनर्वररुचिस्तस्मै प्रकृतार्थमवर्णयत् (कथा०) । **अनन्तरोदित एवार्थः** । हित्वाभिषेकं प्रकृतं प्रजाभिः (भट्टि० ३।३६) । **प्रकृतम्=प्रस्तुतम्=प्रारब्धम्** । तत्प्रकृतवचने मयट् (पा० ५।४।२१) । **प्राचुर्येण प्रस्तुतं प्रकृतम्** । प्रियेभ्यः प्रकृतं साधु को नु स्वन्ततरो मम (भा० शल्य० ६४।२३) । **प्रकृतमुपकृतम्** । अर्पितप्रकृतकान्तिभिर्मुखैः (**रघु० १६।१०**) । **अप्रज्ञिप्तस्वाभाविकरागैरित्यर्थः** । अनुष्ठास्यति रामस्य सीता प्रकृतमासनम् (रा० २।३७।२३) । **प्रकृतं प्रस्तुतमिति रामष्टीकाकारः** । प्रकृत्यान्नं यथाशक्ति भोजयेत् सह भार्यया (मनु० ३।११३) । **प्रकृत्य=साधयित्वा, पक्त्वा** । तेन नष्टेषु वेदेषु प्रक्रियासु मखेषु च (हरि० १।४१।१०५) । **प्रक्रियासु=अनुष्ठानप्रकारेषु** । शूराय च सपुत्राय नृपतिः प्रक्रियां ददौ (राजत० ५।४२) । **प्रक्रिया=राजलक्ष्माणि=छत्रचामरादीनि** । नोच्छ्रितं सहते कश्चित् प्रक्रिया वैरकारिका (शां० १११।५६) । प्रक्रिया समुन्नयनमन्यापेक्षयाऽभ्यधिकः समादरो

वा । अकस्मात्प्रक्रिया नृणाम् अकस्माच्चापकर्षणम् (भा० शां ११११।८८) । **प्रक्रिया समुन्नतिरारूढिः** । भोः पश्य दयितापत्ये दुहितुः प्रक्रियामिति (वृ० श्लो० सं० ५।२४३) । **प्रक्रिया=प्रकर्म=परदाराभिमर्शः** । स्थेम्ने न्वेवाथो कर्मणः प्रकृततायै (श० ब्रा० ६।५।४।१)। **प्रकृतता प्रवृद्धिः** । स्त्री प्रकृता सकामा समाना द्वादशपणं दण्डं दद्यात् (कौ० अ० ४।८६) । **प्रकृता दूषिता पारदारिकेण** । सवर्णामप्राप्तफलां कन्यां प्रकुर्वतो हस्तवधश्चतुश्शतो वा दण्डः (कौ० अ० ४।८६)। कुलभार्यां प्रकुर्वाणमहं द्रष्टुं दशाननम् (भट्टि० ८।१६)। **भार्यायां लहसा प्रवर्तमानं परामृशन्तम्** । उपकुर्वन्तमत्यर्थं प्रकुर्वाणोऽनुजीविवत् (भट्टि० ८।१८) । **प्रकुर्वाणः सेवमानः** । स्वजातिगुणसम्पन्नाः स्वेषु कर्मसु संस्थिताः । प्रकर्तव्या ह्यमात्यास्तु नास्थाने प्रक्रिया क्षमा (भा० शां० ११६।३) ॥ **प्रकर्तव्या नियोक्तव्याः । प्रक्रिया नियोगः** । तत्र ये पुण्यकृतस्तेषां प्रकृतयः पराज्वलन्त्य उपलभ्यन्ते (आप० ध० २।२४) । **प्रकृतयः शरीराणि । भोजप्रबन्धे प्रकृतिशब्दो भिषक्कृते भेषजनिर्देशे व्यवहृतः** । नार्थानां प्रकृतिं वेत्सि (भा० वि० ४६।१) । **मूलकारणं प्रधानोपायम्, प्राप्तिकारणमिति नीलकण्ठः** । उपणत्व-मग्न्यातपसम्प्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य (रघु० ५।५४) । मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः (रघु० ८।८।७) ॥ **प्रकृतिः संसिद्धिः स्वभावः** । प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया (कि० २।२१) । **उक्तोर्थः** । महानुभावप्रकृतिः (मालती० १) । **प्रकृतिराकृतिः संनिवेशः संस्थानम्** । गोपालप्रकृतिरार्यकोऽस्मि (मृच्छ० ७) । **गोपालवंशजः, गोपालान्वयज इत्यर्थः** । प्रक्रियेयं न ते युक्ता बहिस्त्वं क्षत्रधर्मतः (भा० आश्व० ७६।३)। **प्रक्रिया वृत्तिर्व्यवहार आचारसरणिरिहोक्ता** । युक्तं चेदम् । बभ्रुवाह-नोऽर्जुनं पितरं नायोधयत् प्रत्युत ब्राह्मणार्थपुरःसरस्तम्प्रति विनयेन निर्ययौ । एवं स्थितेऽर्जुनस्तं तर्जयामास प्रक्रियेयं नेत्यादि त्राभ्युवाच । प्रकर्ता कलहानां च नित्यं च कलहप्रियः (भा० शल्य० ५४।२०) । **प्रकर्ता प्रवर्तयिता जनयिता प्रयोजक इहोक्तः** ।प्रकृते कर्मन् विष्यति (ग्रन्थिम्) (श० ब्रा० ३।६।१।२५) । **प्रकृते सिद्ध (समाप्ते)** ।

—**कृत्** (**कृती छेदने**) । वालान् (अथर्व० (१२।४।७) । स्वधितिना (=क्षुरेण) प्रकृत्य (कौ० सू० ४४) । **अल्पशः कर्तित्वेत्यर्थः** । गृह्णीत बध्नीत प्रकर्ततेमं पचाम खादाम च भीमसेनम् (भा० वन० १५४।१६) । **प्रकर्तत=प्रकृन्तत=खण्डशः कुरुत** ।

—**कृष्** (**कृष विलेखने**) । सत्कुलीनश्च शूरश्च यश्च सेनां प्रकर्षति (भा० आदि० १३६।३५) । **प्रकर्षति नयति प्रणयतीति वा । सेनानीर्भवतीत्यर्थः** । तस्मात्त्वं पुरुषव्याघ्र प्रकर्षेतां महाचमूम् (भा० कर्ण० १०।३५) । **उक्तोर्थः** ।

स्थानादपीन्द्र कुपितः प्रकर्षेत् (रा० ३।४३।४२)। **आकृष्याधः पातयेदित्यर्थः।** एकं तु मम दीनस्य मनो भूयः प्रकर्षति। यदस्याहं प्रियाख्याने न करोमि सदृक् प्रियम् (रा० ५।७०।११)। **मनः प्रकर्षति मनः कदर्थयति चेतस्तुदतीत्यर्थः।** पश्चात् दर्भानास्तीर्य दक्षिणतः प्राची प्रकर्षेदुत्तरतश्च (खा० गृ० १।२।६)। **वस्तारयेदित्याह।** दशमं पादं प्रथमं प्रकर्षति (कौ० सू० ६०)। **अग्रतः प्रसारयति।** स तैः प्रकृष्यताकृष्यत च (रा० ५।६१।१६)। **अग्रतोऽकृष्यतेत्याह।** वेगेन महता नावं प्राकर्षल्लवणाम्भसि (भा० वन० १८७।४२)। **अग्रेऽवाहयदित्यर्थः।** गाण्डीवं च प्रकर्षतः। **प्रकर्षणं धनुरारोपणं भवति।** आयुः प्रकर्षो भोगाश्च लभ्यन्ते तपसा विभो (भा० अनु० ५७।८)। **आयुः प्रकर्ष आयुषो-दैर्घ्यम्।** वपुः प्रकर्षादजयद् गुरुं रघुः (रघु० ३।३४)। **वपुःप्रकर्षो वपुषः सौष्ठवम्, गुणवत्तरत्वम्।** वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः (कु० ३।२८)। **वर्णप्रकर्षः=वर्णस्यानुत्तमत्वम्।** प्रकर्षगतेन शोकसन्तानेन (उत्तर०३)। **प्रकर्षो वृद्धिः।** प्रकर्षतन्त्रा हि रणे जयश्रीः (कि० ३।१७)। **प्रकर्षो गुणैर्ज्यायस्त्वम्।** प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः (भा० आदि० १६०।२५-२६)। **प्रकर्षणं दूरे नोदनमिति नीलकण्ठः।** गत्वा प्रकृष्टमध्वानम् (१२।८२)। **प्रकृष्टं दीर्घम्।** यदा प्रकृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशम् मनु० ७।१७०)। **प्रकृष्टा उत्कर्षं गताः, समृद्धिमतीर्बलवतीर्वेति पर्यवसितोऽर्थः।**

—**कॄ** (**कॄ विक्षेपे**)। तानग्नौ प्रकिरेयुः (श० ब्रा० ४।४।३।१२)। **प्रक्षिपेयुरित्यर्थः।** अश्मनस्त्रीस्त्रीन् प्रकिरति (श० ब्रा० ४।८।४।३)। हिरण्यं च सुवर्णं च वासांसि विविधानि च। प्रकिरन्तो जना मार्गे नृपतेरग्रतो ययुः (रा० २।७६।१५)। नाराजके जनपदे बीजमुष्टिः प्रकीर्यते (रा० २।६७।६)। **अत्रोदाहृति षु सर्वत्र प्रशब्दो विशब्दश्च द्रष्टव्यः। बीजमुष्टिः प्रकीर्यत इति बीजवापमाह।** कामसंजननार्थाय ऋषिपुत्रस्य धीमतः। सर्वतः प्रकिरन्ति स्म ललमाना वराङ्गनाः (रा० १।६।१६)॥ **प्रकिरन्ति=वल्गन्ति=नृत्यन्ति।** विप्रकीर्ण क्वचिच्छत्रं प्रकीर्णकमपि क्वचित् (शि० भा० २१।५४)। चामरं तु प्रकीर्णकमित्यमरः। बद्धमपि स्वेच्छया कामं प्रकीर्णमभिधीयते (शिशु०२।७३)। **प्रकीर्णमसम्बद्धमुच्यते। प्रकीर्णा वाक्=व्यामुग्धं वचः।** प्रकीर्णाम्बरमूर्धजः (भा० वन० २१।२४)। **पर्याकुलकेशी अव्यवस्थितवासाश्च।** प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् (वेणी०)। **नानापुष्पप्रचयरचित इत्यर्थः। प्रकीर्णमैथुन०** (भा० अनु १४५।५३)। **संकीर्णवर्णयोर्मिथुनीभाव०।**

—**कृत्** (**कृत संशब्दने**)। प्रकीर्तितं व्यासमहर्षिणा च (हरि० १।१।५)। **प्रकीर्तितं व्याहृतम्।**

—क्लृप् (कृपू सामर्थ्ये)। प्र णोऽवनिर्देवकृता दिवा नक्तं च कल्पताम् (अथर्व० ५।७।३)। **अवनिर्नदी। जातावेकवचनम्। प्रकम्पतां प्रवर्ततां प्रवर्धताम् इत्यर्थः।** धात्वर्थ एव प्रशब्देन द्योत्यते। कृतार्थोहं गमिष्यामि तव चार्थः प्रकल्पते (रा० २।३१।२४)। **प्रकल्पते सिध्यति पुरा।** हस्तकाष्ठे पुरोडाशमवदातुं प्रकल्पतः (का० श्रौ० १।२।३ सूत्रे टीका)। **अवदानार्हे भवत इत्यर्थः। अत्रापि प्रक्लृपिः सामर्थ्यान्नातिरिक्तमाचष्टे।** पथि यस्तं प्रकल्पयेत् (भा० अनु० ४६।२०)। **प्रकल्पयेदिति सङ्गृह्णीतेत्यर्थः।** मृत्पात्रस्य क्रियायां हि दण्डचक्रादयो यथा। कारणत्वे प्रकल्प्यन्ते (भा० अनु० १।३८)। **प्रकल्प्यन्ते=निर्धार्यन्ते।** एवं शिवं हैवैनमुपस्पृशन्ति ह हैवैनं कल्पयन्ति (श०ब्रा० १२।५।२।८)। **कल्पयन्ति=अग्रे प्रतिष्ठापयन्ति=अभ्यर्चन्ति।** प्रकल्पयंश्चन्द्रमा यान्येति (नक्षत्राणि).....अष्टाविंशानि...सहयोगं भजन्तु मे (अथर्व०१६।८।१-२)। **नक्षत्राणां सहायभावमुपयन्तित्यर्थो भाति।** प्रक्लृप्तं हैवास्य स्त्री विजायते (श० ब्रा० १।३।३।६)। **प्रक्लृप्तं सुखमनायासं प्रसूयत इत्यर्थः।** द्वारि द्वारि च पौराणां पुष्पभङ्गः प्रकल्पितः। **बद्धः, आसक्तः।** अश्रु प्रकल्पितम् (अमरु० ७३)। **नयनसलिलमुक्तमित्याह।** यास्तु मातरः पूर्वं लोकस्यास्य प्रकल्पिताः (भा० वन०)। **प्रकल्पिताः=नियतीकृताः स्थापिताः।** न त्वां मन्ये मानुषं देवसत्त्वं...न ते तुल्यो विद्यते वाक्प्रकल्पे (भा० वन० १३३।३०)। **वाक्प्रकल्पः प्रकृष्टः संलापः।**

—क्रन्द् (क्रदि आह्वाने रोदने च)। **प्रक्रन्दतिरुच्चैरावाहने वर्तते।** तथा **चर्ग्वेदे प्रयोगः।** प्र वः स्प ळ् क्रन् (५।५६।१)।

—क्रम् (क्रमु पादविक्षेपे)। प्र सोमासः पवमानासो अक्रमुः (ऋ० ६।३१।१) **प्राक्रमुः (=प्राक्रमिषुः)=प्राभवन्=प्रास्यन्दन्त।** प्राक्रमिषमुपसामग्रियेव (ऋ०१०।६५।२) **प्राक्रमिषम्=प्रागाम्।** प्र सप्त सप्त त्रेधा हि चक्रमुः (आपः) (ऋ० १०।७५।१)। **प्रसस्यन्दिर इत्यर्थः।** प्रक्रम त्वं महार्णवम् (रा०-५।३।७३)। **दिक्क्रमणेन पारयेत्यर्थः।** यथापरः प्रक्रमते परेषु तथापरे प्रक्रमन्ते परस्मिन् (भा० अनु ११३।१०।)। **प्रक्रमन्ते प्रक्रामन्ति=व्यवहरन्ति=आचरन्ति।** तस्मात् प्राङ् प्रक्रामति त्रीन् विक्रमान् (श० ब्रा० ३।५।१।१)। **अग्रे प्रसरतीत्यर्थः।** दग्धान्रथान्महाबाहू रक्षिणेयः प्रचक्रमे (हरि० २।७३।४६)। **अतिचक्रामेत्यर्थः।** को वा कि वा प्रक्रमते हरिश्रेष्ठो महाबलः (रा० ५।१।३४)। **प्रारभते, कर्तुमुद्युङ्क्त इत्यर्थः।** सभां प्रचक्रमे कर्तुम् (भा०)। प्रचक्रमे निधानाय (=निधातुम्) शस्त्राणां भरतर्षभ (भा० वि० ५।१७)। **प्रचक्रमे=प्रववृते।** प्रचक्रमे च प्रतिवक्तुमुत्तरम् (रघु० ३।४७)। **उत्क्रोर्थः।** उदीराणा उतासीनास्तिष्ठन्तः प्रक्रामन्तः (अथर्व० १२।१।२८)। **प्रक्रामन्तः=**

अग्रे क्रामन्तः । प्रक्रामति आगच्छतीति प्रोपाभ्यां समर्थाभ्याम् इति सूत्रे माधवीय-धातुवृत्तौ ।

क्रीड (क्रीडृ विहारे) । यद् दिव्यवः पृतनासु प्रक्रीडान् (ऋ० ४।४१।११) । **प्रक्रीडन्ति विहरन्ति, खेलन्ति ।** यैरिन्द्रः प्रक्रीडते पद्घोषैश्छायया सह (अथर्व० ५।२१।८) । **आत्मानं विनोदयतीत्यर्थः ।** प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति (शा० ७।) ।

–क्रुश् (क्रुश आह्वाने रोदने च) । प्राक्रोशन् भैरवं शिवाः (भा० सभा०) । **प्रकृष्टमवाश्यन्तेत्यर्थः । उच्चैररुवन्** । प्रचुक्रुशुर्महात्मानो हृष्टरूपाः (रा० ४।२५।३५) । **उक्तोऽर्थः ।** प्राक्रोशदुच्चैः संत्रस्ता महाराजेति नैषधम् (भा० वन० ६३।२) । **आह्वयदित्यर्थः ।**

क्षर् (क्षर ईषच्चलने) । प्रास्य धारा अक्षरन् (ऋ० ९।२९।१) । **प्रावहन्नित्यर्थः । प्रक्षर इति वाजिनो वारणस्य वा लोहमयः कवचो भवतीत्याभिधानिकाः ।**

—क्षल् (क्षल शौचकर्मणि) । प्रक्षाल्य पाणी (श० ब्रा० १२।५।२।५) । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् (हित० १।१८५)। **उभयत्र प्रशब्देन नार्थः ।**

—क्षि (क्षि क्षये) । लोके प्रायेणाकर्मकोऽयम् । वेदे तु सकर्मको दृष्टः । सकर्मकत्वे दिवादिर्न । द्विभागधनमादाय प्रक्षिणात्यवर्त्या (अथर्व० १२।२।३-५) । सपत्नान् प्रक्षिणीहि (अथर्व० १०।३।१५) । **नाशयोत्सादयेत्यर्थः ।** उपलप्रक्षिणी नना (ऋ० ९।११२।३) । **उपलेन पेषणकरीत्यर्थः । प्रक्षणीमिदं देवदत्तस्य । इह देवदत्तश्चिक्षाय । अयं देवदत्तक्षयस्य प्रदेश इत्यर्थः ।**

—क्षिप् (क्षिप प्रेरणे) । शरान्दीप्तान् प्रचिक्षेप सुते मम (भा० ३।)। नामेध्यं प्रक्षिपेदग्नौ (मनु० ४।५३) । पण्येषु प्रक्षिपन् हीनम् (याज्ञ० २।२४५) । **क्रय्येषु निकृष्टं सम्मिश्रयन्नित्यर्थः ।** क्षारं क्षते प्रक्षिपन् (मृच्छ०) । मत्स्यमांसखण्डानि नकुलविवरद्वारात्सर्पकोटरं यावत् प्रक्षिप (पञ्चत०) **निधेहीत्यर्थः ।** नित्यमाम्रेडिते डाचीतिवार्तिकदर्शनात्सूत्रे कैश्चित्प्रक्षिप्तम् (पा० ६।१।१०० इत्यत्र कैयटः) । क्वचिद् ग्रन्थान् प्रक्षिपन्ति क्वचिदन्तरितानपि । कुर्युः क्वचिच्च व्यत्यासं प्रमादात्क्वचिदन्यथा ॥ इति महाभारततात्पर्यनिर्णयोपक्रमे मध्वाचार्यः । **अत्र प्रक्षेपो मूलेऽविद्यमानस्य स्वकपोलकल्पितस्य ग्रन्थस्यासङ्ग उच्यते । चरके प्रक्षेपः** क्वथ्यमानायामोषधौ द्रव्यान्तरस्य योगमाह । चतुष्पथगदायुद्धे (भा० आदि० ६८।१२) । अत्र चत्वारः प्रक्षेपविक्षेपपरिक्षेपाभिक्षेपाख्याः पन्थानो यस्य तद्गदायुद्धम् । प्रक्षेपो दूरस्थे शत्रौ त्याग इति नीलकण्ठः ।

—क्षुद् (क्षुदिर् संपेषणे) । मित्रघ्नस्य प्रचुक्षोद गदयाङ्गम् (भट्टि० १४।३३) । **संपिपेक्षेत्यर्थः । इह प्रेण नार्थः ।** । स्त्रीवाक्याङ्कुशप्रक्षुण्णा (पञ्चत० २।१५०) । **प्रक्षुण्णा=विक्षता । विद्धा वेत्यर्थः ।**

—क्षुभ् (क्षुभ संचलने)। अत्र संचलनेन प्रकृतिविपर्यासो मन्थनं चाभिप्रेयते इति व्याख्यातारः। गणत्रयपठित एष धातुः सर्वत्राकर्मकः। सागरश्च प्रचुक्षुभे (रा० ६।७।१५)। प्राक्षुभन्कुलपर्वताः (भट्टि० १५।२५)। **प्रशब्दः प्रकर्षस्य द्योतकः।**

—ख्या (ख्या प्रकथने, चक्षिङ आदेशो वा)। प्रेमन्धः (प्र ईम् अन्धः) ख्यत् (ऋ० ८।६८।२)। **अडभावश्छान्दसः। लुङि रूपम्। पश्यतीत्यर्थः।** मन्दं प्रख्यायमानेन रूपेणाप्रतिमेन सा (भा० ३।६७।८, रा० ५।१८।४)। इदमिदमिति, इदं तदिति वा कथंचिदूह्यमानेनेत्यर्थः। नहि पञ्चाला वरुणा इति योगः सम्बन्धः प्रख्यायते। लुब्योगाप्रख्यानात् (पा०१।२।५४) इति सूत्रे काशिका। यस्तु देवमनुष्येषु प्रख्यातः सहजैर्गुणैः (भा० वन० ४५।७)। **प्रसिद्ध इत्यर्थः।** चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम् (१।२ यो० सू० भा०)। **प्रख्या दर्शनं विवक्षितम्।** ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः। यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मना (भा० शां० २०४।८)। **प्रख्ये निःश्वासेन मालिन्येन वाऽनुपहते विशुद्धे।** तस्यास्तदद्भुतप्रख्यं श्रुत्वा हर्षमुपागतः (रा० ७।८६।७)। फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति (याज्ञ० ३।१०)। प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः (नै० १२।१०६)। **इह सर्वत्र प्रख्यशब्दः सदृशेऽर्थे वर्तते।** अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम् (भा० वन० ७३।११)। **चामीकरप्रख्यं हेमवद् भास्वरम्।** अप्रख्यातिमियां राजन्मर्वतः पर्वतैश्चितः (भा० वन० २२।१२)। **अप्रख्यातिरदर्शनम्।**

—गण् (गण संख्याने)। ततः प्रगणयामासुः कस्य वारोद्य भोजने (भा० आदि०)।

—गम् (गम्लृ गतौ)। यथोपदिष्टेन पथा महर्षिणा प्रजग्मतुः पञ्चवटीं समाहितौ (रा० ३।१३।२५)। **प्रजग्मतुः=प्रचक्रमतुः=प्रतस्थाते।** तदाश्रमपदं द्रष्टुं प्रजग्मुः (रा० १।६।३०)। **प्रजग्मुः=प्रययुः।** विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् (ऋ० ८।८।१०)। **प्रागच्छतम्=अधारयतम्।** प्रजुः प्रगतजानुक इत्यमरः। **प्रशब्दो विप्रकर्षे। प्रगते विप्रकृष्टे विरले विश्लिष्टे जानुनी अष्ठीवन्तौ यस्य सः।** 'प्रसंभ्यां जानुनो जुः' इति जानुनो जुरादेशः।

—गर्ज् (गर्ज शब्दे)। निरभ्रमेव चाकाशं प्रजगर्ज महास्वनम् (भा० आदि० ३०।३६)। स्तनितुं (स्तनयितुम्)। **प्रचक्रमे। प्रशब्द आदिकर्मणि द्रष्टव्यः।**

—गाह् (गाहू विलोडने)। अपः प्रगाह्य तिष्ठन्तोऽवभृथेन चरन्ति (आप० श्रौ० ८।२।७२७)। **प्रगाह्य=अन्तः प्रविश्य।** प्र यः पुरूणि गाहते तक्षद् वनेव शोचिषा (ऋ० १।१२७।४)। **उभयत्र प्रशब्देन नार्थः। अर्थोपजनाभावात्।**

—गुर् (गुरी उद्यमने)। प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः (ऋ० १।१७३।२)। अत्र प्रपूर्वो गुरतिरुच्चैरभिसम्बोधने वर्तते। प्रगूर्त इति सम्बुद्धिः। हे उद्गूर्णेन्द्र इति सायणः। यथा तु संस्कृतशार्ङ्गधरकोषकारौ पश्यतस्तथा प्रगूर्त इति पुरुहूतमाह। गूर्त इतिच्छान्दसं रूपं गूर्ण इति तु भाषायाम्।

गृ (गॄ शब्दे)। प्र मित्रे धाम वरुणे गृणन्तः (ऋ० १।१५२।५)। प्रगृणन्त उद्घोषयन्तः संशब्दयन्तः कीर्तयन्त इत्यर्थः।

—गै (कै गै शब्दे)। प्र व इन्द्राय मादनं गायत (ऋ० ७।३१।१)। मदकरैर्गीतैः कीर्तयतेत्यर्थः। प्र गायता अगासिषुः (ऋ० ८।१।७)। प्रागासिषुः प्रतिध्वनिता बभूवुः। अनाद्यो ह्यमध्यन्तथा चाप्यनन्तः प्रगीतोऽहमीशो विभुः (भा० शां १४२।६०)। प्रगीतः प्रकीर्तितः संशब्दितः। पुम्भिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवद् (गिरिः) (भा० आश्व० ५६।८)। गीतिबहुलः, गानप्रचुर इत्यर्थः। यथा मे रुदितैरेव प्रगीतेव पुरी भवेत् (रा० ५। २६।३६)। प्रगीता = आक्रोष्टुमारब्धा। प्रशब्द आदिकर्मणि। अनुपचरितो धात्वर्थः।

—ग्रह् (ग्रह उपादाने)। अग्निमूर्ध्वं प्राञ्चं प्रगृह्णाति (श० ब्रा० ६।४।३।१०)। धत्त इत्यर्थः। स (प्रजापतिः)। आत्मनो वपामुदखिदत्। तामग्नौ प्रागृह्णात् (तै० सं० २।१।१।४)। प्राक्षिपदित्यर्थः। तस्मै देवा एतां धारां प्रागृह्णन् (श० ब्रा० ६।३।२।१)। निरवपन्नित्यर्थः। यावन्न चरणौ भ्रातुः...शिरसा प्रग्रहीष्यामि (रा० २।६६।७)। संस्प्रक्ष्यामीत्यर्थः। ऋत्विक्पुरोहिताचार्यान्सत्कृत्यानवमन्य च। यदा सम्यक् प्रगृह्णाति स राज्ञो धर्म उच्यते (भा० शां ६१।४३)॥ प्रगृह्णाति=अनुगृह्णाति=परिगृह्णाति=परिपालयति। तेन हि प्रगृह्यन्तां दाजिनः (शा० १)। प्रग्रहेषु गृह्यन्तां संदंश्यन्ताम् इत्यर्थः। क्वचित्तेन हि प्रगृह्यन्तामभीषव इति पाठः। इह प्रशब्दोनर्थकः। क्रियतामस्माकमनुनयप्रग्रहः (चारु० १)। प्रग्रहः परिग्रहः स्वीकारः। प्रग्रहोपग्रहौ वन्द्याम् इत्यमरः। प्रग्रह इत्यपरावस्य हेतोः संयत उच्यते। प्रग्रहो वन्दी भवति। वन्दीति पुंव्यक्तावपि स्त्रियाम्। सर्वे कवचप्रग्रहे रताः (हरि०)। कवचबन्धने कवचग्रहणे वा लग्नाः। साञ्जलिप्रग्रहमेनमुवाच (अवदा० जा० ६)। साञ्जलिबन्धमित्यर्थः। केचिदञ्जलिप्रग्रहपुरःसरं मार्गमस्यावृत्य समवातिष्ठन्त (अवदा० श्रेष्ठिजा०)। ततो जगौ परमं जप्यं साञ्जलिप्रग्रहः प्रभुः (भा०शां० ३४७।३७) साञ्जलिप्रग्रहा देवी रौहिणेयमुपस्थिता (हरि० २।४१।१६)। न हि मुच्यते कश्चित्कथं चित्प्रग्रहं

गतः । गजो वा महिषो वापि षष्ठे काले नरोत्तम (भा० वन० १८०।१६) ॥ **ग्रहो देवदत्तस्य** (पा० ३।३।५२ सू० काशिका)। **अत्र साञ्जलीत्यादिषूदाहृतिषु सर्वत्र ग्रहो बन्धं वक्ति ।** तुलाग्रहेण प्रचरन्ति वणिजः । **तुलाग्रहस्तुलासूत्रम् । धृताः** ग्रहाः । अवतरत्वायुष्मान् (शा० १) । **ग्रहाः=रश्मयः=अभीषवः=वल्गाः ।** पाञ्चाल्यग्रहो द्रोणं सर्वतः समवारयत् (भा० द्रोण० ६।२५) । **पाञ्चाल्यो बन्धनरज्जुर्यस्य स इति नीलकण्ठः ।** स्रुग्बाहुमात्री विज्ञेया वृत्तस्तु ग्रग्रहस्तयोः (कर्मप्रदीपे) । **ग्रहो दण्डः ।** तामार्यगणसम्पूर्णां भरतग्रहां सभाम् (रा०२।८२।१) । **भरतग्रहामिति समस्तमेकं पदमिति संस्कृतशार्मण्यकोषः । तथा च भरतः ग्रहो नेता नायको यस्यास्तां भरतनायकाम् इत्यर्थः । ग्रहशब्दो नेतृवचन इतीहैवाधस्ताद् वक्ष्यते । तिलककारो रामस्तु भरतः ग्रहामिति व्यासेन पठति । प्रकृष्टैर्वसिष्ठादिभिर्ग्रहः परिग्रहोऽधिष्ठानं यस्याम् इति क्लिष्टं च कल्पयति ।** असाधुनिग्रहरतः साधूनां ग्रहे रतः (भा० शां० २१।१४) । **ग्रहे=सङ्ग्रहे ।** अपराधं सहेतालं तुष्येत्स्वल्पेऽपि चोदये । महोपकारं चाध्यक्षं ग्रहेणाभिपूजयेत् (कौ० अ० २।७।२५) । **ग्रहेण=अनुग्रहेण परितोषिकेण द्रव्यदानेन । ग्रहेण प्रकृष्टग्रहणेन यावज्जीवं परिग्रहेणेति तु गणपतिः ।** को मां ग्रियमिवातिथिम् । भोजयिष्यत्यकर्मण्यमग्रहमनायकम् (रा० २।३।३३) । **अग्रग्रहं नीवारादिसङ्ग्रहरहितमिति तिलकः । यष्टिग्रहणपूर्वकमार्गप्रदर्शकरहितमिति तु कतकः ।** यः ग्रहानुग्रहयोर्यथान्यायं विचक्षणः (रा० २।६४।३४) । **इह ग्रहो निग्रहं नियन्त्रणमाह ।** राजोपजीविनां ग्रहप्रदेशभोगपरिहारभक्तवेतनलाभम् (कौ० अ० २।७।२५) । **ग्रहः=पूजा । मन्त्रिपुरोहितादीन्प्रति प्रत्युद्गमनबहुमान इति गणपतिः ।** मेढीभूतः स्वयं राजन्निग्रहे ग्रहे भवान् (भा० वन० १०।१६) । **ग्रहोऽनुग्रहः ।** विनिग्रहग्रहयोः प्रवृत्तिर्धर्मोपरोधं न चकार तस्य (प्रवदा० मैत्री० ३) । **ग्रहो बन्धनम् । अनुग्रह इति कश्चित् ।** निग्रहेण च पापानां साधूनां ग्रहेण च (भा० शां० ३४६।३४) । **ग्रहेण=अनुग्रहेण ।** अमतां ग्रहो यत्र मतां चैव विमानना । दण्डो दैवकृतस्तत्र सद्यः पतति दारुणः (कूर्म० पु० पूर्व० १५।२७) । **ग्रहः सभाजनं सत्क्रिया स्वागतव्याहारः ।** अतिथिग्रहरतस्तथाभ्यागतपूजकः (भा० अनु० १४२।२७) । **ग्रहः सत्कारः ।** धर्मशास्त्रातिगो मूढो दुरात्मा ग्रहं गतः (भा० उ० ६२।३) । **ग्रहो निर्बन्धः प्रत्यभिनिवेशः । दौष्कुलेया विशेषेण कथं चित् ग्रहं गताः ।** बालभावाद् विकुर्वन्ति प्रायशः प्रमदाः शुभे (भा० वन० ३०३।२६) ॥ **ग्रहो निर्बन्ध इति नीलकण्ठः । ग्रहं गताः साध्वाचरिता मित्रवत्सत्कृता इति संस्कृतशार्मण्यकोषः ।** सोऽस्माकं वैरपुरुषो दुर्मतिः ग्रहं गतः (भा० शां० ७।३३) । **ग्रहो बन्धनम् ।** निग्रहे ग्रहे सम्यक् यदा

राजा प्रवर्तते (भा० वन० १५०।४०)। **प्रग्रहोऽनुग्रहः**। तयोरथ भुजाघातान्निग्रहप्रग्रहात्तथा। आसीन्मुभीमः सम्पातो वज्रपर्वतयोरिव (सभा० २३।२३)॥ **प्रग्रहः शत्रोरुत्तानपातनार्थं पादाकर्षणमिति नीलकण्ठः। निग्रहान्निर्मोक्ष इति तु संस्कृतशार्मण्यकोषः**। तयो राजन्भुजाघातनिग्रहप्रग्रहात्तथा (भा० द्रोण० १४२।४२)। **प्रग्रहो गलहस्तक इति नील०**। तानि रत्नौघकल्पितानि समानुप्रग्रहाणि च (हरि० २।२९।७)। **प्रग्रहः पताका। सानुरुपरिदेशः**। प्रग्रहः सूर्यचन्द्रयोरुपराग इति सूर्यसिद्धान्ते (४।१४)। प्रमाणं सर्वभूतेषु प्रग्रहं च भविष्यसि (भा० शां० १०५।७)। **प्रग्रहो नायकः। नीलकण्ठस्तु प्रग्रहो भुजत्वं (भुजभावम्) इत्येवं विवृणोति। मेदिनीं च प्रमाणमुदाहरति—प्रग्रहस्तु नुलासूत्रे वन्द्यां नियमने भुज इति। कोषप्रमितोऽप्यदमर्थः प्रकृते नातीव संश्लिष्यति।** प्रमाणं सर्वभूतानां प्रग्रहाश्च भविष्यथ (भा० अनु० ३५।६)। **प्रग्रहा वल्गा इव। हलायुधप्रग्रहणा** (सेना) (भा० वन० १८३।३३)। **हलायुधः प्रग्रहणो नायको यस्या इत्यर्थो भाति**। प्रमाणं सर्वभूतेषु गत्वा प्रग्रहणं महत् (भा० शां० १०५।१०)। **प्रग्रहणमादरः**। यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा। नरेन्द्रधर्मो लोकस्य तथा प्रग्रहणं मतम् (भा० शां० ५६।५)॥ **अत्र तु प्रग्रहणं नियन्त्रणमिति मुक्तसंशयम्**। दीनानुकम्पी धर्मज्ञो नित्यं प्रग्रहवाञ्छुचिः (रा० २।१।१५)। **प्रग्रहो दुष्टनिग्रह इन्द्रियनिग्रहश्च**। प्रग्राहं शंसति (ऐ० ब्रा० ६।३२)। **विसन्धीनि पदान्युच्चारयति। प्रशब्दो विश्लेषे पृथक्करणे वर्तते**। प्लुतप्रगृह्या अचि नित्यम् (पा०६।१।१२५)। **अत्राप्यदमेवार्थः**। प्रगृह्य पाणी देवान् पूजयन्ति। (नि० २।२६।१)। **प्रगृह्य = बद्ध्वा। अयमेवार्थः शां० श्रौ० १।६।१० इत्यत्र**। प्रगृह्य बाहून् क्रोशन्त्यः (भा० स्त्री० १०।१२)। **प्रगृह्य = उद्यम्य। एवमर्थेऽस्य प्रगृह्यशब्दस्य बहुशः प्रयोगः। तथा चोदाहरणानि**—प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् (रा० ३।१८।२४)। प्रगृह्य रुचिरं बाहुमिदं वचनमब्रवीत् (सभा० ६८।२६)। प्रगृह्य बाहून् क्रोशेत भग्ना भग्नाः परे इति (भा० शां० १००।४८)। उद्यन्मेघस्वनः काले प्रगृह्य विपुलं भुजम् (भा० उ० ९१।१६)। ततश्च तं बली भीष्मः प्रगृह्य विपुलं भुजम् (भा० अनु० १६७।२५)। एवमुक्त्वा ततो बाहुं प्रगृह्य पुरुषादकः (भा० आदि० १५३।३८)। प्रगृह्य बाहू व्यलपन्ननाथवत् (रा० २।६५।२९)। **अत्र तु प्रग्रह्येत्यभिहृत्येत्यनेन समानाभिधेयम्**। प्रगृह्य दन्ताविव नागराजः (भा० वि० ५४।१९)। **प्रगृह्य = आग्रहेण**। प्रगृह्य वेगं न्यपतज्जवेन (भा० वि० ५४।२१)। **प्रगृह्य = स्वीकृत्य, आस्थाय**। प्रगृहीताञ्जलिः किंचित्तस्माद् देशादपाक्रमत् (रा० २।१४।५८)। **प्रगृहीताञ्जलिः = बद्धाञ्जलिः**। तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः (रा० २।३।१)। **प्रगृहीतानि शिरसा**

नि बद्धानि। प्रगृहीतम्तु योऽमात्यो निगृहीतस्त्वकारणैः (भा० वि० ४।४०)। **प्रगृहीतः प्रकृष्टतया दानमानादिना गृहीतः**। तस्माद्राजा प्रगृहीतः प्रजासु (भा० शां० १२०।४४)। **प्रगृहीतः स्निग्धः**। यथाज्यं प्रगृहीतमाल्लुम्पेत् स्रुचो अग्नये (अथर्व० १२।४।३४)। **प्रगृहीतं पृथग् गृहीतम्**। यया तस्येदं चर्म प्रगृहीतम् (अवदा० जा० २३)। **अपनीय वियोज्य गृहीतमित्यर्थः**।

—**ग्लै (ग्लै हर्षक्षये)**। प्रग्लायति (भट्टि० ६।१३)। **ग्लानिं ग्लानिमाप्नोतीत्यर्थः**।

—**घट् (घट चेष्टायाम्)**। को वा विश्वजनीनेषु कर्मसु प्राघटिष्यत (भट्टि० २१।१७)। **सर्वात्मनाऽयतिष्यत उदयोक्ष्यत उदयंस्यत**। ततः प्रजघटे युद्धम् (भट्टि० १४।७७)। **आरब्धमभूदित्यर्थः**।

—**चक्ष् (चक्षिङ् व्यक्तायां वाचि)**। एतत् प्रचक्ष्व मे (भा० आदि०)। **प्रचक्ष्व=आख्याहि उपवर्णय**। नैव दारुणतामेके सज्वालायाः (शिवायाः) प्रचक्षते (व० बृ० सं० ६०।६)। **आहुः, मन्यन्त इति तात्पर्यार्थः**। क्रोधोद्भवानि च त्रीणि व्यसनानि प्रचक्षते (रा० ३।१३।३)। **उक्तोऽर्थः**। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते (मनु० २।१७।५६)। **ब्रह्मावर्तनाम्ना कीर्तयन्ति**।

—**चर् (चर गतिभक्षणयोः)**। दिवः स्पशः प्रचरन्तीदम् (अथर्व० ४।१६।४)। **प्राप्य संचरन्तीत्यर्थः**। ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः (वा० सं० १६।६१)। **पर्यटन्तीत्यर्थः**। नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः (रा० १।३४।१८)। **प्रचरन्ति=परिक्रामन्ति**। प्रचारयेद् मन्त्रविदः कार्यद्वारेषु नैकधा (का० नी० सा० १२।३८)। **प्रवर्तयेदित्यर्थः**। ग्रामे शुचीनि प्रचरन्कुलानि भरतर्षभ (भा० वन० २०६।७)। **प्रचरः=पर्यटन्**। कार्येणोर्वीप्रचारिणः (वि० पु० ५।२५।२)। **उर्वीप्रचारिणः=भूभ्रमणशीलाः**। गुणप्रचारिणी बुद्धिर्हुताशन इवेन्धने (भा० शां० २०५।२६)। **गुणेषु प्रचरणशीला गुणेष्वाविर्भाववती**। तस्यास्तीर्थं प्रचरितं प्रकामं प्रेक्ष्य राघवः (रा० २।५५।५)। **प्रचरितं गमनागमनाभ्यामतिक्षुण्णम्**। शान्तमृगप्रचारं (वानप्रम्) (कु० ३।४२)। **प्रचारः संचारः पर्यटनम्**। यावत्स्थास्यन्ति गिरयः सरितश्च महीतले। तावद्रामायणकथा लोकेषु प्रचरिष्यति (रा० १।२।३६)॥ तिष्ठन्ति जीवाः प्रचरन्ति चान्ये (भा० शां० २८०।३०)। **केचित्स्थावरा भूत्वाऽऽसतेऽपरे जङ्गमा भवन्तीत्यर्थः**। गवां प्रचारेष्वामीक्ष्णम् (भा० आदि० ४०।१७)। **गोष्ठो गवादनी गोचरः प्रचार इति पर्यायाः**। ग्राम्येच्छया गोप्रचारो भूमौ राजदण्डेन वा (याज्ञ० २।१६६)। **गोप्रचारो गवादीनां प्रचारमार्गः**। योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते (मनु० ६।२१६)। प्रचारे चावघोषयेत् (कौ० अ० २।८।२६)। **प्रचारो जनपद इति गणपतिः**। प्रचारं स तु संगृह्य (रा० ७।३५।४६)। **प्रचारः=**

संचारः। लोहितोष्णीषा ऋत्विजः प्रचरन्ति (=**कर्मारभन्ते**)। मानुवोचो मा प्र चारीः (ऐ०ब्रा०३।२)। **मा स्म प्रवृतः, प्रवृत्तिं मा स्म करोरित्यर्थः**। स्वधर्मं प्रचरिष्यन्ति दण्डकेषु महर्षयः (रा०३।३०।३७)। **आचरिष्यन्ति अनुष्ठास्यन्ति**। इष्टधर्मप्रचारा (स्वप्न० १।५)। **प्रचारोऽनुष्ठानम्**। समाहितः प्रचरेद् दुश्चरं यो गार्हस्थ्यधर्म मुनिधर्मजुष्टम् (भा० शां० ६१।१०)। **प्रचरेत्=अनुतिष्ठेत्**। अथाध्वर्युरेव कायेन। एककपालेन पुरोडाशेन प्रचरति (श०ब्रा० २।५।२।३९)। **प्रचरति=प्रवर्तते, अनुष्ठानपरो भवति**। मिथ्या प्रचरतां तात बाह्येष्वभ्यन्तरेषु च (भा० उ० ६५।८)। **प्रचरतां व्यवहरताम् इत्यनर्थान्तरम्**। औरसीं भगिनीं वापि भार्यां वाप्यनुजस्य च। प्रचरेन्नरः कामात्तस्य दण्डो वधः स्मृतः (रा० ४।१८।२२-२३)॥ **प्रचरेत्=प्रकुर्यात्, दूषयेत्, परामृशेत्**। पुरा प्रचरितोः (गो० ब्रा०)। **अध्वर्योः कृत्योपक्रमात्पुरा**। स वै प्रचारः पश्यतो ब्राह्मणस्य (भा०शां १५१।१)। **प्रचारो व्यवहारः**। धर्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत् (भा० उ० ६५।६)। **प्रचरन्ति=आचरन्ति**।

—**चल्** (**चल कम्पने**)। घूर्णितः प्रचलायित इत्यमरः। **यो निद्रयाऽभिभूत आसीन एव शिरश्चलयति कम्पयति स प्रचलायितो भवति**।

—**चि** (**चिञ् चयने**)। अपि प्रचीयन्ते संव्यवहारागणां वृद्धिलाभाः (मुद्रा० १)। **प्रचीयन्ते एधन्ते**। परेषामुत्तमाङ्गानि प्रचिन्वन्तमथेषुभिः (भा० भीष्म० ६।१४।११)। **छिन्दन्तम् इत्यर्थः**। प्रचीयमानावयवा रराज सा (रघु० ३।७)। **वर्धमानगात्रा**।

—**चुद्** (**चुद संचोदने**)। धियो यो नः प्रचोदयात् (ऋ० ३।६१।१०)। प्रचोदनं देवकृतं गवां कर्मसु वर्तताम्। (भा० अनु० ६९।६)। **प्रचोदनं प्रतोदेन प्रवर्तनं प्रेरणम्**।

—**च्यु** (**च्युङ् गतौ**)। सोग्निमनु प्राच्यवत (ऐ०ब्रा० ३।६)। **स पशुरग्निमन्वगादित्यर्थः**। ब्रह्म हि देवान्प्रच्यावयति (श०ब्रा० ३।३।४।१७)। **प्रच्यावयति प्रेरयति**। त्रिः प्रच्यावयतात् (का० श्रौ० ६।८।१)। **त्रिरुत्कालयेत्यर्थः**।

—**छिद्** (**छिदिर् द्वैधीकरणे**)। प्रच्छिन्दन्त्यशुभेषु च (भा०शां० २७१।१६)। **अशुभेषु कर्मसूपस्थितेषु हरन्ति दत्तपूर्वं राज्यादि इत्यर्थः**। **अत्र प्रशब्द आडोऽर्थे**। **आच्छिन्दन्त्यामृशन्तीत्यर्थः**। प्रवृद्धानां च वृक्षाणां शाखां प्रच्छेदयेत्तथा (भा०शां०६९।४१)। **शाखानामग्राणि च्छेदयेदित्यर्थः**। **अत्र प्रशब्दोऽग्रवचनः, यथा प्रपदमित्यत्र**। गात्राणि प्राच्छिदत्पार्थः (भा० कर्ण० ८०।५)। **खण्डशश्चकर्तेत्यर्थः**।

—**जन्** (**जनी प्रादुर्भावे**)। **प्र यत्ते अग्ने सूरयो जायेमहि** (अथर्व०४।३४।४)। **प्रजायेमहीति पुत्रपौत्रैः समृद्धा भवेमेत्याह**। अर्धो ह वा एष आत्मनस्त-

स्माद् यज्जायां न विन्दते नैतावत्प्रजायते। अमर्वो भवति (श० ब्रा०)। **प्रजया सन्तानेन समृद्धो भवतीत्यर्थः। प्रशब्दः प्राचुर्यमाह।** कन्यां प्रवररूपां तु प्राजायत नराधिप (भा० उ० १८८।१४)। **प्राजायत=व्यजायत=प्रासूत।** प्रजज्ञे च ततः काले राजन्राजीवलोचना कुमारम् (भा०आदि० ८२।२७)। **प्रजज्ञे सुषुवे।** प्रजने सर्तेः (पा० ३।३।७१) **इत्यत्राचार्यः प्रजनशब्दं गर्भग्रहणेऽर्थे प्रयुङ्क्ते तथा च पदमञ्जर्यां हरदत्तवचनम्—प्रशब्दो धात्वर्थं विपरीतयति। यथा प्रतिष्ठत इत्यत्र। प्रादुर्भावस्य च वैपरीत्यं गर्भग्रहणम्। प्रजने वीयते** (पा० ६।१।५५) **इत्यत्रापि स एवार्थः।** पुरोवातो गाः प्रवाययति। पुरोवातो गाः प्रवापयति। **प्रजनो हि जन्मन उपक्रमो गर्भग्रहणम् इति वृत्तिः।** स यज्ञशीलः प्रजने निविष्टः (भा० शां० २८।५६)। **प्रजने प्रजोत्पादने। निमित्ते सप्तमी। निविष्टः कृतदारः, गार्हस्थ्यमास्थितः।** भूयसी मे प्रजातिरभूत् (श० ब्रा० १२। ४।१।७)। **प्रजातिः सन्तानः।**

—**जागृ** (जागृ निद्राक्षये)। ततः प्रजागराञ्चक्रुर्वानराः (भट्टि० १४।६१)। **अवेक्षां चक्रिरे। प्रशब्दः प्रत्यर्थे। अवेक्षा प्रतिजागर इति कोषः।** उपशये स्थितिरपि प्रजागरो भवति तथा च भारते प्रयोगः—अद्य युद्धे सुसंक्रुद्धो दीर्घं राज्ञः प्रजागरम् (शल्य० २७।२१)।

—**जि (जि जये)।** प्रामुं जय (अथर्व० ६।१२६।३)। **प्रकर्षेण जय, विजयस्व, सञ्जयेत्यर्थः।**

—**जुष् (जुषी प्रीतिसेवनयोः)।** न तथैतानि शक्यन्ते संनियन्तुमसेवया। विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः (मनु० २।९६) ॥ **प्रजुष्टानि प्रसक्तानि।**

—**ज्ञा (ज्ञा अवबोधने)।** स्वर्गं लोकं न प्रजानाति मूढः। **प्रशब्दोऽनर्थकः। जानातीत्येवार्थः।** न च स्त्रियं प्रजानाति कश्चिदप्राप्तयौवनः (भा० आदि० ६४।१७)। **भेदेन ज्ञानं प्रज्ञानम्। स्त्रीपुंसयोर्भेदं न जानातीत्यर्थः।** तम एवाभवत्सर्वं न प्राज्ञायत किं चन (भा० शां० ३४७।१६)। **विशिष्य विविच्य वा नाज्ञायतेत्यर्थः।** यावता या दिशो न प्रजानीयुः (आप० ध० २।६।१५।२१)। तमसा निष्प्रभं सर्वं न प्राज्ञायत किञ्चन (हरि० १।४२।१८)। **प्राज्ञायत=प्राविच्यत। अन्यत्राप्ययमेवार्थ इत्यन्याः काश्चिद् दिश उपन्यस्यन्ते**—सर्वैरपि च वक्तव्यं न प्राज्ञायन्त पाण्डवाः (भा० वि० ४।५)। गर्जितेन च दैत्यानां न प्राज्ञायत किञ्चन (भा० वन० १७१।६)। उदतिष्ठद्रजो भौमं न प्राज्ञायत किञ्चन (भा० वि० ३२।६)। यदेतद् हृदयं मनश्चैतत् संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं...वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति (ऐ० ब्रा० २।६)। तत्प्रज्ञानं प्रथमं पण्डितस्य (भा० उ० ३३।२२)। **प्रज्ञानं लक्षणमभिज्ञानम्।** ध्वजो रथस्य प्रज्ञानम् (रा० २।६७।३०)।

प्रज्ञानमनुमापकः, लक्ष्मेत्यर्थः। आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् (मनु० १।५)। **प्रत्यक्षगोचरः प्रज्ञात इत्युच्यते इति कुल्लूकः**।

—**डी** (डीङ् विहायसा गतौ)। प्रडीनम् (भा० कर्ण० ४१।२६)। **प्रडीनं सर्वतो यानं भवति**।

—**तन्** (तनु विस्तारे)। प्रतन्वतीरोषधीरावदामि (अथर्व० ८।७।४)। **प्रतन्वतीः**=**प्रकटयन्तीः**। या शतेन प्रतनोषि सहस्रेण विरोहसि (वा० सं० १३।२१)। **शतप्रताना भवसीत्यर्थः**। **तनोतिरिहाकर्मकः**। स्यातस्त्वं विभर्वैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः (भर्तृ०)। **विस्तारयन्तीत्यर्थः**। तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते (शिशु० २।३०)। **प्रतायते प्रथ्यते दृश्यत इत्यर्थः**। (सिराः) नाभ्यां निबद्धाः प्रतन्वन्ति समन्ततः (सुश्रुते १।३५४।५)। **प्रतता वितता भवन्तीत्यर्थः**। शतं तव प्रतानास्त्रयस्त्रिंशन्तिताः (अथर्व० ६।१३६।१)। **प्रतानाः शिखाः**। बीजकाण्डरुहाण्येव प्रताना वल्लय एव च (मनु० १।४८)। **प्रतानास्तन्तुयुक्तास्त्रपुषालाबूप्रभृतय इति कुल्लूकः**। पिप्पलीप्रततं वनम् (रा० ३।७६।२५)। **पिप्पलीभिराकीर्णं परिगतमित्यर्थः**।

—**तप्** (तप सन्तापे)। सूर्यः प्रतपतां श्रेष्ठः (भा०वि०२।१५)। प्रतपन्तमिवादित्यं राज्ये स्थितमरिन्दमम् (रा० २।१०५।६)। **उभयत्र प्रशब्दः प्रकर्षेऽनर्थको वा**। प्रतपं ज्योतिषा तमः (ऋ० ६।१०८।१२)। **अडभावश्छान्दसः**। **प्रातपं प्रकर्षेणादीपयम् उदज्वलयम् इत्यर्थः**। स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम् इत्यमरः।

—**तम्** (तमु ग्लानौ)। प्रताम्यति·····प्राणान् प्रतिपद्यते (ऐ० ब्रा० ८।२२)। **प्रताम्यति**=**क्षीणश्वासो भवति**। प्रताम्य वा प्रश्वल वा प्रणश्य वा सहस्रशो वा स्फुटित्वा मही व्रज (रा० २।१२।१०६)। **प्रग्लाय, ग्लानशक्तिका भव, क्षामा भवेत्यर्थः**।

—**तर्क्** (तर्क वृतु वृधु भाषार्थाः)। इदमिदमिति तत्र तत्र तत्तत् स्वपरमतैर्गहनं प्रतर्कयद्भिः (भा० शां०१७६।३५)। **प्रतर्कयद्भिर्विवृण्वद्भिः**। स्थिरत्वं व्यायामैर्बलं वैद्यः प्रतर्कयेत् (सुश्रुते १।१३०।१)। **प्रतर्कयेत्**=**वर्धयेदित्यर्थः**। प्रतिध्वनीनात्मकृतान्निशम्य···प्रतर्कयन्नन्यमृगेन्द्रनागान् (भट्टि० २।६)। **प्रतर्कयन्मन्यमानः, चिन्तयन्नित्यर्थः**।

—**तुद्** (तुद व्यथने)। श्रृणतां च शृणोम्येनं गोपुत्राणां प्रतोद्यताम् (=प्रतोद्यमानानाम्) (भा० अनु० ११७।११) **प्रतोदेन तोत्त्रेण व्यथ्यमानानामित्यर्थः**। प्रतुदन्तौ रणे स्थितौ (हरि० ३।५४।७५)। **प्रविध्यन्तावित्यर्थः**। प्लवः प्रतुदाम् (आप० ध० १।१७।३३)। **तुण्डेन प्रतुद्य ये भक्षयन्ति ते दार्वाघाटादयः प्रतुदः**। **प्रशब्द आदिकर्मणि**। **प्रतुदति तोदनमारभते**।

—**तृद्** (**उतृदिर् हिंसानादरयोः**)। पार्श्वत एवैनत् काष्ठे प्रतृद्य श्रपयेत् (श० ब्रा० ११।७।४।३)। **प्रतृद्य**=**आसज्य**=**संश्लेष्य**।

—**तॄ** (**तॄ प्लवनतरणयोः**)। अश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रतरता सखायः (ऋ० १०।५३।८)। **प्रतरता** (=**प्रतरत**)=**तरत**। समुद्रं वा एते प्रतरन्ति (श० ब्रा० १२।२।१।१)। **प्रतरन्ति तरन्ति**=**पारं गच्छन्ति**। तां नदीं क्षत्रियाः शूरा रथनागहयप्लवैः। प्रतेरुर्बहवो राजन्···(भा० भीष्म० १०३।३७)। **प्रतेरुः**=**तेरुः**=**उत्तेरुः**। आत्मानं कः समुद्रबध्य कण्ठे बद्ध्वा महाशिलाम्। समुद्रं प्रतरेद् दोर्भ्याम् (भा० वि० ४।४६।१६)। **प्रतरेत्**=**तरेत्**। **बाहुकः स्यात्**। **प्रशब्दोऽनर्थकः**। जलं प्रतरमाणश्च कीर्तयेत पितामहान् (भा० अनु० ६२।१६)। **अत्रापि प्रशब्दो न विशेषकृत्**। प्र ण आयूंषि तारिषत् (अथर्व० २।४।६)। **तरतेर्लेटि प्रथमैकवचने रूपम्**। **इह प्रपूर्वस्तरतिर्वृद्ध्यर्थः**। प्र सो अग्ने तवोतिभिस्तिरते (ऋ० ८।१६।३०) **प्रतिरते उदञ्चति**=**उन्नमति**=**अभ्युदयते**। संवत्सरः सर्वाणि भूतानि प्रतिरति (श० ब्रा० ४।१।१३)। **उन्नमयति, बृंहयति, भूमयति**। प्रातिरतं जहितस्यायुर्दस्रा (ऋ० १।११६।१०)। **प्रातिरतमद्राघयतम्**। आयुर्वै नः प्रातीतरः (=प्रावर्धयः) (अथर्व० ११।६।६)। तथा प्रतीर्णायामागच्छेत्स विहीयेत (श० ब्रा० २।३।३।१६)। **प्रतीर्णायां प्लोतुमारब्धायां प्रस्थितायां नावीत्यर्थः**। **प्रशब्द आदिकर्मणि**। गयस्फानः प्रतरणः सुवीरः (ऋ० १।६१।१६, वा० सं० ४।३७)। गवां नः स्फावयिता प्रतारयितैधीत्येव तदाहेति च तत्रैतरेयब्राह्मणम् (३।२)। **प्रतारयिता रक्षक इति षड्गुरुः**। **स्वार्थे णिच्**। वास्तोष्पते प्रतरणो न एधि (ऋ० ७।५४।२)। **प्रतरणः प्रवर्धकः**। नमः प्रतरणाय चोत्तरणाय च (वा० सं० १६।४२)। **प्रतरन्ति येन तत् प्रतरणमुदकमुच्यते**। **उत्तरन्ति येन तदुत्तरणं नौरुच्यत इत्युवटः**। न ह्यल्पसौहार्दनिबन्धनानामेवं मनांसि प्रतरन्ति कर्तुम् (अवदा० जा० २७।१४)। **प्रतरन्ति**=**प्रवर्तन्ते**। न चात्र मे निश्चयमेति मानसं धनार्थमेवं प्रतरेद्भ्रुवानपि (अवदा० ब्राह्मण० १८)। **प्रवर्तेतेति संभाव्यतेऽर्थः**। आपत्प्रतरणं सम्यक् सङ्घधर्म इति स्थितिः (का० नी० सा० ८।५७)। **प्रतरणं निबर्हणमिति जयमङ्गला**। चक्रे चक्रधरे तेन वितस्ताम्भः प्रतारणम्। विनिर्मायारघट्टालीः ... (राजत० ४।१६१)॥ **प्रतारणं प्रकर्षणम्, परीवाहम्**। तन्न देवीमतीर्थे प्रतारयामः (अवदा० जा० २)। **कुत्सिते नद्या अवतारेऽवतरणाय प्रेरयाम इत्यर्थः**। **विपथेन (अपथा) प्रवर्तयाम इति तात्पर्यार्थः**। किं मां प्रतारयसि (मृच्छ०)। **वञ्चयसेऽतिसन्धत्स इत्यर्थः**। (भागीरथी) प्रतार्यमाणा कूटेषु (भा० ३।६६।३२)। **प्रतार्यमाणा**=**विस्तार्यमाणा**। अथ नाभिस्तु जन्त्वङ्गे यस्य संज्ञा **प्तारिका**। रथचक्रस्य मध्यस्थपिण्डि-

कायां च ना पुनः ॥ (केशवः)।

—**त्रस् (त्रसी उद्वेगे)**। पराजिताः प्रत्रसतामित्रा नुत्ता धावत ब्रह्मणा (अथर्व० ८।८।१९)। **प्रशब्दः प्रकर्षस्य द्योतकः**।

—**दस् (दसु उपक्षये)**। आपस्त्वरमाणा न क्षीयन्ते न प्रदस्यन्ति (काठक० २८।१)।

—**दा (डुदाञ् दाने दाण् दाने)**। शान्तां तस्मै प्रदास्यति। स्वकां दुहितरं भार्याम् (रा० १।८।२५)। प्र वां घृतस्य निर्णिजो ददीरन् (ऋ० ७।६४।१)। अथैनं मात्रे प्रदाय स्तनं प्रयच्छति (श० ब्रा० १४।६।४।२८)। **अत्रोदाहृतिषु प्रशब्देन नार्थः**। हुतशेषं प्रदद्यात्तु भाजनेषु (याज्ञ० १।२३६)। **निक्षिपेदित्यर्थः**। आज्ञापय किमेतेभ्यः प्रदायं दीयताम् इति (भा० आश्रम० १४।६)। **प्रदायः=दायः=प्रदेशनम्, उपदा, उपायनमुपग्राह्यम्**। प्रदानं प्रदाय याजयितव्यमेव (श० ब्रा० १२।८।१।१७)।

—**दिव् (दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु)**। प्रादेवीत्परिघम् (भट्टि० ६।६)। तृतीया ह प्रद्यौरिति (अथर्व० १८।२।४८)। **प्रकृष्टफलोपेता द्यौः प्रद्यौः**।

—**दिश् (दिश अतिसर्जने)**। इदं दिव्यम् (अस्त्रम्) प्रदिशामि ते (भा०वन० ४।३६)। **प्रशब्दो दानार्थस्य द्योतकः। प्रयोगेष्वनेकार्थोऽयं धातुरिति दर्शनात्। निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः** (मेघ० ११६)। त्वमुत्तरायै प्रदिशस्व माम् (भा०वि०२२।८)। कदा सुमनसः कन्या द्विजातीना फलानि च। प्रदिशन्त्यः पुरीं हृष्टाः करिष्यन्ति प्रदक्षिणम् (रा० २।४३।१४)। **प्रदिशन्त्यः=उपहरन्त्यः**। तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातम्। सत्त्वप्रधानानि नामानि (नि० १।१।६)। **प्रदिशन्ति=प्रविभज्योपदिशन्ति**। तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे (भा० वन० ५७।१६)। **प्रदिशन्तु=सङ्केतयन्तु**। प्रदिशन्ति तु भूतानि सर्वत्र तु यथेप्सितम् (हरि०२।६६।५७)। **प्रदिशन्ति शंसन्ति**। दाहं दशवदनः प्रदिदेश वानरस्य (भट्टि०६।१३७)। **आदिदेशेत्यर्थः**। सायम्प्रातश्च विप्राणां प्रदिष्टमभिवादनम् (भा० शां० १६३।१६)। **प्रदिष्टं कर्तव्यत्वेनोपदिष्टम्**। दिशः सूर्यो न मिनाति प्रदिष्टाः (ऋ० ३।३०।१२)। **प्रदिष्टा नियताः=विधात्रा विहिताः**। तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टाम् (रघु० ५।६२)। **निर्दिष्टां संकेतिताम्**। इति प्रदिष्टं व्यसनं ह्यनेन समन्वितो यो व्यसनी स गम्यः (का० नी० सा० ११।११)। **प्रदिष्टमुदितं कथितम्**। एते प्रदेशमात्रेण मयोक्ता गरुडात्मजाः (भा० उ० १०१।१५)। **प्रदेश उद्देशः=नाम्ना निर्देशः**। **प्रदेशो नाम यद्बहुत्वादर्थस्य कात्स्न्र्येनाभिधातुमशक्यमेकदेशेनाभिधानम्**। तत्रैषोऽत्यन्तप्रदेशः (भा० श्रौ० ६।१५।५)।

सामान्यो विधिरित्यर्थः । वृद्धिप्रदेशाः सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः (का० १।१।८) । **प्रदेशो विधिस्थलम्** । प्राभृतं तु प्रदेशनम् इत्यमरः । प्रदिष्टानि च देयानि न दद्युर्भर्तृशासनात् (भा० वन० २८।११) । **प्रदिष्टानि = आज्ञापितानि** । आवासं त्वहमिच्छामि प्रदिष्टमिह कानने (रा० ३।५।३३) । **प्रदिष्टम् = उपदिष्टम्** । प्रदेशिनी तर्जनी भवति । **प्रदिशत्यवश्यमित्यावश्यकेणिनिः** । **प्रदेश इह निर्देशः** । नाज्ञायन्त रणे वीरा न दिशः प्रदिशः कुतः (भा० शल्य० २२।२१) । **प्रदिशः = दिगन्तरालानि** । **प्रशब्दः प्रमितमाह यथा प्रदेश(= देशैकदेशः) इत्यत्र** । नक्षत्राणि ग्रहाश्चैव दिशोऽथ प्रदिशस्तथा (भा० अनु० १६०।४२) । **उक्तोर्थः** । प्रदिश्य चासनं चास्मै...(रा० २।४।११) । **प्रदिश्य = हस्तेन दर्शयित्वा** । तेषामनुमतं ज्ञात्वा राजा दुर्योधनस्तदा । सभावास्तूनि रम्याणि प्रदेष्टुमुपचक्रमे (भा०उ० ८५।१२) । **प्रदेष्टुं निर्देष्टुम् दर्शयितुम् इति वा** । तया प्रदेशितो राजा ब्राह्मणान् वशवर्तिनः । प्रास्थापयत् (भा० वन० ६६।३४) । **प्रदेशितः प्रकर्षेण सुष्ठुतया प्रेरित इति** । परितुष्टो व्याधान् प्रादेशिकेन संमानितवान् (तन्त्रा० २।५) । **प्रदेशनेन पारितोषिकेणेत्यर्थः** । **परितोषः प्रयोजनमस्येति पारितोषिकम्** ।

—**दिह्** (**दिह उपचये**) । शिग्रुभिर्नवनीतमिश्रैः प्रदेग्धि (कौ० सू० २६) । प्रदेहैः प्रदिह्यात् (सुश्रुते १।४२।१६) । **प्रदेहो लेपः** ।

—**दुष्** (**दुष वैकृत्ये**) । व्रणाः प्रदुष्यन्ति (सुश्रुते १।८३।१६) । **विक्रियन्त इत्यर्थः** । अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि (मनु० ९।७४) । **विकारमाप्नुयात्, पतिं व्यभिचरेदिति तात्पर्यार्थः** ।

—**दू** (**दूङ् परितापे**) । तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैव हाऽस्य सर्वे पाप्मानः प्रदूयन्ते (छां० उ० ५।२४।३)। **प्रदूयेत = दीप्येत, ज्वलेत् दह्येतेति वा** ।

—**दृश्** (**दृशिर् प्रेक्षणे**) । प्र मे पन्था देवयाना अदृश्रन् (ऋ० ७।७६।२) । **वाग्गोचरो अभूवन् इत्यर्थः** । न ह्यदग्धः प्रदृश्यते । लङ्कायाः कश्चिद् उद्देशः (रा०५।५१।५) । अहो त्वयाद्य विप्रेषु भक्तिरागः प्रदर्शितः (भा० अनु० १५२।२७) । **प्रकाशित इत्यर्थः**

— **दॄ**(**दॄ विदारणे**) । (पृथिव्याः) शोचत्या इमे प्रदराः प्रादीर्यन्त (ऐ० ब्रा० ७।३५) । **प्रदरा गर्ताः** । **अविशेषितो धात्वर्थः** । ततः प्रादीर्यत चमूर्धनञ्जयशराहता । महावातसमाविद्धा महानौरिव सागरे (भा० कर्ण० १६।७) ॥ **प्रादीर्यत = भग्ना, विद्रुता विघटिता जातेत्यर्थः** ।

—**द्युत्** (**द्युत दीप्तौ**) हृदयस्याग्रं प्रद्योतते (श० ब्रा० १४।७।२।३) **द्योतितुमारभते** । **प्रशब्द आदिकर्मणि प्रकर्षे वा** ।

—द्रा (द्रा कुत्सायां गतौ) प्र वीरया शुचयो दद्रिरे वाम् (ऋ० ७।६०।१)। **प्रदद्रिरे प्रदद्रुः प्रद्राणा दीना अभूवन्नित्यर्थः।**

—द्रु (द्रु गतौ)। उत्तिष्ठ प्रेहि प्रद्रव। (अथर्व० ४।१२।६)। **प्रद्रव=त्वरितो याहि, पलायस्व।** भयातः शक्रः प्रदुद्राव सरः प्रवेष्टुम् (भा०वन० १०१।१६)। **प्रदुद्राव प्रतत्वरे।** वित्रासिता मृगाः सिंहैः सहसा प्रद्रुताः (रा० २।६७।६)। **प्रनष्टा इत्यर्थः।** रणात्प्रद्रवन्ति बलानि (वेणी० ४)। **पलायन्त इत्यर्थः।**

—द्विष् (द्विष अप्रीतौ)। आश्रमस्थान् विधर्मस्थाः प्राद्विषन्त परस्परम् (भा०शां० २२८।६५)। **प्रशब्देन नार्थः। यो द्वेषः स एव प्रद्वेषः। यथा यो दीपः स एव प्रदीपः।** प्रद्वेषो बहुमानो वा संसर्गादेव जायते (स्वप्न० १।७)। **इत्यत्रापि तथा।**

—धा (डुधाञ् धारणपोषणयोः) यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वा भुवः (ऋ० १।१५१।२)। आत्मानमेव तद्यजमानोऽग्नौ प्रदधाति (तै० सं० २।३।२।६)। **प्रदधाति समर्पयति।** आयुः प्रजानां प्रदध्यात् प्रमायुकाः स्युः (काठक० २८।१)। **प्रधीयते निधीयते लीयते विकारजातं यस्मिन्निति प्रधानमिति स्वामी** (अमरोद्घाटने)। **प्रधीयते जन्यते विकारजातमनेनेति प्रधानमिति योगभाष्यटीकायां** (२।२३) **वाचस्पतिमिश्राः।** प्रधानं स्थित्यैव वर्तमानं विकाराकरणादप्रधानं स्यात् तथा गत्यैव वर्तमानं विकारनित्यत्वादप्रधानं स्यादिति पञ्चशिखाचार्यः।

—धाव् (धावु गतिशुद्ध्योः)। प्र नूनं धावता पृथक् (ऋ० ८।८६।७)। **प्रधावत=त्वरध्वम्। गन्तुं प्रस्थातुं सज्जा भवतेत्यर्थः।** तेभ्यो मधु प्रधावति (ऋ० १०।१५४।१)। **प्रवहति स्यन्दत इत्यर्थः।** द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः (भा० आदि०१३८।१५)। **इतस्ततो धावितुमारब्धेत्यर्थः।** न प्रधावेच्च वर्षति (मनु० ४।३८)। **देवे वर्षति न प्रतूर्णं गच्छेन्मा स्खालीदिति।** मनो हि मे दूरतरं प्रधावति ( )। **दूराद् दूरतरं जवते इत्यर्थः।** सा श्रीर्नीतिविदां वेश्म चञ्चलापि प्रधावति (हित० ४।४६)। **चलप्रकृतिरिति प्रपलायते।** समुद्रपारं यदि वा प्रधावसि। तथापि तेभ्यो न विमोक्षमर्हसि (भा० वि० १४।५०)। **प्रधावसि=त्वरितं क्रामसि।** आधावनप्रधावनमात्रके नन्दगोपपुत्रे (बाल०८)। **इह प्रधावनं प्रमिते देशे परिक्रमणमुक्तम्। यच्चङ्क्रम्येत्याहुः।**

—धू (धूञ् विधूनने)। अग्नौ प्रास्तं प्रधूयेत तथा तूलं द्विजोत्तम। तथा गङ्गावगाढस्य सर्वपापं प्रधूयते (भा० अनु० २६।२)। **अयमपपाठः। प्रधूयत इत्येव पाठः। छान्दोग्योपनिषदि तथा दर्शनादर्थसाङ्गत्याच्च।**

—धृ (धृञ् धारणे)। तस्मिन्राजा प्रधारयेत् (दण्डमिति शेषः)। परेणापकृतो राजा तस्मात्सम्यक् प्रधारयेत् (भा०शां० २६७।१०)। **दण्डं प्रणयेद् दण्डं**

निपातयेदित्यर्थः। वधाय कर्णात्मजस्याथ मनः प्रदध्रे (भा० कर्ण० ८५।२६।) **दध इत्येव पर्याप्तम्**। **अन्यत्र बहुत्र मनो दध इति दर्शनात्**। **व्यससादित्यर्थः**। सप्त या धारणाः कृत्स्ना वाग्यतः प्रतिपद्यते। पृष्ठतः पार्श्वतश्चान्यास्तावत्यो वै प्रधारणाः॥ **प्रशब्दो विप्रकर्षमाह यथा प्रवास इत्यत्र**। **यथा वा प्रशिष्यः प्रपौत्र इत्यत्र**। **व्यवहिता धारणाः प्रधारणाः**। (महाख्यानं) लोके बहुधा प्रधारितम् (भा० उ०१२३।२३)। **नानाशास्त्रयुक्त्यादिभिर्निश्चितम्**।

—**धृष्** (**ञिधृषा प्रागल्भ्ये, धृष प्रसहने**)। न च शत्रुं प्रपश्यामि युधि यो नः प्रधर्षयेत् (भा०आदि० ३०।३६। **अभिभवेत् अवमानयेत् कदर्थयेदिति वार्थः**। वायुरूपेण वा शक्रो गुरुपत्नीं प्रधर्षयेत् (= तस्यां सहसा प्रवर्तेत) (भा० अनु० ४०।४४)। न त्वां क्रोधः प्रधर्षयेत् (भा० अनु० ५५।२४)। **क्षोभयेत् क्षुभितं कुर्यादित्यर्थः**। येनायं राक्षसावासमस्त्वयैकेन प्रधर्षितः (रा० ५।३३।२२)। **विध्वंसितः, विपर्यासं नीतः**। बिभेति यथा शक्रो ब्रह्मचारिप्रधर्षितः (भा० अनु० ७५।३८)। **ब्रह्मचारिणाऽवमानितः**।

—**ध्मा** (**ध्मा शब्दाग्निसंयोगयोः**)। अग्निष्टानस्मात् प्रधमति यज्ञात् (अथर्व० १८।२।२८)। **प्रधमतीति लेटि रूपम्**। **प्रधमेत् वातवद् दूरमादधीतेत्यर्थः**। ततः सिंहपुरम्·····प्राधमत् (भा० सभा० २७।२०)। **उदसादयदित्यर्थः**। यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् स यथा तत्र प्राङ् वा···प्रध्मायीत् (छां० उ० ६।१४।१)। **विक्रोशेत्, शब्दं कुर्यादिति शङ्करः**। दिव्यौ शङ्खौ प्रदध्मतुः (गीता १।१४)। **प्रपूरयामासतुः**।

—**ध्यै** (**ध्यै चिन्तायाम्**)। प्राध्यायद् गरुडं हरिः। (हरि० १०३८१)। **सस्मारेत्यर्थः**। कृष्णः प्रदध्यौ यदुवीरमुख्यः (भा० आदि० १८७।६)। **मयैतन्नाम प्रध्यातं मनसा शोचता** (भा०उ० ११३।१०)। **चिन्ताविषयतां नीतम्**।

—**ध्वंस्** (**ध्वंसु अदस्त्रंसने गतौ च**)। यत्र सर्वत आपः प्रध्वंसेरन् (आश्व० गृ० ४।१।१०)। **प्रध्वंसेरन्=स्यन्देरन्=नावतिष्ठेरन्**। **प्रशब्दो गत्यर्थस्य द्योतकः**। **अत्रार्थे प्रपूर्व एवायं धातुः प्रयोगमवतरन्दृष्टः**। **प्रध्वंसते=प्रणश्यति** (छां० उ० ८।१।४)। प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः (भर्तृ० ३।२६)। **प्रध्वस्ताः=नष्टाः=उच्छिन्नाः**। प्रध्वस्तचत्वरपथाऽयोध्या (गोरेसियोसम्पा० रा० २।६८।५३)। **उज्जासिताजिरमार्गा**। **प्रध्वस्तानि चत्वराणि पन्थानश्च यस्यां सा**। **प्रध्वस्तानि विगतजनसम्पातानीत्यर्थः**। सिकताः प्रध्वंसयति (शा० ब्रा० ७।३।१।२३)। **प्रध्वंसयति विकिरति**।

—**नद्** (**णद अव्यक्ते शब्दे**)। प्राणदद्यामदुन्दुभिः (रा० २।८१।२)। **प्रावदित्यर्थः**।

—**नभ्** (**णभ तुभ हिंसायाम्**)। प्र नभस्व पृथिवि भिन्द्धीदं दिव्यं नभः

(अथर्व० ६।१८।१)। **प्रदीर्यस्व। उत्पाटिता भवेत्यर्थः। नमतिरकर्मकोपि**—नभन्तामन्यके समे (ऋ० ८।३६।१) इत्यत्र यथा। मा भूवन्नन्यके सर्व इति हि तत्र निरुक्तम्।

—**नम्** (णम प्रह्वत्वे शब्दे च)। तस्मात्प्रणमेन्न चातिनमेत् (तन्त्रा० ३।४)। **इह प्रशब्दोऽनर्थकः। नायं प्रकर्षमाचष्टे।** इन्द्राय स प्रणमति यो बलीयसे नमति (का० नी० सा० टीका)। **प्रणमति=नमस्यति।** वनवासे प्रणता मतिः कथम् (अवदा० जा० २०।२)। **प्रणता=प्रवणा।** नैवोन्नता न प्रणता न गुरुं धारयेच्चिरम् (का० सं० गर्भिणीचिकित्साध्याये)। **प्रणता=अवनता=आर्वाजता=नतकाया।** प्रणम्य प्रणिधाय कायम् (गीता० ११।४४)। **नमस्कृत्य।**

—**नश्** (णश अदर्शने। या प्रेव नश्यसि (ऋ० १०।१४६।१)। **प्रणश्यसि=तिरोभवसि, तिरोधत्से, अन्तर्धत्से।** आधिः प्रणश्येद् द्विगुणे धने यदि न मोच्यते (याज्ञ० २।५८)। तस्याहं न प्रणश्यामि स च मे न प्रणश्यति (गीता ६।३०)। **नित्यं संनिदध इत्यर्थः। अहं मद्भक्तस्य हृदि संनिविष्टः, स च मयीति तात्पर्यार्थः।** प्रनंष्टुमयतिष्ट च (भट्टि० १५।५८)। **प्रनंष्टुं पलायितुं प्रायसदित्यर्थः॥**

—**निज्** (णिजिर् शौचपोषणयोः)। आपो मलमिव प्राणैक्षीत् सर्वान्मच्छ-पथानधि (अथर्व० २।७।१)। **प्रक्षालयतु, शोधयत्वित्यर्थः।**

—**नी** (णीञ् प्रापणे)। उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति (ऐ० ब्रा० २५।६)। **प्रणयति=सुवति=प्रेरयति कर्मसु।** प्र नो नय प्रतरं वस्यो अच्छ (ऋ० ६।४७।७)। **प्रणय=प्रापय।** स होवाच। बिभेमि प्रणयत मेति (श० ब्रा० १२।६।३।८)। **अग्रे नयतेत्यर्थः।** तां पुरं प्रणयामि वः (अथर्व० १६।१६।१)। **प्रतिष्कशो भूत्वा नयामि प्रापयामि।** स येनैव प्रणयति तेनैव निनयति (श० ब्रा० १।६।२।३३)। **येन पात्रेणाप उपावस्ते तेनैवासिञ्चति आवर्जयतीत्यर्थः।** एतेनाग्ने ब्रह्मणा वावृधस्व'''उत प्रणेष्यभि वस्यो अस्मान् (ऋ० १।३१।१८)। **वस्यः श्रेयः। प्रणेषि साधु नयेत्यर्थः।** अस्त्रं पुनः पाशभृतः प्रणिन्ये (कि० १६।५४)। **प्रणिन्ये प्रययुजे।** प्रणये-द्वापि तां भूमिं प्रणश्येद्गहने पुनः (भा० शां० १२०।१५)। **प्रणयेत्=आत्मानं प्रापयेत्।** प्रणयस्व यथाश्रद्धं राजन् किं करवाणि ते (भा० वन० ५६।१)। **प्रीयस्वेत्यर्थो भाति।** नीलकण्ठस्तु **परिणयस्वेत्याह।** यो हि गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते तस्मिन्नाधाय इत्यमरः। **प्रणीयते=निर्मीयते=कल्प्यते।** शाल्यर्थं कुल्याः प्रणीयन्ते (भाष्ये १।१।२२)। **प्रणीयन्ते=निर्मीयन्ते।** प्रणयन्तु भवन्तो मां यथेष्टमभिमन्त्रिताः (भा० सभा० ३५।३)। **मयि स्निह्यन्तु, स्नेहं दर्शयन्तु। प्रकर्षेण श्रेयः प्रापयन्तु इति तु नीलकण्ठः।** यदि

न प्रणयेद्राजा दण्ड दण्ड्येष्वतन्द्रितः (मनु० ७।२०)। **प्रणयेत्=धारयेत्=निपातयेत्**। यत्राधर्म प्रणयते दुर्बले बलवत्तरः (भा० शां० ६३।१)। **प्रणयते=आचरति**। तस्मात्तमेव प्रणयेत्मदैव मन्त्रं प्रजासङ्ग्रहणे समर्थम् (भा०शां०८३।५५)। **प्रणयेत्कुर्वीत**। भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयन्ति (गो० गृ० १।११)। **स्थापयन्तीत्यर्थः**। **प्राञ्चं नीत्वाऽऽवर्त्य स्थापयन्तीति ग्रन्थाशयः**। प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा (रा० ५।२०।७)। **संमानने नयतेरात्मनेपदमिति टीकाकृद्रामः**। अपः प्रणयति। **अत्र पवनरूपं संस्कारं निर्वर्तयतीत्यर्थो विवक्ष्यते**। चाराः कृष्ण प्रणीयन्तामनिरुद्धस्य मार्गणे (हरि० २।१२१।३३)। **चार्यन्ताम् नियुज्यन्तामित्यर्थः**। अद्य कुन्त्याः परिक्लेशं वनवासं च कृत्स्नशः। द्रौपद्याश्च परिक्लेशं प्रणेष्यामि हते त्वयि (भा० भीष्म० ७६।४)॥ **विनेष्यामि अपनेष्यामीत्यर्थः**। प्रयं गये निनीषसि (ऋ०८।६२।४)। ओजायमाना तस्यार्ध्य प्रणीय जनकात्मजा (भट्टि० ५।७६)। **उपहृत्येत्यर्थः**। तेन सम्यक् प्रणीतानि शरजालानि (भा०भीष्म०८६।६)। **प्रणीतानि=क्षिप्तानि**। क्रमं प्रणीय पाञ्चाल्यः शिक्षां चोत्पाद्य केवलाम् (हरि० १।२४।३२)। **प्रणीय विरचय्य**। ददानि किं चापि मनःप्रणीतम्। **मनःप्रणीतं संकल्पितम्, हृदयस्य प्रियमित्यर्थो वैवक्षिकः**। परप्रणीतानि वचांसि चिन्वताम् प्रवृत्तिसाराः खलु माद्दशां गिरः (कि० १।२५)। **परप्रणीतानि=परग्रथितानि परोक्तानीत्यर्थः**। दग्धां गुहां पश्य उलूकपूर्णां काकप्रणीतेन हुताशनेन (पञ्चत० ३।१)। **प्रणीतेन=आहृतेन, क्षिप्तेन, दत्तेनेति वा**। भवत्प्रणीतमाचारमामनन्ति हि साधवः (कु० ६।३१)। **प्रणीतं निबद्धं ग्रन्थे कृतम्, स्मृतमिति वा**। प्रणीतो न तु प्रकाशितः (उत्तर० ४)। **प्रणीतो रचितः**। उत्तरं रामचरितं तत्प्रणीतं प्रयुज्यते (उत्तर०१।३)। **उक्तोर्थः**। **प्रणीतः संस्कृतोऽनलः** (अमरे)। **प्रणयनं मन्त्रादिना संस्कारैः प्रादुष्करणम् इति स्वामी**। वानरेन्द्रप्रणीतेन (बलेन) (रा०)। **वानरेन्द्रनायकेनेत्यर्थः**। कण्ठाश्लेषोपगूढं तदपि न चिरं यत्प्रियाभिः प्रणीतम् (भर्तृ० ३।८२)। **प्रणीतम्=रचितम्**। प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् (मनु० ६।३१७)। **प्रणीतः=आहितः**। वृष्ण्यन्धका ह्युग्रसेनादयो वै कृष्णप्रणीताः सर्व एवेन्द्रकल्पाः (भा० उ० २८।१२)। साधुकारं याचित स्यात्प्राक् प्रणीतमयाचितम् (ल० वि० स्मृ० ४।१०)। मिथ्याप्रणीते यज्ञाङ्गे प्रजानां संक्षयो ध्रुवः (हरि० ३।२।२१, रा० ६।६६।६)। **प्रणीते=निर्मिते=निर्वृत्ते**। प्रणीतमुपसम्पन्नं प्रयस्तं स्यान्मुसंस्कृतम् इत्यमरः। प्रणीतभावमत्यर्थं युधि सत्यपराक्रम (भा० उ०७६।२)। **युधि समर्पितचित्तमित्यर्थः**। प्रणीताः (आपः) (श० ब्रा० १।६।२।३२)। **प्रणीताः इतोभूते प्रयोगार्थं वेद्यां निहिताः**। **प्रणीतेति च यज्ञियपात्राणामन्यतमम्**। त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः

(हरि० ३।२३।५)। **प्रणीतः स्मृत उदित उदाहृत उक्तः** (गार्हपत्य आहवनीयो दक्षिणाग्निश्चेत्यग्नित्रेता)। बुद्धिः प्रणीता येनेयम् (रा० २।२२।१४)। **निर्मिता, रचितेत्यर्थः**। नीतिमता प्रणीता (सेना) (रा० २।६७।३१)। **प्रणीताऽभिविनीता=शिक्षिता**। दण्डनीत्यां प्रणीतायां सर्वे सिध्यन्त्युपक्रमाः। **दण्डनीत्यामुपयोगं नीतायाम्, व्यापारितायाम्** इत्यर्थः। न च धर्म प्रणीतं ते पथ्यमुक्तं विचक्षणैः (रा० ५।२३।७)। **प्रणीतमाचरितम्**। **ते=त्वया**। किमयं शब्दः स्यात्स्वभावज उत परप्रणीतः (पञ्चत०१८।१०)। **परप्रणीतः=परकृतः**। द्यूते पुराणैर्व्यवहारः प्रणीतस्तत्रात्ययो नास्ति न सम्प्रहारः। (भा० सभा० ५६।१३)। **प्रणीतः=निबद्धः, निर्णीतः प्रतिष्ठापितः**। (आयुर्वेदम्) भूयोऽप्यृषा प्रणीतवान् (सुश्रुते १।१।१८)। **अष्टधा व्यास, जगन्थ रचयाञ्चकारेत्यर्थः**। त्रिंशन्मुहूर्त तु भवेदहश्च रात्रिश्च संख्या मुनिभिः प्रणीता (भा०१२।२३१।१३)। **प्रणीता=निर्धारिता, नियतीकृता**। तेन वै दुष्प्रणीतेन गता वैवस्वतक्षयम् (भा० द्रोण० १८३।११)। **दुष्प्रणीतेन=दुर्नयेन**। प्रणीतीरभ्यावर्तस्व (अथर्व० ७।११०।१)। **प्रकृष्टनयनादिवेदब्रह्मचर्यनियतीः**। तव प्रणीती (=प्रणीत्या) तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः (वा० सं० ७।३५)। **तव प्रणीत्या=त्वया प्रणीताः सन्तः, त्वन्नेत्रा इत्यर्थः**। प्रणेतारो यजमानस्य मन्म (ऋ० ७।५७।२)। **प्रणेतारः=प्रेरयितारः**। तृन्नन्तमेतत्। प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु (ऋ० ८।१६।१०)। प्रणयन्ती चोपेक्षेत (का० सं० वि० शिष्य०)। **प्रणयं कुर्वतीमित्यर्थः**। अस्मत्प्रणेयो राजेति लोकांश्चैव वदन्त्युत (भा० शां० ५६।६०)। **प्रणेयो वश्यः**। सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितम् (भा०उ०१०७।७)। **प्रणयं कृत्वा विस्रम्भमुत्पाद्येत्यर्थः**। स्नेहस्य तत् फलमसौ प्रणयस्य सारः (मालती० १।६)। मया गृहीते सलिलेऽनेन कृतः प्रणयः (शा०५)। **प्रणयः परिचयः**। **कृतः प्रदर्शितः**। अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि (गीता० ११।४१)। **मैत्र्यात्, परिचयाद्वा** साधारणोऽयं प्रणयः (शा० ३)। **प्रेमा, अनुरागः** अलंकृतोस्मि स्वयंग्राहप्रणयेन भवता (मृच्छ० १)। **प्रणयेन=प्रसादेन**। हरेरतुलविक्रमप्रणयलालसः साहसे (मालती० ८।७)। **प्रणयोऽभिलाषः, स्पृहा**। आबद्धकङ्कणकरप्रणयप्रसादमासाद्य (मालती० ६।१४)। **करप्रणयः=करग्रहणम्, पाणिपीडनम्**। तद्भूतनाथानुग नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम् (रघु०२।५८)। **प्रणयं प्रार्थनाम्**। स मद्विधानां प्रणयैः कृशीकृतः (चारु० १।२६)। **प्रणयैः=याच्ञाभिः, धनयाचनैः**। हेतुप्रणयालसः (अवदा० जा० २३।२७)। **युक्तिप्रथनमन्द इत्यर्थः**। नेता रसानां नेता भासां ज्योतिषां प्रणयः (नि० २।१४।३)। प्रणयः=**प्रणेता। कर्तर्यच्**। भव्यानां भवादृशां चार्थिदर्शनं महोत्सवः प्रणयनमाराधनम्

(हर्ष० उ०३)। **प्रणयनं याचनम्। राजानं प्रति भैरवाचार्योक्तिरियम्।**

—**नु (णु स्तुतौ)**। प्र पर्वता अनवन्त प्र गावः (ऋ०८।८५।५) **प्राणवन्त= अनदन्, अशब्दायन्त**। गावोऽरेभन्त (अरम्भन्त) पर्वताश्चागर्जन् इत्यर्थः। **ओमिति** प्रणौति (ऐ०ब्रा० ५।३२)। **प्रणौति=उच्चारयति। विशिष्टेऽर्थे धातोः पाठः. सामान्ये प्रयोगः**। षोडशभिः प्रणौति (ऐ०ब्रा० ४।१,६।३३)। **वर्णानामक्षराणामन्ते ओम् इत्यक्षरमुच्चारयतीत्यर्थः**। य एतदेवं विद्वानक्षरं प्रणौति (छां० उ०१।४।५)। **उक्तोऽर्थः**।

—**नुद् (णुद प्रेरणे)**। प्रणुदा नः सपत्नान् (वा०सं०१५।२)। **परासुवेत्यर्थः। उत्सारय, दूरं गमय**। अग्ने जातान् प्रणुद मे सपत्नान् (अथर्व० ७।३५।१)। **अतिदूरमपसारयेत्यर्थः**। सा नो भूमिः प्रणुदतां सपत्नान् (अथर्व० १२।१।४१)। **उक्तोऽर्थः**। नावमन्येदभिगतं न प्रणुद्यात्कथंचन (भा०अनु०६३।१३)। **प्रणुद्यात्=प्रत्याख्यायात्, निराकुर्यात्। अभिगतमभ्यागतम्**। अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना (मनु० ३।१०५)। **अप्रत्याख्येयः। सूर्योढमस्तमनवेलायां प्राप्तमतिथिं वासे न प्रत्याचक्षीतेत्यर्थः**। न सायकप्रणुत्तानां पुनरस्ति निवर्तनम् (अथर्व०९।२।१२)। **सायकैर् दूरं प्रेरितानाम् इत्यर्थः**। तस्य सैन्यस्य रेणुमुद्धूतं वै वाजिखुरप्रणुन्नम् (भा०वन०२६९।२५)। **प्रणुन्नम्=उत्क्षिप्तम्**। बहुवेगप्रणुन्नेन समुद्रेण (रा० ५।३।३८)। **प्रणुन्नेन=आकम्पितेन, क्षोभितेन**।

—**नृत् (नृती गात्रविक्षेपे)**। क्लीबा इव प्रनृत्यन्तो वने ये कुर्वते घोषम् (अथर्व० ८।६।११)। **प्रनृत्यन्तो नर्तनपूर्वकं गच्छन्तः**। प्रनृत्यतीव सङ्ग्रामे चापहस्तो धनञ्जयः (भा० वि० ६२।९)। हर्षाविष्टः प्रनृत्तवान् (=**नर्तितुमारब्ध**)। **प्रशब्द आदिकर्मणि**। ये तदास्मान् प्रनृत्यन्ति पुनर्गौरिति गौरिति (भा० ८।८३।४३)। **अवहेलयन्तो नर्तकवृत्तिमास्थुः**।

—**पक्ष् (पक्ष परिग्रहे)**। प्रपक्षः शकुनिस्तेषाम् (भा० द्रो० ७।१२)। **प्रपतितपक्ष इत्यर्थः**।

—**पच् (डुपचष्)**। पिटकायाः पाकः प्रपाको भवति।

—**पठ् (पठ व्यक्तायां वाचि)**। यं (जप्यं) सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान् (भा०पु०४।८।५३)। **प्रपठन्=उच्चैरुच्चारयन्**। येन यत्नेन मन्वाद्यैरात्मवचनं प्रपाठितम् (=**प्रोक्तम्, अध्यापितम्**)। **प्रपाठक इति तैत्तिरीयसंहितादिषु ग्रन्थैकदेशस्य संज्ञा**।

—**पण् (पण व्यवहारे स्तुतौ च)**। येन धनेन प्रपणं चरामि (अथर्व० ३।१५।५)। **व्यवहर्तुं पण्यद्रव्यस्य परिमाणकल्पनं प्रपण इति सायणः**। शुनं नो अस्तु प्रपणः (अथर्व० ३।१५।४)। **प्रपणो विनिमयः**।

—**पत् (पत्लृ गतौ)** । साकं यक्ष्म प्र पत (ऋ० १०।९७।१३) । **प्रपत=अपध्वंस** । गिरिभिः पुरा वसुधां प्रपतद्भिरुत्पतद्भिश्च (व० सं० ३१।३) । ता एता देवताः सृष्ट्वा अस्मिन्महत्यर्णवे प्रापतन् (ऐ० उ० २।१) । **प्रापतन्=न्यञ्चन्** । ये तत्र पक्षिणो भूत्वा प्रपतन्ति यथादिशम् (भा०उ०४६।९) । **प्रपतन्ति=उड्डीयन्ते** । दृष्ट्वापि नाभ्यजानन्त तेऽज्ञानात्प्रपतन्त्युत (भा०सभा०३।३३)। **प्रपतन्ति=स्खलन्ति** । प्रपतेतः पापि लक्ष्मि नश्येतः (अथर्व० ७।११५।१) । **प्रपत=दूरं गच्छ** । पुरूरवो मा मृथा मा प्रपप्तः (ऋ० १०।९५।१५) । **मा पलायिष्ठाः, माऽपक्रमीः** । न खालित्यं न पालित्यं न केशाः प्रपतन्ति च (चरके) । वयं एवैनमेतद् भूतं प्रपातयति (श० ब्रा० ३।३।४।१५) । **प्रपातयति=उड्डाययति** । प्रपातादुद्धृतोऽन्यस्मादन्यत्र पतितो ह्यसि (अवदा० जा० २४।२८) । **प्रपातः=अवपातः=अवटः** । प्रपातस्त्वतटो भृगुरित्यमरः । मधु प्रेप्सुरिवाबुद्धिः प्रपातं नावबुध्यते (भा० द्रोण० १३३।१०) । **उत्तोऽर्थः** । प्रपातैरायुधान्युग्राण्युद्वहन्त (महीधरम्) न चुक्षुभे (भा० द्रोण० १७५।७४) । प्रपाताः पयसो विचित्राः कणपङ्क्तयः (यो० वा० ६ (२) १८६।७९) । **प्रपाता धारासाराः** । शरत्प्रतीक्षः क्षमतामिमं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः (रा० ४।२७।४८) । **जलप्रपातः=जलागमः=वर्षाकालः** ।

—**पद् (पद गतौ)** । यदध्वर्युश्च प्रतिप्रस्थाता च निश्चक्रामतः प्र च पद्येते (श० ब्रा० ४।२।४।२२) । **प्रपद्येते=प्रत्यावर्तेते** । तम एतत्पुरुष मा प्रपत्थाः (अथर्व० ८।१।१०)। **मा प्रपत्थाः=मा गमः** । योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः (कठ०उ० ५।७) । **प्रपद्यन्ते प्राप्नुवन्ति** । **अप्रपद्यंश्च** कर्माणि नित्यदेयानि (भा० शां० ३४।१२) । **अप्रपद्यन्=प्रापद्यन्त=आचरन्** । पश्यामो मयि किं प्रपद्यते (अमरु० २४) । **मयि कथं व्यवहरतीत्यर्थः** । धमनोर्यदा मातरिश्वा प्रपद्यते (सुश्रुते १।२५१।२०) । **प्रपद्यते=उपैति** । ब्रह्म प्रपद्ये ब्रह्म मा क्षत्राद् गोपायतु (ऐ० ब्रा० ७।२२) । **ब्रह्म शरणं यामीत्याह** । गच्छामित्रान् प्रपद्यस्व (ऋ० ६।७५।१६) । **प्रपद्यस्व=आक्राम, आस्कन्द, अभियाहि** । अथाम्बराद् भयजनना प्रपेदिरे सपादपाः·····महाद्रयः (भा० १।१९।२६) । **पतिता इत्यर्थः** । ते शरास्वसमुत्थेन प्रदीप्ताश्चित्रभानुना । भूमौ सर्वे तदा राजन्भस्मभूताः प्रपेदिरे (भा०उ०१८०।३४-३५) । **प्रपेदिरे=अवपेतुः** । श्रुत्वेदानीं प्रपद्येथाः स्वां मतिम् ( ) । **निश्चयं याहीत्यर्थः** । अनन्यशरणा चाद्यैव प्रभृति प्रपद्यस्व मनसा वाचा क्रियया च ··· ··· देवदेव त्रिभुवनगुरुं त्र्यम्बकम् (हर्ष० १) । **प्रपद्यस्व=शरणं याहीत्यर्थः** । प्रगृहीते ततो धर्मे प्रपत्स्यति कृतं युगम् (हरि० ३।४।४६) **प्रवेक्ष्यति, प्रक्रंस्यत इति वार्थः** । अप्रवृत्ताः प्रपत्स्यन्ते समयाः शपथास्तथ (हरि० ३।३।३०) । **प्रवर्तिष्यन्ते, प्रचरिष्यन्ति प्रथिष्यन्त इत्याह** । द्वारैवैन

पितृलोकं प्रपादयति (श० ब्रा० १३।८।१।५)। **गमयति प्रापयतीत्यर्थः**। अथैनं शालां प्रपादयति (श० ब्रा० ३।१।२।२१)। **प्रपादयति=प्रापयति=प्रवेशयति**। इन्द्रं मध्यं प्रपादयन्ति (=अन्तः प्रवेशयन्ति)। अपरस्याह्नः सन्धिकाले गृहान्प्रपादयेत् (व०गृ०१५।१४)। **उक्तोऽर्थः**। अथाऽस्य स्थानं व्रजपरिहितं प्रपाद्य (लौ० गृ० ३।४)। **गोसमूहो व्रजः, तेन परिहितमधिष्ठितं स्थानं प्रपाद्य प्रवेश्येति देवपालः**। अथ यत्र पूर्वया द्वारा वसतीवरीः प्रपादयन्ति। तदपरया द्वारा नेष्टा परिस्रुतं प्रपादयति (श० ब्रा० ५।१।२।१६)। **प्रपादयन्ति=प्रणयन्ति**। द्वारा पुरं प्रपित्सेत् (श० ब्रा० ११।१।१।३)। **प्रपत्तुं प्रवेष्टुमिच्छेदित्याह**। शिष्यस्तेऽहं शाधि मां त्वां **प्रपन्नम्** (गीता० २।७)। **प्रपन्नम्=शरणागतम्**। पीडिते तु विपन्नः स्यात्प्रपन्नः शरणागते (औ० पदा० २।४१)। मनोवाक्कर्मभिर्देव त्वां प्रपन्नान्भजस्व नः (भा० कर्ण० ३३।६२)। **प्रपन्नान्=शरणागतान्**। प्रपन्ना मामियं चेति दयां कर्तुमिहार्हसि (भा० आश्व० ६७।१६)। **उक्तोऽर्थः**। प्रपन्नवत्सलो देवः (भा०अनु०१७।६८)। भीतं प्रपन्नं प्रददाति यो वै (भा० उ० १२।२०)। त्वं प्रसादं प्रसन्नात्मन् प्रपन्नानां कुरुष्व नः (वि० पु० १।९।७४)। त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः (ध्वन्यालोके १।१)। प्रपन्नानां परित्राता प्रजानां प्रियकारकः (शिव० १।१५)। **अत्र सर्वत्र प्रपन्नः शरणागत उच्यते**। शरणं ये प्रपन्नानां भवन्ति शरणार्थिनाम् (भा० वि० १६।२७)। **प्रपन्नानां प्राप्तानामुपेतानाम्**। **अस्मात्प्रयोगादवसीयते यत्र क्वापि प्रपन्नशब्दः शरणागतमाह तत्र शरणमिति द्वितीयान्तं गम्यमानत्वाल्लुप्तमिति द्रष्टव्यम्**। प्रपन्नं साधयन्नर्थम् (याज्ञ० २।४०)। **इह प्रपन्नं प्रतिपन्नमभ्युपेतमाह**। इयं प्रपन्ना तपसे तपोवनम् (कु० ५।५९)। **प्रस्थिता गतेत्यर्थः**। प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः (शा० १।१)। **प्रपन्नः=सम्पन्नः=उपपन्नः=संगतः**। रात्र्यां प्रपन्नायाम् (=अवतीर्णायां त्रियामायाम्) (रा०२।४२।३२)। क्षमां च तत्रात्मवतां प्रपत्तुम् (अवदा० जा० १९।३३)। **प्रपत्तुम्=आचरितुम्=कर्तुम्**। कुर्वीत यस्ता हृदयेपि तावत्स्यात्सोऽपहास्यः किमुत प्रपत्ता (अवदा० जा० २०।१७)। **प्रपत्ता=अनुष्ठाता**। उक्तं गृहप्रपदनम् (आश्व० गृ० २।१०।१)। **गृहप्रपदनम्=गृहप्रवेशः**।

—**पा** (पा पाने)। यत्त्वा देव प्रपिबन्ति तत आप्यायसे पुनः (ऋ०१०।८५।५)। **पूर्ण पिबन्ति इत्यर्थः**। **प्रशब्दः पानस्य पर्याप्तिं कात्स्न्र्यमाह**। ऋजुः पश्यति यः सर्वं चक्षुषा प्रपिबन्निव (भा० उ० ३४।२३)। **आत्मानं दर्शनेन प्रत्यग्रतां नयन् इत्यर्थः**।

—**पिष्** (पिष्लृ संचूर्णने)। करेण येन प्रापनष्टि कुञ्जरान्न तेन सिंहो

मशकान् प्रबाधते (पञ्चत० १।२२६)। **प्रशब्दः प्रकर्षे। संचूर्णयति न त्ववचूर्णयति।**

—**पुष्** (**पुष पुष्टौ**)। प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यन्ति वार्यम् (ऋ० ५।६।६)। **प्रशब्दः प्रकर्षे। पोषस्य कात्स्न्र्यमाह।**

—**पूर्** (**पूरी आप्यायने**)। क्व गतिर्मनुषाणां च धनुषोऽस्य प्रपूरणे (रा० १।६७।२०)। **प्रसज्य धनुष आकर्णकर्षण इत्यर्थः।**

—**पॄ** (**पॄ पालनपूरणयोः**)। प्र यत्समुद्रमतिशूर पर्षि पारया तुर्वशं यदुं स्वस्ति (ऋ० १।१७४।६)। **प्रपर्षि=पारं नय। लेटि रूपम्। स्वस्ति=क्षेमेण।** प्रप्र यजं पृणीतन (ऋ०५।५।५)। **कृत्स्नं कुरुतेत्यर्थः।** शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते (साहित्य०)। दुह प्रपूरण इति धातुपाठः। **पूरणाभाव एव सः। इति प्रस्थानप्रसृतिपदे विरुद्धार्थस्य दर्शनादिति शाकटायनीये धातुपाठे। स्वाम्यप्येतमेवार्थमनुदवति क्षीरतरङ्गिण्याम्। वस्तुतः स्वामिशाकटायनयोः सम एष भ्रमः। अद्यापि हैमवतीषु वसतिषु दोहनार्थे दूध भरना इति व्यवहरन्त्याबालवृद्धं लोकाः। पयसा पात्रपूरणस्येष्टत्वाद् दोहनस्य च तदर्थत्वान्माङ्गलिकः प्रयोक्ता दोहनं प्रपूरणमाह। गां दुग्धे इत्यस्य गोः स्तनेभ्यः पयो निष्कास्य क्षारयित्वा पात्रं भरतीत्यर्थः। कामान् दुग्धे इत्यादिषु सर्वत्र प्रपूरणमेवार्थः। पूरणाभावस्तु सुतरां दुःश्लिष्ट इति न बहु वक्तव्यमस्ति।**

—**प्लु** (**प्लुङ् गतौ**)। तेऽधराञ्चः प्रप्लवन्ताम् (अथर्व० ३।६।७)। **नदीप्रवाहस्योपर्येव गच्छन्तित्यर्थः।** स ऐक्षत। यमिममात्मानमप्सु प्रापिप्लवम् (श०ब्रा० ६।२।१।८)। **प्रावाहयमित्याह। प्रापिप्लवम् इति ण्यन्तस्य प्लवतेर्लुङि रूपम्।**

—**बन्ध्** (**बन्ध् बन्धने**)। योऽनवद्यं कवते न तु प्रबध्नाति स घटमानः (कविः) (का०मी०१।५)। **प्रबध्नाति प्रबन्धं रचयति।** स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धमुपश्रयते (छां० उ० ६।८।२)। **प्रबद्धः=दृढं बद्धः।** अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि। व्रजत्यफलतामेव...(कि० ११।४३)। **प्रबन्धः पूर्वापरसम्बन्धः।** नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः (पा०३।३।१३५)। अत्र **क्रियाप्रबन्धः क्रियासातत्यम्।** प्रबन्धप्रहितं बाणवर्षम्=**सातत्येन प्रेरिता बाणवृष्टिः।** अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः (शिशु०२।७३)। **प्रबन्धः सन्दर्भः।**

—**बाध्** (**बाधृ लोडने**)। प्रबाधिता सहसा दैव्येन (ऋ० १०।१०८।६)। **दैव्येन बलेनाग्रतः प्रेरितेति विवक्षा।** बाहुभ्यां प्रबाधते कर्माणि (नि० ३।६)।

—**बुध्** (**बुधिर् बोधने, बुध अवगमने**)। अभुत्स्यु प्र देव्या दाचाहद्दिवो (ऋ० ८।६।१६)। प्राभुत्सि=**अजागरिषम्।** अप्रबुद्धा पशोः शक्तिः प्रबुद्धा

कौलिकस्य च । नरेश्वरे जगत्सर्वं निमीलति निमीलति.....तत्प्रबोधे प्रबुध्यते (हित० ४।१३५) ॥

***प्रबाधते प्रतनोतीत्यर्थः । प्रशब्दोऽर्थविपर्यासकृत् ।** न मृत्युसेनामायान्ती जातु कश्चित् प्रबाधते (=**वारयति** । कथं न दैवं शक्येत पौरुषेण प्रबाधितुम् (भा० सभा०४६।२०) । **प्रबाधितुम्**=**पीडयितुम्, विरोद्धुम्, निहन्तुम्** । दिनकरभाः प्रबाधमानं वर्षत्रम् (रा० २।१०७।१८) । **दिनकरभा इति द्वितीयाबहुवचने रूपम् । प्रबाधमानम्**=**निवारयत्** ।

—**बृह् (बृह बृहि वृद्धौ)** । प्र हि क्रतुं बृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ (ऋ० २।३०।६) । धृष्टद्युम्नः सोमकानां प्रबर्हः (भा० आदि० १९३।१) । **प्रबर्हः श्रेष्ठः** । तत्रोपतस्थुर्भरतप्रबर्हाः (भा० वन० २४।२५) । भवान्प्रबर्हः शास्त्राणां प्रगल्भश्चातिबुद्धिमान् (भा० शां०३१८।६४) । **उत्कोर्थः** ।

—**ब्रू (ब्रूञ् व्यक्तायां वाचि)** । अस्येदु प्र ब्रूहि प्र पूर्व्याणि कर्माणि (ऋ० १।६१।१३) । **प्रब्रूहि**=**आख्याहि** । **विस्तरेण शंसेत्यर्थः** । कदा नु ते भ्रात्रं प्रब्रवाम (ऋ० ४।२३।६) । **घोषयामेत्याह** । प्रैतानि तवमने ब्रूमः (अथर्व० ५।२२।८) । **प्रब्रूमः**=**रहस्यनिर्भेदपूर्वं ब्रूमः** । इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् (छां० उ० ३।११।५) । **शिष्याद् उपदिशेदित्यर्थः** । यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु (ऋ० १०।५४।२) । **प्रब्रुवाणः**=**प्रख्यापयन्** । हुत उपसृष्टां प्रब्रूतादित्याह (का० श्रौ० ४।२।१८) । **प्रशब्दोऽनर्थकः । हुतेऽग्निहोत्रे । उपसृष्टा**=**वत्सेन संगता गौः** । एतस्यैव बलिहरणस्यान्ते कामं प्रब्रुवीत भवति हैवास्य (गो० गृ० १।४।२८) । **प्रब्रुवीत**=**शब्दतः कथयेत, न तु मनसा प्रार्थयेत । प्रशब्दः प्रकर्षे** ।

—**भक्ष् (भक्ष अदने)** । ततः स कालः क्षुधितो देवांश्चासुरांश्च प्राभक्षयत (का० सं० कल्प० रेवती० (५))। **भक्षयितुमारब्धेत्यर्थः । प्रशब्द आदिकर्मणि** ।

—**भा (दीप्तौ)** । **प्रभातायां शर्वर्याम्**=**भातुं प्रवृत्तायाम्** ।

—**भाष् (भाष व्यक्तायां वाचि)** । अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते (वा० प० १।१५२) । **शिक्ष्यमाणोऽपभाषत इति पाठान्तरम्** ।

—**भिद् (भिदिर् विदारणे)** । उत्तमे वयसि सर्व एव (दन्ताः) प्रभिद्यन्ते (श० ब्रा० ११।४।१।५) । **शीयन्ते, भ्रश्यन्ति, प्रपतन्तीत्याह** । न त्वां प्रभिन्नं जानामि किमिदं भरतर्षभ (भा० मौ० ८।६) । **प्रभिन्नं पराजितम्** । छिन्नाभिन्नाः प्रभिन्ना वा (रा० ५।२६।१०) । **भिन्ना भित्तिवत्** । **प्रभिन्ना घटवत् शकलीकृता इत्यर्थः** । प्रभिन्नो गर्जितो मत्तः (गजः) इत्यमरः । प्रभिन्नमिव

*इत्यादयः पञ्च पङ्क्तयः स्थानभ्रष्टा वाधृधानुप्रसङ्गे कर्मणीत्यतोनन्तरम्पाठ्याः ।

मातङ्गं परिकीर्ण करेणुभिः (भा० वि० १६।२६)। ततो महामेघमहीधराभं प्रभिन्नमत्यङ्कुशमत्यसह्यम् (रा० २।१५।४६)। **उक्तोर्थः**। प्रभिन्ननरनारीकः समाजोत्सवशोभितः (रा० २।१००।४४)। **प्रभेदः सन्तोष इति तिलकः। प्रहृष्टनरनारीक इति क्वचित् पाठः।**

—भुज् (**भुजो कौटिल्ये**)। प्रभुज्य दक्षिणं जानुम् (वा० गृ० ५।२५)। **अन्वाच्येत्यर्थः**। दक्षिणं जानु प्रभुज्य (कौ० सू० १।१८)। **उक्तोर्थः**।

—भू (**भू सत्तायाम्**)। भुवः प्रभवः (पा० १।४।३१)। **भवनपूर्वके निःसरणे प्रभवतिर्वर्तत इति पदमञ्जरी**। हिमवतो गङ्गा प्रभवति। **ततः प्रादुर्भवतीत्यर्थः**। (शराः) प्रभवन्तः शरासनात् (भा० वि० ५८।४१)। **निःसरन्त इत्यर्थः**। अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे (गीता ८।१८)। **प्रादुर्भवन्तीत्यर्थः**। वनेपि दोषाः प्रभवन्ति रागिणाम्। **उक्तोऽर्थः**। स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः (शा०७।६)। **जज्ञ इत्यर्थः**। ततः प्रजानां पतयः प्राभवन्नेकविंशतिः (भा० आदि १।३३)। लोभात् क्रोधः प्रभवति (हित०)। द्विजातिपूर्वको लोकः क्रमेण प्रभविष्यति (भा० वन० १६०।८६)। **प्रभविष्यतीति शक्तिसम्पन्नो भविष्यतीत्याह**। विश्वासात्प्रभवन्त्येते (हित०)। **प्रभवः समर्था भवन्तीत्यर्थः**। मदनसन्तप्तापि न खल्वात्मनः प्रभवामि (शा०३)। **नात्मन ईश इत्याह**। प्रभवति निजस्य कन्यकाजनस्य महाराजः (मालती० ४)। **महाराजस्य कन्यास्वधिकार इति विवक्षति**। विधिरपि न येभ्यः प्रभवति (भर्तृ० २।६४)। **दैवमपि येषां नेष्ट इत्यर्थः**। प्रभवति मल्लो मल्लाय। **तुल्यबली भवतीत्याह**। प्रभवन्त्योपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः (माल०)। **प्रभवः सत्योपीत्याह**। कथं मृत्युः प्रभवति वेदशास्त्रविदाम् (मनु० ३।२)। **अभिभवति प्रसहत इत्यर्थः**। यज्ञो हैभ्यो विहृतो न प्रबभूव (ऐ० ब्रा० १।१८)। **एषां सहायो न बभूव, नैतांस्तर्पयामास**। देवेभ्यो वै सुवर्गो लोको न प्राभवत् (तै० सं० ६।६।११।२)। प्र स्तोमो बभूत्वग्नये (ऋ० १।१२७।१०)। **प्रबभूतु=उपकरोतु, उपयोगं व्रजतु**। रयिमिव पृष्ठं प्रभवन्तम् (ऋ० २।१३।४)। **पृष्ठवाह्यादभ्यधिकमित्यर्थः**। पशवो रेवत्यां प्राभवन् (तै० ब्रा० १।५।२।५)। **प्रभूता अतिबहुला अभवन्नित्यर्थः**। प्राभवंस्तस्या विवेकगुणाः क्रियाः (राजत० ५।३५२)। **उक्तोर्थः**। भवत्सम्भावनोत्थाय परितोषाय मूर्छते। अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे (कु० ६।५६)॥ **पर्याप्तानि न भवन्ति**। गुरुः प्रहर्षः प्रबभूव नात्मनि (रघु० ३।१७)। **शरीरे न समावित्यर्थः**। मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्छितो यथा (भ०पु०१।११।६)। **मुदा आत्मनः शरीरे न प्रबभूवेत्यन्वयः। शरीरेऽस्य वशो नाभूदित्यर्थः। प्रहर्षविषयोऽभूदिति पर्यवसितोऽर्थः। इत्थम्भूतो वाग्विन्यासः प्रचरद्भाषाशैल्याऽत्यन्तं संवदत इति**

सुधीभिरस्यार्वाचीनत्वमवसेयम्भवति । (गोमिनः) प्रभावयन्ति राष्ट्रं च व्यवहारं कृषिं तथा (भा० शां ८७।३८)। **प्रभावयन्ति सामर्थ्ययुतं कुर्वन्ति, एधयन्तीत्यर्थः**। गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः। जरया पुरुषो जीर्णः किं हि कृत्वा प्रभावयेत् (रा० २।१०५।११)॥ **शक्तिमान्त्स्यादित्याह**। कथं च खल्वात्मबलं च तत्त्वतः प्रभावयेन्मां चरणे दशाननः (रा० ५।३७।३५)। **अनुभवेद् विजानीयात्, परिचिनुयात्, विविञ्च्यादित्यर्थः**। एवं मनःप्रधानानि इन्द्रियाणि प्रभावयेत् (रा० २।१०५।२१)। **मनः प्रधानानामिन्द्रियाणां प्रभवेत्। तानि नियच्छेदित्यर्थः**। स यदि राजोपदस्येत्। तमत एव तन्वीरन्नतः प्रभावयेयुः (श० ब्रा०)। **निष्क्रमयेयुरित्यर्थः**। एतत् प्रविभावयिषन्ति चतुर्थस्याह्न उद्यत्यै (ऐ० ब्रा० ५।३)। **प्रभुत्वमक्षरस्य कर्तुमिच्छन्तीत्याह**। ब्रह्मणो हि प्रभूतोग्निरग्नेरपि च काञ्चनम् (भा० अनु० ८५।५१)। **प्रभूतो जात इत्यनर्थान्तरम्**। कच्चिच्च वो मूलफलं प्रभूतम् (=प्रचुरम्)। अकिञ्चनः सन् प्रभवः स सम्पदाम् (कु० ५।७७)। **प्रभवः=स्रोतः**। प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्। (भा० शां० १०६।१०)। **प्रभवो भूतिः समृद्धिः**। यथा नदीनां प्रभवः समुद्रः, यथाऽऽहुतीनां प्रभवो हुताशः। (**समुद्रः प्रभवः सङ्गमस्थानम्। आहुतिभिर्हुताशः प्रभूतो भवति**) यथेन्द्रियाणां प्रभवं मनोऽपि (**प्रभवं प्रभु**) तथा प्रभुर्नो भगवानुपेन्द्रः (म०व्या०१।५१)॥ पुत्र दुर्योधन! अहं तव प्रभावी ननु (पञ्च०१)। **प्रभावोऽस्यास्ति, प्रभुः। अहं ते प्रभवामीत्यर्थः**।

—**भृ (भृञ् भरणे)**। प्र वां ब्रह्माणि कारवो भरन्ते (ऋ० ७।७२।४)। **उपहरन्तीत्यर्थः**। इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः (वा० सं० १६।४८)। **उक्तोऽर्थः**। वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन्। पुरुतमासः पुरूहूत वज्रिवो भृति न प्र भरामसि (ऋ० ८।६६।११)। **भृतिरुपहारः। केवलस्यापि भृञ उपहरणमर्थः**। प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः (ऋ० १।१४।४)। अथैनं सर्वेषामनुवाकानां प्रभृतीरभिव्याहारयति। **प्रभृतिरादिर्भवति। लोके प्रभृतिरुपयमनन्यं च। उभयथा हि प्रयोगाः प्रयन्ते**। यज्ञस्य चक्षुः प्रभृतिः (अथर्व० २।३५।५)। **प्रभृतिरादिः, आदिभूतम्**। इदमग्निमुद्दिश्योक्तम्। संभाराणां प्रकर्षेण भृतिर्भरणमायोजनं प्रभृतिः, तया वर्तते यः स प्राभृतः। चिकित्सायां प्राभृतः चिकित्साप्राभृत इति **चरके** (सू० १६।२६) गङ्गाधरः।

—**प्रथ् (प्रथे विलोडने)**। सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा (हरि० २।३०।३२)। **प्रमाथो (भ्वादिः) भूतौ पातनम्**। भारते (विराट०१३।२७) श्लोकः पठ्यते। तत्र नीलकण्ठ एवं विवृणोति—**निपात्य पेषणं भूतौ प्रमाथ इति कथ्यते। यत्तूत्थायाङ्गमथनं तदुन्मथनमुच्यते**।

— **मद् (मदी हर्षे)**। द्यूते पाने तथा स्त्रीषु मृगयायां च यो नरः। न प्रमाद्यति मोहात्...(भा० शां० २८८।२६)॥ **द्यूते इत्यादयः सामीप्ये सप्तम्यः। न प्रमाद्यति आत्मानं विस्मृत्य तत्राभिनिविष्टो न भवतीत्यर्थः।** मा जीवेभ्यः प्रमदः (अथर्व० ८।१।७)। **प्रपूर्वो मदिरनवधाने वर्तते। अनवहितो मा स्म भूरित्याह।** नोपगच्छेत्प्रमत्तोपि स्त्रियमार्तवदर्शने। **प्रमत्तः कामशरैः पीडितः।** प्रमदसम्मदौ हर्षे (पा० ३।३।६८)। दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान्। मत्तः प्रमत्त उन्मत्तः.....(भा० उ० ३३।१०१)। **प्रमत्तोऽनवहितः।** कथां प्रमत्तः प्रथमं कृतामिव (शा०४।१)। यन्ति प्रमादमतन्द्राः (अथर्व०२०।१८।३)। **प्रमादं प्रकर्षेण मादयितारं तस्य मदकरं सोमम् इति सायणः।**

—**मन्द् (मदि स्तुतिस्वोदस्वप्नकान्तिगतिषु)**। यां त्वा जनो भूमिरिति प्रमन्दते (वा० सं० १२।६४)। **प्रमन्दते प्रशंसति मोदत इति सायणः।**

—**मा (माङ् माने)**। प्रेमां मात्रां मिमीमहे (अथर्व १८।२।३६)। **प्रकर्षेण मिमीहे।** यज्ञस्य (सोमः) प्रमाऽप्रिमोन्मा प्रतिमा वेद्यां क्रियमाणायाम् (काठक० ३४।१४)। **प्रमा=प्रमितिः।** सहस्रस्य प्रामसि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि (वा० सं० १५।६५)। कासीत्प्रमा प्रतिमा किं निदानम् (ऋ० १०।१३०।३)।

—**मिह् (मिह सेचने)**। यास्तिष्ठन्त्यः प्रमेहन्त यर्थवोष्ट्रदशेरकाः (भा० कर्ण० ४०।३७) **प्रशब्दोऽनर्थकः।**

—**मी (मीङ् हिंसायाम्)**। त्वां मृत्युर्दयतां मा प्रमेष्ठाः (अथर्व०८।१।५)। **मा प्रमेष्ठाः=मा मृथाः। प्रपूर्व एव मीङ् मृत्युमाचष्टे नं केवलः, यथा प्रमायुको भवतीत्यत्र। न तस्य लोमापि मीयत इत्यत्र मीयते क्षीयते छिद्यत इत्यर्थस्य दर्शनात्।** अथ तद्भीतया राज्ञा रक्षके प्रमयमागते (राजत० ६।२८४)। **प्रमयो मृत्युः।**

—**मृज् (मृजू शुद्धौ)**। विष्णोः स्तूपोऽसीति कर्षन्निवाहवनीयं प्रति प्रस्तरमपादत्ते.....न प्रमार्ष्टि (आप० श्रौ० २।३।८।५)। **न प्रमार्ष्टि=न स्पृशत्यन्येन** हस्तेन। त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् (मनु० २।६०)। **शोधयेदित्यर्थः।**

—**मृण् (मृण हिंसायाम्)**। रुजन्परिरुजन्मृणन्प्रमृणन् प्रेहि शत्रून् (अथर्व० १६।१।२, ४।३१।३)। **उच्चैरुत्सादयन्नित्यर्थः।**

—**म्लुच् (म्लुचु गत्यर्थे)**। प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ (वा० सं० १५।१७)। **प्रम्लोचति नरं प्रत्यात्मानं दर्शयतीति प्रम्लोचन्तीति महीधरः।** अहोरात्रे तु ते, ते हि प्र च म्लोचतोऽनु च म्लोचतः (श० ब्रा० ८।६।१।१८)। **उदयेते अस्तमयेते चेत्यर्थः।**

—**यज्** (**यज देवपूजासंगतिकरणदानेषु**)। देवानामुत यो मर्त्यानां यजिष्ठः स प्रयजतामृतावा (ऋ० ६।१५।१३)। **प्रशब्दो विशेषकृन्न। यो यजेरर्थः स एव प्रयजेः।**

—**यत्** (**यती प्रयत्ने**)। प्र रश्मिभिर्यतमानाः (तै० ब्रा० २।८।२।२)। **प्रयतमानाः प्रभवन्तः, प्रवृत्तिमन्तः।** प्रयतेतार्थसिद्धये (मनु० ७।२१५)। **चेष्टेतेत्यर्थः।** लोमानि प्रयतिर्मम (वा० सं० २०।१३)। **प्रयत्न इत्यर्थः।** स्वधाऽवस्तात्प्रयतिः परस्तात् (ऋ० १०।१२९।५)। **प्रयतिः प्रयतिता।**

—**यम्** (**यम उपरमे**)। हुत्वा प्रयताञ्जलिः कवातिर्यङ् अग्निमुपतिष्ठेत (वौ० ध० २।२।११)। **प्रयताञ्जलिः सम्पुटितकरः, बद्धाञ्जलिः।** तापसी तु तदा शक्रमुवाच प्रयताञ्जलिः (भा० अनु० १२।४४)। प्रयता ऋष्टयः (ऋ० १।६६।४)। प्रयता **निष्कृष्टा उद्यता असयः।** इदं दीर्घं प्रयतं सधस्थम् (ऋ० १।१५४।३)। **प्रयतमायामवत्।** शतमश्वान्प्रयतान्मह्य आदम् (ऋ० १।१२६।२)। **प्रयतान्=प्रत्तान्=उपायनीकृतान्।** अत्ता हवींषि प्रयतानि बर्हिषि (ऋ० १०।१५।११)। **प्रयतानि=निक्षिप्तानि=स्थापितानि।** अद्धि त्वं देव प्रयता हवींषि (अथर्व० १८।३।४२)। **प्रयता=प्रयतानि दत्तानि।** य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि। प्रयतः.....(कठ० उ० ३।१७)। **प्रयतः पूतः।** प्रयतात्मा जितेन्द्रियः (मनु० ४।१४५)। **बाह्याभ्यन्तरशौचोपेतः।** तमनु प्रयतो व युः पुण्यगन्धवहः शुभः। ववौ संहर्षयन् पार्थम्...(भा०)। **प्रयतो मन्दः।** नीवाकस्तु प्रयामः स्यादित्यमरः। **नियतं वचनं नीवाकः, तुलाकृतं न्यूनाधिकघ्नं क्रयादरो वेति स्वामी।** नाप्सु सतः प्रयमणं विद्यते (आप० ध० १।५।१५।१०)। **येन प्रयतो भवति तत्प्रयमणमाचमनम्। प्रयतः पूतः।**

—**यस्** (**यसु प्रयत्ने**)। उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति (ऋ० ३।५३।२२)। **उत्सिच्यमानेत्यर्थः।** प्रयस्तं स्यात् सुसंस्कृतम् इत्यमरः। **सुष्ठु राद्धम्।** प्रायसदुत्प्लवाय सः (तै० १।१२५)। **प्रयत्तवान् इत्यर्थः।**

—**या प्रापणे, प्रापणमिह गतिः**)। प्र ये ययुरृक्वासो रथा इव (ऋ० ७।७४।६)। **प्रययुः=यानमारब्धाः, प्रव्रजुः।** ततः प्रायाद्रहं तेन स्यन्दनेन (रा० गोरेसियो० २।४४।२५), भा० ३।१२०६८)। रथेन खरयुक्तेन प्रयातो दक्षिणामुखः (रा० श्लेगल० २।६९।१५)। **प्रयातः प्रस्थितः।** प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः (शा० ६।२६)। **सत्पथेन विपथेन वा याति, सद्व्यवहरत्यसद्वेत्यर्थः।** वियति बहुतरं स्तोकमुर्व्यां प्रयाति (शा० १)। **प्रयाति प्रसरति अग्रे धावति।** यद्येनमायतनाद् बाधेरन् वा प्र वा यापयेयुः (श० ब्रा० ११।८।१।३)। **प्रयापयेयुः निष्क्रमयेयुः बहिर्गमयेयुः।** राजानं प्रियायासन्तम् (श० ब्रा० १४।७।१।४४)। **प्रयातुं प्रस्थातुमिच्छन्तम्।** मार्ग तावः

च्छृणु कथयतस्त्वत्प्रयाणानुरूपम् (मेघ० १३)। **प्रयाणं यात्रा**। प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः (गीता ७।३०)। कामं पुरः शुक्रमिव प्रयाणे (कु० ३।४३)। **प्रयाणेऽभियानेऽभिक्रमे**। प्रायात्रिकं चानयताशु सर्वम् (भा० द्रोण० २।२६)। **प्रयात्रा युद्धार्थं प्रयाणम्। तदर्हम् प्रायात्रिकम्**।

—**याच् (दु) याचृ याच्ञायाम्**)। एवं प्रयाचति तदा भास्करे मुनिसत्तमः (भा० अनु० ६६।१)। **प्रशब्दोनर्थकः**। स पारिजातं यदि न प्रदास्यति प्रयाच्यमानो भवता (हरि० २।६८।३६)। **सानुबन्धं प्रार्थ्यमान इत्यर्थः स्यात्**।

—**यु (यु मिश्रणामिश्रणयोः)**। श्रीरसीति पार्श्वेन वसाहोमं प्रयौति (आप० श्रौ० ७।८।२५।४)। **प्रयौति घट्टयति, लोडयति**। विष्णोः स्तूपोऽसीति कर्षन्निवाहवनीयं प्रति प्रस्तरमपादत्ते नोद्यौति न प्रयौति (आप० श्रौ० २।३।८।५)। **न प्रयौति=न पुरस्तात् सारयति**। प्रयुतो न पातारः (आवाणः)। **प्रयुतः=घट्टयितारः। प्रपूर्वस्य यौतेः क्विपि रूपम्**। इति (वपां) प्रयौति (भा० श्रौ० ७।१४।१२)। **प्रयौति अपनयति उत्खिदति**। युवा प्रयौति कर्माणि नि० ४।१६)। **प्रयौति संमिश्रयति अविवेकित्वात्**। प्रयुवती गच्छति (नि० ६।२६)। नकिष्टं कर्मणा नशन्न प्रयोषत् (ऋ० ८।३१।१७)। **प्रयोषत्=पृथक् करोति=एकतः करोति**। धेनुं चरन्तीं प्रयुतामगोपाम् (ऋ० ३।५७।१)। वा० सं० ११।७५ इत्यत्र **प्रयुतां वियुक्तां व्रजाद् भ्रष्टामाह**। रात्रिं रात्रिमप्रयावम् (अथर्व० १६।५५।१)। **अप्रयावमिति सायणधृतः पाठः। अप्रयातमिति पाठान्तरम्। अप्रयावम्=अप्रच्छिद्य। इह प्रयुषिश्लेषे वर्तत इत्यभिप्रेतं सायणस्य**। स्वप्नश्चेदनृतस्य प्रयोता (ऋ० ७८६।६)।

—**युच्छ् (गुच्छ प्रमादे)**। या सम्राजा मनसा न प्रयुच्छतः (ऋ० १०।६५।५)। **यौ सम्राजौ मनसाऽसंनिहितौ न भवत इत्यर्थः। न प्रमाद्यत इति धातूत्कोऽर्थः। वेननन्ता न प्र युच्छतः**। धृतव्रताय दाशुषे (ऋ०१।२५।६)। **केवलस्य युच्छतेस्त्वपसरणमपसर्पणं वार्थः—न यो युच्छति तिष्यो यथा दिवः (अथर्व० ५।५४।१३)**।

—**युज् (युजिर् योगे)**। प्र यदा मर्त्यान् प्रयुनक्षि धीरः (अथर्व० १६।५६।१)। **सम्बध्नासीत्याह**। एते देवास्त्रिः संवत्सरस्य प्रयुज्यन्ते (तै० ब्रा०१।६।२।२)। **प्रयुज्यन्ते पूज्यन्त इज्यन्ते कीर्त्यन्ते सत्क्रियन्त इत्यर्थः**। यज्ञादेव तद्यज्ञं प्रयुङ्क्ते (तै० ब्रा० ३।२।५।६)। **प्रयुङ्क्ते=उद्धरति=उपादत्ते**। यज्ञपात्राणि प्रयुनक्ति (आप० श्रौ० १।४।११।५)। **प्रयुनक्ति=व्यस्यति=निधत्ते**। ये प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते (कु० ५।३५)। **अभिनयेन दर्शयन्ति**। उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते (उत्तर०१।२)। **अभिनयेन दृश्यतां नेष्यत इत्यर्थः**। इहापि तावद् धनसम्पदर्थिनः प्रयुञ्जते धनं दुरात्मनि (अवदा०

ब्रह्मजा० १७)। **वृद्ध्यर्थं धनं ददतीत्यर्थः**। धेनुरुष्ट्रो वहन्यश्वो यश्च दम्यः प्रयुज्यते (मनु० ८।१४६)। **वृद्ध्यर्थं कृषकादये कञ्चित्कालं प्रदीयते**। प्रायुङ्क्त राज्ये वत दुष्करे माम् (भट्टि० ३।५१)। **न्ययुङ्क्तेत्याह**। आशिषं प्रययुजे न वाहिनीम् (रघु० ११।६)। **व्यवजहारेत्यर्थः**। गृहस्थधर्मान् प्रयुञ्जान इमानि व्रतान्यनुकर्षेत् (गौ० ध० १।६।१)। **प्रयुञ्जानः=अनुतिष्ठन्**। तास्वभार्यायां मृतायामुत्सवः कर्तुं प्रयुज्यते (पञ्चत०)। **प्रयुज्यते=युज्यते**। **अस्थाने प्रशब्दः**। शक्वरीं श्वो यजे प्रयोक्ष्ये (तै० सं० २।६।२।३)। सर्वेभ्यः कामेभ्यो यजः प्रयुज्यते (तै० सं० २।४।११।२)। **प्रयुज्यते=अनुष्ठीयते**। (पृषतीः) प्रयुञ्जती दिव एति ब्रुवाणा (ऋ० ५।४७।१)। **प्रयुञ्जती=युञ्जती=वाहने प्रसजतीत्यर्थः**। उषो ये ते प्र यामेषु युञ्जते मनः (ऋ० १।४८।४)। **प्रयुञ्जते=युञ्जते युक्तं कुर्वन्तीत्यर्थः**। तेनाभिवादं भवतां न प्रयुञ्जे (भा० आदि० ८९।२)। **प्रयुञ्जे कुर्वे**। तेभ्यः प्रयुञ्जतां पूजा प्रोवाच मधुसूदनः (भा० उ० ८३।६३)। **प्रयुज्यताम् क्रियताम्**। गृणातिस्त्ववपूर्वो न प्रयुज्यत इति भाष्यम् (१।३।५१)। **न व्यवह्रियत इत्याह**। भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना (भट्टि० ७।८५)। **प्रयुज्यमाना=प्रेर्यमाणा**। नैकं प्रयोजनं योगारम्भं प्रयोजयति (भाष्यम्)। **प्रयोजयति=प्रवर्तयति=कारयति**। **योगारम्भस्य निमित्तं भवतीत्यर्थः**। लिङ्गविशिष्टस्य ग्रहणमेकशब्दह्रस्वत्वं प्रयोजयति (६।३।६२ सूत्रे वृत्तिः)। **प्रयोजयति=प्रवर्तयति**। **एकशब्दह्रस्वत्वं प्रयोजनमुद्दिश्य क्रियत इत्याह**। अनुतिष्ठेत्समारब्धमनारब्धं प्रयोजयेत् (**कारयेत्**) (का० नी० सा० ११।५७)। साम्नैवार्थं ततो लिप्सेत् कर्म चास्मै प्रयोजयेत् (भा० वन० ३२।५५)। मा स्म लुब्धांश्च मूर्खांश्च कामार्थेषु प्रयुयुजः (भा० शां० ७१।८)। **मा स्म व्यापीपरः, मा नियुक्था** इत्यर्थः। भोजयेत्सह भृत्यैस्तावान् शंस्यं प्रयोजयन् (मनु० ३।११२)। **आनृशंस्यं प्रयोजयन् अनुकम्पां दर्शयन्नित्याह**। अनुजानीहि मां तात आशिषश्च प्रयोजय (भा० भीष्म० ४३।३७)। **प्रयोजय=प्रयुङ्क्ष्व**। एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति (भाष्ये ६।२।८४)। **सुव्यवहृतः, सुप्रयोगविषयीकृतः**। एष एतेषां पशूनां प्रयुक्ततमो यदजः (तै० ब्रा० २।८)। **व्यवहृततमः**। **मृयिष्ठं हि वहनकर्मणि व्यापार्यते इत्यर्थः**। प्रयुक्तपाणिग्रहणोपचारौ (रघु०७।८६)। **प्रयुक्तः कृतः, उपचारः सत्कारः (आचारः) ययोस्तौ**। प्रयुक्तं राक्षसैः सह वैरम्...(रा० ३।६७।१२)। **प्रयुक्तं प्रक्रान्तम्, प्रारब्धम्**। अथ माढव्यं प्रति भवता किमेवं प्रयुक्तम् (शा०७)। **प्रयुक्तं व्यवहृतम्, आचरितम्**। आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् (कु० १।३६)। **प्रयुक्तं निर्मितम्**। अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः (गीता ३।३६)। **प्रयुक्तः**

=प्रेरितः। भावप्रयुक्तया युक्तया तया गुणकथया (अवदा० जा० ८)। **भावप्रयुक्तया=सद्भावप्रेरितयेत्याह**। परप्रयुक्तः पुरुषो विचेष्टते (भा०उ० ३२।१३)। **उक्तोर्थः**। नापोऽभ्यवयन्त्यूर्ध्वं जानुभ्यामगुरुप्रयुक्ताः (गो० गृ० ३।१।३२)। **गुरुणाननुज्ञाताः**। शते प्रयुक्तेऽशीतिभागं प्रतिमासं वृद्धिं गृह्णीयात् (मनु० ८।१४०) **इत्यत्र कुल्लूकः**)। **प्रयुक्ते वृद्ध्यर्थं दत्ते** (धने)। दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम् (अग्निपु० २५५।४)। **उक्तोर्थः**। गोखरोष्ट्रप्रयुक्तैश्च मानैः (भा० शल्य० ३५।२३)। **प्रयुक्तैः=युक्तैः**। **प्रायेणात्रार्थे प्रशब्दो न प्रयुज्यते**। उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका (अमरः)। अन्यः प्रयोगे स्यादत्र किल्बिषी जन्तुनाशने (भा० अनु० १।४६)। **प्रयोगे प्रवर्तने**। इदं वयं मृच्छकटिकं नाम प्रकरणं प्रयोक्तुं व्यवसिताः। **प्रयोक्तुम् अभिनयेन दृश्यतां नेतुम्**। उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् (अमरः)। **इह यो वृद्ध्यर्थं धनमन्यस्मै ददाति स प्रयोक्तेत्युक्तः**। परदारप्रयोक्तारस्ते वै निरयगामिनः। हर्त्रेभिर्मशिनोर्दृनाः.....(भा० अनु० २३।६१)॥ **परदाराणां प्रयोक्तारः=प्रेरयितारः, दुष्कर्मणि प्रवर्तयितारः**। न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि (रा० १।१५)। **प्रयोक्तव्या कर्तव्या**। समानम् आ पात्राणां प्रयोजनात् (भा० श्रौ० ६।१६।६)। **प्रयोजनं क्रमिका रचना क्रमेण न्यासः**। शरीरं सर्वं प्राविशन्नायुजः प्रयुजो युजः (अथर्व० ११।८।२५)। **अत्र सायणः—युजो योजनानि। उपसर्गवशादेषामर्थभेदोऽवगन्तव्य इति। स च सायणस्याप्यनवगतः। अवगतश्चेदभविष्यत्कथं नावक्ष्यत्**।

—**युध् (युध सम्प्रहारे)**। आदित्यं वोशनसं वाऽवस्थाय प्रयोधयेत् (आश्व० गृ० ३।१२।१६)। **प्रयोधयेत्=युद्धगारभेत। प्रशब्द आदिकर्मणि**। शूरा इव प्रयुधः प्रोत युयुधुः (ऋ० ५।५६।५)। **उक्तोर्थः**। सेनामुखे प्रयुद्धानां भीमसेनो भविष्यति (भा० उ० ५८।२३)। **प्रयुद्धानां युध्यमानानाम्**।

—**रभ् (रभ राभस्ये)**। तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव। इन्द्रस्य च रभामहे (ऋ० ६।५७।५)। **प्ररभामहे=गृह्णीमः**।

—**रम् (रमु क्रीडायाम्)**। रात्रिः कस्मात् प्ररमयति भूतानि नक्तंचराणि (नि० २।१८।२)। **प्रकर्षेण रमयति=विनोदयति=प्रमोदयति**।

—**रिच् (रिचिर् विरेचने)**। दिवश्चित्ते प्ररिरिचे महित्वम् (ऋ० १।५६।५)। अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् (अथर्व० २०।३५।६)। **अत्र प्रेत्युपसर्गो धात्वर्थं बाधते प्रस्मरणं प्रस्थानम् इत्यत्र यथा**।

—**री (री गतिरेषणयोः)**। यद् देवस्य शवसा प्रारिणा असुम् (ऋ० २।२२।४)। **प्रारिणाः=क्षयमुङ्क्थाः**।

—**रुच् (रुच दीप्ताभिप्रीतौ च)**। प्र रोचय्या उषसो न सूरः (ऋ० १।

१२१।६)। **न प्ररोचि**=नाभात्=नोदभासत। किं प्ररोचते (श० ब्रा० १।६।२।३)। **प्ररोचते**=रुचिविषयो भवति। अथैभ्योग्निः प्रारोचत (श० ब्रा० ३।२।३।६)। **अग्निस्तैः समगंस्तेत्यर्थः**। य एभ्यो यज्ञं प्रारोचयत् (श०ब्रा०१।६।२।५)। **यज्ञमेषां रुचेर्विषयतामापादयत्**। तेभ्यः (ऋषिभ्यः) देवा वैव प्ररोचयाञ्चक्रुः स्वयं चैव दध्रिरे (श० ब्रा० १।६।२।३)। **ऋषिषु रुचिमुत्पादयाञ्चक्रुः**। विधिविहितमर्थवादप्ररोचितं मन्त्रेण स्मृतमभ्युदयकारि भवति। **प्ररोचितम्**=**प्रशस्तम्, स्तुत्या प्रेरितम्**।

—**रुद्** (**रुदिर् अश्रुविमोचने**)। श्वानः प्ररुदन्त इव (व० सं० ४६।६८)। **न गर्भस्थः प्ररोदिति** (सुश्रुते १।३१६)। **उभयत्र प्रशब्दो न धात्वर्थं विशिनष्टि**। अथाकस्मात्प्रव्रते तया साध्व्या प्ररोदितुम् (कथा० १०।३६)। **प्रशब्दः प्रकर्षे**। **सा साध्वी उच्चैः क्रन्दितुं प्रवृत्तेत्यर्थः**।

—**रुध्** (**रुधिर् आवरणे**)। अतीर्थेन वा अयमध्वर्युराहुतीः प्रारौत्सीत् (श० ब्रा० ११।४।२।१४)। **प्रारौत्सीत्**=**अभ्रंशयत्**।

—**रुह** (**रुह बीजजन्मनि**)। **काण्डात्काण्डात् प्ररोहन्ती** (वा०सं० १३।२०)। **अङ्कुरानुद्गमयन्ती**। न ह्यनुप्तं प्ररोहति (भा० अनु० १६३।११)। **नाङ्कुरितं भवतीत्याह**। न पर्वताग्रे नलिनी प्ररोहति। न हि दुर्बलदग्धानां कुले किंचित्प्ररोहति। **अत्र प्ररोहणं वृद्ध्युपक्रममाहोपचारेण**। **न समृध्यति नैधत इत्याह**। गोभिः पशुभिरश्वैश्च कृषणया सुसमृद्धया। कुलानि न प्ररोहन्ति यानि हीनानि वृत्ततः (भा० ५।१२६०)। कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि (रघु० ६।३३)। **प्ररोहाः**=**अङ्कुराः**। मूढाः प्ररूढिं नोज्झन्ति द्रोहश्रीलोभमोहिताः (राजत० ६।१४६)। यास्ते रुहः प्ररुहो यास्त आरुहः (अथर्व० १३।१८)। **प्ररुहः**=**अभिनवाः शाखाः**।

—**लप्** (**लप व्यक्तायां वाचि**)। तै० ब्रा० २।२।१०।३ इत्यत्र **प्रपूर्वस्य लपेर्मूढोक्तौ** प्रयोगोऽव्यक्तोक्तौ वा। प्रलपत्येष वैधेयः (शा०२)। प्रलापोनर्थकं वचः (अमरः)। न तत्र प्रलपेत्प्राज्ञो वधिरेष्विव गायनः। अत्र प्रशब्दोऽर्थान्तरकृन्न। आर्तार्हं प्रलपामीदम् (भा०वन० ३२।२)। **अत्र प्रलापो विलाप उक्तः**। अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः (भा० उ० ३४।३२)। **प्रलपतोऽनर्थकं लपत इत्यर्थः**। सोऽद्य मां प्रलपिष्यति (वि० पु० ५।१७।१०)। **मया संलपिष्यतीत्यर्थः**। **प्रशब्दोऽस्थाने**। आलापाश्च प्रलापाश्च (अथर्व०११।१०।२५)। **प्रलापा अनर्थकानि वचनानि**।

—**लभ्** (**डुलभष् प्राप्तौ**)। त्वामेव कुरवो व्यक्तं प्रलम्भन्ते जनार्दन (भा० सभा० ३७।२८)। **प्रलम्भन्ते**(=**प्रलभन्ते**)=**विप्रलभन्ते**=**वञ्चयन्ते**। **अत्रार्थे गृधिवञ्च्योः प्रलम्भने** (पा० १।३।६६) **इति सूत्रं मानम्**। मया प्रलब्धो

ब्रह्मर्षिनारदः सुमहातपाः (भा० वन० ६६।५)। **वञ्चितः, अतिसंहित इत्यर्थः।** इत्यब्रुवन्त ते राजन्प्रलब्धास्तैर्दुरात्मभिः (भा० मौ० १।२२)। **उक्तोर्थः।** मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना (भा०आश्व०५५।२३)। एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप (भा० पु०११।१।१६)। **इदं प्रपूर्वस्य लभेरतिसन्धानार्थं प्रयोगप्राचुर्यं व्यनक्ति। पूर्वं मुनय एकोपसर्गपूर्वस्य प्रयोगमरोचयन्त, न तु विप्राभ्यामुपसृष्टस्य, यथाऽद्यत्वे।** तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना (भा० पु० १०।३४।१३)। **प्रलब्धैः कुपितैरिति श्रीधरः। इदमर्थस्वीकारे कवेः स्वाच्छन्द्यमेव हेतुः।** प्रलब्धश्च हृषीकेशस्तच्च कर्मविचारितम् (भा० शल्य० ५।६)। **प्रलब्धोऽवमानित इत्यर्थो भाति।** एवं प्रलम्भान्विविधान्प्राप्य (भा० सभा० ४७।१४)। **प्रलम्भान्=वञ्चनानि।** अनसूयुर्दुष्प्रलम्भः स्यात् (आप० ध० १।७।२०।५)। **मिथ्याफलाख्यानेन वञ्चयितुं न शक्यः स्यादित्यर्थः।**

—**ली (लीङ् श्लेषणे)**। अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे। राज्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके (गीता ८।१८)॥ **प्रलीयन्ते=विलीयन्ते, तिरोभवन्ति, नश्यन्ति।** एकः प्रजायते जन्तुरेक एव प्रलीयते (मनु० २।२४०)। **प्रलीयते म्रियते।** सह मेघेन तडित्प्रलीयते (कु० ४।३३)। **तिरोधत्ते इत्याह।** असितं ते प्रलयनम् (अथर्व० १।२३।३)। **प्रलीयते प्रकर्षेण लीयते संश्लिष्यत्यत्रेति प्रलयनमुत्पत्तिस्थानम् इति सायणः।**

—**लुप् (लुप्लृ छेदने)**। दर्भानेकेचित्प्रलुम्पन्ति हस्तैः (हरि०३।३२।१७)। ब्राह्मणस्य हविर्घ्राङ्क्षैः प्रलुप्यते। **अपह्रियत इत्यर्थः। घ्राङ्क्षा विलुम्पन्तीति पाठान्तरम्।**

—**लुभ् (लुभ गार्ध्ये)**। यन्मे माता प्रलुलुभे विचरन्त्यप्रतिव्रता (मनु० ९।२०)। **प्रातिव्रत्यं धर्ममतीयाय, पुमन्तरे लुब्धा बभूव।** त्रिस्तनी कुब्जेन सह प्रलुब्धा (पञ्चत०)। **कुब्जे बद्धभावाऽजनीत्यर्थः।** यद्वयं संशितात्मानं प्रलोब्धुं त्वामिहागताः (भा० आदि० २१७।३)। **प्रलोभयितुं धर्माद् विभ्रंशयितुं स्वात्मनि (स्वस्मिन्) प्रणयवन्तं कर्तुमित्यर्थः।**

—**वच् (वच परिभाषणे)**। प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट (ऋ० ८।९०।१५)। **प्रवोचम्=प्रब्रवीमि=उपदिशामि=अनुशास्मि।** तं प्रवक्ष्यामि भारतीम् (रा० २।६४।३७)। **प्रवक्ष्यामि=वक्ष्यामि। प्रशब्दो धात्वर्थानुवादी। ओमिति ब्रह्मणः प्रवक्षयन्नाह (तै० उ० १।८)।** यो मा प्रावोचः (तै० सं० २।६।६।१)। **यो मद्रहस्यमन्यस्मा आख्यद् इत्याह।** मा नो अग्ने दुर्भृतये प्रवोचः (ऋ० ७।१।२२)। **मा नः परादाः मा नः परस्मै रीरध इत्याह।** प्र णः पूर्वस्मै सुविताय वोचत (ऋ०८।२७।१०)। प्र च दातारममृतेषु वोचः (मै०सं०४।१३।७)। **प्रवोचः=कीर्तय=प्रख्यापय।** संज्ञप्तः

पशुरिति प्रोक्षते (का०श्रौ० ६।५।२३)। **प्रोक्षते=प्रकर्षेणोक्षते=उच्चैर्व्याहृते**। न हि पाणिनिना शब्दाः प्रोक्ताः किन्तर्हि सूत्रम् (भाष्ये)। **प्रोक्ता उच्चारिताः**। (तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे (छां० उ० ४।१०।२)। **अप्रोच्य=अनिवेद्य=अनामन्त्र्य**। इहापि प्रशब्दो विशेषकृन्न। अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च (मनु० ३।१०४)। प्रकर्षेणोच्यते व्याख्यायते वेदार्थ एभिरिति प्रवचनान्यङ्गानि। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् (तै० उ० १।११।१)। प्रवचनमध्यापनम्। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता (भाष्ये पस्पशायाम्)। प्रवक्ता=अध्यापकः।

—**वद् (वद व्यक्तायां वाचि)**। यो वै भवति यः श्रेष्ठतामश्नुते तस्य वाचं प्रोदितामनुप्रवदन्ति (ऐ० ब्रा० २।२५)। **प्रोदितां विस्पष्टमुच्चारिताम्**। सत्यं वचो यत्प्रवदन्ति विप्राः (रा० ५।२८।३)। शिवाश्चाशिवा वाचः प्रवदन्ति महास्वनाः (रा० ६।१६।११)। **शिवाः क्रोष्टारः (क्रोष्ट्रयश्च) प्रवदन्ति क्रोशन्तीत्यर्थः**। एष दात्यूहको हृष्टः···प्रवदन्मन्मथाविष्टः स्वकान्तामनुतिष्ठति (रा० ३।७६।१२)। **प्रवदन्=उच्चैर्वाश्यमानः**। (आपः) अप्रवदन्त्यः (आश्व० गृ० २।७।७)। (**अशब्दायमानाः**)। पुरा वाचः प्रवदितोर्निर्वपेत् (ऐ० ब्रा० २।१५)। **प्रशब्द आदिकर्मणि**। **वाग्विसर्जनात्प्रागित्यर्थः**। प्रसिद्धौ कार्याणां प्रवदति जनः पार्थिववलम् (अवि० १।५)। **प्रवदति घोषयति**। प्राग्वयसां प्रवादात् (आश्व० श्रौ० ४।१३।१)। **अर्वाक् शकुनीनां विरावादित्याह**। प्रवादेन मत्स्यानां राजा नाम्नायमुच्यते (भा० वि० २२।६)। **प्रवादः, प्रथितो वादः लोकवादः**। प्रवदतां श्रेष्ठः (हरि० २।४६।२५)। **प्रवदतां प्रवाचाम्**। या अवनेजनप्रवादा ऋचः (भा० श्रौ० ६।६।३।१३)। **अवनेजनं शोधनं प्रवदन्ति अभिवदन्तीति ताः**।

—**वप् (डुवप् बीजसन्ताने, बीजसन्तानो बीजविकरणम्)**। मिहः प्र तत्र अवपत् तमांसि (ऋ० १०।७३।५)। **प्रावपत्=प्रास्यत्=प्राक्षुदत्=अपाकरोत्=व्यगमयत्**। प्रवपाणि वपुर्वह्नौ (भट्टि० २०।३६)। प्रवपाणि शिरो भूमौ वानरस्य वनच्छिदः (भट्टि० ६।६८)। **छित्त्वा पातयामीति जयमङ्गला**। सधनुः सशरः साश्वः प्रवपन् सायकान्रणे (भा० भीष्म० ५२।६७)। **प्रवपन्=विकिरन्, विसृजन्**। प्रवपन् सायकान्बहून् (भा० द्रोण० १४७।४६)। **उक्षोऽर्थः**। पर्जन्यधोषान्प्रवपन् शरौघान् (भा० उ० २२।११)।

—**वल्ह् (वल्ह परिभाषणहिंसाच्छादनेषु)**। यत्किञ्चित्प्रवल्हितमादित्यकर्मैव तत् (नि० ७।११।१३)। **प्रहेलिकारूपम् प्रवल्हितम्**।

—**वस् (वस निवासे, वस स्नेहच्छेदापहरणेषु)**। पतङ्गे प्रवसति (व० बृ० सं० २७।२)। **सूर्ये गगनादपक्रामति, अस्तं गच्छति सति**। वर्षगणं प्रोवास (छां० उ० ४।४।५) **वर्षपूगं देशान्तरे वसति चकारेत्यर्थः**। अमा

वै नोऽद्य वसुर्वसति यो नः प्रावात्सीत् (श० ब्रा० १।६।४।३)। **अपाक्रमीत्, अपागादित्याह।** परिमलः पवनानुसारी दिशि दिशि प्रावात्सीत्। **दिस्तृतिमगमदित्यर्थः।** विधाय वृत्तिं भार्यायाः प्रवसेत् कार्यवान्नरः (मनु० ९।७४)। **विदेशं विप्रकृष्टं देशं गच्छेदित्याह।** न मे वैरं प्रवसत्येकाहमपि (हरि० २।५०।८४)। **प्रवसति विश्राम्यति विरमतीत्याहोपवारेण।** निर्वासयेल्लिङ्गं वा सवृषणं परिवास्य (बौ० ध०२।१।१४)। **परिवास्य=छित्त्वा।** प्रवासनं परासनं निषूदनं निर्हिंसनम् इत्यमरः। प्रवासयेद् दण्डयित्वा ब्राह्मणं तु विवासयेत् (मनु० ८।१२३)। **प्रत्रासयेन्मारयेत्। अर्थशास्त्रे प्रवासशब्दस्य मारणे प्रयोगाद् इति याज्ञ०२।८१ इत्यत्र मिताक्षरायाम्।** ततः प्रवासितो विद्वान् विदुरेण नरस्तदा (भा० आदि० १४१।५) **प्रवासितः प्रेषितः।** मुषितं प्रवासितं चैषामनिर्गतं रात्रौ ग्रामस्वामी दद्यात् (कौ० अ० ४।९०)। **प्रवासितम्=अन्यत्र नीतं (धनम्)।** यो वै गृहेभ्यः प्रवसन् प्रियाणां नानुसंस्मरेत् (भा० वि० ४।४७)। **प्रवसन्=प्रयान्।** अस्मिन् (नरके) निवासोऽमुलभप्रवासः (अवदा० श्रेष्टि० ५)। **प्रवासो देशान्तरगमनम्॥** अत्यन्तनिद्रोपगमाय मुक्ता (शिला) निद्राप्रवासाय कपेर्बभूव (अवद० जा० २४।२१)। **निद्राप्रवासायेति निद्रापगमायेत्याह।** प्रवासादुपावृत्तेन काश्यपेन (शा०)। **प्रवसत्यस्मिन्निति प्रवासो देशान्तरम्। प्रशब्दो विप्रकर्षे।** पूर्ववद् विराटक्रमैरुपस्थायाशित्वा प्रवसथमेष्यन् (आप० श्रौ० ६।७।२४।५)। **प्रवसथः प्रवासः।** सा ह वागुच्चक्राम। संवत्सरं प्रोष्य (छा० उ० ५।१।८)। **प्रोष्य=दूरं उषित्वा।**

—वह् (वह प्रापणे)। इदमापः प्रवहत यत्किं च दुरितं मयि (ऋ० १०।९।८)। **अपस्रावयतेत्यर्थः। अपनयत शोधयतेति तात्पर्यार्थः।** यथा बलिं न प्रवक्ष्यति (गो० गृ० ३।८।१४)। **वहेर्लृटि प्रयोगः। उक्तोऽर्थः।** यदनोवाह्यं स्यात्पूर्वं तं प्रवहेयुः (आप० ६।८।२८।४) **प्रवहेयुः=नयेयुः, हारयेयुः। कथं रथं त्वया हीनं प्रवक्ष्यन्ति रथोत्तमाः** (रा० २।५२।४३)। **रथं देव प्रवह** (आश्व० गृ० २।८।५)। **प्रवह अग्रतः कुरु।** अश्विना त्वा प्रवहतां रथेन (ऋ० १०।८५।२६)। **प्रवहताम्=नयताम्।** प्रोह्यमाणः सोम आगतः (वा० सं०८।५६)। **शकटादागतोऽवरूढ इत्यर्थः।** परेत पितरः सोम्यास इति प्रवाहण्या पितॄन् प्रवाहयति (आप० श्रौ० १।३।१०।५)। **प्रवाहणी शिबिकाविशेषः।** कर्णीरथः प्रवहणं डयनं च समं त्रयम् इत्यमरः। **प्रवहत्यनेनेति प्रवहणम्।** गिरिप्रवोढारमिवानिलं द्रुमाः (भा० द्रोण० २।१२)। **गिरेः प्रवोढारं समीरयितारमपनोत्तारम्।** अत्र सोढुं नालमिति शेषः। शयानः प्रौढपादश्च (मनु० ४।११२)। **आसनारूढपाद इति कुल्लूकः।** प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम् (अत्रि० श्लो० ३२५)। प्रोह्य पादौ हस्तिनं वाहयति

(५।४।१२८ सूत्रवृत्तौ)। प्रोह्य=प्रगुह्य।

—**वा (वा गतिगन्धनयोः)**। अहमेव वात इव प्रवामि (ऋ० १०।१३७।२)। **प्रशब्देन नार्थः**। वनाच्च वायुः सुरभिः प्रवायात् (भा० आदि० ७१।४२)। वातस्य प्रवामुपवामनुवात्यर्चिः (अथर्व० १२।१।५१)। प्रवाः=वातवीचिः। स यदग्निः। प्रवानिव दहति (ऐ०ब्रा० ३।४) **वान् इति शत्रन्तस्य प्रथमायामेकवचने।**

—**विच् (विचिर् पृथग्भावे)**। प्रविवेककामत्वादुद्यानपुष्करिण्यास्तीरे··· मधुकरगणोपकूजिते पर्यङ्कोपनिषण्णस्य (अवदा० जा० २)। **प्रविवेककामत्वात्=विविक्तसेवनेच्छुकत्वात्**। स तं गृहिजनसंसर्ग प्रविवेकसुखप्रमाथिन व्यासङ्गविक्षेपान्तरायकरमबहुमन्यमानः (अवदा० जा० ७)। **उक्तोऽर्थः**।

—**विज् (विजिर् पृथग्भावे, ओविजी भयचलनयोः)**। उपाविशन्गरुत्मतः शरैर्गाढं प्रवेजिताः (भा० वि० ३२।१७)। **प्रवेजिताः=उद्वेगं प्रापिताः**। उत्पूर्वस्य **विजेः प्रयोगस्तु बहुलतमः। संपूर्वस्य क्वचित्कः। प्रपूर्वस्य विरलतमः।**

—**विद् (विद ज्ञाने, विदॢ लाभे)** न हि प्रवेद सुकृतस्य पन्थाम् (ऋ० १०।७१।६)। **न प्रवेद=सुष्ठु न वेद।** यांश्च विद्म यां उ च न प्रविद्म (ऋ० १०।१५।१३)। मा त इदं पुष्टं कश्चन प्रविदत (श० ब्रा० १।६।१।५)। **मा प्रविदत=मा प्रापत्=मा स्मासदत्।**

—**विश् (विश प्रवेशने)**। देवरं प्रविशेत्कन्या तप्येद्वापि तपः पुनः (भा० अनु० ४४।५२)। **देवरं प्रविशेत्=देवरमाश्रयेत्**। ऋतुकाले मनस्विनी। पत्नी द्रुपदराजस्य द्रुपदं प्रविवेश ह (भा० ५।७३६७) **प्रविवेश=संविवेश=सम्बभूव। द्रुपदेन सह शिष्ये।** तं (अर्जुनम्) प्रवेक्ष्यन्ति ये सर्वे राजानः शस्त्रयोधिनः (हरि० २।१६।७८) पार्थात् **तिरोभविष्यन्ति, मन्दप्रतापा भविष्यन्तीत्यर्थः।**

—**वी (वी प्रजनगत्यसनखादनेषु)**। यदि वशां न विन्देदपि यैव का चाप्रवीता स्यात् (श० ब्रा० ५।५।१।११)। **अप्रवीता**=अनापन्नसत्त्वा=**अगर्भिणी। अत्रार्थे प्रशब्दो वृष्परिहरः। तमन्तरेण तदर्थानवगतेः। नानार्थेषु धातुषूपसर्गाणां द्योतकत्वस्याभ्युपेतत्वात्।**

—**वृ (वृङ् सम्भक्तौ)** दभ्रेभिः प्रवृणोति भूयसः (ऋ० ७।८२।६)। **अल्पसंख्यकैर्भूयःसंख्यान् पराणुदतीत्यर्थः**। वर्जयित्वा तु मे वज्रं प्रवृणीष्व यथेच्छसि (भा० वन० ३१०।१६)। **यथेष्टं वरयेत्याह। अत्रार्थे प्रशब्दो द्योतको नावश्यकः। केवलस्यापि प्रयोगदर्शनात्**—वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः (कि० २।३०)। करोमि कामं कं तेऽद्य प्रवृणीष्व यमिच्छसि (भा० रुद्रो० १२।४)। ण्यन्तस्य प्रशब्दपूर्वत्वं नियतम्। तं ते

प्रवारयामासुर्निरासुश्च परावसुम् (भा० वन० १३८।२०)। **प्रवृणीष्व कामं याचस्वेति प्रायुयुजन्**। ननु भोज्येषु पानेषु वस्त्रेष्वाभरणेषु च। प्रवारयति सर्वान्नि:...(रा० २।७७।१५)। **बहून्याभरणादीनि दिव्यवस्तून्युपस्थाप्य अङ्गुष्ठ किं तेऽपेक्षितं गृह्यतेति प्रकर्षेणास्मदिष्टवरणं कारयतीत्यर्थ इति तिलकः**। प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः। तस्मात्प्रवारणं पूर्वमर्हः पार्थो धनञ्जयः (भा० उ० ७।१७)॥ काम्यदानं प्रवारणम् इत्यमरः। तद्वृणीतां भवानग्रे प्रवार्यस्त्वं हि धर्मतः (भा० उ० ७।२०)। **काम्यं ते ददानीति प्रेर्यः**।

—**वृज्** (**वृजि वृजी वर्जने**)। प्रवावृजे सुप्रया बर्हिरेषाम् (ऋ० ७।३६।२)। विप्रुतं रेभमुदनि प्रवृक्तम् (ऋ० १।११६।२४)। **उभयत्र वृजिः प्रक्षेपणे परासने वर्तते**। घर्मश्चित्तप्तः प्रव्रजे य आसीदयस्मयः (ऋ० ५।३०।१५)। **प्रवर्जनमिहाधिश्रयणं श्रपणं वा वक्ति**। तं देवा अग्नौ प्रावृञ्जन् (श० ब्रा० ७।१।२।६)। **समतपन्नित्यर्थः**। यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति (श० ब्रा० १।७।१।११)। न प्रथमयज्ञे प्रवृञ्ज्यात् (श० ब्रा० १४।२।२।४४)। **प्रवर्ग्यं नानुतिष्ठेदित्याह**। अवकाश्यस्य प्रवृञ्ज्यात् (का० श्रौ० २६।७।५२)। **प्रवर्ग्यं कुर्यात्**। ज्ञातिप्रियानूचाना एते त्रयोऽवकाशाः। अवकाशशब्दवाच्याः। अवकाशा एवावकाश्याः। धर्मो वा एष प्रवृज्यते (=**सन्तप्यते**) **यदग्निहोत्रम्** (काठक० ६।२)।

—**वृत्** (**वृतु वर्तने**)। किं.....राजिलेषु गरुडः **प्रवर्तते** (रघु० ११।२७)। **प्रवर्तते=शत्रूयते, द्रुह्यति, अवस्कन्दति**। प्रावृतद् गृहात् (भट्टि० १५।७)। **प्रास्थितेत्यर्थः**। तस्य हस्यामवारितम्। अश्व प्रववृते (कथा० १३।१२६)। **प्रववृते प्रसुस्राव**। प्रवर्ततां प्रकृतिहिताय पार्थिवः (शा० ७।३५)। **प्रवर्ततां=चेष्टताम्=प्रयतताम्**। तदर्थव्याख्यानाय ब्राह्मणं प्रवर्तते (बृ० उ० शं० भा०)। **ब्राह्मणमारभ्यते**। राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते (रघु० १५।४।७)। **प्रवर्तते=प्रथते=प्रचरति**। तस्मादोमित्युदाहृत्यय ज्ञदानतपःक्रियाः प्रवर्तन्ते (गीता १७।२४)। **प्रवर्तन्ते=एधन्ते=समृध्यन्ति=पुष्यन्ति**। स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते (पञ्चत० १।८१)। **अविच्छेदेन वर्तते**। प्रवर्तमानं च न दृश्यते रजः (शा० ७)। **प्रवर्तमानमुत्तिष्ठत्**। अथ याः समापयिष्यामः संवत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्तन्त (ऐ०ब्रा० ४।१७)। **प्रावर्तन्त=न्यवर्तन्त=निवृत्तान्यभवन्, प्रपतितानि विशीर्णानि जातानि**। न्यर्थे प्रशब्द इति षड्गुरुशिष्यः। अयमेवार्थो **युक्तो भाति**। **अव्यवहितपूर्वायाः ता या उदतिष्ठंस्ता एताः शृङ्गिण्य इति श्रुतेः श्रवणात्**। स यो द्रोणकलशे शुक्रः परिशिष्ट आस तं प्रवर्तयाञ्चकार (श० ब्रा० १।६।३।८)। **प्रवर्तयाञ्चकार=आवर्जयामास=अवसिषिचे**। इतस्तर्हि देवः प्रवर्तयतु पुष्पकम् (उत्तर०)। **प्रस्थापयतु प्रेरयत्वित्यर्थः**।

कश्चिद् राजा ब्राह्मणानां यथावत् प्रवर्तते पूर्ववत् तात वृत्तिम् (भा० उ० २३।१५)। **प्रवर्तते = प्रवर्तयति = घटयति = प्रणयति = संविधत्ते। अन्तर्णीतण्यर्थको वृतिः।** हन्त प्रवृत्तं सङ्गीतकम् (माल० १)। **प्रवृत्तं प्रारब्धम्।** प्रवृत्तोऽश्वतरीरथः (छां० उ० ५।१३।२)। **स्थित इत्यर्थः।** देवालयं स्त्री प्रयता प्रवृत्ता (**प्रस्थिता**)। (व० वृ० सं० २७ (२५।८)। प्रवृत्तां श्रुतिं दूषयति (भा०अनु० २४।८ इत्यत्र नीलकण्ठः)। **प्रवृत्तां विसृमरां प्रचरन्तीम्।** वने प्रवृत्तामिव नीलकण्ठीम् (रा० ५।११।२३)। प्रवृत्तां विहरन्तीम्। प्रवृत्तशिखा ज्येष्ठप्रथमाः कनिष्ठजघन्याः (आश्व० गृ० ४।२।७)। **प्रवृत्तशिखाः = मुक्तशिखाः। ज्येष्ठः प्रथमः पुरःसरो येषां ते ज्येष्ठप्रथमाः। जघन्यः = पश्चाद्भवः = पृष्ठतोगामी।** आकालिकीं वीक्ष्य मधुप्रवृत्तिम् (कु० ३।३४)। **प्रवृत्तिम् = प्रारम्भम्। रात्री केशा हरितौ प्रवर्तौ** (अथर्व० १५।२।५)। खादिरं पात्रं चतुःस्रक्ति प्रयुनक्ति। सौवर्णस्य प्रवर्तशतमानस्य कृतम् (आप० श्रौ०)। **प्रवर्तः कर्णाभरणं कुण्डलमिति सायणः।** कृच्छ्रं चान्द्रायणं चैव लोहितस्य प्रवर्तने (बौ० ध० २।१।१।७)। **प्रवर्तने प्रवाहणे स्यन्दने स्रावणे।** तदेतत् पूर्णमप्रवर्ति। पूर्णमप्रवर्तिनीं श्रियं लभते य एवं वेद (छां० उ० ३।१२।६)।

—**वृध् (वृधु वृद्धौ)** पापान्प्रवर्धतो दृष्ट्वा कल्याणानवसीदतः (भा० अनु० १२४।३६)। **नार्थः प्रशब्देन।** लोकानुग्रहकर्तारः प्रवर्धन्ते महीभुजः।

—**वृष् (वृषु सेचने)**। विषये वासवस्तस्य सम्यगेव प्रवर्षति (भा० अनु० २।१४)। **प्रशब्देन नार्थः। सम्यक्छब्देन प्रकर्षस्योक्तत्वात्।** शैलेन्द्रमिव धाराभिः प्रवर्षन्ति पयोधराः (रा० ३।३१।६)। **प्रशब्दोऽभेरर्थे।** वार्षिकांश्चतुरो मासान्यथेन्द्रोद्भिः प्रवर्षति (मनु० ६।३०४)। **सिञ्चति भुवमित्यर्थः।**

—**वृह (वृहू उद्यमने)**। तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण (कठ० उ० २।३।१३)। **विश्लेषयेदित्यर्थः।** तेषां (लोकानाम्) तप्यमानानां रसान्प्रावृहद् अग्निं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः (छां० उ० ४।१७।१)। **निरकासयदित्याह।** तस्य पादमगृह्णात्स प्रावृह्यत (काठक० १३।२)। **भग्नोऽभूत्, विश्लिष्टोऽभूदित्याह।** जह्यसुष्वीन्प्रवृहापृणतः (ऋ० ६।४४।११)। **प्रवृह = उन्मूलय।** प्र हि क्रतुं वृहथो यं वनुथो रघ्रस्य स्थो यजमानस्य चोदौ (ऋ० २।३०।६)। **प्रवृहथः = उत्सादयथः ध्वंसयथः।** ते सवनानि प्रावृहन्त (श० ब्रा० ११।५।६।४)। **आत्मानम्प्रत्याकर्षन् आत्मीयान्यकुर्वन्नित्यर्थः।** शूलात्प्रवृह्य हृदयं कुम्भ्यामवधाय (आप० श्रौ० ७।७।२३।७)। **प्रवृह्य = अपनीय।** यो ग्रीवाभ्यः प्रवृढाभ्यो रसः समस्रवत् (काठक० ३४।३)। **प्रवृढाभ्यः = अवकृत्ताभ्यः।**

—**वे (वेञ् तन्तुसन्ताने)**। **प्रोयतेऽस्यामिति प्रवाणी। प्रवयन्ति तयेति**

वा प्रवाणी (काशिका५।४।१६०)। इषीकातूलमग्नौ प्रोतम् (छां०उ०५।२४।३)। **प्रोतं म्यस्तम्**। तरुच्छिद्रप्रोतान् (शशिनः करान्) विसमिति करी संकलयति (सुभा०)। **प्रोतान् प्रस्यूतान्**। तत्र सर्वमिदं प्रोतमोतं चैवाखिलं जगत्। ततो जगज्जगत्तस्मिन्स जगच्चाखिलं मुने (विष्णु० पु०२।६४)। **उक्तोर्थः**।

—**वेप्** (टुवेपृ कम्पने)। प्रावेपत भयोद्विग्ना प्रवाते कदली यथा (भा० उ० १३।३)।

—**वेष्ट्** (वेष्ट वेष्टने)। भुजबाहू प्रवेष्टो दोः (अमरः)।

—**व्यध्** (व्यध ताडने)। तां संक्लिश्याप्सु प्राविध्यत् (श० ब्रा० ६।१।१।१२)। **प्राविध्यत्=प्राक्षिपत्**। वायुप्रविद्धाः शरदि मेघजाला इवाम्बरे (रा० २।६३।१२)। **वातप्रेरिता इत्याह**। प्रविद्धो रक्षसां भागः पर्वणीवाहिताग्निना (रा० २।४३।५)। **प्रविद्धः=प्रक्षिप्तः**। अपकीर्णजटाभारं प्रविद्धकलशोदकम् (रा० २।६३।३६)। **प्रविद्धं पर्यस्तम्**। देवतार्चाः प्रविद्धाश्च (रा० २।७१।४०)। **प्रतिमा निरस्तपूजना जाता इत्याह**।

—**व्रज्** (वज व्रज गतौ)। तौ ह शान्तहृदयौ प्रवव्रजतुः (छां० उ० ८।८।३)। **प्रतस्थाते इत्याह**। गृह्णीयुरपि मातङ्गान् मत्तान्प्रव्रजतो वने (रा० १।१७।२८)। **प्रव्रजतः स्वच्छन्दगतीन् इति कतकः**। अजातश्मश्रवो मन्दाः कुले जाताः प्रवव्रजुः (भा० शां० ११।२)। **परिव्रज्यां परिजगृहतुरित्यर्थः**। **पुनर्गृहं प्रति न गन्तव्यमिति प्रकर्षेण गता इति तिलकः**। अतएव ब्रह्मचर्यवान् प्रव्रजति (आप० ध० २।२१।१६)। **प्रव्रजति प्रकर्षेण व्रजति न प्रत्यावर्तत इत्यर्थः**।

—**शंस्** (शंसु स्तुतौ)। प्र ते महे विदथे शंसिषम् (अथर्व० २०।३०।१)। **प्रशंसिषम्=प्राशंसिषम्**। **प्रास्ताविषमित्यर्थः**।

—**शद्** (शदॢ शातने)। अन्तर्वेदिशाखायाः पलाशान्यसर्वाणि प्रशात्य मूलतः शाखां परिवास्योपवेषं करोति (आप० श्रौ० १।२।६।६)। अपि वा काममा मार्गादा मधुन आ प्राशातिकाद् (आप० श्रौ० ४।१।३।८)। **प्राशातिकं कोशीधान्यम्, यस्मात्प्रशातनेनोद्धियते। भक्ष्यकाण्डेषु मृगमांसपर्यन्तानां रसेषु मधुपर्यन्तानाम् अन्नेषु च प्राशातिकपर्यन्तानां भक्षणे याथाकामी, एभ्योऽवशिष्टेभ्यः परेषामभक्षणमेव (इति रुद्रदत्तः)**।

—**शम्** (शमु उपशमे शम लक्ष आलोचने)। प्रशाम्य नगरं दानवांश्च निहत्य तान् (भा० वन० १७२।३५)। **प्रशाम्य प्रकर्षेणालोच्येति नीलकण्ठः**। प्रशान्तं पावकास्त्रम् (उत्तर० ६)। **निर्वाणमित्यर्थः**। निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति (पञ्चत० ३।५६)। **उक्तोर्थः**।

—**शास् (शासु अनुशिष्टौ, आङः शासु इच्छायाम्)**। अपि साक्षात् प्रशिष्यास्त्वं कृच्छ्रे ष्विन्द्रपुरोहितम् (भट्टि० १९।१६)। **शासितुमुपदेष्टुमर्हसीति कवेर्विवक्षितम्**। प्रशाधि धर्मेण वसुन्धराम् (अवदा०जा० २२।९९)। **प्रशाधि=ईशिष्व**। गां प्रशाधि गलितावधिकालम् (नै० ५।२४)। **उक्तोर्थः**। प्रशाधि यन्मया कार्यम् (मार्क०पु०)। इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे (उत्तर० १।१)। **प्रशास्महे याचामहे इति यावत्**। **नमोवाकम्—नम इत्युक्त्वेत्यर्थ इति कश्चित्**। **अत्रार्थे आङ् युज्यते वक्तुम्**। **न ह्यत्रार्थे आङं व्यभिचरति धातुः**। **आङ् प्रायिक इति तु रभसोक्तिः**। **यत्तु प्रशासनं निर्देश इति वीरराघवस्याभिमानः स प्रयोगैः समर्थनां न लभत इति नादृत्यो भवति**। इन्द्रप्रसूता वरुणप्रशिष्टा ये (ऋ० १०।६६।२)। **प्रशिष्टाः=आदिष्टाः**। प्रशास्तृ-सूत-सेनानी-मन्त्र्यमात्य-पुरोधसाम् (का०नी०सा०१४।४५)। प्रशास्तारः=**कलाध्यक्षा इति मङ्क्त्वा**। प्रशास्तारः सैन्यप्रसाधका **इत्युपाध्यायनिरपेक्षा**। आशिषः प्रशिषश्च संशिषो विशिषश्च याः (अथर्व० ११।१०।२७)। **प्रशिषः=प्रशासनानि**।

—**शृ (शॄङ् हिंसायाम्)**। शृणातु ग्रीवाः प्रशृणातूष्णिहाः (अथर्व० ६।१३४।१)। **प्रशब्दः प्रकर्षे**।

—**श्यै (श्यैङ् गतौ)**। यद्वै शीतस्य प्रशीतं तद्धिमस्य जरायु (श० ब्रा० ९।१।२।२६)। **प्रशब्दः प्रकर्षे। शीतमिति निष्ठायां सम्प्रसारणे रूपम्। सम्प्रसारणविरहे तु श्यानमाश्यानं संश्यानमिति भवत्युपसर्गान्वयव्यतिरेकाभ्याम्**।

—**श्रि (श्रिञ् सेवायाम्)**। अयं तु प्रकृत्युद्धतो रामः कथमित्थमतिप्रश्रयते (वा० रा० ४)। **अतिप्रश्रयतेऽतिविनीतो भवति, अतिनम्रो वर्तत इति यावत्**। प्रत्युद्गमप्रश्रयणाभिवादनम् (भा० पु० ४।३।२२)। **प्रश्रयो विनयः तद्दर्शनम्**। जनयति खलु रोषं प्रश्रयो भिद्यमानः (चारु० १।१४)। **प्रश्रयः=विनयः प्रणयः प्रार्थना विज्ञापना**। तच्छ्लोककूटमद्यापि ग्रथितं सुदृढं मुने। भेत्तुं न शक्यतेऽर्थस्य गूढत्वात् प्रश्रितस्य च (भा० आदि० १।८२)। **प्रमेयेण स्वप्रकाशार्थं श्रितं शब्दप्रमाणं तस्यापि गौण्यादिवृत्तिभेदेन गूढत्वम्** (इति नीलकण्ठः)। बहुप्रकारं धर्मज्ञः प्रश्रितं प्रश्रिताञ्जलिः (रा० ३।६१।३१)। **प्रश्रितं विनीतम्**। निभृतविनीतप्रश्रिताः समा इत्यमरः। **प्रश्रिताञ्जलिः=बद्धाञ्जलिः**। तद्दर्शनोपास्तिकता नित्यं तद्भावभाविता। तत्कारिता प्रश्रयिता वृत्तं संश्रयिणां स्मृतम् (का० नी० सा० ११।२८)॥ **संश्रयिणः=आश्रिताः**। प्रश्रयिता सादरता। **प्रश्रयोऽस्यास्तीति प्रश्रयी। तस्य भावः प्रश्रयिता**।

—**श्रु (श्रु श्रवणे)**। यस्ते अग्ने सुमतिं मर्तो अक्षत् सहसः सूनो अति स प्र शृण्वे (ऋ० १०।११।७)। **प्रशृण्वे प्रकर्षेण श्रूयते विश्रूयते**।

—श्वस् (श्वस प्राणने)। तानभि प्राश्वासीत्। तस्य श्वसथाद् ईषमाणा विश्वे देवा अद्रवन् (ऐ० ब्रा० ३।२०)। **तेषामभिमुखः सन् श्वासममुचत् इत्याह**। तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः (यो० सू० भा० २।४६)। **कोष्ठ्यस्य वायोर्निः सारणं प्रश्वासः**। कुतो वा प्रश्वसिति उच्छ्वसित्यपि वा पुनः (भा० आश्व० २०।४२)।

—सञ्ज् (षञ्ज सङ्गे)। रुद्रियेण ह पशून् प्रसजेत् (श०ब्रा० १।७।४।१२)। **प्रसजेत्=युञ्जीत बध्नीयात्। तद्वहति रथयुगप्रासङ्गम्** (पा० ४।४।७६) **इत्यत्रापि धातु बन्धने वर्तते। उपसर्गस्य दीर्घः**। कामा मनुष्यं प्रसजन्त एते (भा० उ० २७।४)। **बध्नन्तीत्यर्थः। तन्मा प्रसाङ्क्षीः** (छां० उ० ४।१।२)। **अत्र तच्छब्देन ज्योतिः परामृश्यते। तेनात्रापि सजतिः सकर्मकः। मा स्प्राक्षीरित्यर्थः**। नेढृशतया समया यज्ञं प्रसजामेति (श०ब्रा० ३।८।२।२०)। **प्रसङ्गो दुःसङ्गो व्यसनं व्यासङ्ग इति वा। इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्** (मनु० २।९३)। **प्रसङ्गः प्रसक्तिरासक्तिः। विषयेष्विति शेषः**। प्राकृता अपि बलवता सह प्रसङ्गं न कुर्वन्ति (भा० आदि० १।१५० इत्यत्र नीलकण्ठः)। **प्रसङ्गः संघर्षः**। विशेषा हि प्रसङ्गिनः (भा० उ० ३८।४४)। **प्रसङ्गः सङ्घर्षस्तत्कारिणः**। प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् (मनु० ४।१८६)। **प्रसङ्गः पुनः पुनः प्रवृत्तिः**। स्त्रियो राजकुले याश्च···। प्रसक्तास्त्वां निरीक्षन्ते, पुमांसं कं न मोहयेः (भा० वि० ९।२३)॥ **प्रसक्ता एकाग्रमनसः**। प्रसक्तमभिवीक्षेथाः स कामवशगो भवेत् (भा० वि० ९।२६)। **प्रसक्तमिति क्रियाविशेषणम्। चेतः प्रसज्येत्यर्थः**। विवेश गां तोयमिवाप्रसक्ता (शक्तिः) यशो विशालं नृपतेर्दहन्ती (भा० शल्य० १७।५०)। **अप्रसक्ताऽप्रतिहताऽविघ्निता**। प्रसक्तस्तस्य तु श्रमः (स्वप्न० १।१५)। **प्रसक्तो निरन्तरोऽविरतः**।

—सद् (षदॢ विशरणगत्यवसादनेषु)। क्रिया हि वस्तूपहिता **प्रसीदति** (रघु० ३।२९)। **नावसीदति, सफला भवतीत्यर्थः**। त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति (कौ० अ० ३।१)। **प्रसीदति=समृध्यति। निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति** (पञ्चत० १।२८७)। **प्रसीदति=शाम्यति**। अवेहि मां कामदुघां प्रसन्नाम् (रघु० २।६३)। **प्रसन्नाम्=परितुष्टाम्**। तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु (रघु० ६।६४)। **प्रसीद=अनुरुध्यस्व**। फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्। न नामग्रहणादेव तस्य वारि प्रसीदति (मनु० ६।६७)। **प्रसीदति विमली भवति**। दिशः प्रसेदुर्मरुतो ववुः सुखाः (रघु० ३।१४)। **दिशो नीरजस्काः प्रकाशा बभूवुरित्यर्थः**। प्रसन्नो ब्राह्मणशेष इति श० ब्रा० भाष्ये सायणः। **विशदो व्याख्यानिरपेक्ष इत्यर्थः**। प्रसन्नस्ते तर्कः (विक्रम० २)। प्रसन्नप्रायस्ते तर्कः (मालती० १)।

प्रसन्नः शुद्धः, सत्योऽवितथः । तथा प्रासादे (आप० ध० १।१७।७) । **प्रासादो दारुमयो मञ्च इति हरदत्तः** ।

—**सस्ज्** (**षस्ज सङ्गे**) प्रसज्जन्तीं तु तां प्राह (वि० पु० ५।२७।१५) । **आसजन्तीम् इत्याह** ।

—**सह्** (**षह मर्षणे**) । आशीर्भिर्बृंहितानस्मान्न पापं प्रसहिष्यति (भा० आदि० १४३।१६) । **प्रसहिष्यति=प्रसहिष्यते=अभिभविष्यति=अधिकरिष्यते** । संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः (कु० २।५७) । ह्रियमाणावकाशं तु दानप्रीत्या पुनः पुनः । न प्रसेहे मनस्तस्य च्छेददुःखं विगाहितुम् (अवदा० जा० ८।४४) । **इह प्रशब्दोऽनर्थकः** । प्रसह्य वित्ताहरणं न वल्कः (भा० आदि० १।२७५) । **प्रसह्य=प्रकर्षेण दुःखं सोढ्वेत्यर्थः** । प्रसह्य धर्षितस्तत्र सोमो वै राजयक्ष्मणा (हरि० १।२५।४७) । **प्रसह्य=बलात्=हठात्** । प्रसह्य सिंहः किल तां चकर्ष (रघु० २।२७) । **उक्तोर्थः** । **प्रसहनमभिभव** इत्यधेः प्रसहने (पा० १।३।३३) सूत्रे वृत्तिः ।

—**साध्** (**राध साध संसिद्धौ**) । इदमूषु प्रसाधय (अथर्व० १।२४।४) । **किलासाक्रान्तमङ्गं साधु कुर्वित्याह** । प्रसाध्य शत्रुं यन्मित्रम् (कौ० अ० ७।११६) । **प्रसाध्य=जित्वा** । प्रसाधनी कङ्कतिका इत्यमरः ।

—**सिच्** (**षिच क्षरणे**) । उदपानाश्च कुम्भाश्च प्रासिञ्चन् शतशो जलम् (भा० उ० ८४।७) । **प्रासिञ्चन्=प्राक्षारयन्** । उदकाञ्जलिं प्रसिञ्चेत् (द्रा० गृ० १।२) । **प्रसिञ्चेत् अवसिञ्चेत्** । इत्येभिर्हेतुभिस्तस्य त्रिभिश्चित्तं प्रसिच्यते (भा० शां० २८।७) । **द्रवति क्लिन्नं श्लथं भवतीत्याह** । यल्लोहमयः स्यात्प्रसिच्येत (श० ब्रा० १४।२।२।५४) **प्रसिच्येत द्रवेत्, द्रुतं स्यन्नं स्यादित्याह** ।

—**सिध्** (**षिधु संराद्धौ**) । भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति (मनु० १२।९७) । **प्रसिध्यति प्रभवति प्रादुर्भवति** । तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति (पा० ३।१।१२२ इत्यत्र श्लो० वा०) । **प्रसिध्यति व्यक्तिमेति, व्याख्यातो भवति** । यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् (कु० ५।९) । **प्रसिद्धैर्भूषितैः** । प्रसिद्धौ ख्यातभूषितावित्यमरः ।

—**सु** (**षु प्रसवैश्वर्ययोः**) । गौरिव प्रसवत्यर्थान्रसमुत्तमशालिनी (भा० अश्व० २१।२२) । **प्रसवति=सूते=उत्पादयति** । **प्रसव इह उत्पाद उक्तो नाभ्यनुज्ञानम्** । ...भक्ष्योऽयं मग सुप्रियः । स्नेहस्रवान्प्रसवति (भा० **आदि०** १५२।८) । **उक्तोऽर्थः** । तत्रेमं यज्ञं यजमानं च धेह्यों प्रणयेति प्रसौति (आप० श्रौ० ३।६।१९।१) । **अभ्यनुजानातीत्यर्थः** । यज्ञेषु चैतदादयः प्रसवाः (आप०

ध० १।४।१३।८) । **प्रसवा निर्देशा अनुज्ञावाक्यानि** । त्रैलोक्यदर्शनं चैव प्राधान्यं प्रसवे तथा (हरि० १।३१।३७) । **प्रसवोऽभ्यनुज्ञा** ।

—**सु** (**षुञ् अभिषवे, अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च**) । सुतं तस्मात्तव प्रसुतमासुतं कुले दृश्यते (छां० उ० ५।१२।१) । **प्रसुतं सन्ततं सवनम्** ।

—**सू** (**षूङ् प्राणिगर्भविमोचने, प्राणिप्रसवे**) । यथा शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते (मनु० १०।३०) । **जनयतीत्यर्थः** । तद्वः सर्वं प्रवक्ष्यामि **प्रसवे** च गुणागुणान् (मनु० ३।२२) । **प्रसवे=सन्तानेऽपत्येषु** । एषां सूतिप्रसूतिभ्यामिदमापरितं जगत् (वि० पु० १।८।१०) । **सूतिप्रसूतिभ्याम्=पुत्रपौत्रादिभिः** । पुष्पवतीः प्रसूमतीः फलिनीरफला उत (अथर्व० ८।७।२७) । **प्रसूः=नवाङ्कुरः** । प्रसूमं बर्हिः प्रस्तरश्च (आप० श्रौ० ८।१।१।१०) । **प्रसूमयम्=पुष्पमयम्** । सूश्च मे प्रसूश्च मे (वा० सं० १८।७) । **सूः पुत्रादिप्रेरणसामर्थ्यम्** । **प्रसूः पुत्रोत्पत्त्यादिसामर्थ्यम्** ।

—**सृ** (**सृ प्रेरणे**) । प्रेमां देवा असाविषुः सौभगाय (अथर्व० १।१८।२) । **प्रासाविषुः=प्रेरितवन्तः** । तद्यदेताभ्यामप्रसूतः करोत्यकृतं तत् अकृतमकरिति वै निन्दन्ति (ऐ० ब्रा० १०।६) । **अप्रसूतः=अनभ्यनुज्ञातः** । एका दीक्षा तिस्र उपसदः...प्रसूतः (आप० श्रौ० १०।१५।१) । **प्रसूत इति यजमानस्य संज्ञा** । शेषमुपह्वयस्वेत्यामन्त्र्यामन्त्र्य भक्षणमुपहूत इति प्रसूतः (का०श्रौ०४।२।१३) । **प्रसूतोऽभ्यनुज्ञातः** । तत्प्रसूतः कर्माणि कुर्वीत (गौ० ध० २।२।१३) । **उक्तोऽर्थः** । गोभिः सन्नद्धा पतति प्रसूता (ऋ० ६।७५।११) । **प्रसूता=प्रेरिता=क्षिप्ता (इषुः)** । तदस्मै सविता प्रसविता प्रासुवत्, तत्सवितृप्रसूत उदजयत् (श० ब्रा० ५।१।१।४) । **प्रासुवत्=प्रैरयत्** । **सवितृप्रसूतः=सवित्रा प्रेरितः** ।

—**सृ** (**सृ गतौ**) । प्रसरति परिमाथी कोप्ययं देहदाहः (मालती०१।४१) । **प्रसरति=विसर्पति** । भित्त्वा भित्त्वा प्रसरति बलात् कोपि चेतोविकारः (उत्तर० ३।३६) । **उक्तोर्थः** । न मे हस्तौ प्रसरतः (शा० २) । **आयच्छेते** । लोहिताद्या महानद्यः प्रसस्रुस्तत्र चासकृत् (भा०) । **प्रसस्रुः=सस्यन्दिरे** । न चैनं (गुरुम्) अभि प्रसारयीत (आप० ध० १।६।३) । **अभिः कर्मप्रवचनीयः** । **प्रसारयीत=प्रसारयेत्** । न प्रसारयेत् **नाततौ कुर्यात्** । दृश्यते ज्ञानयोगेन आवां च प्रसृतौ ततः (भा० शां० ३३४।४२) । **प्रसृतौ निःसृतौ** । प्रसृते च परिचये तस्या हस्ते न्यासं निक्षेपं च निदध्यात् (कामसूत्रे) । **प्रसृते=उपचिते=वृद्धिगते** । प्रवृद्धप्रसृते (समे) इत्यमरः । न तेजस्तेजस्वी प्रसृतमपरेषां विषहते (उत्तर०६।१४) । **उक्तोर्थः** । कौतूहलप्रसृतलोलतरनयनाः (अवदा०महा०जा०)।

प्रसृते=व्यायते (लोचने)। अन्वेषणप्रसृते च मित्रगणे। **गवेषणायां प्रगते।** पाणिनिकुञ्जः प्रसृतिः, तौ युतावञ्जलिः पुमान् इत्यमरः। **अत्र केचित्प्रसृत इति पठन्ति। स्वामी तु प्रसृतिप्रसृतावुभावपि स्वीकरोति। प्रसृत इति प्राक्तनः पाठ एव साधुर्भवति। प्रसृतेन प्राशयेत (आश्व० गृ० १।११।२) इत्यत्रार्धाञ्जलावर्थे प्रयोगदर्शनात्। द्वौ दापयेत् प्रसृतौ शर्करामधुसंयुतौ (का० सं० खिल० ३।६१)। इत्यत्र च तथा दर्शनात्।** पेया च पञ्च प्रसृता (अष्टाङ्ग०१६।४१)। द्वे पले प्रसृतं विदुः।

—सृज् (सृज विसर्गे)। जयो वैरं प्रसृजति दुःखमास्ते पराजितः (भा०उ० ७२।५६)। **प्रसृजति=सृजति, उत्पादयति।** ततोऽर्जुनः प्रासृजद् उग्रधन्वा भुजावुभौ गाण्डिवं चानुमृज्य। नाराचनालीकवराहकर्णान्...(भा०कर्ण०८६।१४)॥ **प्रासृजत्=व्यसृजत्=प्राक्षिपत्।** न तदहः प्रसृज्यते (गो०गृ०१।५।२१)। **प्रसृज्येत =त्यज्येत। गृहमिति शेषः।** गुरवे प्रस्नक्ष्यमाणो नाम प्रब्रूवीत (आश्व०गृ०३।८।१)। **प्रस्नक्ष्यमाणः=विस्रक्ष्यमाणः=गृहाय प्रहीयमाणः। अथैनमुदञ्चं प्राञ्चं** प्रसृजतः (श०ब्रा०१३।४।२।१५)। **प्रसृजतः=विसृजतः।** तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च (भा०वि०१३।२८)। **अङ्गुल्यः प्रसृता यास्तु ताः प्रसृष्टा उदीरिता इति नीलकण्ठः।** कीलैर्वज्र निपातैश्च प्रसृष्टाभिस्तथैव च (हरि० २।३०।३४)। **प्रसृष्टाभिः सर्वाङ्गसंश्लेषणैः।** प्रसृष्टास्वनुमन्त्रयेत (आश्व० गृ० ४।८।५)। **दत्तास्वर्घ्यास्पु इत्याह।** संजहारास्त्रमथ तत्प्रसृष्टं पाण्डवर्षभः (भा० वन० २४५।२६)। **प्रसृष्टम्=प्रक्षिप्तम्।** प्रसृष्टवृषणो ह्येष वृषलीभूतो भवति (जै० गृ० १।१२)। **प्रसृष्टवृषणः=त्याजितमुष्कः।**

—सृप् (सृप्लृ गतौ)। प्रसर्पकाले सम्प्राप्ते नानादिग्भ्यः समागतान् (भा० सभा० १२।१६)। **प्रसर्पोऽग्निविसर्जनम् इति निघण्टुरिति नीलकण्ठः।** ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः (रा०१।१५।५१)। **अभ्यागतेभ्य इति तिलकः। परिचारकद्विजेभ्य इति च कतकः।** आलकं विषमिव सर्वतः प्रसृप्तम् (उत्तर० १।४०)। **प्रसृप्तम्=विसृप्तम्।**

—स्कन्द् (स्कन्दिर् गतिशोषणयोः)। य आगच्छेत्तं ब्रूयाच्छरणशुल्बेन जिह्वां निर्मृजानः शालायाः प्रस्कन्देति (कौ०सू०२५।२२)। **निष्क्राम, निष्पत, निर्याहीत्यर्थः।** वासुदेवस्ततो योगी प्रचस्कन्द महारथात् (भा० भीष्म० १०६।५६)। **प्रचस्कन्द=अवचस्कन्द=अवततार।** समुत्क्षिप्य नदन्क्रुद्धः प्रचस्कन्द रथोत्तमात् (भा० द्रोण० १५।४)। **प्रचस्कन्द=अवप्लुवे।** प्रस्कन्देयेच्च मनसा भुक्त्वा चाग्निमुपस्पृशेत् (भा० अनु० १०४।५६)। **अन्नशेषं त्यजेत् इत्यर्थः।** शोणितोदां रथावर्तां नागनक्रां दुरत्याम्। नदीं प्रस्कन्दयिष्यामि परलोकप्रवाहिणीम् (भा० वि० ६१।२०)। **प्रवाहयिष्यामीत्याह।** ततो रथाभ्यां

प्रस्कन्द्य भ्रातरौ क्षत्रियर्षभौ (भा० वि० ३३।५) । **प्रस्कन्द्य = प्रस्कद्य = अवतीर्य** । अग्निप्रस्कन्दनपरस्त्वं चाप्येवं भविष्यसि (भा० आदि० ८४।२६) । **प्रस्कन्दनं श्रौतस्मार्ताद्यग्निसाध्यकर्मत्यागः** । तत्रावहसितश्चासीत्प्रस्कन्दन्निव संभ्रमात् (भा० आदि० १।१३६) । **प्रस्कन्दन्** = स्खलन् । एते विनिहताः सर्वे प्रस्कन्नाः पाण्डुवाहिनीम् (भा० शल्य० १८।२२) । **प्रस्कन्नाः = प्रपन्नाः** । यन्मुखेन (स्त्रियं न स्पृशति) तेनाग्निप्रस्कन्दिनां (लोकानवरुन्धे) (गो० ब्रा० पू० २।४) । **अग्निप्रस्कन्दिनाम् = ज्वलितहिरण्यरेतस्यात्मानं जुह्वताम्** ।

—**स्तु (ष्टुञ् स्तुतौ)** । प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः (ऋ० ८।१६।१) । **प्रशब्दः प्रकर्षे** । ता वामद्य स्तुतिभिः शुभस्पती अश्विना प्रस्तुवीमहि (ऋ० ८।२२।६) । **उक्तोऽर्थः** । प्रणम्य स कथयितुं प्रास्तावीत् (हर्ष० ७) । **प्रास्तावीत् = उपाक्रंस्त, आरब्ध** । **प्रपूर्वः स्तौतिः प्रारम्भे वर्तते इति (भट्टि० २।२८) इत्यत्र जयमङ्गला** । **इदं च लोके प्रायेणेति द्रष्टव्यम्** । प्रस्तूयतां विवादवस्तु (माल०१) । **उक्तोर्थः** । राज्ञोपि दुर्गुणान् वक्ति प्रत्यक्षमविशङ्कितः । स वक्ता गुणतुल्यांस्तान् न प्रस्तौति कदाचन (शुक्र० १।३२३) । **अनर्थकः प्रशब्दः** । **स्तौतीत्येवार्थः** । **स्तुतिमात्रेऽभिप्रायो न तु स्तुतिविशेषे** । यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः (महा० च० २।४५) । **प्रस्तौति जनयतीत्यनर्थान्तरम्** । स तु प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणाम् । (पञ्चत० २।१७६) । **प्रस्तावः संवादः, यत्र वक्तारः स्वस्वमतोपन्यासेनोपकुर्वन्ति** । नाममात्रप्रस्तावः (शा० ७) । **प्रस्तावः कीर्तनम्** । **उद्देशः** । **अत्र स्तौतिविशेषं परिहृत्य सामान्ये कीर्तनेऽर्थे प्रयुक्तः** । लोकेषु पञ्चविधं सामोपासीत पृथिवी हिङ्कारोग्निः प्रस्तावः (छां उ० २।२।१) । **साम्न आद्यानि पदान्युपोद्घातरूपाणि प्रस्तावो भवति** । त्वराप्रस्तावोऽयं न खलु परिहासस्य विषयः (मालती० ६।४५) । प्रस्तावोऽवसरः । संस्काराभिनयौ तेषां प्रस्तावानां च धारणम् (हरि० २।६३।१०) । **प्रस्तावः क्रियाणां प्रसञ्जनम्** । यथेप्सितं प्रस्तुतं कर्म धर्म्यम् (भट्टि० २।२८) । **प्रस्तुतं प्रारब्धम्** । यदिदं प्रस्तुतं कर्म त्वया गोविन्द लौकिकम् (हरि० २।४०।३६) । **उक्तोर्थः** । नलिन्यां प्रस्तुता क्रीडा भवता भोगिनामिति (बृ०श्लो०स० ५।११३) । उद्गीथः प्रस्तुतं स्तुतम् (अथर्व० ११।७।५) । **प्रस्तोत्रा गीयमानः प्रस्तावाख्यो भागः प्रस्तुतम्** । **प्रस्तूयते स्तुतेः प्रारम्भः क्रियतेऽनेनेति प्रस्तुतम्** । प्रस्तावना कपटनाटकस्य (का० शुक्र०) । **अवतरणिका** । कृतमनेनाप्रस्तुतप्रशंसया । **असंबद्धार्थकथनेन नार्थ इत्याह** ।

—**स्तृ (स्तृञ् आच्छादने)** । स प्रस्तरः (आप० श्रौ० १।२।३।१२) । प्रस्तरः प्रथमलूनो मुष्टिः । गृहान्व्रजित्वाऽधः प्रस्तरे व्यहमनश्नन्त आसीरन्

(इदं वसिष्ठवचनमिति याज्ञ० ३।१६मिताक्षरायां स्थितम्)। **शयनासनार्थस्तृणमयः प्रस्तर इति च मिताक्षरा ।**

—**स्था** (ष्ठा गतिनिवृत्तौ)। या ते काकुत्सुकृता या वरिष्ठा यया शश्वत् पिबसि मध्व ऊर्मिम् । तया पाहि प्र ते अध्वर्युरस्थात् (ऋ०६।४१।२)। **प्रास्थात् = उपास्थित = अभिमुखोस्थात् ।** द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत (वा० सं० २६।२२)। **प्रतिष्ठत = प्रतिष्ठध्वम्, कर्मणि प्रवृत्ता भवतेत्याह । पिपीषति—पेतुं पातुमिच्छति । पीङः सनि रूपम् । परस्मैपदं स्वार्थम् ।** पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना (रघु० ४।६०) । **प्रशब्दो धात्वर्थं विपर्यासयति । प्रतस्थे = गन्तुं प्रववृते ।** खण्डेन लोहितेन शरावेण ग्रामे प्रतिष्ठेत (आप० ध० १।६।२४।१४)। **ग्रामं गच्छेदित्यर्थः ।** पुरो बलानां सवनाम्बुशीकरः शनैः प्रतस्थे सुरभिः समीरणः (कि०१४।२८)। **प्रतस्थे = ववौ ।** तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते (प्रश्न०उ०)। **प्रतिष्ठमाने प्रतितिष्ठति, स्थेमानं लभमाने । प्रतिष्ठन्ते = स्थितिमत्यो भवन्ति ।** वाक्यैरमृतकल्पैस्तैः प्रतिष्ठन्ति व्रजन्ति च (भा०शां०१५३।८)। **प्रतिष्ठन्ति = प्रतितिष्ठन्ति = तिष्ठन्ति ।** भिक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः । तेष्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् (वि०पु०३।६।११)। **प्रतिष्ठन्ते प्रतितिष्ठन्ति ।** वेदा इह प्रतिष्ठेरन्नेष नः काङ्क्षितो वरः (भा०शां०३२७।४१)। **प्रतितिष्ठेयुः ।** देवो वः सविता प्रार्पयत्विति शाखया गोचराय गाः प्रस्थापयति (आप०श्रौ०१।१।२।४) । **प्रस्थापयति = कालयति ।** स्थगिता तत्कथापापस्पर्शभीत्या सरस्वती । कथं चित्त्वस्नुरश्चेव सेयं प्रस्थाप्यते मया (राजत०५।४१६)। **प्रवर्त्यते । प्रवीयते ।** इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य (पा० २।३।६१ सूत्रे वृत्तिः)। हविषः प्रस्थितस्य प्रतिषेधो वक्तव्य इति च वार्तिकम् । **प्रस्थितं प्रवृत्तम् ।** अध्वर्युभिः प्रस्थितं सोम्यं मधु (अथर्व० २०।६७।७) । **उक्तोऽर्थः ।** उशन्निन्द्र प्रस्थितान्पाहि सोमान् (अथर्व० २०।८७।२) । **पाहि = पिब । प्रस्थितान्पवमानान् ।** वायो तान् (सोमान्) प्रस्थितान् पिब (ऋ० १।२३।१) **उक्तोऽर्थः ।** तस्यापि सुमहांस्तापः प्रस्थितस्योपजायते (भा० शां० २६१।६) । **प्रस्थितस्य मृतस्य । योगे प्रवृत्तस्येति वा । अनन्तरार्थे तापो नरकजं दुःखम् ।** लीलामन्दं प्रस्थितं च स्थितं च । स्त्रीणामेतद् भूषणं चायुधं च (शृं० ति० श्लो० ३) । ह्रदप्रस्थितसंचया (हरि० २।४६।३५) । **ह्रदात्प्रस्थितः चलितो मत्स्यादिसमुदायो यस्याः सा ।** सन्देहश्चेन्निरीक्षस्व नभःप्रस्थापितेक्षणः (दृ० श्लो० सं० ३।८२) । **वियत्प्रहितलोचन इत्याह ।** सप्रस्थानाः क्षत्रधर्मा विशिष्टाः (भा० शां० ६४।२२) । **प्रस्थानं पारिव्राज्यम् । प्रतिष्ठतेऽस्मिन्निति प्रस्थो गिरेः समा भूः । वनस्य प्रस्थः = वनप्रस्थः । वनप्रस्थे भवो वानप्रस्थः ।**

—**स्ना** (ष्णा शौचे)। समुद्र वा एते प्रस्नान्ति ये संवत्सरं (संवत्सरसाध्यं गवामयनम्) उपयन्ति (ताण्ड्यब्रा० ५।८।५)। **प्रस्नान्ति अवगाहन्ते**। तीर्थेन यथा समुद्र नायुः (श०ब्रा० १२।२।१।१)। **प्रस्नायुरिति स्नातेर्लिङि रूपम्। प्रविशेयुरित्यर्थः**।

—**स्फुट्** (**स्फुटिर् विकसने, स्फुट विकसने, स्फुट भेदने**)। नगानां प्रास्फुटन्कुम्भाः (भा० कर्ण० २२।२४)। **अभिद्यन्तेत्यर्थः**।

—**स्मृ** (**स्मृ चिन्तायाम्, स्मृ आध्याने**)। भातृन्सन्दश्य निहतान्प्रास्मरंस्ते हि तद्वचः (भा० भीष्म० ८८।३२)। **प्रास्मरन्=अस्मरन्। प्रकर्षेणास्मरन्निति वा। इह प्रशब्दो नार्थं विपर्यासयति यथाऽन्यत्र**।

—**स्यन्द्** (**स्यन्दू प्रस्रवणे**)। प्रस्यन्दिनि (गौ० ध० २।७।४२)। **प्रकृष्टं स्यन्दनं वर्षं प्रस्यन्दः, तद्वति काल इति सूत्रार्थः**। स रथं युक्त्वा। सुकन्यार्थं शर्यातीमुद्वाहाय प्रसिष्यन्द (श० ब्रा० ४।१।५।६)। **तत्वरे इत्यर्थः। स्यदो जवो भवति, स्यन्दनश्च जवनोऽनुद्घातो रथः**।

—**स्रंस्** (**स्रंसु अवस्रंसने**)। ते जन्या उभयतोऽप्रस्रंसाय वर्सो नह्यति (ऐ० ब्रा० २।५)। **अप्रस्रंसाय=अशिथिलत्वाय। वर्सो बन्धनविशेषो भवति**।

—**स्रु** (**स्रु गतौ**)। हिमवतः प्र स्रवन्ति सिन्धौ समह सङ्गमः (अथर्व० ६।२।१)। **प्रस्रवन्ति=प्रस्यन्दन्ते=प्रवहन्ति=प्रभवन्ति**। रुधिरेणावसिक्ताङ्गं प्रस्रवन्त यथाऽचलम् (भा० अनु० १।३)। **प्रस्रवन्तं निर्झरवन्तमित्याह**। नाऽऽतपति प्रस्रावयेत् (श०ब्रा०१४।१।१।३३)। **सूर्ये वितपमाने न मेहेदित्यर्थः**। स यत्पुरैतस्य होमात्प्रसर्पेद्वा प्र वा स्रावयेत् (श० ब्रा० ४।२।४।८)। **उत्क्लोऽर्थः**। स्रवद्भिः शोणितं गात्रैः प्रस्रुताविव वारणौ (भा० द्रोण० ६८।२३)। **प्रस्रुतौ प्रभिन्नौ मदवारि विमुञ्चन्तौ**।

—**स्वप्** (**ञिष्वप् शये**)। स यत्रायं प्रस्वपिति (श० ब्रा० १४।७।१।१०)। **प्रसुप्तः सुषुप्तो भवति**।

—**स्विद्** (**ञिष्विदा गात्रप्रक्षरणे**)। ततः प्रसिष्विदे कृष्णः स्विन्नश्चार्जुनमब्रवीत् (भा० द्रोण० १६।२१)। **प्रशब्द आदिकर्मणि स्यादनर्थको वा। प्रकर्षद्योतकस्तु न। स्विन्न इत्यनन्तरोक्तेः**।

—**हन्** (**हन हिंसागत्योः**)। रात्री तस्य प्रतीत्य प्र ग्रीवाः प्र शिरो हनत् (अथर्व०१६।४६।६)। अथ तुषान्प्रहन्ति (श०ब्रा०१।१।४।२१)। **प्रक्षिपतीत्याह। ईषद् धौतं नवं श्वेतं सदशं यन्त्रधारितम्। निर्णेजकाक्षालितं चाप्रहतं वास उच्यते॥ हतप्रहतविध्वस्ता विवर्मायुधवाहनाः** (भा० कर्ण० ३१।६)। **हतास्ता-**

डिताः । प्रहताश्छिन्नावयवाः । खिलाप्रहते समे इत्यमरः । अप्रहृत एष पन्थाः । अक्षुण्ण इत्यर्थः । प्रहताश्च पातकपथाः । पापमार्गाः पादचारेण लोकेन क्षुण्णा इत्यर्थः । अगारैकदेशे प्रघणः प्रघाणश्च (पा० ३।३।७६) । आलिन्देऽर्थे प्रपूर्वाद् हन्तेरपि घञि च निपातनं पाणिनीये । सर्पान् हरन्ति विततप्रहणाः सुपर्णाः (अवदा० जा० ३२।३२) । विवृतमुखा इत्याह ।

—हा (ओहाक् त्यागे) । श्रुतं मे मा प्रहासीः (ऐ० उ०) । अन्तर्णीतण्यर्थोत्र जहातिः । मा स्म हाप्सीत्यर्थः ।

—हि (हि गतौ वृद्धौ च) । प्राहिणोच्चन्द्रसंकाशान्कुपितानिव तान् हयान् (भा० वि० ५७।४) । प्राहिणोत्=प्राचोदयत् । प्राजत् । खड्गं सहदेवाय प्राहिणोत् (भा० शल्य० २८।३८) । खड्गेन सहदेवे प्राहरदित्यर्थः । विपदिग्धमिषुं प्राहिणोत् (तन्त्रा० २।३) । प्रास्यदित्यर्थः । बृहस्पतेरञ्जलिं प्राहिणोत्सः (भा० आश्व० ६।२२) । तेऽकृतार्था प्रहिण्वन्ति प्राणा रायः सुतादयः (भा० पु० १०।४६।२३) । विहाय गच्छन्तीति विवक्षति कविः । तदस्य स्वातन्त्र्यम् । वेगेन प्रहितं बाहुं निजग्राह हसन्निव (भा० आदि० १५३।३६) । प्रहितमुत्क्षिप्तम् । यातुधाना हेती रक्षांसि प्रहेतिः (वा० सं० १५।१६) । प्रकृष्टा हेतिः प्रहेतिः । यस्मिन्नस्त्रे मुक्ते रावणसेनेव परस्परं रिपवो घ्नन्ति सा प्रहेतिः । प्रहेतिर्बाण-प्रासादि प्रहरणमिति कश्चित् । ततस्तां प्रहितां देवीमिन्द्राणी सा समन्वगात् (भा० उ० १४।५) । प्रहिता=प्रस्थिता । हि गतौ वृद्धौ चेति प्राकृतेऽर्थे प्रयोगः, अन्यत्रान्तर्भूतण्यर्थको हिनोतिः प्रयुक्तो दृश्यते । प्रहीयमाणः प्रवरैश्च वादिकैः (रा० २।१६।४६) । प्रेर्यमाण इत्याह । राम इति कर्तृपदमुद्वेश्यम् । भिनत्ति सम्यक् प्रहितो भेदः स्थिरमतीनपि (तन्त्रा० १।१२।१२६) । प्रहितः प्रयुक्तः प्रणीतः । अहं हि सततं गोषु भवतां प्रहितः पुरा (भा० वि० ३।१०) । प्रहितोऽधिकृतः ।

—हु (हु दानादनयोः प्रीणन इत्येके) । प्रहुतो भौतिको बलिः (मनु० ३।७४) ।

—हृ (हृञ् हरणे) । इन्द्रो वृत्राय वज्रं प्राहरत् (तै० सं० ५।२।६) । प्रास्यदित्यर्थः । वृत्राय=वृत्रं हन्तुम् । इन्द्रो ह वृत्राय वज्रं प्रजहार, स प्रहृतश्चतुर्धाऽभवत् (श० ब्रा० ५।२।४।१) । प्रजहार=प्रचिक्षेप=प्रास । अग्नेरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम् । (भा० आदि० ६।१) । प्रजहार=अपजहार । धिगस्तु मम वार्ष्णेय यदस्मै प्रहराम्यहम् (भा० द्रोण० १४७।२७) । अस्त्रमस्वामीत्यर्थः । न क्षीणशक्तौ प्रहरामि वज्रम् (भा० आश्व० ६।२६) । प्रक्षिपामीत्यर्थः । आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि (शा० १।) ।

अनपराद्धे क्षेपाय नेत्याह। सह शाखया प्रस्तरं प्रहरति (का० श्रौ०)। **क्षिपति, जुहोतीत्यर्थः।** न स्रुवमग्नौ प्रहरेत् (गो० गृ० १।८।२१)। **क्षिपेदित्यर्थः।** स्थाल्यां पिण्डान् समवधाय ये समाना इति सकृदाच्छिन्नमग्नौ प्रहरति (आप० श्रौ० १।३।१०।१०)। **उक्तोऽर्थः।** दिवमनु विक्रमस्वेति दिवमनु विक्रमते प्रहरति पादम् (श० ब्रा० ६।७।२।१५)। **प्रहरति=अग्रे निधत्ते।** शतधा ते शिरो वज्री वज्रेण प्रहरिष्यति (भा० सभा० ६८।७०)। **खण्डयिष्यतीत्याह।** यथा न बाणा नास्त्राणि प्रहरिष्यन्ति ते रणे (भा० द्रोण० ६४।३५)। **आहनिष्यन्ति इत्यर्थः।** बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति (भा० आदि० १।२६८)। **उक्तोर्थः।** अस्मा इदु प्रतवसे तुराय। प्र यो नर्हमि (=हरामि) स्तोमं माहिनाय (अथर्व० २०।३५।१)। **प्रर्हमि=प्रकर्षेण हरामि। इह प्रपूर्वो हरतिस्ताडनं प्रक्षेपणं वा नाह। प्रशब्दो धात्वर्थे विशेषमाधत्ते।** अग्नये प्रह्रियमाणायानुब्रूहि (श० ब्रा० ३।६।३।६)। **प्रह्रियमाणाय=प्रणीयमानाय।** प्रहरिष्यन् प्रह्रियमाणायानुब्रूहि (भा० श्रौ० ७।१०।४)। **प्रहरिष्यन् प्रणेष्यन्।** प्रह्रियमाणायाभिरूपा (ऐ० ब्रा० ३।५)। **आहवनीये प्रक्षिप्यमाणोऽयं मथितोऽग्निः प्रह्रियमाण इति सायणः।** प्रत्येत्यग्निं प्रहरिष्यन् (श० ब्रा० ६।२।२।१)। **प्रशब्द आङोऽर्थे। आहरिष्यन्नित्याह।** तेन पुत्रेण बालेन प्रहृतं तस्य वै पुनः (हरि० १।२६।७२)। **प्रहृतमपहृतम्। प्रशब्दोऽपस्यार्थे। राज्यमिति शेषः।** यदि वास्मा प्रहृतो जघान (अथर्व० ४।१२।७)। **प्रहृतः=प्रक्षिप्तः।** प्रहृत्य तृणं तेन चरति (का० श्रौ० ४।४।१०)। **प्रहृत्य प्रक्षिप्य।** प्रहृत्य परिधीन् सम्प्रेष्यति (भा० श्रौ० ८।३।१२)। **उक्तोऽर्थः।** प्रहारे च पराक्रान्तः शूरः पञ्चत्वमागतः (रा० ४।२३।१२)। **प्रहारे=सम्प्रहारे=युद्धे।**

—हृष् (हृष तुष्टौ)। गुरुः प्रहर्षः प्रबभूव नात्मनि (रघु० ३।१७)। **प्रवृद्धो हर्षः शरीरे नामादित्याह।** तं विचिन्तयतः शापं प्रहर्षः समजायत (भा० आदि० १२५।२०)। **प्रहर्षः काम इति नीलकण्ठः। उपस्थेन्द्रियोत्थानमिति त्वापटेकोषः।**

—ह्वे (ह्वेञ् स्पर्धायां शब्दे च)। प्रह्वः प्रणतः। एष प्रह्वोस्मि भगवन् एषा विज्ञापना च नः (महा० च० १।४७)। प्रह्वेष्वनिबंन्धरुषो हि सन्तः (रघु० १६।८०)। **प्रह्वो विधेयो नम्रः।** तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः (गो० स्मृ० १।१०)। **प्रह्वः=आसनाद्युपाश्रित्य प्रणतः प्रवणः स्थितः।**

प्राङ् (प्र+आङ्)

—दा (डुदाञ् दाने)। प्रादात् तच्च शक्रस्तु काल चक्रे (भा० आदि०)। **प्रादातुम्**—दातुम्। आङ्पूर्वो ददातिरादाने ग्रहणे रूढः, **प्राङ्-पूर्वस्तु दानमेवार्थमर्पयति**, शब्दशक्तिस्वाभाव्यात्। **अपि वा प्रशब्दस्यैव च्छन्दोवशाद् दीर्घः। एवमन्यत्रापि भारते**—जातमात्रान् पुत्रांश्च दारांश्च भवतामिह। प्रादायोपनिधिं राजा पाण्डुः स्वर्गमितो गतः (भा० आदि० १२६।३)॥ **उपनिधिर्निक्षेपो न्यासः**।

—भृ (भृञ् भरणे, डुभृञ् धारणपोषणयोः)। चिकित्साप्राभृतो धीमान् शास्त्रवान्कर्मतत्परः (चरक० सूत्र० १६।२६)। **चिकित्सा प्राभृतमस्य। प्राभृतमित्युपायनं भवति**।

—रभ् (रभ राभस्ये)। प्रारभ्यते न खलु विघ्नभयेन नीचैः (भर्तृ० १।२७)। अत्र प्राङ्भ्यां न विशेषः कश्चिज्जन्यते। **केवलस्य रभेः प्रयोगो दुर्लभः**।

—लम्ब् (रबि लबि अबि शब्दे, लबि अवस्रंसने च)। प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः (रघु० ६।१४)। **प्रालम्बमृजुलम्बि (माल्यम्)** इत्यमरः। **लम्बनं स्याल्ललन्तिका। स्वर्णैः प्रालम्बिका इति चामरः**।

—विश् (विश प्रवेशने)। अस्मद्गृता देवत्रा गच्छत प्रदातारमाविशत (वा० सं ७।७६)। **प्रपूर्वस्य विशतेर्योऽर्थः स एव प्राङ्पूर्वस्य। शब्दोपजनो नार्थोपजनः**।

—वृ (वृञ् वरणे, वरणमावरणमाच्छादनम्)। तद्वस्त्रमरजः प्रावृणोद्वसुधाधिपः (भा० वन० ७६।४२)। **प्रावृणोत्**=आच्छादयत्। वास एव त्यक्तं प्रावृण्वानः (भा०उ०१३६।१२)। अयं पटः प्रावरितुं न शक्यते (मृच्छ०२।१०)। **प्रावृणोतु चीवरे वीरता** (हर्ष० ५)। विचित्राणि च वासांसि प्रावारावरणानि च (भा० आदि० १।१३३)। **प्रावाराणि उपरिवस्त्राणि। आवरणानि परिधानीयानि। यद्वा वासःशब्देनैव तेषां ग्रहणात् प्रावाराणि शिबिराणि=उपकार्याः, पटभवनानि। आवरणानि जवनिका इति नीलकण्ठः**।

प्राधि (प्राङ्=अधि)

—अधीङ् अध्ययने। प्राधीतद्विजमुख्या सा सम्प्रज्वलितपावका (भा० आश्रम० १८।२२)। **प्रशब्दो वाऽऽदिकर्मणि**।

प्रोद् (प्र=उद्)

—**खन् (खनु अवदारणे)**। कृत्स्नां पृथिवीमनुगच्छत। **प्रोत्खनध्वं प्रयत्नेन यावत्तुरगदर्शनम्** (रा० १।४०।१४)। **उत्खनतीत्यूर्ध्वं खननीत्याह। प्रशब्द उत्खननं विशिनष्टि**।

—गै (कं गै शब्दे)। प्रोद्गीतां मधुरस्तैः स्तुतिं पठन्तो नृत्यन्ति (समीराः) (प्र० च०)। उच्छब्दो गानस्योच्चैस्त्वमाह। प्रशब्द उच्चैस्त्वं विशिनष्टि। प्रोद्गीताम्=प्रोच्चैर्गीताम्।

—नद् (णद अव्यक्ते शब्दे)। प्रोन्ननाद च सिंहवत् (हरि० २।६१।४७)। प्रोच्चैर्जगर्जेत्यर्थः। उन्ननादेति पाठान्तरम्।

=नम् (णम प्रह्वत्वे शब्दे च)। पुंसा यथाङ्गेषु सिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः (व० बृ० सं ५३।१)। अत्र प्रोद्म्यां नार्थः।

—नी (णीञ् प्रापणे)। गुणैरुदारैः संयुक्तान् प्रोन्नयेन्मध्यमाधमान् (का० नी० सा० ५।६६)। उन्मयेदित्येव विलक्षितमर्पयति, नार्थः प्रेण।

—मृज् (मृजू शुद्धौ)। वर्षप्रोन्मृष्टचित्राभं जगत्पश्यत्यवासनः (यो० वा० ६ (२)१६०।५७)। प्रोन्मृष्टं प्रमार्जितम्।

—यम् (यम उपरमे)। प्रोदयंसीच्च मुद्गरम् (भट्टि० १५।६६)। प्रोदयंसीत्=अवागुरिष्ट। नार्थः प्रोद्भ्याम्। प्र सोमाय वच उद्यतम् (ऋ० ६।१०३।१)। उद्यतमुदञ्चितम्। उत्कण्ठमुद्गीर्णम् इत्यर्थः।

—सद् (षदॢ विशरणगत्यवसादनेषु)। चारैश्चानेकसंस्थानैः प्रोत्साद्य शमानयेत् (मनु० ६।२६१)। अयमपपाठः। प्रोत्साद्येति तु युज्यते।

—सृ (सृ गतौ)। ततो व्युदस्तं तत्सैन्यं सिन्धुसौवीरकौरवम्। प्रोत्सारितं महावेगैः कर्णपाण्डवयोः शरैः (भा० द्रोण० १३७।२१)। प्रोत्सारितम्=दूरमपसारितम्।

—स्था (ष्ठा गतिनिवृत्तौ)। प्रोत्तिष्ठतस्तत्सहसा शिरोऽगच्छद् धरातलम् (भा० द्रोण० १४६।२६)। नार्थः प्रेण। उत्तिष्ठत इत्यर्थः।

—हा (ओहाङ् गतौ)। यद्वामिव प्र वयामुज्जिहानाः (वा० सं० १५।२४)। महान्तः पक्षिणो यथा वृक्षशाखां परित्यज्योर्ध्वगच्छेयुरित्याह। अत्र प्रशब्दो विप्रकर्षं विश्लेषं परित्यागमाह यथा प्रव्रज्येत्यत्र। उच्छब्दश्च ऊर्ध्वभावम्।

—हृ (हृञ् हरणे)। स वराहस्ततो भूत्वा प्रोज्जहार वसुन्धराम् (रा० २।११०।४)। उन्निनायेत्यर्थः।

प्रणि (प्र+नि)

—गद् (गद व्यक्तायां वाचि)। प्रण्यगादीद् राक्षसेन्द्रम् (भट्टि० ६।६६)। व्यक्ततरमवोचद् सविस्तरं वा। व्यक्तिर्विस्तृतिर्वा प्रशब्दवाच्यः प्रकर्षः। निशब्दस्तु विशेषं नाह। यथा निगदव्याख्यातः (ग्रन्थः) इत्यत्र। निगद इति पाठमात्रमाचष्टे।

—दा (डुदाञ् दाने, मेङ् प्रणिदाने)। **प्रणिदानं विनिमयः प्रत्यर्पणं च।**

—धा (डुधाञ् धारणपोषणयोः) अमात्येषु च सर्वेषु मित्रेषु विविधेषु च। पुत्रेषु च महाराज प्रणिदध्यात्समाहितः (भा० शां० ६९।९)। **तत्र चाराग्नियुञ्जीतेत्यर्थः।** वैहासिकांस्तद्भक्तान्वा प्रणिदध्यात् (काममूत्रे)। **प्रणिधीन्कुर्यादित्याह।** एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवम् (रा० ४।२।६)। **वालिना प्रणिधिरूपेण नियुक्ताविन्याह।** यदि मणिस्त्रपुणि प्रणिधीयते (पञ्चत० १।६५)। **प्रत्युप्यत इत्यर्थः। प्रतिधीयत इति पाठान्तरम्।** नखपदलिपयोपि दीपितार्थाः प्रणिदधिरे दयितैरनङ्गलेखाः (शिशु० ७।३९)। **प्रणिदधिरे=विभावयाम्बभूविरे=तर्कयाञ्चक्रिरे।** निर्वणे प्रणिधीयते (पा० ६।२।१७८ सूत्रे वृत्तौ)। नान्यत्र युद्धाच्छ्रेयोस्ति तथात्मा प्रणिधीयताम्। (भा० वि० ४७।१७)। **आत्मा प्रणिधीयतां चित्तं सावधानं क्रियतामित्याह।** वर्ति प्रणिदध्यात् (=उपरि दध्यात्) (सुश्रुते १।१६।८)। यथा मां त्वं पुनर्नैवं दुःखेषु प्रणिधास्यसि (भा० शां० १७७।३२)। **पातयिष्यसि।** किष्किन्धाद्रिगुहां गन्तुं मनः प्रणिदधे द्रुतम्। (भट्टि० ६।१४२)। **दधे=दध्रे इत्याह।** बुद्धिः प्रणिहिता येन मनश्चानु समाहितम् (रा० २।२२।१४)। **प्रकर्षेण निहिता प्रणिहिता। बुद्धिः प्रणीता येनेयमिति पाठान्तरम्।** प्रणिहितशिरसं वा कान्तमार्द्रापराधम् (माल० ३।१२)। **प्रणिहितं=भूमौ निहितम्।** भर्तृप्रणिहितेक्षणम् (रघु० १५।८४)। **भर्तृप्रहितनयनमित्यह।** कृष्णप्रणिहितेक्षणाः (हरि० २।२०।२६)। **उक्तोऽर्थः।** मामाकाशप्रणिहितभुजम् निर्दयाश्लेषहेतोः (मेघ० १०८)। **प्रणिहितभुजम्=उत्क्षिप्तबाहुम्=ऊर्ध्वीकृतबाहुम्।** प्रणिहितमपि चक्षुर्गुस्तमुक्तं हिनस्ति (उत्तर० ५।१३)। **प्रणिहितं=व्यापारितम्।** ततः प्रणिहिताः सर्वा वानर्योऽस्य वशानुगाः। चुक्रुशुः...(रा० ४।२५।३४)॥ **प्रणिहिताः=प्रकर्षेणैकत्र निहिताः समुदिताः समेताः।** विद्धि प्रणिहितं धर्मे तापसं वनगोचरम् (रा० २।५०।३०)। **धर्मे प्रणिहितम्=धर्मे दत्तावधानम्।** वेदप्रणिहितो धर्मः (भा० पु० ६।१।४०)। **वेदविहित इत्याह। अपूर्वश्चोपसर्गयोगः।** कीर्तिमन्तः प्रणिहिताः (रा० १।७।६)। **राजकृत्येषु सावधाना इति कतकः।** ऋजुः प्रणिहितः (भा० शां० ९।१९)। **प्रणिहितोऽन्तर्मुख इति नीलकण्ठः।** पिता श्रेष्ठः। सुहृद्यश्च सम्यक् प्रणिहितात्मवान् (भा० उ० ५४।४)। **प्रणिहितात्मवान्=समाहितमनाः, सावधानचित्तः।** सम्यक् प्रणिहितं चार्थं पृष्टः सन्नाभिनन्दति (मनु० ८।५४)। **प्रणिहितं प्रणिधिभिरुपलब्धमित्यर्थः। प्रतिज्ञातम् अभ्युपगतमिति कुल्लूकः।** विभावितमुपन्यस्तं वेति मोनियर्। धार्तराष्ट्रस्य शिबिरे मया प्रणिहिताश्चराः (भा० द्रोण० ७५।४)। **गूढं स्थापिता इत्यर्थः।** तिर्यक् प्रणिहिते शस्त्रे (सुश्रुते १।९५।१६)। **प्रणिहिते**

व्यापारिते। यद्दोःषु मा प्रणिहितम् (भा० पु० १।१५।१६) **निहितम्**=**स्थापितम्**)। इह प्रशब्दः प्रकर्षस्य द्योतकः। निर्धात्वर्थानुवादी। सुगोपायितमित्यर्थः। आवर्तयन्ति भूतानि सम्यक् प्रणिहिता च वाक् (भा०उ० ३८।३६)। **प्रणिहिता**=**प्रयुक्ता**। ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये (मनु० ६।२६६)। **मूले राजनियुक्तपुराणचौरवर्गे प्रणिहिताः सावधानभूता इति कुल्लूकः**। त्वां वयं तात संयुगे प्रणिधायानुयास्यामो रक्षन्तः सर्वतोमुखाः (भा०द्रोण० ३५।२१)। **प्रणिधाय**=**पुरस्कृत्य, मूर्ध्नि स्थापयित्वा**। (ध्वजम्) प्रणिधाय शमीमूले (भा०वि० ४६।२)। **सर्वप्रथमं निधायेति विवक्षति**। तस्मात्प्रणम्य प्रणिधाय कायम् प्रसादये त्वामहमीशमीड्यम् (गीता ११।४४)। **प्रणिपात्येत्यर्थः**। **इह प्रशब्दः प्रकृष्टं प्रततमाह, निशब्दश्च नीचैस्त्वम्**। प्रततं यथा स्यात्तथा **नीचैर्देहं पातयित्वेत्याह**। **निशब्दस्य नीचैस्त्ववाचित्वे यास्कीयं** नरकं न्यरकं नीचैर्गमनम् इति (नि० १।११।१) **वचः प्रमाणम्**। स चापि सम्यक् प्रणिधाय शिक्षाम् (भा० वन० १८३।३०)। **इह प्रणिधानं परत्र निधानं संक्रमणं प्रदानमुच्यते तेन प्रणिधायेति दत्त्वेत्याह**। तस्मान्नित्यं परीक्षेत पुरुषान् प्रणिधाय वै (भा० अनु० ३७।७)। **प्रणिधाय**=**विचिन्त्य, साधु चिन्तयित्वा**। प्रणिधायेन्द्रियग्रामं भर्तृलोकपरायणे (भा० आदि० ११६।२६)। **प्रणिधाय**=**नियम्य**। विकृष्य चापं प्रणिधाय सायकम् (रा०३।५६।२६)। **प्रणिधाय**=**सन्धाय**। प्रणिधाय हि चारेण ततो भावः परीक्ष्यताम् (रा० ५।६०।१५)। **प्रणिधाय**=**गुप्तं विज्ञायेत्यर्थः**। चारश्च विविधोपायः प्रणिधेयः पृथग्विधः (भा० शां० ५६।३४)। **प्रणिधेयः**=**नियोज्यः**। सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् (रघु० १।७४)। **प्रणिधानेन**=**समाधिना**। तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः (योग० २।१)। जानामि प्रणिधानं ते बाल्यात् प्रभृति नन्दिनि। ब्राह्मणेष्विह सर्वेषु गुरुबन्धुषु चैव ह (भा० वन० ३०३।१६)। **प्रणिधानम्**=**प्रश्रिता वृत्तिः, सादरो व्यवहारः, आस्था**। प्रणिधानेन वर्येण रूपेण वयसा च मे। मनः प्रविष्टो देवर्षे गुणकेश्याः पतिंवरः (भा० उ० १०३।२१)॥ **प्रणिधानेन**=**अवधानेन**। स्वशरीरं ततो मुमुक्षुर्नियतमिति प्रणिधिमुपव्याजहार (अवदा० जा० ३०)। प्रणिधिः संकल्पोऽध्यवसाय इत्यर्थो भाति।

—**पत्** (पत्लृ गतौ)। कथं प्रणिपतेच्चायमिह कृत्वा पणं परम् (भा० उ० ३।८)। **प्रणिपतेत्**=**नमेत्**। **शरणं यायादित्यर्थः**। गुरुं च प्रणिपत्य मूर्ध्ना (भा० वि० ६६।२६)। **प्रणिपत्य**=**प्रणम्य**=**नमस्कृत्वा**। **नमसो गति-संज्ञाविकल्पः**। पादयोः (रघु० ८।१२)। **पादावुपसङ्गृह्येत्यर्थः**। श्वश्रूश्वशुरयोः पादौ प्रणिपत्य (मार्क० २२।१०४)।

नमस्कृत्येत्यर्थः। वागीश वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे (कु० २।३)। **प्रणिपत्यासुरास्तस्मै** शमयित्रे सुरद्विषाम् (रघु० १०।१५)। **उक्तोर्थः। केवलं विभक्तिवैचित्र्यार्थमुदाहृतयः**। प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् (रघु० ४।६४)

—**पद् (पद गतौ)**। प्रविश्य तदा भीष्मं शिरोभिः प्रणिपेदिरे (भा० १०७।५७)। **प्रणिपेतुरित्यर्थः। पतिपदी समानार्थौ। समानौ चेहोपसर्गौ, तेन समाना नमस्कारार्थता तयोः। वाचि स्वतन्त्राश्च महर्षय इत्यपि।**

प्रवि (प्र+वि)

—**कस् (कस गतौ)**। प्रविकसति चिराय द्योतिताशेषलोके दशशतकरमूर्त्तौ (शिशु० ११।६३)। **प्रविकसति प्रोन्मिषति सति।**

—**गाह् (गाहू विलोडने)**। प्रविगाह्योदकं तीर्णं वनानि फलवन्ति च। (रा० ६।१६।२)। **प्रशब्देन नार्थः। विगाह्येत्यवगाह्येति वाह। समाने विगाहनावगाहने। बर्हैश्च दीर्घान्प्रविकीर्य मूर्धजान्** (भा० वि० ११।२)। **शिरोरुहानुन्मुक्तबन्धनान्कृत्वेत्याह।** विषं शरीरे प्रविकीर्णमात्रम् (सुश्रुते २।२६५।१)। प्रविकीर्णम्=विसृप्तम्।

—**चल् (चल कम्पने)**। यश्च धर्मात् प्रविचलेल्लोके क्वचन मानवः (भा० शां० ५६।१०५)। **प्रविचलेत्=भ्रंशेत=प्रच्यवेत। न्याय्यात्पथः** प्रविचलन्ति पदं न धीराः (भर्तृ १।८४)। **न्यायमार्गं पदमेकमपि यावन्नोच्चरन्त इत्याह। प्रवी समुदितौ विप्रकर्षमाहतुः।**

—**दृ (दृ अवदारणे)**। **युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् (अमरः)।**

—**द्रु (द्रु गतौ)**। रथाः सर्वे कस्माच्चैते प्रविद्रुताः (भा० द्रोण० १२२।२)। **विद्रुता भग्नाः पलायिताः। प्रविद्रुता इति परस्परं विश्लिष्य पलायिता इत्यर्थमाचष्टे। प्रशब्दः प्रविश्लेषं पार्थक्यमाह।**

—**धा (डुधाञ् धारणपोषणयोः)**। रन्ध्रं हि तद्विप्रकृता महत्त्वं नयन्ति तस्मात् प्रविधाय यायात् (का० नी० सा० १६।१५)। **प्रविधाय=प्रतिकृत्य। प्रत्यर्थे प्रशब्दः**। प्रविधाय च तद्वर्ती योजयेच्चाञ्जने भिषक् (सुश्रुते २।३४७।७)। **प्रविधाय=विभज्य।** ततस्तां लक्ष्मीं प्रविधाय प्रदोषे स्वगृहं निनाय (शुक०)। अनागतविधानं च तस्यार्थे प्रविधीयताम् (रा० ४।१४।२६)। **प्रविधीयतां चिन्त्यतामित्याह।**

—**ध्वंस् (ध्वंसु अवस्रंसने, गतौ च)**। प्रविध्वस्तशरासनौ (रा० ६।२२।२६)। वातप्रविध्वस्ततरङ्गसंकुलो यथार्णवः (हरि० २।१२४।५५)। **वातेन**

वात्यया प्रविध्वस्ता विक्षिप्तास्तरङ्गा वीचयः । प्रवी विशेषणे । वातप्रवृद्धस्तु तरङ्गसंकुल इति पाठान्तरम् ।

—यु (यु मिश्रणामिश्रणयोः) । यमुना प्रयुवती गच्छतीति वा प्रवियुतं गच्छतीति वा (नि० ९।२६।१) । प्रयुवती प्रकर्षेण स्वान्युदकान्यामिनंदीभिर्मिश्रयन्ती । प्रवियुतं स्तिमितं यथा स्यात्तरङ्गैस्तथेत्यर्थ इति दुर्गः ।

—रम् (रमु क्रीडायाम्) । ततोऽग्रहारहरणादेव प्रविरतोऽभवद् (राजत० ४।६३८) । प्रविरतः=विरतः=उपरतः । विशब्दो धात्वर्थं विपरीतयति । रमिश्चेष्टामाह विरमिस्तु चेष्टाविरामम् ।

—विच् (विचिर् पृथग्भावे) । प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् (रा० २।१६।१) प्रविविक्ताम्=जनासम्बाधाम् । जनसम्मर्दरहिताम् । जनौघेन विविक्तां परित्यक्ताम् ।

—श्लिष् (श्लिष आलिङ्गने) विधुरं तु प्रविश्लेष इत्यमरः । व्यतिरिक्तोऽत्र प्रशब्दः ।

प्रव्या (प्र+वि+आङ्)

—हृ (हृञ् हरणे) । निःश्वसन्तं यथा नागं प्रव्याहाराय भारत (भा० शां० २२४।१) । प्रव्याहाराय=प्रकृष्टोक्तये ।

प्रसम् (प्र+सम्)

—ईक्ष् (ईक्ष दर्शने) । समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम् । प्रसमीक्ष्य·····(मनु० ५।४९) । सुनिपुणं चिन्तयित्वेत्याह । प्रसमयोरन्यतरः शक्यस्त्यक्तुम् ।

—ख्या (ख्या प्रकथने) । परिपृष्टिका वैघसिकाः प्रसंख्यानास्तथैव च (भा० आश्व० ९२।७) । प्रसङ्ख्यानास्तत्कालमात्रसङ्ग्रहाः । हरः प्रसङ्ख्यानपरो बभूव (कु० ३।४०) । प्रसङ्ख्यानपरः=आत्मानुसन्धानपरः । ध्याने जपे प्रसङ्ख्यानं नित्यानित्यविचारणे इति शाश्वतः । गुणानेतान् प्रसङ्ख्याय (भा० शां० १००।२५) । प्रसङ्ख्याय=सम्यग् विचार्य । यो न याति प्रसङ्ख्यानमस्पष्टो भूमिवर्धनः (भा० वन० ३५।७) । प्रसङ्ख्यानं प्रकृष्टां कीर्तिम् । गुणिगणगणनागोचरो न भवतीति धात्वर्थस्य सन्निकृष्टोऽर्थः । अस्पष्टः=अविदितः । भूमिवर्धनः=भूमेर्हिसको भारभूतत्वात् ।

—चक्ष् (चक्षिङ् व्यक्तायां वाचि) । पृष्ठस्थानि सर्वाण्येव प्रसंचक्षीत (लाट्य० श्रौ० २।९।७) । कात्स्न्र्येन गणयेदित्याह ।

परा

—**अञ्च्** (**अञ्चु गतिपूजनयोः**)। विदुषां वदनाद्वाचः महसा यान्ति नो बहिः। यातास्चेन्न पराञ्चन्ति द्विरदानां रदा इव (भामिनी०१।६३)। **पराञ्चन्ति=प्रत्यागच्छन्ति=प्रतिनिवर्तन्ते=परापतन्ति**। पराञ्चि खानि व्यतृणत्स्वयम्भूः (कठ० उ० २।१।१)। पराञ्चि=बहिर्मुखानि। पराचः काममनुयन्ति बालाः (कठ० उ० २।१।२)। **पराचो बाह्यान्**। **पराङ्मुखः पराचीन इत्यमरः**।

—**अय्** (**अय गतौ**)। **ईर्ष्या जेया ततो रागः स्वयमाशाः पलायते (राजत० ३।५२१)। अत्र पलायतिः सकर्मकः, आशा इति च कर्म**। आशाः=दिशः।

—**अस्** (**असु क्षेपे**)। परा मार्तण्डमास्यत् (ऋ० १०।७२।८)। **पुत्रं सूर्यं परास्यदित्याह**। तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसम् (मै० सं ४।६।४, नि० ३।४)। **अवज्ञाय स्वतां विहाय प्रक्षिपन्ति परावपन्ति अपविध्यन्ति। परस्मै प्रयच्छन्तीति तु दुर्गः**। तन्न। **प्रदानं तु स्त्रीपुंसयोः साधारणमिति पुंदाननिषेधोऽपार्थकः स्यात्**। ममच्चन त्वा युवतिः परास (ऋ० ४।१८।८)। **उक्तोऽर्थः**। एतेन अनलंकृती पुनः क्वापीति यदुक्तं तदपि परास्तम् (सा० द० १)। **परास्तम्=निराकृतम्=प्रत्युक्तम्**। परास्तवसुधा सुधाधिवसति (कि० ५।२७)। **परास्तवसुधा=त्यक्तवसुन्धरा। त्यक्तान्यभूभागा सुधाऽत्रैवाद्रौ वसतीति तात्पर्यम्**।

—**इ** (**इण् गतौ**)। परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः (ऋ० १।१२३।१२)। परा मे यन्ति धीतयः (ऋ० १।१५।१६)। **उभयत्र पराशब्दो वैदूर्यमाह**। **परायन्ति=अपगच्छन्ति=अपसरन्ति**। कं स्विदर्घं परागात् (ऋ० १।१६४।१७)। तिष्ठा सु कं मघवन् मा परागाः (ऋ० ३।५३।२)। **इतो मत्तो दूरं मा यासीरित्याह**। चलं यथा दृष्टिपथं परैति (भा० शां० २०२।२३)। **परैति=प्राप्नोति**। का न सम्पदो या न विपत्परैति (अव० जा० ३२।१४)। **या इति द्वि० बहु०**। **परैति=प्राप्नोति=आसादयति**। परैति कार्श्यं यशसा समं वपुः (कि० १।२६)। **उक्तोऽर्थः**। नैव श्रेयो धृतराष्ट्रः परैति (भा० वन० ५।१६)। एहि क्षत्तर्द्रौपदीमानयस्व। संमार्जतां वेश्म परैतु शीघ्रम् (भा० सभा० ६६।१)। **परैतु पराकृता धिक्कृता ऐत्वित्यर्थ इति नीलकण्ठः**। परैतु मृत्युरमृतं न ऐतु (अथर्व० १८।३।६२)। **परैतु=अपयातु**। न वाप्यहं लिप्समानः परैमि (भा० शां० २९९।१९)।

विचलामि, व्यतियामीत्याह। धर्मादिति शेषः। परेह्यं नं जवेन भूतये (भा० वन० २७०।८)। **शरणं प्रपद्यस्वेत्याह।** परेहि सौम्य ! ग्लावं मैत्रेयमुपसीद (गो० ब्रा० पू० १।३१)। तस्माद् गुणानेव परैमि तीर्थम् (बुद्ध० ७।३१)। **परैमि=अवैमि।** मृतः श्रूयेत यो जीवः परेयुः पशवो यदा (भा० वन० २२१।२८)। **परेयुः=परेताः स्युः, म्रियेरन्।** अथ श्वोभूते पुरोहितस्य गृहान्परेत्य बार्हस्पत्यं चरुं निर्वपति (श० ब्रा० ५।३।१।२)। **परेत्य=प्राप्य=आसाद्य=उपगम्य।** परायद्भ्यश्चोऽवहीये सखिभ्यः (ऋ० १०।३४।५)। **परायद्भ्यः=अग्रे गच्छद्भ्यः।** परायतो निवर्तनमायतः प्रतिनन्दनम् (अथर्व० ७।३६।१)। **परायतः पराङ्मुखं गच्छतः।** य उदानट् परायणं य उदानण्यायनम् (अथर्व० ६।७७।२)। **परायणम्=पराङ्मुखगमनम्।** मधुमन्मे परायणं मधुमत्पुनरायनम् (ऋ० १०।२४।६)। **परायणम्=दूरगमनम्।** परेयिवांसं प्रवतो महीरनु (ऋ० १०।१४।१)। **इतः प्रयान्तं म्रियमाणमित्याह।**

—कृ (डुकृञ् करणे)। ता हनूमान्पराकुर्वन् (भट्टि० ८।५०)। **तासां दर्शनं परिहरन्नित्याह। पराशब्दः पर्यर्थे वर्जने वर्तते।**

—कृष् (कृष विलेखने)। स तां पराकृष्य सभासमीपमानीय (भा० सभा० ६७।३१)। **अग्रतो बलात्कृष्ट्वेत्याह।** ब्राह्मणा यं प्रशंसन्ति पुरुषः स प्रवर्धते। ब्राह्मणैर्यः पराकृष्टः पराभूयात् क्षणाद्धि सः (भा० अनु० ३३।२०)॥ **अवकृष्टो न्यक्कृतोऽवहेलित इति पराकृष्ट इहोक्तः।**

—कॄ (कॄ विक्षेपे)। राज्यमक्षैः पराकीर्य न श्रूयन्ते कथंचन (भा० वि० ४४।३)। पराकीर्य=अपविध्य=परोप्य=हारयित्वा। स्थानेऽक्षैः करणैः साहचर्य्येण पराकिरतेः प्रयोगो वश्यवाचः कवेः।

—क्रम् (क्रमु पादविक्षेपे)। प्रहाणस्तिष्ठन्दण्डे पराक्रम्य (शां० श्रौ० ५।१६।४)। देवा देवेषु पराक्रमध्वम्, प्रथमा द्वितीयेषु पराक्रमध्वम् (शां० श्रौ० ४।१०।१-२)। (राजा) बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् (मनु० ७।१०६)। **विक्रान्तवदाचरेदित्यर्थः।** गाण्डीवमुक्ता हि यथा पुरा मे पराक्रमन्ते न शराः किराते (कि० १६।१८)। **अप्रतिबन्धेन न पतन्तीत्यर्थः।** स्वर्गं गन्तुं पराक्रान्तः स्वेन वीर्येण भारत (भा० आदि० १२०।२)। **पराक्रान्त उत्साहवान्।** रामस्यार्थे पराक्रान्ता वानरास्त्यक्तजीविनः (रा० ६।७५।५५)। पानीयार्थे पराक्रान्ता यत्र ते भ्रातरो हताः (भा० वन० १७।६१)। **उक्तोऽर्थः।** सैन्धवं त्वऽभिसम्प्रेक्ष्य पराक्रान्तं पलायने (भा० वन० २७१।५७)। **पलायने रणाद् द्रुतौ व्यवसितमित्याह।** ब्रह्मवादी पराक्रान्तः शत्रुभिर्युधि दुर्जयः (हरि०

१।२६।२)। **पराक्रान्तः**=उत्साहसम्पन्नः। पराक्रान्तस्य समरे विरथस्य पलायतः (हरि० २।४३।२४)। **शत्रुणा वशीकृतस्येति नीलकण्ठः**। यत्र तपः पराक्रम्य व्रतं धारयत्युत्तरम् (अथर्व० १०।७।११)। **पराक्रम्य**=सोत्साहं प्रक्रम्य।

—**क्षिप्** (**क्षिप प्रेरणे**)। पराक्षिप्तस्वलोकत्रयः (भा० पु० ५।२४।१८)। **पराक्षिप्तम्**=आक्षिप्तम्=आच्छिन्नम्=हृतम्। आङोऽर्थे पराशब्दप्रयोगः साहसम्। औदार्येण पराक्षिप्तमनाः (भा० पु० ५।२।८)। **हृतमना इत्यर्थः**।

—**ख्या** (**ख्या प्रकथने**)। स यथा नद्यै पारं परापश्येदेवं स्वस्यायुषः पारं पराचख्यौ (श० ब्रा० ११।१।६।६)। **पराचख्यौ**=दूराद् ददर्श।

—**गम्** (**गम्लृ गतौ**)। यद्वो मनः परागतं यद्बद्धमिह वेह वा (अथर्व० ७।१२।४)। **परागतं दूरं गतम्** (**अशक्यानुसारम्**)। विद्यया तदारोहन्ति यत्र कामाः परागताः (श० ब्रा० १०।५।४।१६)। **परागताः**=निवृत्ता भवन्ति। ये ते पूर्वे परागता अपरे पितरश्च ये (अथर्व० १८।३।७२)। **परागताः**=इतः प्रयाताः परेता मृताः। तदयं परागत एवास्मि (उत्तर० ५)। **परापतितः प्रत्यागत इत्याह**। विश्विलोऽपि मुहूर्तेन वाराणस्याः परागतः (बृ० श्लो० सं० ५।२५८)। **उक्तोऽर्थः**। स्फुटपरागपरागतपङ्कजम् (शिशु० ६।२)। **परागतम्**=परिगतम्। **स्फुटैः परागै रजोभिः परागतानि व्याप्तानि पङ्कजानि यस्मिंस्तं सुरभिं वसन्तम् (आलोकयत) इति मल्लिनाथः। पर्यर्थे सर्वतोभावे पराशब्दस्य प्रयोगो निरङ्कुशत्वमेव कवीनां निदर्शयति। हन्त महाकवयो पीत्थङ्कारं वाचमाकुलयन्ति**।

—**चर** (**चर गतिभक्षणयोः**)। आ च परा च चरति प्रजानन् (ऋ० १०।१७।६)। **प्रचरति**=प्रतिकूलं चरति इति सायणः। अथर्वणि (७।१०।१) **अप्येषगम्नायते तत्र पराचरति परागच्छतीति सः**।

—**जि** (**जि जये, जि त्रि अभिभवे**)। अहमिन्द्रो न पराजिग्य इद् धनम् (ऋ० १०।४८।५)। **अहारयमित्यर्थः**। **पराभावयमिति तु सायणः**। उभा जिग्यथुर्न पराजयेथे (अथर्व० ७।४५।१)। **अकर्मकोत्र पराजयतिः**। परा भागमोषधीनां जयन्ताम् (अथर्व० ८।३।१६)। **भागं पराजयन्ताम्**=स्वं भागं हारयन्ताम्=स्वस्मादंशान्निर्भज्यन्ताम्। इन्द्रो जयाति न पराजयातै (अथर्व० ६।९८।१)। **पराजयं न लभत इत्यर्थः**। **अभिभवतीन्द्रो नेन्द्रोऽभिभूयत इत्याह**। गच्छ त्वं कितवं गत्वा सभायां पृच्छ सूतज। किं नु पूर्वं पराजैषीरात्मानमथवा नु माम् (भा० सभा० ६७।७)॥ **पराजिरत्र सकर्मकः**। ते (देवाः) ततः (आग्नीध्रीयात्) न पराजयन्त (ऐ० ब्रा० १०।४)। **पराजयन्त**=प्राज्य-

वन्त । **पराजय इह प्रच्युतिः** । अध्ययनात्पराजयते (पा० १।४।२६ सूत्रे वृत्तौ)। **अध्येतुं ग्लायतीत्यर्थः** । ते देवाः सङ्घातं संघातं पराजयन्त (गो० ब्रा० उ० २।१७) । जिष्णुर्हापराजिष्णुर्भवति (श० ब्रा० १४।५।१।६) । इहोभयत्र पराजिरकर्मकः । **न्यग्भवनमाचष्टे** । पेतुरार्ता वेपमाना गावो वर्षपराजिताः (हरि० २।१६।२४) । **वर्षपराजिता वृष्टयभिभूताः । वर्षणेनोद्वेजिताः** ।

—**डी (डीङ् विहायसा गतौ)** । पश्चाद् गतिः पराडीनम् (भा० कर्ण० ४१।२७) ।

—**त्रस् (त्रसी उद्वेगे)** । परामित्रान् दुन्दुभिना सर्वे देवा अत्रितसन् (अथर्व० ५।२१।७) । **भीषयित्वाऽद्रावयन्नित्यर्थः** ।

—दा (डुदाञ् दाने) । मा दत्वते दशते मादते नो मा रीषते सहसावन् परादाः (ऋ० १।८६।५) । **मा परादाः=माऽर्पिपः । मा रीरध इति तात्पर्यार्थः** । महे च न त्वामद्रिवः परा शुल्काय देयाम् (ऋ०८।१।५) । **महार्घेणापि त्वां न विनिमयेयेत्याह** । मा नो मघेव निष्पपी परा दाः (ऋ० १।१०४।५) । **निष्षपी स्त्रीकामो भवति विनिर्गतसपः । स यथा धनानि विनाशयति मा नस्त्वं तथा परादाः (विनीनशः) इति निरुक्ते** (५।१६) यास्कः । यद् दत्तं यत्परादानं यत्पूर्वं याश्च दक्षिणाः (वा० सं० १८।६४) । **परादानं दीनान्धकृपणेभ्यो दयया दानम् इत्युवटः** । ब्रह्म तं परादात् । योऽन्यत्रात्मनो ब्रह्म वेद (श० ब्रा० १४।५।४।६) । **परादात्=निराकार्षीत्=अत्याक्षीत्** । मा नो वधीरिन्द्र मा परादाः (ऋ० १।१०४।८) । **उक्तोऽर्थः** । मा नो अग्नेऽवीरते परादाः (ऋ० ७।१।१६) । स सृञ्जयाय तुर्वशं परादात् (ऋ० ६।२७।७) । **आर्पिपत्, तद्वशेऽकरोत्** । मा परादा नो दुराध्ये मर्ताय (ऋ०८।६०।७) । न गा इन्द्रस्तस्य परादददाति (ऋ० १०।१६०।३) । **न परास्यति, तन्नाशं नाभ्यनुजानातीत्यर्थः** । परैणान् देवः सविता ददातु (अथर्व० ८।३।१६) । **एनान् परादददातु=एनान् निरस्यतु** । भवं ये बर्हिषां भागभाजं परादुः (भा० पु० ४।६।५) । **बर्हिर्भागभाजम्=यज्ञे भागिनम् । परादुः=परासुः=अवधीरयामासुः । यज्ञभागान्निरभजन्तित्यर्थः** ।

—**दिश् (दिश अतिसर्जने)** । परामीषामसून् दिदेश दीर्घेणायुषा समिमान्त्सृजामि (अथर्व० १२।२।५५)। **परादिदेश=पराददामि=हरामि । दाञः स्थाने दिशेः समानार्थकस्य प्रयोगः । समश्चोपसर्गः** ।

—**दृश् (दृशिर् प्रेक्षणे)** । आ पश्यति प्रतिपश्यति परापश्यति (अथर्व० ४।२०।१) । **परागतं दूरस्थमपि भयकारणं जानातीत्यर्थः** । यतरा नौ दवीयः परापश्यात् (श० ब्रा० ३।६।२।३।) । **इह पराशब्दो दवीयःशब्दसहचारेण**

दर्शनस्य दूरावधिकतामाह। स यथा नद्यै पारं परापश्येत् (श० ब्रा० ११।१।६।६)। **सुदूरात्पश्येदित्यर्थः।** न तत्र गच्छेद्यत्र चक्षुषा परापश्येत् (गो० ब्रा० पू० ३।२१)। धूममग्निं परादृश्यामित्रा हृत्स्वादधतां भयम् (अथर्व० ८।८।२)।

—द्रु (द्रु गतौ)। पराद्रवत्प्राणपरीप्सुरुर्व्याम् (भा० पु० १।७।१८)। **पराद्रवत्=पलायत।**

—धाव् (धावु गतिशुद्ध्योः)। परा हीन्द्र धावसि वृषाकपेः (अथर्व० २०।१२६।२)। **स्पष्टोऽर्थः।**

—ध्मा (ध्मा शब्दाग्निसंयोगयोः)। सपत्नीं मे पराधम (ऋ० १०।१४५।२)। **पराणुदेत्यर्थः। पराणुदेति चाथर्वणिकाः पठन्ति।** प्रविद्धं रक्षः पराध्माता अमित्राः (आप० श्रौ० १।६।२०।८)। **पराणुत्ताः (पराणुन्नाः) इत्यर्थः।**

—नी (णीञ् प्रापणे)। पुनः कृत्यां कृत्याकृते हस्तगृह्य पराणय (अथर्व० ५।१४।४)। **पराणय=प्रतीपं नय। प्रत्यावर्तयेत्यर्थः।** ये गोपति पराणीयाथाहुर्मा ददा इति (अथर्व० १२।४।५२)।

—नुद् (णुद प्रेरणे)। पराशर्धन्तं नुनुदे अभि क्षाम् (ऋ० ७।१८।१६)। **दूरं प्रैरयत्।** तन्नः पराणुद विभो कश्मलं मानसं महत् (भा० पु० ३।७।७)। **उक्तोऽर्थः।**

—पत् (पत्लृ गतौ)। इन्द्रस्य सुपुत्राणस्य दशधेन्द्रियं वीर्यं परापतत् (तै० सं० ५।६।३।४)। पृथग्भूत्वाऽपतत्, **अस्कन्दत्।** यः प्रथमः शकलः परापतेत् स स्वरुः कार्यः (श० ब्रा०)। **अवतरेत्, विश्लिष्टः स्याद् इत्याह।** यथेषुका परापतदवसृष्टाधि धन्वनः (अथर्व० १।३।६)। **अनिरुद्धवेगा शीघ्रं गच्छतीत्याह।** अवसृष्टा परापत सख्ये ब्रह्मसंशिते (वा० सं १७।४५)। **सहसा परसैन्ये पतिता भवेत्याह।** पूर्णा दर्वि परापत सुपूर्णा पुनरापत (अथर्व० ४।१०।७)। **देवान् प्रति परागच्छेत्याह।** परा हि विमन्यवः पतन्ति वस्य इष्टये (ऋ० १।२५।४)। **दूरमुड्डयन्ते।** पक्षिणः परापातमासते (काठक० ३४।८, वा० सं० ३।४६)। **परापातम् उत्पत्योत्पत्येत्यर्थः।** यदद्य होतृवर्ये जिह्मं चक्षुः परापतत् (श० ब्रा०)। **परापतिरिह सकर्मकः। चक्षुष्कर्म। जिह्मस्य चक्षुषो विषयतां पर्यहरत्। चक्षुर्गृहीतं नाभूदित्यर्थः।** शब्दार्थौ प्रतिभानवतः कवेरहम्पूर्विकया परापततः (का० मी०)। **कविमुपयातः।** परा शुक्लानि पातय (अथर्व० १।२३।२)। **परापातय=पराणुद, पराचीनं दूरं प्रेरय।** प्रथमपरापातिनं शकलमाहरति (आप० श्रौ० ७।१।२।५)। **प्रथमपरापातिनम् प्रथमं परापतति पृथग्भूत्वा पतति, तम्।**

—पू (**पूञ् पवने**)। परापूतं रक्षः परापूता अरातयः (वा० सं० १।१६)। **परापूतम्**=**दूरीकृतम्**। **पूञ् इति विशेषं विहाय सामान्ये धात्वर्थे करणे प्रवृत्तः, पराशब्दश्च पृथग्भावे**। दक्षिणाप्राची तिष्ठन्ती पत्न्यवहन्ति परापावमविवेकम् (आप० श्रौ० १।३।७।५)। **परापावं शूर्पेण तुषप्रोहणं कृत्वा**।

—पॄ (**पॄ पालनपूरणयोः**)। परापुरो निपुरो ये भरन्ति (अथर्व० १८।२।२८)। **परापृणन्ति पिण्डान् ददतीति परापुरः पिण्डदातारः पुत्राः**।

—भिद् (**भिदिर् विदारणे**)। तस्य पारावतानश्वान्रथशक्त्या पराभिनत् (भा०द्रोण०१६१।३२)। **अत्यन्तं विक्षतानकरोत् क्षुण्णानकार्षीदित्यर्थः**। पराभिनन्नवैर्नवत्या च शरैस्तथार्जुनम् (भा०कर्ण०६०।६०)। **उक्तोऽर्थः**। पराभिनत्कौञ्चमिवाद्रिमग्निजः (भा० कर्ण० ६०।६८)। **व्यदारयदित्यर्थः**।

—भू (**भू सत्तायाम्**)। अस्तु शेषं कौरवाणां मा पराभूदिदं कुलम् (भा० उ० १२३।५६)। **मा नशदित्यर्थः**। एकान्तेन ह्यनीहोऽयं पराभवति पूरुषः (भा० वन० ३२।३६)। **उक्तोऽर्थः**। कतमासां भोमतमा यामदत्त्वा पराभवेत् (अथर्व० १२।४।४५)। यथा ते कुलतन्तुश्च धर्मश्चापि न पराभवेत् (भा० आदि० १०३।२२)। ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् (अथर्व० ५।२८।२०)। कथं नु प्रजाः सृष्टाः पराभवन्ति (काठक २।४)। यमिच्छेयुः स राजा स्याद्यो नेष्टः स पराभवेत् (भा० अनु०३३।१७)। नैतद् विद्वान्पराभवेत् (भा० गृ० २।६)। **एतज्जानानो न नश्येदित्याह**। तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः (भाष्ये)। **नेशुरित्यर्थः**। यो राघवं रणे पराभवेत् (रा० ३।६६।१४)। **पराभवतिरिह सकर्मकः**। जयेत्=**अभिभवेत्**। नचिरात्तं रिपवः पराभवन्ति (का० नी० सा० १३।६४)। **उक्तोऽर्थः**। यदुत्साही सदा मर्त्यः पराभवति सज्जनान्। **पराभवति**=**तिरस्करोति**=**अधिक्षिपति**। इन्द्रो मणिनाऽसुरान्पराभावयत् (अथर्व० ८।५।३)। संभाव्य पराभावयत्ततो वै देवा **अभवन्** परासुराः (ऐ० ब्रा० ३।३६)। **अभवन्नवर्धन्त**। **पराभवन्**=**अहीयन्त**=**अनश्यन्**। अनेनेन्द्रो मणिना वृत्रमहन्ननेनासुरान्पराभावयन्मनीषी (अथर्व० ८।५।३)। सपत्नेभ्यः पराभुवे (अथर्व० १।२६।४)। **पराभुवे**=**पराभूतये**। **सम्पदादित्वाद् भावे क्विप्**। न चैवं सामरा लोका गमिष्यन्ति पराभवम् (भा० आदि० १८०।२०)। **पराभवो नाशः**। नियच्छेदं मनः पापात्सर्वलोकपराभवात् (भा० आदि० १७६।२१)। **उक्तोऽर्थः**। वरं परिभवस्तस्मान्न गुणानां पराभवः (अवदा० जा ३३।१३)। **पराभवो नाशस्त्यागः**। पराभवस्य हैतन्मुखं यदतिमानः (श० ब्रा० ५।१।१।१)। **पराभवो विनिपातः**। परैरपर्यासितसत्त्वसम्पदां पराभवोप्युत्सव एव मानिनाम् (कि० १।४१)।

पराभवः पराजयः। कुबेरस्य मनःशल्यं शंसतीव पराभवम् (कु० २।२२)। **परामवः=तिरस्कारः=विमानना**।

—**मृ** (**मृङ् प्राणत्यागे**)। परामृताः परिमुच्यन्ति सर्वे (मुं० उ०३।२।६)। **परामृता मृत्युमतिक्रान्ता इत्याह**।

—**मृश्** (**मृश आमर्शने, आमर्शनं स्पर्शः**)। परामृशन् हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् (रघु० ३।६८)। गदामाशु परामृशत् (भा० द्रोण० १७७।४३)। **परामृशत्=अगृह्णात्**। अतः प्रजारक्षणदक्षिणोऽसौ शस्त्रं शास्त्रं च परामर्मश (अवदा० जा० ८।१)। **परामर्मश=अग्राह, चिन्तयामास**। अथ शंकित परामृशत् (भा० द्रोण० १४०।६५)। **अगृह्णादित्यर्थः**। **केशपरामर्शः=कचग्रहः**। किं भवितेति सशङ्कं पङ्कजनयना परामृशति (भामिनी० २।५३)। परामृशति=**चिन्तयति**। ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति (का० ग्र० १)। **मनसा ध्यायति चिन्तयतीत्यर्थः**। तदित्यनेन प्रकृतं ब्रह्म परामृश्यते (ब्र० सू० शां० भा०)। **परामृश्यते=बुद्धिस्थं क्रियते**। इदमा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतददःशब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन (सा० द०)। कथं राजा स्थितो धर्मे परदारान् परामृशेत् (रा० ३।५०।६)। **दूषयेदित्यर्थः**। प्रमत्त एष राजा कलत्राणि नः परामृशति (दशकु०)। तेषु सहसा प्रवर्तते, **तानि दूषयतीत्यर्थः**। क्व दृष्टा त्यागिता भिक्षोः कुतो वा तस्य सम्पदः। **परामर्मश नैवेति** गतानुगतिको जनः (राजत०८।७९७)। **परामर्मश=चिन्तयामास**। याज्ञसेन्याः परामर्शः स च वीर दहत्युत (भा० वन० १४१।४)। **परामर्शः केशेषु ग्रहणम्**। हस्तिहस्तपरामृष्टां व्याकुलामिव पद्मिनीम् (भा० वन० ६८।१५)। **परामृष्टां विलोडिताम्**। तात चूतकदम्बायपरामर्शसुगन्धयः (यो० वा० ६ (२)। ११४।२९)। परामर्शः स्पर्शः। परस्परपरामर्शात्कुन्ताद्यायुधपङ्क्तयः (यो० वा० ६ (२)। १०८।४४)। परामर्शः=**सङ्घर्षः=सङ्घट्टः**। ईदृशे तु परामर्शे वर्तमानस्य माधव। त्वदन्यो हि रणे गोप्ता विजयस्य न विद्यते (भा० द्रो० ११०।५४)॥ **उक्तोऽर्थः**। विजयोऽर्जुनः। धनुषोऽस्य परामर्शात् स्वस्ति तेऽस्तु परन्तप (रा० १।७६।१७)। परामर्शो ग्रहणाकर्षणादि। तपःपरामर्शविवृद्धमन्युः (कु० ३।७१)। **तपःपरामर्शः=तपस आस्कन्दनम्, तपश्चर्यायाः धर्षणम्**। लिङ्गपरामर्शोऽनुमानम् (तर्क०)। **परामर्शो ज्ञानम्**। अश्वं च तं परामृश्य विषयान्ते विषोपमाः (भा० आश्व० ७७।३)। **परामृश्य=गृहीत्वा**। क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः (योग० सू० १।२४)। **अपरामृष्टः=अस्पृष्टः=अनास्कन्नः**। मदनव्याधिना परामृष्टोसि (माल० ।) **परामृष्टः=स्पृष्टः=गृहीतः**। मत्स्यराजः

परामृष्ट्रस्त्रिरत्नेन सुशर्मणा (भा० वि ३३।१२)। **परामृष्टो गृहीतः**। स केशेषु परामृष्टो बलेन बलिनां वरः (भा० वि० २२।५२)। **उक्तोऽर्थः**। न भीतो न परामृष्टो नापयातो न वर्जितः। नाशस्त्रोऽप्यवमन्तव्यः···(तन्त्रा० ३।१३)। **परामृष्टः=गृहीतः=गृह्यकः=बन्दिः**।

—**या (या प्रापणे, प्रापणमिह गतिः)**। परा याहि मघवन्ना च याहीन्द्र (ऋ० ३।५३।५)। **परायाहि=दूरं याहि=अपवाहयात्मानम्**। **प्रतियाहि, प्रतिनिवर्तस्वेत्याशयः**। परायात पितर आ च यात (अथर्व० १८।३।१४)। **परागच्छत=पराङ्मुखाः स्वस्थानं गच्छतेत्याह**।

—**वच् (वच परिभाषणे)**। परावाकाय ते नमः (अथर्व० ६।१३।२)। **परावाकः पराभववचनम्**।

—**वप् (डुवप बीजसन्ताने)**। ये निखाता ये परोप्ताः (अथर्व० १८। २।३४)। **परोप्ता दूरे परित्यक्ताः**। **परावपेर्निष्ठायां रूपम्**। **परावपिः परासने वर्तते**। याश्च ते हस्त इषवः परा ता भगवो वप (वा० सं० १६।६)। **परावप=पराक्षिप**। परा वा एष यज्ञं पशून्वपति योऽग्निमुद्वासयति (तै० सं० १।५।२।१)। यत्त्वा क्रुद्धः परोवप मन्युना यदवर्त्या (अग्ने) (तै० सं० १।५। ३।२)। **परोवप=परोवाप**। **उत्तमे णलि वृद्धिविकल्पः**। परा वा एषोऽग्निं वपति योऽप्सु भस्म प्रवेशयति (तै० सं० ५।२।२।५)। **उक्तोऽर्थः**। शूर्पेण धान्यं परावपति। **उत्फाल्य प्रक्षिपति परिपवितुकामः**।

—**वह् (वह प्रापणे)**। द्विषते तत् परावह शपते तत् परावह (अथर्व० १६।६।३)। **परावह=परागमय=पराणय**। अहीनां सर्वेषां विषं परावहन्तु सिन्धवः (अथर्व० १०।४।२०)। **प्रोह्य नयन्त्विवत्याह**। **अत्रार्थे दशतयीषु प्रवहेरपि प्रयोगो दृश्यते**—इदम् आपः प्रवहत यत्किञ्च दुरितं मयि (ऋ० १।२३।२२)।

—**वा (वा गतिगन्धनयोः)**। पराङ्त्यो वातु यद्रपः (ऋ० १०।१३७।२)। **परावातु=परावापयतु**। **वान्वातो मे पाप्मानं दूरं वहत्वित्याह**।

—**वृज् (वृजी वर्जने)**। परा पूर्वेषां सख्या वृणक्ति (ऋ० ६।४७।१७)। **परिवर्जयतीत्यर्थः**। परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः (ऋ० १।३३।५)। **शीर्षा शीर्षाणि शिरांसि परावृजुः पराङ्मुखानि चक्रुः**। **प्रहारपरिजिहीर्षया प्रदुद्रुवुरित्यर्थः**। त्वाष्ट्रस्य त्रीणि शीर्षा परावर्क् (ऋ० १०।८।६)। **चिच्छेदेत्याह**। मा न इन्द्र परावृणक् (ऋ० ८।८६।७)। **मा त्याक्षीः**। **कृच्छ्रगतान्नोऽसहायान्मा स्म हासीरित्याह**।

—**वृत्** (**वृतु वर्तने**)। अथौधः स परावृत्तः प्रतिकूलेन वायुना (कथा० ४६।१३९)। **परावृत्तः**=**प्रत्यावृत्तः**। परावृत्तं यौवनम्। (प्रबोध०)। **परावृत्तं गतम्**।

—**शस्** (**शसु हिंसायाम्**)। अवशसा निःशसा पराशसोपारिम। (अथर्व० ६।४५।२)। **पराशसा**=**पराङ्मुखहिंसनेन**। **उपारिमेति लिटच्युत्तमबहुवचने रूपम्**।

—**शृ** (**शृञ् हिंसायाम्**)। परा शृणीहि तपसा यातुधानान्पराऽग्ने रक्षो हरसा शृणीहि। परार्चिषा मूरदेवाञ् छृणीहि परासुतृपः शोशुचतः शृणीहि (अथर्व०८।३।१३)॥ **इह सर्वत्र पराशब्दो विशरणस्य हिंसनस्य कात्स्न्र्यमाह**। पराशृणीतमचितो न्योपतम् (ऋ० ७।१०४।१)। **उक्तोऽर्थः**। **पराशर इत्यृषिनामधेयम्**। **अत्रापि परेत्युपसर्गः**। **पराशृणातीति पराशरः**। **पचाद्यच्**। इन्द्रो वोऽद्य पराशरीत् (अथर्व० ३।६६।२)। **पराशरीदिति लुङि रूपम्**। **वृद्ध्यभावश्छान्दसः**।

—**श्वस्** (**श्वस प्राणने**)। त्वयि चाहं पराश्वस्तः (भा० द्रोण० ८४।३२)। **परमाश्वासं गत इत्याह**। त्वयि वत्से पराश्वस्य ब्राह्मणस्याभिराधनम् (भा० वन० ३०३।१४)। **परमाश्वासं विश्वासं कृत्वा**। **विस्रब्धं समर्प्येत्यर्थः**।

—**सञ्ज्** (**षञ्ज सङ्गे**)। परासक्ते (परासिक्ते ?) वस्तस्मिन् कथमासीन्मनस्तदा जीवितेऽप्यद्य...(भा० भीष्म० १४।५५)।

—**सिच्** (**षिच क्षरणे**)। यो हैनं तत्र ब्रूयात्परासिञ्चत त्वा अयमग्निहोत्रम् (श०ब्रा०१२।४।२।६) **अच्छर्दयदित्याह**। परा वा एष सिच्यते योऽबलोश्वमेधेन यजते (श० ब्रा०१३।१।६।३)। **परासिच्यते**=**परास्यते**=**पराभूयते**। परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते (अथर्व० ५।१९।६)। **परासिच्यते**=**सम्पदा हीयते**। **जीयते**=**क्षीयते**=**हीयते**। **ज्या वयोहानौ**। **यकि सम्प्रसारणं दीर्घश्च**। परासिक्तं विपुलं स्वं बलौघम् (भा० उ० ४८।२२)। **परासिक्तं दूरे क्षिप्तं निरस्तम्**। परासिक्तान्धार्तराष्ट्रांश्च विद्धि (भा० उ० २९।५०)। **निर्धूतान् सम्पदा हीनान् इति नीलकण्ठः**। मा परासेचि मत् पयः (आप० श्रौ० ४।४।१४।४)। **अत्र अच्छिद्रः प्रजया भूयासम् इति प्रथमश्चरणः**। **द्रवद्रव्यस्य कर्मत्वे सिचे र्मुख्या वृत्तिरन्यत्रोपचारोऽस्य**। **यथाऽऽपः परासिच्यन्ते पात्रावुद्धृत्य प्रवाह्यन्त एवं द्रव्यान्तराणि राजादीनि परासिच्यन्ते ऽपाक्रियन्ते**। **अत्रोदाहृतिषूपचारः सिचेः, मा परासेचि मत्पय इत्येकां वर्जयित्वा**। **अहो वाग्वैदग्धीविलासो वश्यवाचां प्राचां मन्त्रद्दशाम्**।

—सू (षू प्रेरणे)। विश्वानि देव सवितर्दुरितानि परासुव (ऋ० ५।८२।५, वा० सं० ३०।३)। **पराङ्मुखानि प्रेरय, इतो दूरमुत्सारयेत्याह।** आ ते प्राणं सुवामसि परा यक्ष्मं सुवामि ते (अथर्व० ७।५५।६)। **उत्क्रोडर्थः। सुवामसि**=सुवामः। **इदन्तो मसि** (७।१।४६) **इति मसो मसिः।**

—सृज् (सृज विसर्गे)। परासृजसि यद्वित्तं किञ्चित्त्वं बहु मूढवत् (भा० कर्ण० ३९।३)। **वृथा परित्यजसीत्याह।**

—स्कन्द्(स्कन्दिर् गतिशोषणयोः)। पराचित-परास्कन्द-परजात-परंधिता इत्यमरः। **परास्कन्दो भृत्यः।**

—हन् (हन हिंसागत्योः)। सत्येन सोमं पराहणानि (श० ब्रा० ३।९।४।१)। यत्ते (त्वा) शिक्वः परावधीत्तक्षा हस्तेन वास्या (अथर्व० १०।६।३, वै०सू०१०।३०, आप०श्रौ०७।२।८।९)। **परावधीत्**=**प्राहार्षीत्**=**अवातीतडत्।** यद्वोऽशुद्धाः पराजघ्नुः (वा० सं० १।१३)। **परा हतवन्तः**=**दूषितवन्तः।** तद्यदेवैषामत्राशुद्धस्तक्षा वाऽन्यो वाऽमेध्यः कश्चित् पराहन्ति (श० ब्रा० १।१।३।१२)। **दूषयति कलुषयतीत्याह।** नानवनिज्य हस्तौ पात्राणि पराहन्ति (आप० श्रौ० २।२।३।१५)। **संमार्ष्टीत्याह।** मीळ्हुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा (ऋ० ५।५६।३)। **पराहता**=**उत्कर्षिता**=**कृष्टा।** पराहतः शैल इवार्णवाम्बुभिः (कि० १४।१)। **पराहतः**=**अभिहतः।** पराहते पौरुषे धार्तराष्ट्रे (भा० द्रोण० २।२१)। **पराहते**=**न्यक्कृते**=**न्यग्भाविते।** कटाक्ष-पराहतं वदनपङ्कजम् (मालती० ७)। **कटाक्षप्रहृतम्**=**अपाङ्गावीक्षिताहतम्।** शुभाशुभप्रसरपराहताकृतौ...मनसि (यो० वा० ४।४२।५२)। **पराहता उपहता मलिनीकृताऽऽकृतिर्यस्य तस्मिन्मनसि। परस्परपराहतं वचः संकुलमुच्यते।** अमरश्चाप्याह—अथ संकुलक्लिष्टे परस्परपराहते।

—हृ (हृञ् हरणे)। तैश्चेत् (दक्षिणपाण्यादिभिरङ्गैः)। स्त्रियं परा-हरत्यनग्निरिव शिष्यते (गो० ब्रा० पू० २।४)। आ भद्रं द्वापरं भरमुत परा कलिम्। कृतं मे हस्त आहितम् (अथर्व०पि०१।४९।४)। **पराभरं**=**पराहरम्**=**पर्यहरम्।**

अप

—**अच्** (**अञ्चु गतिपूजनयोः**)। अपामित्रां अपाचितो अचेतः (**ऋ० ६।६७।५४**)। **अपाचेतः** (=**अप अच इतः**) **इतो ऽपगमयेत्यर्थः।**

—**अज्** (**अज गतिक्षेपणयोः**)। अप त्यं परिपन्थिनमज (**ऋ० १।४२।३**)। **त्यं परिपन्थिनं तं पर्यवस्थातारमपाज परागुदेत्याह। यद्ध वा अस्य किञ्चन** नश्यति यन्म्रियते यदपाजन्ति (ऐ० ब्रा० २५।२)। **अपाजन्ति गवादयोऽप-**

गच्छन्ति । अत्रापपूर्वोऽजिरकर्मकः । असिक्नीमेति रुशतीमपाजन् (ऋ० १०। ३।१) । **अपाजन्=अपगमयन् ।**

—**अञ्च्** (**अञ्चु गतिपूजनयोः**) । अपाञ्चौ त उभौ बाहू अपिनह्याम्यास्यम् (अथर्व० ७।७३।४) । **अपाञ्चौ पृष्ठभागसम्बद्धौ ।** अनपाचीनचित्तवृत्तिग्राहिण्यो हि भवन्ति प्रज्ञावतां प्रकृतयः (हर्ष०) । **अनपाचीना=अविपरीता ।**

—**अन्** (**अन प्राणने**) । अन्तश्चरति रोचनाऽस्य प्राणादपानती (ऋ० १०। १८९।२) । **अपानती=निष्क्रामन्ती । अव्यवहितपूर्वं प्राणादित्युक्तेरत्रानितिः क्रियासामान्यमाह ।**

—**अय्** (**अय गतौ**) । अत्र वो नृत्यतामिव तीव्रो रेणुरपायत (ऋ० १०।७२।६) । **उदतिष्ठत्=उदहन्यत ।**

—**अस्** (**असु क्षेपे**) । अभिमातीरपास्य (ऋ० ३।२४।१) । **अपास्येति लोण्मध्यमैकवचने रूपम् । दूरमपसारयेत्यर्थः ।** चीराण्यपास्याज्जनकस्य कन्या (रा० २।३८।६) । **अपास्यात्=अपास्येत्=जह्यात् ।** अपास्य फलकुद्दालं कुरुष्व वचनं मम (रा० २।३२।३०) । **अपास्य=अनादृत्य=उपेक्ष्य ।** सारं ततो ग्राह्यमपास्य फल्गु (पञ्चत०) । **उक्तोऽर्थः ।** यदि समरमपास्य नास्ति मृत्योर्भयम् (वेणी० ३।५) । **अपास्य=परिहृत्य ।** अपास्य मातृशुश्रूषामनर्थे सोऽवतिष्ठताम् (रा० २।७५।४८) । **उक्तोऽर्थः ।** इत्यादीनामपि काव्यलक्षणत्वमपास्तम् (सा० द०) । **निराकृतं प्रत्युदितमित्यर्थः ।**

—**अस** (**अस भुवि**) । अभागः सन्नप परेतो अस्मि (ऋ० १०।८३।५) । **अपास्मि=दूरे भवामि=न संनिदधे ।**

—**इ** (**इण् गतौ**) । अथास्य बह्वपैति लोमानि त्वगसृक्कुष्ठिकाः (ऐ० ब्रा० २।११) । **अपैति=पृथग्भवति ।** स्वपिमि तावदहं किमपैति ते (का० सु० वृ० ३।२।१२) । **किं ते छिद्यत इत्याह ।** अपेतो यन्तु पणयोऽसुम्ना देवपीयवः (वा० सं० ३५।१) । **इतोऽपयन्तु=अस्मात्प्रदेशादपसर्पन्तु ।** इहैवास्त माऽपगात (वा० सं० ३।२१) । अपागादग्नेरग्नित्वम् (छां० उ० ६।४।१) अपेत वीत वि च सर्पत (ऋ० १०।१४।९) । **अपेत=अपयात ।** अपात इत पणयो वरीयः (ऋ० १०।१०८।१०) । **इतोऽपेतेत्याह ।** लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् (रा० २।११२।८) । सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते (शा० ७।२४) । **अपैतु=व्येतु ।** उपयन्नपयन्धर्मो विकरोति हि धर्मिणम् (न्यायः) । एवं कृतमिदं कार्यमनपायं भविष्यति (रा० ३।४४।१९) । **अनपायम्=अपायरहितम् । अपायो नाशः ।** उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत् (हितोप०) । **अपायो हानिः ।** यत्र धारा

अनपेता मधोर्घृतस्य च याः (वा० सं० १८।६५)। **अनपेता अनुपक्षीणा निरन्तरा अनपगमा अनुपदस्ता उपभुज्यमाना अपीत्यर्थः।**

—ईक्ष् (ईक्ष दर्शने)। स्वर्यन्तो नापेक्षन्ते (शा० ब्रा० ६।२।३।२७)। **इतस्ततो नेक्षन्ते इत्याह। अविवक्षितकर्मा ईक्षतिरिहाकर्मकः।** अनपेक्षमाणो ऽरण्यमभिप्रेयात् (श०ब्रा० १३।६।१।२०)। **उक्तोऽर्थः।** सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते (शा०)। **प्रतीक्षत इत्याह।** न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते (हित०)। पादेन नापैक्षत सुरसुन्दरीणां सम्पर्कमाशिञ्जितनूपुरेण (कु० ३।२६)। **उक्तोऽर्थः।** शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते (शिशु० २।८६)। **द्वयेनार्थी भवतीत्याह।** यतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते (सा० द०)। **अर्थान्तरसाकाङ्क्षं भवतीत्यर्थः।** अपेक्षते प्रत्ययमुत्तमं त्वाम् (कु० ३।१८)। **प्रत्ययः कारणम्। अपेक्षते आकाङ्क्षति। त्वदायत्तं भवति, त्वद्दत्ते तस्य दुर्निर्वहत्वात्।** प्रभुता रमणेषु योषितां नहि भावस्खलितान्यपेक्षते (विक्रम० ४।१२)। न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते (मुद्रा० १।३)। **वप्तृगुणाधीना न भवतीत्याह।** किमपेक्ष्य पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः (कि० २।२१)। **किमपेक्ष्य=किमुद्दिश्य।** स (विष्णुः) हि निर्व्याजभक्तानां नैवापदमपेक्षते (कथा० १७।१२)। **द्रष्टुं न सहत इत्यर्थः।** अपेक्षन्ते हि विपदः किं पेलवमपेलवम् (कथा०)। **गणयन्ति, आद्रियन्त इत्याह।** एतां दिशमनवानन्त्सृत्वा कुम्भं प्रक्षीयानपेक्षमाण एहि (श० ब्रा० १३।८।३।४)। **अनपेक्षमाणः पृष्ठतोऽनालोकयन्।** तदानपेक्ष्य स्वशरीरमार्दवम् (कु० ५।१५)। **अनपेक्ष्य=अगणयित्वा=अनादृत्य=उपेक्ष्य।** नूनमस्यायमनपेक्षितास्मदवस्थो व्यापारः (मालती०६)। उदयापेक्षिणी पत्युः (कथा० १६।८६)। **उदयापेक्षिणी उदयप्रतीक्षा।** दैवेष्वपेक्षका ह्येते शश्वद् भावेषु भारत (भा० उ० ६१।७)। **अपेक्षावन्तः, आदरवन्त इत्याह।** अनपेक्षमेत्याप उपस्पृशन्ति (श० ब्रा० १२।५।२।१५)। **अनपेक्षमिति पृष्ठतो ऽनालोक्येत्याह। एत्य=आगत्य।** अवधिष्म रक्षः (वा० सं० ६।३६) इत्यायन्त्यनपेक्षम् (का० श्रौ० १५।२।८)। **उक्तोऽर्थः। सूत्रग्रन्थेष्वत्रार्थे प्रतिर्बहुलं प्रयुज्यते।** मय्यपेक्षा न कर्तव्या कथंचिदपि सात्वत (भा० द्रोण० ८४।३३)। **अपेक्षाऽनुरोध इति नीलकण्ठः।**

—उच्छ् (उच्छी विवासे)। सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपोच्छतु (अथर्व० ६।८३।१)। **अपोच्छतु=अपवासयतु=अपवर्जयतु।** उपो यस्माद् दुःष्वप्न्यादभैष्माप तदुच्छतु (अथर्व० १६।६।२)। **अपोच्छतु=अपैतु।** वीरुत्क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु (अथर्व० २।८।२)। **अपोच्छतु=अपगमयतु। इहोच्छिः सकर्मकः।** अप वास उषसामप क्षेत्रियमुच्छतु (अथर्व० ३।७।७)।

अपोच्छतु = शाम्यतु । अपास्मत्तम उच्छतु (अथर्व० १४।२।४८) । **वैभातिकेन प्रकाशेन निरस्तमस्त्वित्याह** ।

—**ऊर्णु** (**ऊर्णुञ् आच्छादने**) । अप त्वान्तमूर्णुहि (ऋ० १०।७३।११) । **प्रकाशय** । **तमोऽपधानमपनयेत्याह** । **अपशब्दो धात्वर्थं विपरीतयति** । अपोर्णुते दीक्षितः शिरः (का० श्रौ० ७।८।२५) । **अनावृतं करोति शीर्षमित्याह** । अपोर्णुते वक्ष उस्रेव वर्जहम् (ऋ० १।९२।४) । **उक्तोऽर्थः** । न पुरा सोमस्य क्रयादपोर्णीत (आप० श्रौ० १०।३।९।२६) । **अपोर्णीत = अपोर्णुवीत = उद्घाटयेत्** ।

—**ऊह्** (**ऊह वितर्के**)। अपाप शक्रस्ततनुष्टिमूहति (ऋ०५।३४।३) । **अत्रापशब्दस्य निपातस्य द्विरुक्तिः** । **द्वितीयोपशब्द आम्रेडितम्** । **स च सर्वानुदात्तः** । **अपोहति = दूरं करोति** । पादेन फलीकरणानपोहति (कौ० सू०) । वाजस्यनं प्रसवेनापोहामि (वा० सं० २।१५) । एतैर्व्रतैरपोहेयुर्महापातकिनो मलम् (मनु० ११।१०७) । इति मनसि यः काव्यारम्भे कवेर्भवति श्रमः । सनयनजलो रोमोद्भेदस्तमपोहति (पाद० श्लो० ३) ॥ **उक्तोऽर्थः** । अपैतदूह यदिहाबिभः पुरा (अथर्व० १८।२।५७) । **अपोह = परित्यज = परिहर = जहाहि** । स हि विघ्नानपोहति (शा०३।२)। **अपाकरोतीत्याह** । कुसुमानि···प्रभवन्त्यायुरपोहितुं यदि (रघु० ८।४४) । **अपोहितुम् = क्षपयितुम्** । पूर्वमुत्सवमपौहदुत्सवः (उत्तरः) (रघु०१९।५)। **स्वस्मात्स्थानात्प्राच्यावयदित्यर्थः** । अकिंचिदपि कुर्वाणः सौरूयैर्दुःखान्यपोहति (उत्तर० २।२९) । **अपोहति = अपाकरोति** । सर्वान्रसानपोहेत कृतान्नं तु तिलैः सह (मनु०१०।८६) । **अपोहेत = त्यजेत्** । **विक्रये वर्जयेदित्यर्थः** । किं व्याप्तं किमपोहितम् (प्र० च०) । **अपोहितम् = व्यावर्तितम्** । आरण्यैः स्थण्डिलं प्रतार्यापोह्याङ्गारान् (गो०गृ०४।८।१२)। **अपोह्य = अपनीय = दूरीकृत्य** । इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः (भा०अनु०१४५।४३) । **अपोहः = पूर्वपक्षोऽपरतर्कनिरासाय कृतो विपरीतस्तर्क इति च । ऊहः सिद्धान्त इति नीलकण्ठः** । पञ्चवट्यां ततो रामः···अनपोढस्थितिः तस्थौ (रघु० १२।३१) । **अपरित्यक्तमर्याद इत्याह** । **अर्थान्वयवशादपोढमिति ऊहतेर्निष्ठायां रूपमिति शक्यमास्थातुम्** । **इडभावस्तु दुःसमाधानः** ।

= **ऋ** (**ऋ गतिप्रापणयोः**) । अप द्वारा मतीनां प्रत्ना **ऋण्वन्ति** कारवः (ऋ० ९।१०।६) । अपऋण्वन्ति = **विवृण्वन्ति** ।

—**एज्** (**एजृ कम्पने, एजृ दीप्तौ**) । अपो अपाचीरपरा अपेजसे (ऋ० ५।४८।२) । अपेजसे = पृष्ठतो गमयसि ।

—**कल्** (**कल क्षेपे**)। काकोऽपकालयितव्यो भवति (नि० ३।१८।६) । **परानोद्यो भवतीत्यर्थः** । **उपघातभयादिति शेषः** ।

—**कष्** (**कष हिंसायाम्**)। अपपूर्वस्य कषेराथर्वणे प्रयोगः—यजुर्यस्माद-पाकषन् (अथर्व० १०।७।२०)। **अपातक्ष्णुवन्, निरकृन्तन्**।

—**कित्** (**कित निवासे रोगापनयने च**)। ततो नापचिकित्सति (अथर्व० १३।२।१५)। नापचिकित्सति=प्रमदितुं नेच्छति।

—**कृ** (**डुकृञ् करणे**)। चतुर्थोपायसाध्ये तु शत्रौ सान्त्वमपक्रिया (शिशु०२।५४)। **अपक्रिया दोषो दुर्नयः**। ऋणविगणनेपि यथा याज्ञवल्क्यस्मृतौ (३।२३४)। —**ऋणानां चानपक्रिया**। **मानवे धर्मशास्त्रे** (११।६५) **च**—अनाहिताग्निता स्तेयमृणानामनपक्रिया इति। योऽपचक्रे वनात् सीताम् (भट्टि०८।२०)। **वनमुपगम्य सीतामवाक्षिपत् अभ्यभूदिति जयमङ्गला**। **अपहरणेनापाकरोद् अपाराध्नोदिति तु शब्दमर्यादया लभ्योऽर्थः**। दण्डमर्हन्ति दुष्यन्ति दुष्टाश्चाप्यपकुर्वते (भा०वन०२८।१५)। **अपकुर्वते**=क्षिण्वन्ति, **परार्थं हिंसन्ति**। नगरे वा पुरि वापि यदि नापकरोम्यहम् (रा०४।१६।१९)। **अनिष्टमाचरामीत्याह**। किं च राक्षसराजस्य रामेणापकृतं पुरा (रा० ५।८०।१३)। **उक्तोऽर्थः**। न पश्यामोऽनपकृतं धनं किञ्चित्क्वचिद्वयम्। (भा०शां०८।३०)। **अपकृतमपकारः, तद्रहितम्। परार्थहानिपुरस्कारेणैव महतोऽर्थौघस्य समुपार्जनं शक्यक्रियमित्याह**। दत्तस्यानपकर्म (मनु० ८।४)। **धनस्य दत्तस्य क्रोधादिनाऽपात्रबुद्ध्या वा ग्रहणमपकर्म अपक्रिया, तदभावोऽनपक्रिया**। अपस्करमधिष्ठाने (भा०कर्ण०३४।२२)। **अपस्करः पश्चात्काष्ठम्**।

—**कृत्** (**कृती छेदने**)। प्राणापानावपकृन्तामि (कौ० सू० ४४)। **अपच्छिनद्मि**।

—**कृष्** (**कृष विलेखने**)। कच्चिदर्थेषु सप्रौढान् हितकामाननुप्रियान्। नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषम् (भा० सभा० ५।७३)। **अपकर्षसि**=**पृथक् करोषि**। यदा च शोचतः शोको व्यसनं नापकर्षति (भा०वन०२४९।३७) **अपकर्षति**=**अपनयति**=**अपाकरोति**। धैर्यं शोकोऽपकर्षति (रा० ५।७१।५)। एष रोगान्योगोऽपकर्षति (सुश्रुते २।१३२।५)। **उक्तोऽर्थः**। अपकर्षेदेवं यावत् पञ्चदश (सुश्रुते०१।४०।८)। **अपकर्षेत्**=**न्यूनीकुर्यात्**। विदित्वाप्यपकर्षेयं शक्यं चेदपकर्षितुम् (भे० आदि० १६०।१) **उक्तोऽर्थः**। ततस्ततः शरैर्द्रोणमपाकर्षत पार्षतः (भा० द्रोण० ९५।१९)। **व्यावर्ततत्रानित्यर्थः**। अष्टावक्रं पितुरङ्के निषण्णमपाकर्षद् गृह्य पाणौ (भा० वन० १३२।१८)। **आकृष्य पृथगकरोत्, उत्सङ्गाद् बलादवारोपयदित्यर्थः**। अपाकर्षद् वैदेह्याः सकाशाद् राक्षसेश्वरम् (रा० ६।७२।६८) **उक्तोऽर्थः**। तस्य मौर्वीमपाकर्षच्छूरः संक्रन्दनो युधि (भा० वि० ५।२५)। **अवातारयदित्यर्थः**। यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्। बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति (भा० सभा०

८१।८, उ० ३४।८१)। **अपकर्षन्ति=विनाशयन्ति**। अपाकर्षत्स्वकं देहं नियमैर्मानसप्रियैः (भा०द्रोण०५४।२६)। **अपाकर्षत्=अकर्शयत्**। पीड्यन्भृत्यवर्गं हि आत्मानमपकर्षति (भा० अनु० ३७।३)। **आत्मानं पातयति, मानाद् भ्रंशयतीत्याह**। आत्मज्ञानं समारम्भस्तितिक्षा धर्मनित्यता। यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते (भा० उ० ३३।१५)॥ **नापकर्षन्ति=पृथङ् न कुर्वन्ति न भ्रंशयन्ति**। श्रियं ददाति कस्मैचित्कस्माच्चिदपकर्षति (भा०शां०६८।४७)। **अपकर्षति=अपहरति**। वेदनां नापकर्षन्ति यतमानाश्चिकित्सकाः (भा० शां० ३३१।३०)। **अपकर्षन्ति लघयन्ति, न्यूनी कुर्वन्ति**। स पश्यति बुद्ध्या आत्मांश्चापकृष्यमाणान्यग्रोधांश्चोपधीयमानान् (स्थानिवत्सूत्रे भाष्ये)। **अपकृष्यमाणान्=अपनीयमानान्**। अग्रिमसूत्रस्थं सर्वत्रग्रहणमिहापकृष्यते (४।१।१७ सूत्रवृत्तौ)। **अपकृष्यते=पृष्ठत आकृष्यते**। काव्यात्मभूतं रसमपकर्षयन्तः (सा० द० ७।२१)। **अपकृष्टं कुर्वन्त इत्याह**। सर्वस्वमपकृष्टं च तथा धर्मेण बालिश (भा० द्रोण० १९८।४१)। **अपकृष्टमपहृतमाच्छिन्नम्**। आनायिभिरतामपकृष्टनक्राम् (रघु० १६।५५)। **अपनीतग्राहामित्याह**। चारित्रेण महाबाहुरपकृष्टः स लक्ष्मणः (रा० ४।३३।२७)। **अपकृष्टः=पृष्ठत आकृष्टः=प्रतिषिद्धः**। **अन्तःपुरप्रवेशाद् वारित इत्यर्थः**। अपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा (भा० आदि० १।१६६।३)। **अपकृष्टाम्बराम्=स्रस्तदस्त्राम्**। अपकृष्य च लज्जां सा स्वयमुक्तवती नृप (भा० वन० ६९।३३)। **अपकृष्य=पृष्ठतः कृत्य=अपास्य**। दन्ताग्रभिन्नमपकृष्य निरीक्षते च (ऋतु० ४।१३)। **पृष्ठत आकृष्य इत्याह**। अथ व्युष्टायां जघनार्धादात्मानमपकृष्य तीर्थं गत्वा ···(बौ० ध० ३।४।४।७)। न क्त्वा सेडिति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः (१।२।७ सूत्रवृत्तौ) **अपकर्षः=अपनयः=दूरीकरणम्**। भ्राष्ट्रापकर्षमपूपान् भक्षयति। **भ्राष्ट्रापकर्षमिति णमुलन्तम्**। **अपादाने परीप्सायाम्** (१।४।५२) **इति सूत्रोदाहरणम्**। **भाष्ट्रादपकृष्य भ्राष्ट्रादपकर्षणसमनन्तरमेव भुङ्क्त इत्याह**। सशल्यः क्लिश्यते प्राणैर्विशल्यो विनशिष्यति। इति मामाविशच्चिन्ता तस्य शल्यापकर्षणे (रा० २।६३।४६-४७)॥ **शल्यापकर्षणे शल्योद्धरणे**। एवकारः कर्तुरपकर्षणार्थः (३।४।७० सूत्रवृत्तौ)। **अपकर्षणाय निवृत्त्यर्थः**। न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम् (सुश्रुते २।१३९।८ **अकर्षणं न्यूनीकरणम्**। सर्वं दैवापकृष्टं मन्यते युधिष्ठिरः (वेणी० ५)। **अपकृष्टम्=आकृष्टम्**। अपकृष्टश्चाणक्याच्चन्द्रगुप्तः (मुद्रा० ४)। **अपरागमापित इत्याह**। न पोऽपकृष्टः सचिवात् (मुद्रा०४।१४)। **उत्कोऽर्थः**। न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते (शा०५।१०)। पतिं हित्वाऽपकृष्टं स्वमुत्कृष्टं या निषेवते (मनु० ५।१६३)। **निगदव्याख्यातम्**। तं दृष्ट्वा प्रमुदितैरश्वैरपकृष्टं

रणाजिरात् (भा० द्रोण० २००।२८)। **अपकृष्टमपोढम्, निर्यापितम्**। सर्वस्वमपकृष्टं च (भा० द्रोण० १९८।४१)। **आच्छिन्नं हृतमित्याह**। चेतसा त्वपकृष्टेन मां त्यजेथा महीपते (भा० वन० ६१।३३)। **चेतः=प्रतिसन्धानम्**। **अपकृष्टम्=हृतम्** (**कलिनेति शेषः**) अपकृष्टो महाबाहुर्नागराजस्य कन्यया (उलूप्या)। अन्तर्जले महाराज···(भा० आदि० २१४।१३)॥ **अपकृष्टो। ऽपनीतः**।

—**चर्** (**चर गतिभक्षणयोः**)। यो यस्तेषामपचरेत्तमाचक्षीत वै द्विजः (भा० शां० २६७।८)। **तेषामपचरेत् तेषां मध्ये द्विजवचनमतिक्रामेत्**। तदङ्गनास्वपाचरन्नरेन्द्रः (दशकु०१६२)। **अपाचरत् प्राकुरुत, अदूषयत्**। क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वा (कौ० अ० १५।१।१८०)। आहोस्वित्प्रसवो ममापचरितैर्विष्टम्भितो वीरुधाम् (शा० ५।६)। **अपचरितमपराधः, व्यतिक्रमः**। राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते (रघु० १५।४७)। **अपचारो दुर्वृत्तं दुर्व्यवहारः**। शिष्यो गुरावि व कृतप्रथमापचारः (महावीर० ४।२०)। **अपचारो-ऽपराधः**। न राजापचारमन्तरेण प्रजास्वकालमृत्युश्चरति (उत्तर० २)। **उक्तोऽर्थः**। प्रतिषिद्धवाङ्मनसापचारे (गौ० ध० ३।७।८)। **अपचारः कुत्सिता प्रवृत्तिः**। त्वद्गतमपचारं सुहृदो मे वर्णयन्ति (तन्त्रा० १।३)। **अपचारं कदाचारम्**। महाध्वरे विध्यपचारदोषः (कि० १६।४८)। **विध्यपचारदोषः कर्मस्खलनदोषः**। नापचारमगमन् क्वचित्क्रियाः (शिशु० १४।३२)। **अपचारो व्यृद्धिः, वैकल्यम्**। कृतापचारोपि परैरनाविष्कृतविक्रियः। असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा (शिशु० २।८४)॥ **अपचारोऽपथ्यम्, अपकारश्च**। पदार्थानामनपचारो यथाप्राप्तकरणमभ्रेषः (३।३।३७ सूत्रे वृत्तौ)। प्रोऽयं दृष्टापचार आदिकर्मणि वर्तते (१।३।१ सूत्रे भाष्ये)। **अपचारो व्यभिचारः**।

—**चाय्** (**चायृ पूजानिशामनयोः**)। गुरु वृद्धापचायिनः (भा०अनु०१४५।२३)। **हीनत्वसम्पादका इति नीलकण्ठः**। **अत्रापशब्दो नञर्थे**। **विरलतमोऽयं चायधातुसहचरितस्यापोपसर्गस्य प्रयोगः**। **पूजार्थे त्वस्य प्रसिद्धिः**—अपचिकीहि (अथर्व० १।१०।४)। **इत्यत्र यथा**। **अपचिकीहीति यङ्लुकि लोण्मध्यमैकवचने रूपम्**। तत्र चायः की (६।१। २१) **इत्यनेन चायः 'की' इत्यादेशः**। नैवोपयान्त्यपचितिं कवयस्तवेश (भा० पु० १०।७७।३७)। **अपचितिं निष्कृतिम्**।

—**चि** (**चिञ् चयने**)। प्रकृतिः सूयते तद्वदानन्त्यान्नापचीयते (भा०)। **न हीयते न क्षीयत इत्याह**। राजहंस तव सैव शुभ्रता चीयते नापचीयते (का० प्र० १०)। **नापचीयते=नाल्पी भवति**। वैचित्र्योपचयादुच्चैरौचित्यमपचीयते (शि० भा० १६।३४)। **अपकर्षमाप्नोति=ह्रसति**। तेभ्यः कुमारोपि यदूनां नापचीयते (वि० पु० ५।३७।२६)। **नापचीयते=अपकृष्टो न भवति**। अप-

चितमपि गात्रं व्यायतत्वादलक्ष्यम् (शा० २।४)। एष ते विहितो राजन्धात्रा धर्मः सनातनः। तस्मादपचितः पार्थ लोके हास्यं गमिष्यसि (भा० वन० ३३। ५६)॥ **अपचितो हीनः**। अपचितां लोहिनीनाम् (सुश्रुते)। **गलादारभ्याधस्तात् कक्षादिसन्धिस्थानेषु प्रसृता गण्डमाला**। अगणितपरिखेदा याति षण्णां सुतानाम्। अपचयगमनार्थं सप्तमं रक्षमाणा (बाल० १।१०)। अहो दुःखमिति ध्यायन्दुःखस्यापचितिं चरेत् (भा० शां० २५।१७)। **अपचितिं प्रतीकारम्**। करिष्यति महाभागे ध्रुवं चापचितिं मम (भा० शल्य० ६४।३६)। **उत्कोऽर्थः**। अविन्देथामपचितिं वधत्रैः (ऋ० ४।२८।४)। **अपचितिं वैरनिर्यातनम्**। न वैनतेयो गरुडः प्रशंसति महाजनम्। दृष्ट्वा सुपर्णोऽपचितिं महत्या अपि भारत (भा० भीष्म० ३।८४) **अपचितिं नाशम्**। भवेदपचितिः पूजाव्ययनिष्कृतिहानिष्विति मेदिनी। मम लुब्धस्य पापस्य तथा धर्मापचायिनः (भा० द्रोण० १५०।१८)। **धर्मापचायिनः = धर्मक्षेपकस्य**।

—**चित्** (**चिती संज्ञाने**)। नेत्त्वदपचेतयातै (वा० सं० २।१७)। **त्वत्तः सकाशाद् वियुक्तः सन्नेष परिधिर्मास्मान् विगतचेतस्कान् करोतु** (उवटः)। **त्वत्तोऽपगन्तुं मा जानातु। त्वदपगतचित्तो मास्तु इत्यर्थ इति महीधरः**।

—**च्यु** (**च्युङ् गतौ**)। इहैवैधि माप च्योष्ठाः (ऋ० १०।१७३।२)। **मा नो हासीरित्याह। अस्मान्हित्वा मान्यत्र यासीरित्यभिप्रेतं मन्त्रकृतः**।

—**छद्** (**छद अपवारणे**)। आप० श्रौ० १।२।८।२४ इत्यत्रैष प्रयोगो दृश्यते—पुत्रमिवैनमनुकाङ्क्षन् सर्वधर्मेष्वनपच्छादयमानः। **अपच्छादिरत्र पिधानस्यापाकरणे वर्तते। अनपच्छादयमानः किञ्चिदप्यगूहमानः**।

—**छिद्** (**छिदिर् द्वैधीकरणे**)। स यं प्रथमं शकलमपच्छिनत्ति (श० ब्रा० ३।६।४।११)। **अपच्छिनत्ति = छित्त्वा पृथक् करोति**। दर्ब्भिरपूपस्य नापच्छिन्द्यात् (आप० ध० १५।१६।१७)। **उत्कोऽर्थः**। दर्ब्भिर्दर्शनैः। आजरसं हास्मै वाजिनं नापच्छिद्यते (ऐ० ब्रा० १।१४)। **अपच्छेदो निवृत्तिः**। संयुक्तस्य हि पृथग्भावोऽपच्छेदः (मी० ६।५।५० सूत्रे शा० भा०)।

—**जन्** (**जनी प्रादुर्भावे**)। **अपजातः** (**पुत्रः**) **पितृभ्यां गुणैरपकृष्टः**। जातः पुत्रोऽनुजातश्च अतिजातस्तथैव च। अपजातश्च लोकेस्मिञ्ज्ञेयं पुत्रचतुष्टयम्॥ मातृतुल्यगुणो जातस्त्वनुजातः पितुः समः। अतिजातोधिकस्तस्माद् अपजातोऽधमाधमः॥

—**जि** (**जि जये, जि अभिभवे**)। अप ह वै स्नात्वा भिक्षां जयति (श० ब्रा० ११।३।३।७)। **अपजयति = पराजयते = हारयति**। येन मृत्युमपजयति (श० ब्रा०)। चौरहृतमपजित्य यथास्थानं गमयेत् (गौ० ध० २।१।४६)। **जयेना-**

भिभवेनापहृत्येत्याह। आजिपथे वा कुटिं कृत्वा ब्राह्मणगव्योऽपजिगीषमाणो वसेत् (आप० ध० १।६।२४।२१)। **वस्त्वनपजित्य प्रत्याहर्तुमिच्छन् इत्यर्थः**। ब्राह्मणगव्यः=ब्राह्मणगवीः। वादिनोऽपजयहेतुर्निग्रहस्थानम् (त०सं० दी०)। **अपजयः=पराजयः**।

—ज्ञा (ज्ञा अवबोधने)। आत्मानमपजानानः शशमात्रोऽनयद् दिनम् (भट्टि० ८।२६)। अपजानानः=गूहमानः, **स्वरूपमाच्छादयमानः**। शतं मे धारयसि, यदि न सहसे दातुं मा दाः, अपजानीषे किम् (वा० मु०)। **अपजानीषेऽपलपसि, अपह्नुषे**।

—तक्ष् (तक्षू त्वक्षू तनूकरणे)। तेजो ह वा एतद् वनस्पतीनां **यद्बाह्यशकलस्तस्माद्यदा बाह्यशकलमपतक्ष्णुवन्त्यथ शुष्यन्ति** (श० ब्रा० ३।७।१।८)। **अपतक्ष्णुवन्ति=तक्षणेन पृथक् कुर्वन्ति**।

—तृप् (तृप तृप्तौ, तृप प्रीणने)। स्थूलमेदस्विनमपतर्पयामः (चरके सूत्र० १०।६)। **उपवासमनशनं कारयाम इत्याह। प्यन्तकस्तर्पिरुपवासने रूढः। अपशब्दोत्र धात्वर्थं विपर्यासयति। साम्रेडं चाहुरत्र भिषजः—अजीर्णे भोजनं विषमित्ययमपतर्पयितव्यः**। अपतन्त्रकातुरं नापतर्पयेत् (सुश्रुते २।४२।१)।

—त्रप् (त्रपूष् लज्जायाम्)। नापत्रपेत प्रश्नेषु नाविभाव्यां गिरं सृजेत् (भा० शां० ९३।१०)। **न्यायनिष्ठुरमुत्तरं दद्यादित्यर्थं इति नीलकण्ठः**। येनापत्रपते साधुरसाधुस्तेन तुष्यति (भा० वन० २।६४)। य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत (भा०उ०३३।१२१)। तेऽपत्रपन्ति तादृग्भ्यस्तादृग्वृत्ता भवन्ति च (भा० शां०२६७।२३)। क्रूरेण नापत्रपसे कथं शक्रेह कर्मणा (भा० उ० ९।३४)। **आसु सर्वत्रोदाहृतिष्वपशब्देन नार्थः कश्चिदुपजन्यते। लज्जा साऽपत्रपान्यत इत्यमरोक्तिरपि सापवादा, इहैव य आत्मनाऽपत्रपत इत्युक्तेः**।

—त्रस् (त्रसी उद्वेगे)। अप स्म मत् तरसन्ती न भुज्युस्ता अत्रसन् रथम्पृथी नाश्वाः (ऋ० १०।९५।८)। **अपात्रसन्=भयाद् व्यद्रवन्**। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः (२।१।३८)। **अत्र पाणिनीये तरङ्गापत्रस्त इत्युदाहरणम्। उद्विज्यापगत इत्यर्थः**।

—दस् (दसु उपक्षये)। नादस्यन्ति धेनवः (ऋ०१।१३५।८)। **चोराद्यपहारप्रवीणा न भवन्ति इति सायणः। अपशब्देन नात्र विशेषः कश्चिदुपधीयते। केवलस्य धातोर्दुर्लभः प्रयोग इत्येव द्योत्यते**।

—दिश् (दिश अतिसर्जने)। यदि मां रत्नागतित्वेनापदेक्ष्यसि तदा महाननर्थः। मिथ्या **मन्नाम निर्देक्ष्यसि इति विवक्षा**। तावेतौ भोगापवर्गौ बुद्धिकृतौ

बुद्धावेव प्रवर्तमानौ कथं पुरुषेऽपदिश्येते (यो० सू० २।१८ भाष्ये) । **व्यवह्रियेते इत्याह** । विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् (शिशु०२।५६) । **आरोपेणोच्यताम्** । अपदेशो मे जनकान्नोत्पत्तिर्वसुधातलात् (रा०१।११६।१६) । **अपदेशो गोत्रनिर्देशः** । केनापदेशेन पुनराश्रमं गच्छामः (शा० २) । **अपदेशो व्याजः** । रक्षापदेशान्मुनिहोमधेनोः (रघु०२।४)। **उक्तोऽर्थः** । हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् । **हेत्वपदेशः=हेतूपन्यासः** । नैष न्यायो वेशकुलस्य यद् दातुरपदेशः (मृच्छ०)। **अपदेशः प्रख्यापनम्** । पदे लक्ष्ये निमित्तेऽपदेश इत्यमरः । **पदं स्थानम्** । त्यक्तापदेशो यतिरित्यमरोद्घाटने स्वामी । अहोरात्रापदेशे गताः संवत्सरा दश (रा० १।६३।११) । **अहोरात्रतुल्यमित्यर्थः** । देहं त्यक्त्वाऽपदेशान्ते परे परिणति गतः (यो० वा०६ (२)।१५८।४) । **अपदेशो दैवैर्विहितो** नियतो जीवनकालः) **इति टीका** । रहसि भर्त्रा मद्गोत्रापदिष्टा (दशकु० १०२) । मन्नाम्ना सम्बोधितेत्याह । एकस्मिन्नप्याद्यन्तापदिष्टानि कार्याणि भविष्यन्ति (१।१।२१ सूत्रे भाष्ये) । **अपदिष्टानि=उपदिष्टानि=विहितानि** । प्रपदिश्यापदेश्यं च पुनर्यस्त्वपधावति (मनु०८।५४) । **कथनीयमुपन्यसनीयं कथयित्वा यस्त्वपसरति, अन्यथा भाषत इत्यर्थः** । मित्रकृत्यमपदिश्य (रघु० १६।३१) । **मित्रकृत्यं निमित्तं मिथ्योदाहृत्येत्याह** । शिरःशूलस्पर्शमपदिशन् (दशकु० ५६) । **उक्तोऽर्थः** । कृत्वर्थमपदिश्यान्यस्मै (का० श्रौ० ७।२।७) । **इहोपदिशिरपदिशिना संकीर्यते** । **सोऽयं व्यवहारानुगः सङ्करो न व्यवहारातिगः, बहुलं दृष्टेः** ।

—**दृ** (**दृ विदारणे**) । अप दृळ्हानि दर्द्रत् (ऋ० ६।१७।५) । **भृशं दारयमाण इत्याह** । **अपशब्दो दारणं विशिनष्टि** ।

—**दै** (**दैप् शोधने**) । अपदानान्युदाहृत्य (रा० २।६५।४) । **विक्रान्तान्युदात्तानि वा पूर्वकर्माणि** ।

—**द्रा** (**द्रा कुत्सायां गतौ**) । हायनोप द्राह्यवीरहा (अथर्व० ६।१४।३) । **अपक्रम्य कुत्सितां गतिं गच्छेत्याह** । सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः (ऋ० १०।८५।३२) । **अपद्रान्तु=अपद्राणा भवन्तु, विद्रवन्त्वित्याह** ।

—**द्रु** (**गतौ**) । परावृत्तमपावृत्तमपद्रुतमवप्लवम् । (रा० ६।४०।२५) । **प्रवणीकृतकायस्य या विद्रुतिस्तदपद्रुतम्** ।

—**धा** (**डुधाञ् धारणपोषणयोः**) । अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद् दधातु (ऋ० १०।१६४।३) । **अपदधातु=दूरे दधातु=अपनयतु=अपाकरोतु** । महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः (ऋ० ६।२०।५) **अपधायि=अपाधायि** । यो गा उदाजदपधा वलस्य (ऋ०

२।१२।३)। **अपधा=अपधायाः=पिधानात्। अपधा तिरस्कृतस्तिरोहितः परिहितो वा प्रदेशः।**

—**धाव्** (**धावु गतिशुद्ध्योः**)। अप धावतामर्त्या मर्त्यान्मा सचध्वम् (अथर्व०४।३७।१२)। **अपधावत त्वरितं दूरं गच्छतेत्यर्थः। अपशब्दो विप्रकर्षवचनः।** यथा ह वै हन्यमानामपधावेद् एवमेषोऽभिषूयमाणानां स्कन्दति, तथा ह तस्य नैव धावन्नपधावन् शिष्यते (श० ब्रा० ४।१।१।२६)। **उक्तोऽर्थः।**

—**ध्मा** (**ध्मा शब्दाग्निसंयोगयोः**)। अपाधमदभिशस्तीः (ऋ० ८।७८।२)। आध्मानेनापाकरोदित्याह। इन्द्रद्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परि (ऋ० ९।७३।५)। तेऽपध्माता महात्मना। भस्मराशीकृताः सर्वे समेताः सगरात्मजाः (रा० गोरेसियो-सं० १।४२।२७)। **उक्तोर्थः।**

—**ध्यै** (**ध्यै चिन्तायाम्**)। नापध्यायेन्न स्पृहयेन्नाबद्धं चिन्तयेदसत् (भा० शां० २१५।९)। **परस्यानिष्टं न चिन्तयेदित्याह।** अपध्यास्यन्ति मे देव (भा० द्रोण०५४।४)। अधर्मस्ते न भविता नापध्यास्याम्यहं शुभे (भा०द्रोण०५४।३९)। तदा भीमं हृदा राजन्नापध्यास्यति सः (भा० १५।६१)। अपध्याता च विप्रेण न्यपतद् धरणीतले (भा० वन० २०६।५)। अपध्यातो महेन्द्रो हि मुनिना देवशर्म्मणा। अस्याकाङ्क्षत्पुरा भार्याम् (हरि०२।७२।६४)। अपध्याता भगवता महादेवेन धीमता (प्रजाः) (हरि० १।३।४)। **उक्तचरोऽर्थो न पुनर्वचनमपेक्षते।** अपध्यानेन सा तेन धूमारुणसमप्रभा (भा० आदि० २३२।२९)।

—**ध्वंस्** (**ध्वंसु अवस्रंसने गतौ च**)। अपध्वंसेति बहुशो वदन् क्रोधसमन्वितः (हरि० १।१२।१५)। **अपध्वंस=अपेहि।** आ अपध्वंस (दूत०)। **उक्तोर्थः।** नचाप्यन्यमपध्वंसेत्कदाचित्कोपसंयुतः (भा० आदि० १४०।५५)। **न कुत्सयेदित्याह।** पांशूनपध्वंसयन्तः (तै० ब्रा० सा० भा०)। **अपध्वंसयन्तः=दूरीकुर्वन्तः।** अपध्वस्तैर्वस्तिवर्णैरिव (तै० आ० १।४।४)। **अपध्वस्तैः रजोदूषितैः।** अपध्वस्तवपुः सोपि (वि० पु० २।१३।४१)। **उक्तोर्थः।** अपध्वस्तस्तु धिक्कृत इत्यमरः। मूर्ख, अपध्वस्तोऽसि। अपध्वस्तस्त्ववमतो दुःखं जीवितमृच्छति (भा० शां० १२३।१९)। अपध्वस्ता दस्युभूता भवन्ति ये ब्राह्मणान् क्षत्रियाः संत्यजन्ति (भा० शां० ७३।१०)। शरैरपध्वस्तविनीतवेषम् (रा०७।८।५०)। **अपध्वस्तः=अपध्वंसितः=अपस्रंसितः=त्याजितः। अपध्वस्तो विनीतो वेषोऽस्य तम्।** अपध्वंसजाः स्मृताः (मनु० १०।४०)। **संकीर्णयोनय इत्युक्तं भवति। अत्र पितरमपेक्ष्य माता प्रकृष्टवर्णतरा भवति।**

—**ध्वन्** (**ध्वन शब्दे**)। अपपूर्वस्यास्य च्छान्दोग्योपनिषदि प्रयोगः—अपध्वान्तं वरुणस्य (२।२२।१)। **विस्वरो गानविशेषः।**

—**नम्** (**णम प्रह्वत्वे शब्दे च**)। अथ य एष (यूपः) आनतः। उपरिष्टादपनतो मध्ये सोऽशनायै रूपम् (श० ब्रा० ११।७।३।३)। **अपनतः=बहिरावर्जितः**। (शां० ब्रा० १०।१)। **इत्यत्राप्यपनत इति प्रयुक्तं समानार्थकम्**।

—**नश्** (**णश अदर्शने**)। अपनश्य, धिक् त्वा जाल्मास्तु (शां०ब्रा०३०।५)। **अपनश्येति नशेर्लोण्मध्यमैकवचने रूपम्। अपध्वंसेत्याह**।

—**नह्** (**णह बन्धने**) अप नह्यामि ते बाहू अपि नह्याम्यास्यम् (अथर्व० ७।७०।५)। **पृष्ठतो बध्नामीत्यर्थः**। अप नह्य वासम् (भा० वन० १९८।८)। **विग्रन्थि करोमीत्याह। पूर्वत्रोदाहरणेऽपशब्दो धात्वर्थानुवादी, इह तु धात्वर्थविपर्यासकृदिति शब्दशक्तिवैचित्र्यम्**।

—**नी** (**णीञ् प्रापणे**)। न कश्चिन्नापनयते पुमानन्यत्र भार्गवात्। (भा० उ० ३९।३०)। **अपनयतेऽनीतिं दुर्नयं करोतीत्यर्थः**। शत्रौ हि साहसं यत्तत्किमिवात्रापनीयते (रा० ६।६४।१०)। **अपनीयते=अपनयः क्रियते=असद्व्यवह्रियते**। निर्दिश्यापह्नुते च यः (मनु० ८।५३)। **अत्र कुल्लूको व्याचक्षाण आह—नैतन्मया निर्दिष्टमित्यपनयति। अपलपतीति च विवक्षति**। यत्र संशप्तकाः पार्थमपनिन्यू रणाजिरात् (भा०आदि० २।५६)। **अपनिन्युः=अपवाहितवन्तः**। जलेन कः शीतमपनयति (पञ्चत०१।३५३)। **दूरीकरोतीत्यर्थः**। अन्धतमसमन्धकारेणापनिनीषति (प्र० च०)। **अपनेतुं दूरीकर्तुमिच्छतीत्याह**। यदिदं राज्यमपनीतमनार्यया (रा० गोरेसियो-सं० २।११७।७)। **अपहृतम्, मुषितम् इत्यर्थः**। अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीषते (भा० उ० ३९।५४)। **अपनीतमपनयेन निर्व्यूढम्**। धर्मापनीतस्य दृश्यते कर्मणः फलम् (रा० ३।५५।४०)। **धर्मापनीतस्य=धर्मापेतस्य**। सर्वथा त्वपनीतं ते सीतया यत्प्रचोदितः। ···नाकरोः शासनं मम (रा० ३।५९।२४)॥ **अपनीतम्=अपनयः=अनाचारः**। **नपुंसके भावे क्तः**। सचिवेनापनीतं ते विदुषा प्राज्ञमानिना (भा० शां० १११।५०)। **अपनीतम्प्रतिकूलमाचरितम्**। अपनीय शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् (रा० ३।५४।२६)। **अपनीय=अपहृत्य**।

—**नु** (**णु स्तुतौ**)। सव्येन कुशानादाय दक्षिणेनापनौति (शां०गृ० १।८)। **अपनौति=एकतः करोति**।

—**नुद्** (**णुद् प्रेरणे**)। न रोदसी अपनुदन्त घोराः (मरुतः) (ऋ० १।१६७।४)। **अपशब्दो नोदनविषयं वैदूर्यमाह**। अप मृधो नुदस्व (ऋ० ३।४७।२)। अप मृत्युं नुदन्तु (अथर्व० १२।३।४९)। जरां रोगमपनुद्य शरीरात् (शां० गृ० ३।८) **अपनुद्य=अपाकृत्य=विगमय्य**।

—**पद्** (**पद गतौ**)। ययोर्वधान्नापपद्यते कश्चन (अथर्व० ४।२८।५)। **वधात् पराङ् न याति, वधविषयं नातिक्रामतीत्याह**।

—पृ (पृ पालनपूरणयोः, ह्रस्वान्तोयमिति केचित्, पृ प्रीतौ)। विश्वानि पूरोरपर्षि (ऋ० १।१२६।५)। **अपर्षि = पराणुदसि।**

—प्रु (प्रुङ् गतौ)। ततोऽवाङ्प्रप्लते (श० ब्रा० ५।४।३।२३)। **अवप्लवत इत्याह।** ततोऽसुरा अपपुप्लुविरे (श० ब्रा० ६।५।१।२७)। **अवपुप्लुविरे, अवास्कन्दन्नित्यर्थः।**

—प्रोथ् (प्रोथृ पर्याप्तौ)। अप प्रोथ दुन्दुभे दुच्छुना इतः (वा० सं० २६। ५६)। **अपकृत्यापकृत्य नाशयेत्युवटः।**

—प्लु (प्लुङ् गतौ)। अथ मैत्रावरुणचमसेनैतामाहुतिमप्लावयति (श० ब्रा० ३।६।३।२६)। **आहुतिं तारयतीत्याह।**

—बाध् (बाधृ विलोडने)। उपा उच्छन्त्यपबाधतामघम् (ऋ० १०।३५। ३)। **दूरं नयताम्।** शल्यं दुरपहरमन्यतोऽपबाध्यमानं पाटयित्वोद्धरेत् (सुश्रुते १।१०१।४)। तेभ्यो वै (ऋभुभ्यः) देवा अपैबाबीभत्सन्त मनुष्यगन्धात् (ऐ० ब्रा० ३।३०)। **जुगुप्समानाः पृथगवातिष्ठन्तेत्याह। अपशब्दः पार्थक्यं वक्ति। मनुष्यगन्धात् ईषन्मनुष्यत्वादिति जुगुप्सायां हेतुरुक्तः।**

—भज् (भज सेवायाम्)। अप ते गवां सुभगे भजाम (ऋ०१०।१०८।६)। **अपोद्धृत्य भागं गास्ते ददामेत्याह।**

—भाष् (भाष व्यक्तायां वाचि)। न केवलं यो महतोऽपभाषते (कु० ५।८३)। **अपभाषते = अपवदति = अधिक्षिपति = आक्रोशति।**

—भिद् (भिदिर् विदारणे)। भिन्द्धि विश्वा अप द्विषः (ऋ०८।४५।४०)। **भित्त्वाऽपध्वंसयेत्यर्थः।**

—भू (भू सत्तायाम्)। माकिर्देवानामपभूरिह स्याः (ऋ० १०।११।६)। १।१३१।७)। **अपभूः = अस्मद्यज्ञाद् अपभविता अपगन्ता मा भूदित्यर्थः।** अपभूतु दुर्मतिः (ऋ० १।१३१।७)। **इतो दूरेऽवतिष्ठतामित्याह।** सपत्ना ये मेऽप ते भवन्तु (अथर्व० ४।३४।७)। **अपहता भवन्त्विति सायणः।** गृहमेधास आगत मरुतो मापभूतन (ऋ० ७।५६।१०)। **माऽपेतेत्याह।** पश्चा मृधो अप भवन्तु विश्वाः (अथर्व० २०।६१।११)। **अपहता भवन्त्वित्यर्थः।** सौधन्वना ऋभवो मापभूत (ऋ० ४। ३५।१)। **दूरे मा स्म भवतेत्याह।**

—मा (माङ् माने)। अपेमां मात्रां मिमीहे। (अथर्व० १८।२।४०)। **अप इत्युपसर्गेणापगतदोषता मानस्य प्रतिपाद्यत इति सायणः। तेन साधु मिमीह इत्यर्थः फलति। अन्यत्र दुर्लभोऽयमर्थोऽपस्य, प्रायेण दुरोर्थे पृथग्भावे वा प्रयोगदर्शनात्।**

—मृज् (मृजू शुद्धौ)। अपामार्ग त्वया वयं सर्वं तदपमृज्महे (अथर्व० ४।

१७।६)। **अपमृज्महे=अपमृज्मः=नाशयामः**। बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते (मनु० २।२७)। **शोध्यते, पूयत इत्यर्थः**।

—**मृद् (मृद क्षोदे)**। हस्तिहस्तकरीषाभ्यामपमर्दः कृतो महान् (रा०)। **अपमर्दः=रजः=धूलिः पङ्को वा**।

—**मृष् (मृष तितिक्षायाम्)**। मृषस्तितिक्षायामिति सूत्रे (१।२।२०) अपमृषितं वाक्यमाहेत्युदाहरणं वृत्तौ। **अविस्पष्टमिति तदर्थ इति हरदत्तः पदमञ्जर्याम्**। विहितं मयाद्य सदसीदमपमृषितमच्युताचनम् (शिशु० १५।४६) इत्यत्र **अपमृषितमसोढमित्यर्थ इति मल्लिः**। उपसर्गवशाद् विपरीतार्थतेति च सः।

—**मे (मेङ् प्रणिदाने)**। अपमित्यमप्रतीत्तं यदस्मि (अथर्व० ६।११७।१)। **अपमातव्यमपाकर्तव्यं धान्यादिकमृणम् इत्येवमर्थापयते सायणः**। **अपमयतेरेवायं रूपनिष्पादः, मिश्रोऽपपूर्वस्यादर्शनात्**। प्रणिदानं तु नार्थः, धातूनामनेकार्थत्वात्। **अपमित्य याचते। अपमाय याचत इति उदीचां माङो व्यतीहारे** (३।४।१९) इति सूत्रे वृत्तावुदाहरणम्। कश्चिदाह **अपमयतिरत्र ऋणविगणने वर्तते। तन्न। स्यान्नाम ऋणविगणनमार्थिकोऽर्थः, न तु धातुवाच्यः सः। धातुवाच्यत्वे हि व्यतीहारो न प्रतीयेत। नागेशोऽप्युद्द्योतेऽपमयते वस्त्रादिकं परिवर्तयतीति स्माह**।

—**यज् (यज देवपूजासङ्गतिकरणदानेषु)**। तांस्ते यज्ञस्य मायया सर्वानप यजामसि (कौ० सू० ९७)। **अपयजामसि=यज्ञेनावगमयामः**।

—**या (या प्रापणे, प्रापणमिह गतिः)**। सोऽपयामि शनैर्वीर बलवानेष पापकृत् (भा० वन० १८।८)। **अपयामि=अपक्रामामि=पलाये**। अपक्रमोऽपयानम्। अपयानं पलायनमित्यमरः। मिथ्याज्ञानापाये दोषा अपयान्ति (सर्व० सं०)। **अपयान्ति=अपयन्ति=नश्यन्ति**। अपयानेपि च भवान्समर्थो लघुविक्रमः (रा०)। **उक्तोऽर्थः**। अपयाने मनः कृत्वा फाल्गुनं वाक्यमब्रवीत् (भा० द्रोण० १७३।२४)। आचार्यमातृपितृहन्तारस्तत्प्रसादादपयाप्याद्वा। एषा तेषां प्रत्यापत्तिः (व० धर्म० १५।१९)। रक्षोऽधमेन वृकवद् विपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् (भा० पु० ९।१०।११)। **अपयापिता=अपोढा, अपहृता**।

—**यु (यु मिश्रणामिश्रणयोः)**। अप स्वसारं सनुतर्युयोति (ऋ० १।९२।११)। **अपयुयोति=वियौति=वियुङ्क्ते। स्वसारमुषसम्**।

—**युज् (युजिर् योगे)**। एष एवैकविंशो य एष तपति। स एतस्मादेकविंशादपयुङ्क्ते (श०ब्रा० ५।५।३।४)। **अपयुङ्क्ते=पृथग्भवति। आत्मानं ततो निष्क्रीणाति। अपशब्दो वैरर्थे। अकर्मक इह धातुः**।

—**रञ्ज् (रञ्ज रागे)** । श्वासापरक्ताधरः (शा०) । **अपरक्तः=अपगतरागः =अपगतलौहित्यः, विवर्णः** । नूनं मित्राणि ते रक्षः साधूपचरितान्यपि । स्वदोषादपरज्यन्ते (रा०) । अनुरागं त्यजन्तीत्याह । पित्राऽपरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः (हरि० १।५।३०, वि० पु० १।१३।४८) । **अपरञ्जिताः=अपरागं गमिता उद्वेजिताः** ।

—**रम् (रमु क्रीडायाम्)** (इरिणम्) अपरता अस्मादोषधय इति वा (नि० ६।८।१) । **अपरताः=अपगताः**, अवस्थानमकुर्वाणाः । प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् (भा० पु० १०।२१।१०) । **अपरतम्=निश्चेष्टम्=कर्मान्तरविरतम्** । **अपशब्दो वैरर्थे** । **लौकिके साहित्येऽपपूर्वस्य रमेर्दुर्लभः प्रयोगोऽन्यत्र श्रीमद्भागवतात्** । **तत्र च्छन्दोनुकरणं बहुलम्** ।

—**राध् (राध साध संसिद्धौ)** । अपैतेनारात्सीरसौ स्वाहा (अथर्व० ५।६।७) । **अपारात्सीः=अपराधमचारीः** । **दुष्कृतमकार्षीः** । **अपाचारीः** । **अपशब्दो धात्वर्थं विपरीतयति** । अन्त्यजातिद्विजातिं तु येनाङ्गेनापराध्नुयात् । तत्तदेव च्छेदयेत्तस्य (अग्निपु०) । **अत्रापराधिहिंसायां वर्तते** । राधो हिंसायाम् (६।४।१२३) सूत्रे वृत्तौ **अपरेधतुः, अपरेधुरिति हिंसाद्योतनायापपूर्वस्य राधेरेत्वाभ्यासलोपौ दर्शितौ** । येषां युधिष्ठिरो राजा कस्माद्धर्मेऽपराध्नुयुः (भा० वि० ५२।६) । **अपचरेयुरित्यर्थः** । धर्मे च नापराध्नोति (भा० शां० ७१।१) । **उभयत्र सौवादिकोपि राधिरकर्मकः** । **अन्यत्रापि तथा** । यदि बीभत्सुरायातस्तदा कस्यापराध्नुमः (भा० वि० ४७।८) । यया (इष्ट्या) ऽपैव राध्नोति (श०ब्रा०५।३।५।२६) । **याऽस्येष्टुरपराध्यतीत्याह** । यथा गत्वा काष्ठामपराध्नुयात् तादृक्तत् (ऐ० ब्रा० ४।६) । **स्खलनपतनादिरूपमपराधं कुर्यादित्याह** । ममापि सोऽपराध्नोति यो युष्माकमसौम्यकृत् (भा० कर्ण० ३३।४१) । **मय्यप्यपचरति, मय्यप्यपराद्धो भवति** । एवं स्त्री नापराध्नोति नर एवापराध्यति (भा० शां० २६६।३८) । **अपराध्नोति=दोषभाग्भवति** । **श्यन्विकरणस्तु दिवादौ राधिर्नैयत्येनाकर्मकः** । कच्चिन्नु राजपुत्रि ते सपत्नी चैत्रवाहनी । चित्राङ्गदा वरारोहा नापराध्यति किञ्चन (भा० आश्व० ८१।४) । 'ते' इति चतुर्थ्यन्तम् । **उक्तोऽर्थः** दैवं तत्रापराध्यति (रा० ६।१०१।६) । **विधेरयं दोष इत्याह** । यौवनमत्रापराध्यति न चारित्र्यम् (मृच्छ०६) । **यौवनमत्रार्थे दोषभाजनं भवतीत्यर्थः** । सैषा किं चापराध्यति (कथा० २१।८०) । **कमाचारमुच्चरते ? केनापराधेन तद्वती भवति** । कः कस्येहापराध्यति (भा०शां०१३६।४६)। **इत्यादिषूदाहृतिष्वकर्मकता राध्यते राद्धा भवति** । न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति (शिशु०२।११) । **शिशुपालो मे द्रुह्यतीत्याह** । तथा नस्त्वं गौतम माऽपराधास्तव च पितामहा यथा (श० ब्रा० १४।६।१।११) । **अवश्यमुपेहि नः, असंनिधानेनापराद्धो मा भूर्**

इत्याह । प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः । वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते (प्र०च०२।४) ॥ **कोऽपराधः क्रियते, किं विघटचते, किं विक्रियत इत्याह** । सर्वकार्येष्वपराध्यत्वान्नापराध्यन्ति चाङ्गनाः (भा० शां०२६६।४०) । **सर्वकार्येष्वपराध्यत्वादनुरोध्यत्वादल्पबलत्वेन सर्वथा पुरुषाधीनत्वान्नापराध्यन्ति (दोषभाजो न भवन्ति) इति नीलकण्ठः** । प्रोवाच कोसलपतिः प्रथमापराद्धः (रघु० ६।७६) । **प्रथममपराधं कृतवान्** । **कर्तरि क्तः** । **अकर्मकत्वात्** । किं पुनरसुरावलेपेन भवतीनामपराद्धम् (विक्रम ०१) । **भावे क्तः** । **अकर्मकत्वात्** । **कोऽपराधः कृतः, को व्यतिक्रमोऽनुष्ठित इत्यर्थः** । निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् (शिशु० २।२७) । **निमित्तम्=लक्ष्यम्** । **अपराद्धेषुः=च्युतसायकः** । अपराद्धाऽभिषेकवेलोपाध्यायस्य (विद्ध० ३) । **अपराद्धा=अतिक्रान्ता** । **सकर्मकोऽत्र राधिः सौवादिको वेद्यः** । **कर्मणि क्तः** । एतद्वा अनपराद्धं नक्षत्रं यत्सूर्यः (श० ब्रा० २।१।२।१६) । **अकर्मको दिवादिर्धातुः, कर्तरि क्तः** ।

—**रुध् (रुधिर् आवरणे)** । अनुव्रतामप जायामरोधम् (ऋ० १०।३४।२) । **अपरोधम्=अपारोधम्=अपारुधम्=अवारयम्=स्वस्माद् दूरऽपास्यम्=पराणुदं गृहात्** । सायमागतमतिथिं नापरुन्ध्यात् (व० धर्म० ८।४) । **न पराणुदेत्** । द्वेष्टि श्वश्रूरप जाया रुणद्धि (ऋ० १०।३४।२) । **गृहप्रवेशाद् वारयति** । **न मे त्वया कश्चिदर्थ इति प्रत्याचष्टे** । योऽवगतः सोऽपरुध्यतां योऽपरुद्धः सोऽवगच्छतु (तै० सं० ६।६।५।३) । **अपरुध्यताम्=वार्यताम्** । दुष्टरीतुर्ह पौंसायनः । दशपुरुषं राज्यादपरुद्ध आस (श० ब्रा० १२।६।३।१) । **अपरुद्धः=निरस्तः=बहिष्कृतः** । **दशपुरुषम् राज्यात्=आ दशभ्यः पुरुषेभ्यः स्ववंशजेषु स्थिताद्राज्यात्** । अन्यक्षेत्रेऽपरुद्ध चरन्तम् (अथर्व० ३।३।४) । **अपरुद्धः सन्, अवरुद्धं प्रच्छन्नं यथा स्यात्तथा** । **लोके यमर्थमवरुद्धशब्द आह तमिह च्छन्दस्यपरुद्धशब्दः** । **उपसर्गभेदो नार्थभेदः** । सिन्धुक्षिद्राजर्षिर्योगपरुद्धश्चरन् (पञ्चविंश० १२।१२।६) । **उक्तोऽर्थः** । यस्य व्रत्येऽहनि पत्न्यनालम्भुका स्यात् तामपरुध्य यजेत (याज्ञ० ३।४५ मिताक्षरायामुद्धृतम्) । **अपरुध्य=परिहृत्य** । तस्मादाहुर्न सायमतिथिरपरुध्य इति (ऐ० ब्रा० ५।३०) । **अपरुध्यः—अपरोध्यः=अपनोद्यः=निराकरणीयः** ।

—**लप् (लप व्यक्तायां वाचि)** । संश्रुत्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणाम् । तां चापलपताम् पापः (रा० २।७५।२६) । **अपलपताम्=अपलपतु** । **निह्नुताम्=उक्तं नाङ्गीकरोतु** । राजदेयमपलपितम् इति मनु० ८।४०० इत्यत्र कुल्लूकः । तदनुभवसिद्धमपलपतो गजनिमीलिकैव (सा० द०) । **अपलपतोऽनभ्युपगच्छतः=अप्रतिपद्यमानस्य** । अपलापयमानस्य शत्रूंस्तस्याभवन्मतिः

(भट्टि० ८।४४)। वञ्चयमानस्य। लियः सम्माननशालीनीकरणयोश्चेति सूत्रे वृत्तौ तूत्पूर्वस्य लापेरात्मनेपदं दर्शितम्, नापपूर्वस्य। भट्टिप्रयोगः किंप्रमाणक इति सुधीभिर्विचार्यम्। जयन्ति महतां संस्तुतापलापिन्यः कल्याणिन्यो नीतयः (मालती० १०)। अपलापो निह्नवः। दैन्याद् उन्मुखदर्शनापलपनैः पिण्डार्थमायस्यतः (मुद्रा० ३।१४)। अपलपनमिहादरो वा स्यात् प्रियोक्तिश्चाटूक्तिर्वा। अत्रार्थे प्रमाणं तु नोपलभामहे, न चार्थान्तरं प्रतिभाति। न चापि पाठान्तरमस्ति।

—लष् (लष कान्तौ, कान्तिरिच्छा)। प्रलापिनो भविष्यन्ति कदान्वेतेऽपलाषुकाः। अपलाषुकाः=अपगताभिलाषाः। लषपतपद—(३।२।१५४) सूत्रे वृत्तौ अपलाषुकं वृषलसंगतम् इत्युदाहरणं स्थितम्। तत्रापलषति नाभिलषतीत्यर्थः सन्देहानास्कन्दः। इदं तु सन्दिह्यते कर्तरि ताच्छील्ये उकञि वृषलसंगतमपलाषुकमिति कथं संगच्छेत। अत एवास्माभिः स्वकृतौ व्याकरणचन्द्रोदये ऽपलाषुको वृषलसङ्गतमिति पाठ ऊहितः।

—लिख् (लिख अक्षरविन्यासे)। अपास्याः केश्यं मलमप शीर्षण्यं लिखात् (अथर्व० १४।२।६८)। अप लिखात्=उल्लिख्यापाकुर्यात्।

—लुप् (लुप्लृ छेदने)। तस्माद् देवास्तमोऽपालुम्पन् (का० सं० १२।१३)। अपालुम्पन्=अपाच्छिन्दन्।

=वच् (वच परिभाषणे)। एका च मे दश च मेऽपवक्तार ओषधे (अथर्व० ५।१५।१)। निन्दितार इत्याह। अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् (ऋ० १।२४।८)। अपवक्ता=वचनेन वारयिता।

—वद् (वद व्यक्तायां वाचि)। उत मेऽपवदेयुः (तै० ब्रा० २।३।६।६)। मां निन्देयुरित्यर्थः। नार्तोऽप्यपवदेद् विप्रान् (मनु० ४।२३६)। उक्तोऽर्थः। स्नातान् अपवदेयुस्तान् इतिहासैः पुरातनैः (याज्ञ० ३।७)। शोकनिरसनसमर्थैर्बंधोभिर्बोधयेयुरिति मिताक्षरा। अपगतदुःखान्कुर्युरित्यपरार्कः। तस्मान्नित्यं क्षमा तात पण्डितैरपवादिता (भा०वन०२८।८)। अपवादिता=अनभिनन्दिता। अब्राह्मणवध उक्तः। अत्रापवदति (बौ० ध० २।२।४।३ सूत्रे गोविन्दस्वामिविवरणम्)। अत्रापवादमाहेत्यर्थः। धनकामो न्यायमपवदते (पा० १।३।७३ सूत्रे वृत्तिः)। न्यायापवादेन (न्यायानभ्युपगमेन) धनमर्जयिष्यामीति मन्यत इत्यर्थ इति च वृत्तिः। नृभ्योपवदमानस्य रावणस्य गृहं ययौ (भट्टि० ८।४७)। क्रुध्यतोऽसूयतो वेति जयमङ्गला। अन्यत्र दुर्लभोऽयमर्थ इत्यस्य स्वीकारे संकुचामः। अध्यारोपापवादाभ्यां वस्तुतत्त्वविनिर्णयः (वेदान्ते)। अपवादः=प्रतिवादः=निराकरणम्। गुणापवादेन तदन्यरोपणात् (कि० १४।१२)। गुणापह्नवेन, गुणानस्वीकृत्य। उत्सर्गाणां सामान्यशास्त्राणां स्वस्माद् विधयाद् व्यावर्तकं विशेषशास्त्रमपवादः। अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः

(कु० २।२७)। नहीश्वर आज्ञापयति अपवादैरुत्सर्गा बाध्यन्तामिति भाष्ये। ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः (कि० १४।२७)। **अपवादः=आदेशः**। अपवादो निन्दाज्ञे इति चामरः। **अपवादोप्यथादेश इति सज्जन इति मल्लिः**। मधुकरैरपवादकरैरिव (शिशु० ६।६)। **अपवादकरैर्व्याधैः**। **अपवादं मृगवञ्चनाय घण्टादि कुत्सितं वाद्यं कुर्वन्ति तैरिति मल्लिः**। प्रातिलोम्यापवादेषु (याज्ञ० २।२०७)। **निकृष्टवर्णकृता उत्कृष्टवर्णस्य निन्दा। प्रातिलोम्यापवादः**।

—**वप्** (**डुवप बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं च। अयं छेदनेपि**)। यासां तिस्रः पञ्चाशतोऽभिब्लड्गैरपावपः (ऋ० १।१३३।४)। यो वर्चिनः शतमिन्द्रः सहस्रमपावपत् (ऋ०२।१४।६)। **अपावपत्=व्यकिरत्=व्यघटयत्। अपपूर्वो वपिर्नाशार्थ इति तु सायणः**।

—**वस्** (**वस निवासे**)। अपवासे नक्षत्राणाम् (अथर्व० ३।८।७)। **अपवासे=अपगमनकाले**।

—**वह्** (**वह प्रापणे**)। अपोवाह च वासोऽस्या मारुतः शशिसंनिभम् (भा० आदि०७२।३)। **अपोवाह=अपोढवान्। वान्वातस्तदुड्डाय्यापनिनायेत्याह**। अपोवाह वसिष्ठं तु प्राचीं दिशमतन्द्रिता (भा० शल्य० ४२।३६)। **पराचकर्षेत्याह। ऊढ्वाऽपनिनायेत्यर्थः**। स (राक्षसः) कीचकमपोवाह वातवेगेन भारत (भा० वि० १६।११)। **उक्तोर्थः**। आर्य लेखः खलु मामपवहति (प्रतिज्ञा०१)। **इतस्त्वरयतीत्यर्थः**। मिथ उद्वहत्यथापवहति (भा० उ० १४।३७)। **अपवहति=सम्बन्धं निराकरोति**। ममापवाहितो भर्ता मृगरूपेण मायया (रा०३।५३।४)। **दूरं नीत इत्याह**। त्रिगर्तसेनापतिना स्वरथेनापवाहितः (भा० द्रोण० १२२।३५)। **अपवाहितो रणाजिराद् बहिर्गमित इति यावत्**। नरैरिवोल्काभिरपोह्यमानो मद्दागजः (रा०२।२१।५३)। **दूरं प्रस्थाप्यमान इत्याह**। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः (२।१।३८) इति सूत्रे **कल्पनापोढ** इत्युदाहरणम्। कल्पनाया **अपोढोऽपेत इत्यर्थः**। ततो योद्धुमपोढानां बाणैयानाम् (हरि०२।११६।६३)। **अपोढानां निर्गतानाम्**। **वहिरत्राकर्मकः**। संभ्रमोऽभवदपोढकर्मणाम् (ऋत्विजाम्)। (रघु० ११।२५)। **त्यक्तकर्मणामित्यर्थः**। अमी जनस्थानमपोढविघ्नं...मत्वा (रघु० १३।२२)। **उपप्लवरहितम् अन्तरायवर्जितमित्याह**। भूतकृतः स्थोऽपोढं जन्यं भयम् (भा०श्री० ६।१०।५)। दिव्येन शून्यं वलयेन बाहुमपोढनेपथ्यविधिर्ददर्श (रघु० १६।७३)। **अपोढनेपथ्यविधिरित्यनारब्धाकल्पकल्पन इत्याह**। अपोह्य वसनं स्वकम् (भा० सभा० ८१।१०)। **अपोह्य अवक्षिप्य**। अपवाह्य तु दुष्टात्मा भरतं तव बन्धुषु (रा० २।७।२६)। **अपवाह्य उद्वास्येति तिलकः**।

—दा (वा गतिगन्धनयोः)। यदूवध्यमुदरस्यापवाति (वा०सं० २५।३४)। भक्षितमपरिणतमामाशयस्थमूवध्यमुच्यते। अपवाति गन्धायत इत्युवटः। अपगच्छतीति महीधरः। गन्धायते गन्धमुद्वमतीत्येव युक्तं भाति। इहैवोत्तरत्र तस्य सुकृतीकरणस्य सुरभीकरणस्य श्रवणात्।

—विच् (विचिर् पृथग्भावे)। अथापविनक्ति (श० ब्रा० १।१।४।२२) इति। वायुर्वो विविनक्तु (वा० सं० १।१६) इत्यस्य मन्त्रस्य ब्राह्मणम्। व्यक्तं ब्राह्मणस्थोऽपशब्दः श्रौतस्य वेरर्थे। पृथक् करोतीत्येवार्थः।

—विज् (ओविजी भयचलनयोः)। अभिप्रेहि माऽपविक्थाः (अथर्व० पि० १।४७।२)। अपविक्था इत्यत्रेडभावश्छान्दसः। लोके प्रायेण विजिरुत्पूर्वो दृष्टः क्वचिदेव केवलः सम्पूर्वश्च। याप सर्प विजमाना विमृग्वरी (पृथिवी) (अथर्व० १२।१।३७)। अपविजमाना। उद्वेजयमानेत्यर्थः।

—विश् (विश प्रवेशने)। अन्यत्र पापीरप वेशया धियः (अथव०६।२।२५)। अन्यत्र प्रेषय=अन्यत्र प्रस्थापय=अन्यत्र प्रेरय।

—वी (वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। न घा त्वद्रिगपवेति मे मनः (अथर्व० २०।१७।२)। अपवेति=अपगच्छति। उत मे वोचतादिति सुतसोमे रथवीतौ न कामो अप वेति मे (ऋ० ५।६१।१८)। उक्तोर्थः।

—वृ (वृञ् वरणे)। उद्गातर् अप त्वा वृणे शतेन च निष्केण चाश्वो म उद्गास्यति (लाट्या० श्रौ० ६।६॥१६)। स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि (ऋ० १।७।६)। अपशब्दस्य च्छान्दसो दीर्घः। अप कृष्णां निर्णिजं देव्यावः (ऋ० १।११३।१४)। अपावः=अपावृणोः। वृत्रं जघन्वाँ अप तद्वव्रिवार (ऋ० १।३२।११)। उक्तोऽर्थः। ववारेति वृञो लिटि। अपवृतोऽपवेष्टित आस्ते (जै० उ० ३।६।४)। अपवृतः=विवस्त्रः। बाहुबन्धनापवारितपयोधरोदगमाम् (मालती० ७)। अपवारितः=आच्छादितः। विटपेनापवारितशरीरा भूत्वा (रत्ना० १)। अपवारितम्=तिरस्कृतम्। पत्न्यै शिरोऽपवृत्य (श० ब्रा० १४।१।४।१६)। अनावरणं कृत्वेत्याह। उत व्रजमपवर्तासि गोनाम् (ऋ०४।२०।८)। अपवर्ता=उद्घाटयिता। वृजस्तृचि रूपम्। इडभावश्छान्दसः लोकेऽपवरित्राऽपवरीतेति रूपद्वयम्। इड्दैर्घ्यविकल्पात्। अपवरकोऽन्तर्गृहं भवति यद् गर्भागारमुच्यते। वातगतये छिद्रमप्यपवरक उच्यते तथा च (सुश्रु० १) प्रयोगः—ततश्चैकस्मादपवरकात्।

—वृज् (वृजी वर्जने, वृजि इत्येके)। अपवृङ्क्ष्व शत्रून् (अथर्व० ३।१२।६)। पराणुद, भीषयित्वा पलाययेत्यर्थः। प्रान्या तन्तूँस्तिरते धत्ते अन्या। नाप

वृज्जाते न गमातो अन्तम् (अथर्व० १०।७।४२)। **नापवृज्जाते**=विच्छिन्नतः। यन्नघ्वानमपवृङ्क्ते चरित्रैः (ऋ० १०।११७।७)। **अपवृङ्क्ते**=समाप्नोति=**अध्वनोऽपवर्गमवसानं याति**। कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय (रा०१।४४।७)। **अपवर्जय**=पूरय। समानजातीयेन कर्मणैकैकमपवर्जयति (आप० श्रौ० १।८।२५।१)। **अपवर्जयति**=समाप्नोति=अवसाययति। वेदानधीत्य नियतो दक्षिणामपवर्ज्य च (भा० शां० ३२६।१६)। **अपवर्ज्य**=प्रदाय। पुरस्तादेव भगवन्मयैतदपवर्जितम् (भा० शां० १०६।२)। **अपवर्जितम्**=परित्यक्तम्=**परिहृतम्**। दूरापवर्जितच्छत्रैः शिरोभिः (रघु०१७।७६)। **दूरात्परिहृतातपत्रैरित्याह**। षड्भिरपवर्जिताऽशीतिः (व०बृ०सं०५३।७)। षड्भिस्त्यक्ता षड्भिर्विकलाऽशीतिरित्याह। घटेऽपवर्जिते ज्ञातिमध्यस्थो यवसं गवाम्। प्रदद्यात्... (याज्ञ० ३।२६६)॥ **वारां पूर्णे घटेऽवनिनीते आवर्जिते सतीत्यर्थः**। यदि तावन्न गृह्णामि ब्राह्मणेनापवर्जितम् (भा०शां०१६६।१०७)। **अपवर्जितम् प्राभृतीकृतमुपायनीकृतम्**। श्राद्धमपवर्जयन् (भा० अनु० ८६।६)। **अपवर्जयन्**=ददत्। यद्यनपवृक्तार्थो यूपो विरोहेत् (आप० श्रौ० ६।५।१६।१५)। **नियोजनरूपोऽर्थो यद्यपवृक्तो न भवति सम्पूर्णो नास्तीत्याह**। आदिरत्रापवृक्तः (निष्ठा ३।२।१०२ सूत्रे भाष्ये)। **परिसमाप्त इत्यर्थः**। पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः (भा०पु० ३।२४।७)। **मुक्ता इत्यर्थः**। **अन्यत्र दुर्लभोऽयमर्थः**। विरलतमेष्वर्थेषु **शब्दान्प्रयुञ्जानो विशिष्यते भागवतकारः**। त्वया कालोपसृष्टेन लोभतो नापवर्जिताः (भा० शल्य० ६३।४६)। **नापवर्जिताः**=न दत्ताः। पञ्च ग्रामा वृता यत्नान्नास्माभिरपवर्जिताः (भा० उ० १६०।४७)। **उक्तोऽर्थः**। आहिच्छत्रं सकाम्पिल्यं द्रोणायाथापवर्जितम् (हरि० १।२०।७४)। अपवर्गेऽभिरूपभोजनं यथाशक्ति (गो० गृ०१।१।६)। **अपवर्गे**=कर्मसमाप्तौ। **अभिरूपभोजनं द्विद्विभोजनम्**। उपक्रमप्रभृत्यपवर्गपर्यन्तम् (नि० १।१)। **अपवर्गः**=परिसमाप्तिः। आ क्रतोरपवर्गात् (आश्व० गृ० १।२३)। अपवर्गे यथोत्साहं ब्राह्मणानाशयेत् (खा० गृ० १।१।३)। **अपवर्गे कर्मणोऽन्ते**। अभिप्लुप्तव्यपकर्षणमपवर्गः। (कौ० अ० १५।१।१८०)। **अभिप्लुतस्य अभितः प्रसरतो व्यपकर्षणम्**। अभिव्याप्यापकर्षणमपवर्गः (सुश्रुते२।५५८।५)। **इहापदर्गोऽपवाद उक्तः**। न तेऽपवर्गः सुकृताद्विना कृतः तथा यथान्येषु वरेषु (भा०वन०२६७।५२ सावित्र्युपाख्याने)। **ते**=त्वत्तः। **अपवर्गः**=पुत्रफलप्राप्तिः। कृत्वापवर्गं गुरवे चरिष्यति महत् तपः (भा० उ० ११४।१७)। **गुरुदक्षिणां धनं दत्त्वेत्याह**। आत्मदोषापवर्गेण तद्याच्ञा जनमोहिनी (भा०पु०१०।२३।४६)। **स्वदोषपरित्यागेनेति विवक्षति**। मुष्टेरसंभेद इवापवर्गे (कि० १६।२०)। **अपवर्गो बाणमोक्षः**। तथापवर्गः (बौ० ध० १।७।१५।७)। **अपवर्गो निर्गम इति गोविन्दस्वामी**। गुणस्य

सतोऽपवर्गः कर्मभिः साधर्म्यम् (वैशेषिक० २।२।२५)। **अपवर्ग आशुनाश इति सङ्केतकृच्छङ्करः**। क्रियाणामर्थशेषत्वात् प्रत्यक्षतस्तन्निवृत्त्याऽपवर्गः स्यात् (मी० सू० ११।१।२७)। **अपवर्गः समाप्तिः**। अपवर्गे सत्यागे बुद्धौ च कृतनिश्चयाः (भा० शां०२६६।३)। अपवर्गमहोदयार्थयोः (रघु० ८।१६)। **अपवर्गो मोक्षः**। तपती योषितां श्रेष्ठा किमन्यदपवर्जनात् (भा० आदि०१७३।२५)। **दानादन्यत् किं श्रेय इत्याह**।

—वृत् (वृतु वर्तने)। यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु (मनु० ८।२९३)। **अपवर्तते=अन्यथा व्रजति, अपथा याति**। अपवर्तामहे भूमावास्तीर्य स्वयमर्जितैः (रा० २।५३।४)। **अपवर्तामहे=यथा कथंचिच्छयनं कुर्मः**। रक्षांसि चापवर्तन्ते स्थिते देवे हुताशने (भा० अनु० ९२।१३)। **अपवर्तन्ते=अपक्रामन्ति=अपयान्ति**। तस्मादपावर्तत दूरकृष्टा (रघु० ६।५८)। **अपावर्तत=प्रतिन्यवर्तत**। तस्मादपावर्तत कुण्डिनेशः (रघु० ७।३३)। **उक्तोऽर्थः**। बृहस्पते अप तं वर्तया पथः (ऋ०२।२३।७)। **अपवर्तय=निवर्तय**। मुकुटेनापवृत्तेन कुण्डलोज्ज्वलितानना (रा०५।१०।२५)। **अपवृत्तेन=(निद्रावशात्) पर्यस्तेन**। अपवृत्तजठरशफरीकुलाकुलाः (सरितः) (कि० १२।४९)। **अपवृत्तजठरैः=लुठितोदरैः (शफरीकुलैः)**। **अपवृत्तम्=तत्क्षणक्षोभाल्लुठितम्**। व्याकीर्णस्फुरदपवृत्तरुण्डखण्डः (मालती० ३।१७)। **अपवृत्ताः=अधोमुखाः**। आसक्ततिर्यगपवर्तितदृष्टिवक्त्रं (वहन्ती) (मालती० १।४०)। **अपवर्तिता=साचिकृता**। स्नातापवृत्तैस्तुरगैर्लब्धतोयैरविह्वलैः (भा० उ० १८०।२)। **अपवृत्तैः परावृत्तैः**। अनिमित्तापवृत्तप्रहर्षम्...विद्रवतीव मे हृदयम् (अवदा० जा० ९)। **अपवृत्तः=अपकृष्टः=हसितः**। अपवृत्ते कर्मणि वामदेव्यगानम् (गो० गृ० १।९।२९)। **अपवृत्ते=समाप्ते**। अपवृत्तकर्मा लौकिकोऽर्थसंयोगात् (का० श्रौ० १।३।२८)। **अपवृत्तं समाप्तं कर्म यस्मिन् सः**। **सोऽग्निः समाप्ते कर्मणि लौकिकः सम्पद्यते**। अथ भैक्षचर्या। ब्राह्मणानां शालीनयायावराणामपवृत्ते वैश्वदेवे भिक्षां लिप्सेत (बौ०ध० २।१०।१८।४)। **अपवृत्ते=निर्वृत्ते=समाप्ते**। उर्वशी राजानमपगताम्बरं दृष्ट्वाऽपवृत्तसमया तत्क्षणादेवापक्रान्ता...(वि० पु० ४।६।५९)। **अपवृत्तसमया=अतिक्रान्तसांवत्सरा**। नानिर्विधित्सो नावृत्तो नापवृत्तोऽस्ति कश्चन (भा० शां० २६९।४६)। **अपवृत्तो निष्कर्मेति नीलकण्ठः**। सव्यापवृत्तं विपुलं जटामण्डलमुद्वहन् (हरि० १।५४।७)। **सव्यापवृत्तम्=अप्रदक्षिणवेष्टितम्**। पितृपैतामहं राज्यमपवृत्तं तदाऽनघ (भा० द्रोण० ८६।१४)। **अपवृत्तं सांशयिकं जातम्**। कुदिनानि द्वादशभिरपवर्तितानि (लीला० ४।८।१५)। **विभक्तानीत्याह**। अक्षमालापवृत्तिज्ञा दुःशासनपरिग्रहा। ब्राह्मीव दौर्जनी संसद् वन्दनीया समेखला॥

अपवृत्तिः = भ्रमणम् = आवर्तनम् । न त्यागोस्ति द्विपन्त्याश्च न च दायापवर्तनम् (मनु० ६।७६) । **दायस्य हरणाख्यस्यांशस्यापवर्तनं व्यावर्तनम्** । स्थानापवर्तन० (सुश्रुते २।६१।१४) । **स्थानाद् अपवर्तनं विचालनम्** ।

—वे (वेञ् तन्तुसन्ताने) । इमे वयन्ति पितरो य आययुः । प्र वयापवयेत्यासते तते (ऋ७ १०।१३०।१) । **इहापवयतिरुतस्यानुतीकरणे वर्तते । अपशब्दो धात्वर्थं विपरीतयति** ।

—वेष्ट् (वेष्ट वेष्टने) । अपवृत्तोऽपवेष्ट्रित आस्ते (जै० उ० ३।६।४) ।

—व्यध् (व्यध ताडने) । अप शत्रून् विध्यतां सं विदाने (ऋ० ६।७५।४) । (आर्त्नी) **शत्रून् परास्यताम्** इत्याह । अपविध्यन्ति पापानि दानयज्ञतपोबलैः (भा० शां० ६७।५) । **क्षिपन्ति दूरीकुर्वन्तीत्यर्थः** । यश्चाग्नीनपविध्येत (भा० शां० ३४।६) । **अपविध्येत = अपविध्येत् = संन्यस्येत् = हापयेत् (इत्यर्थे णिच्)**। योऽग्नीनपविध्यात्कृच्छ्रं द्वादशरात्रं चरित्वा पुनरादधीत (व०ध०१।२३)। **अपविध्येत् इति पाठान्तरम्** । उत्सृजेदित्यर्थः । पुरा श्मशाने स्रगिवापविध्यते (भा० वन०२६६।२०) । **क्षिप्यत इत्यर्थः** । अब्रवीदुत्तरः पार्थमपविद्धः शरैर्भृशम् (भा० वि० ६१।३) । **अपविद्धः = विद्धः** । **अपशब्द इह विशेषकृन्न** । **। भृशम् इत्यनेन गतार्थत्वात्** । ताः स्वमङ्गमधिरोप्य दोलया प्रेङ्खयन्परिजनापविद्धया (रघु० १६।८) । **परिजनेनापविद्धया परिचारकैः सम्प्रेषितया । सम्प्रेष्य प्रेर्य त्यक्तयेत्यर्थः** । **भुजस्तम्भापविद्धः** (परशुः) (महावीर०२।३३) । **क्षिप्त इत्यर्थः** । महानिलेनाद्रिमिवापविद्धम् । (भा० कर्ण०६१।६०) । **अपविद्धम् = अवकीर्णम्, भ्रंशितम्** । तार्क्ष्यस्य पक्षपवनोग्रजवापविद्धं शृङ्गं गिरेरिव च तस्य हिमोत्तरीयम् । (अवदा० जा० ३०।२३) । **अपविद्धं क्षिप्तम्** । येनापविद्धसलिलः स्फुटनागसद्मा (अम्बुधिः) (कि० ५।३०) । **अपविद्धसलिलः = क्षिप्तजलः** । **आलोडितोदकः** । मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः (रा० २।६४।२४) । **उक्तोऽर्थः** । छत्राणां चापविद्धानां चामराणां च संचयैः (भा०द्रोण०१६२।८) । **त्यक्तानां विकीर्णानाम् इत्याह । स प्रविश्याश्रमपदमपविद्धवृसीमठम्** (भा०वन० २१७।४८) । **अपविद्धा इतस्ततो विशीर्णा वृस्यो मठाश्च यत्र** । **वेदवादापविद्धांस्तु तान्विद्धि भूतनास्तिकान्** (भा० शां० १२।५) । **वेदवादोऽपविद्धस्त्यक्तो यैस्तान्** । रक्षोविप्रकृतावास्तामपविद्धशुचाविव (रघु० १०।७४) । अपविद्धशुचौ = निरस्तशोकौ । अपविद्धगदो बाहुः (कु०२।२२) । श्रुतापविद्धैरेतैर्वा वृथा किं शुकभाषितैः (तन्त्रा०उपक्रमे ३।३४) । **उक्तोऽर्थः** । गतिं मुनेर्याम्यपविद्धलोकः (भा०पु०६।११।२१) । हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षैरपहृतमपविद्धं पीतमुन्मूलितं वा (मालती० १।२८) । **अपविद्धम् = वि-**

क्षतम् । **अत्रापशब्दो व्यधनक्रियागर्हामाह** । यदा हि गर्गाणां वाहनमपविद्धं तिष्ठति (८।४।८ सूत्रे भाष्ये) । मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा । यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते (मनु० ९।१७१) ॥ षण्ढापविद्धचाण्डालपापिपाषण्डिरोगिभिः (वीक्षिते) (वि०पु० ३।१३।१२) । **अपविद्धः सद्भिर्बहिष्कृतः** । अव मा पाप्मन् सृज (अथर्व० ६।२६।१) इति तितउनि पूल्यान्यवसिच्य अपविध्यापरेद्युस्त्रींस्त्रीन् पुरोडाशसंवर्ताश्चतुष्पथेष्यवचरति (कौ० सू० ३०।१८) । अपविध्य वैदिकानि कर्माणि...(बौ० ध० २।६।११।२८) । **अपविध्य = परित्यज्य** । मणीनामपवेधे च दण्डः प्रथमसाहसः (मनु०९।२८६) । **अपवेधो मौक्तिकादेरस्थाने वेधो, येन तद्वैकृतमापद्यते** ।

—**व्ये (व्येञ् संवरणे)** । अपो महि व्ययति चक्षसे तमः (ऋ० ७।८१।१) । **अपावृणोति, अपगतावरणं करोतीत्यर्थः** । **इहापशब्दो धात्वर्थं विपरीतयति** । तन्वो रपोऽपाचीनमपव्यये (अथर्व० ६।९१।१) । **प्रच्छन्नं शरीरदोषं विवृणोम्याविष्करोमीत्याह** । हृत्वाऽपव्ययते (मनु० ८।३३२) । **अपव्ययते = अपह्नुते = नाङ्गीकरोति** । अनेकेषु चाभियोगेष्वपव्ययमानः सकृदेव परोक्तः सर्वं भजेत (कौ० अ० २।८।२६) । **अपव्ययमानः = प्रच्छादयन् = अनभ्युपगच्छन्नित्यर्थः** । अप्वा यदेनया विद्धोऽपवीयते (नि० ६।१२।४) । **अपवीयते = अपवेष्ट्यते । प्राणैरिति शेषः** ।

—**व्रज् (व्रज गतौ)** । रात्स्याम इत्यपव्रजत्यध्वर्युः (आश्व० श्रौ० ८।१३।१०) । **अपव्रजति = अपगच्छति । रात्स्याम इति साधयाम इत्यर्थे प्रयोगः** ।

—**शुष् (शुष शोषणे)** । यथोदकमपपुषोऽपशुष्यत्यास्यम् (अथर्व०६।१३९।४) । **अपशुष्यति = सुष्ठु शुष्यति** ।

—**श्रि (श्रिञ् सेवायाम्)** । अनपश्रितः (आप० ध० १।२।६।१७) । **कुड्याद्यनाश्रित इत्याह** । नक्तमासीत संश्रितः (लौ० गृ० ५।४) इत्यपश्रित इत्येवमर्थापयत आदित्यदर्शनः । इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् (अथर्व० २०।४१।२) । **निलीनम् इत्यर्थः** । स एतस्मिन्नन्नेऽपश्रितो भाति (श० ब्रा० १।५।२।१९) । अपश्रितो निलीनः (?) ।

सच् (षच समवाये) । अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे (ऋ० ५।२०२) । ते वृद्धा **अन्यव्रतस्य द्वेषं कौटिल्यं चापसचन्ते**, ततोऽपेता भवन्ति न ताभ्यां समवेता भवन्तीत्याह । **अत्रापशब्दो धात्वर्थं विपरीतयति** ।

—**सद् (षद्लृ विशरणगत्यवसादनेषु)** । रे क्षत्रियापसदाः (वेणी०३) । फरवर्णासु अनुलोमजाः षड् अपध्वंसजाः, विलोमजा अपसदाः षड इत्यापटेकोष

उद्धारः । **अपसदः, अपसीदति, अपकृष्टः पृथग्भूतः सीदतीति** । निहीनोऽपसदो जाल्म इत्यमरः। अलब्धपूर्वोऽपसदेऽसुरेऽर्पितः (भा० पु० ८।२३।२)। **अपसदोऽधमः** ।

—**सिध् (षिध गत्याम्)** । दूराद् दवीयोऽपसेध शत्रून् (ऋ० ६।४७।२९)। **अपसेध=पराणुद=दूरं गमय** । संवत्सरं यवाहारस्तत्पापमपसेधति (मनु० १।१९८)। **अपनुदतीत्यर्थः** । पृष्ठतः के परान्वीरानपासेधन् यतव्रताः (भा० भी ष्म० १४।३४)। **उक्तोऽर्थः** । अपसिध्य दुरितं धत्तमायुः (अथर्व० ८।२।७)। **अपसिध्य=निराकृत्य** । दण्डीव यूथादपसेधसि (नागम्) त्वं यो जेतुमाशंससि धर्मराजम् (भा० वन० २६८।५) । **अपसेधसि पराणुदसि, व्याकरोषि** ।

—**सू (षू प्रेरणे)**। तत्रैनो अप तत् सुवामि (अथर्व० ६।११८।३)। **अपसुवामि=परासुवामि=अपगमयामि** । अपामार्ग त्वमस्मदप दुःष्वप्न्यं सुव (वा० सं० ३५।११)। अपामीवामप दुःष्वप्न्यं सुव (ऋ० १०।३७।४)। **उक्तोऽर्थः** ।

—**सृ (सृ गतौ)** । यदपसरति मेषः कारणं तत्प्रहर्तुम् (पञ्चत० ३।४३)। **अपसरति पराचीनं याति, आत्मानमपकर्षति** । अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः (शा० ४।२५)। **अपसृतानि=अधः पतितानि** । अपसृतावयवः समूहः सङ्घातः । **अपसृता उद्भूता अवयवा यस्य सः** । किमर्थमपसारणा क्रियते (मुद्रा० ४)। **अपसारणा=उत्सारणा** । निरन्वयोनपसरः प्राप्तः स्याच्चौरकिल्बिषम् (मनु० ८।१९८) । **अर्थागमे क्रयादिः सद्धेतुरपसरः** । **अपसरत्यनेनास्माद् धनमित्यपसरः प्रतिग्रहक्रयादिः । स यस्य नास्ति सोऽनपसरः** ।

—**सृज् (सृज विसर्गे)** । समहोदरधूम्राक्षा अपसृष्टा रणाजिरात् (रा० ७।३२।४८)। **अपसृष्टाः प्रयाताः । सृजिरिहाकर्मकः** ।

=**सृप् (सृप्लृ गतौ)** । न हि तत्तस्य वीरस्य हृदयादपसर्पति । धृतराष्ट्रस्य दुर्बुद्ध्या यद् वृत्तं द्यूतकारितम् (भा० आश्रम० १।२७)॥ **अपसर्पति=अपैति । अपगच्छति** । अथवा जायमानस्य यच्छीलमनु जायते । श्रूयते तन्महाराज नामृतस्यापसर्पति (भा० वन० ८।११) ॥ **नापसर्पति=नापैति=न प्रलीयते, न विनश्यति** । उत्प्रेक्षितविकारोऽपसर्पेत् (महावीर० ४)। **अपसर्पेत्=राज्यकार्यं संन्यस्य स्ववशाद् वनं प्रव्रजेदित्यर्थः** । अपासर्पद् द्वित्रिपदं किञ्चित् त्वरितविक्रमः (रा० ३।३०।२३) । **अपासर्पत्=अपाक्रामत्** । तान् (सञ्चारान्)

मन्त्रिपुरोहित·····दुर्गान्तपालाटविकेषु·····भवितत: सामर्थ्ययोगाच्चापसर्पयेत् (कौ० अ० १।१२।८)। **अपसर्पयेत्=चारयेत्**। अपसर्पणमुत्सर्पणमशितपीत-संयोगा: (वै० सू० ५।१।१७)। **अपसर्पणमात्मादीनामुत्क्रमणम्**। अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी द्विज (वि०पु०२।४।१३)। **अपसर्पिणी=अपकर्षशीला** (युगावस्था)। अपसर्पश्चर: स्पश: (अमर:)। **नायं मेऽपसर्पं ददाति=अप-सर्प्तुं नानुजानाति**। शुद्धान्तचारी दुर्मुख:, स मया पौरजानपदानपसर्पितुं प्रयुक्त: (उत्तर०१)। **पौरजानपदवृत्तमुपसृप्य निरीक्षितुं प्रणिहित इत्याह। अपसर्पितु-मित्यपभ्रंश:**। **अपसर्प इवाचरितुमित्याचारक्विबन्तादपसर्पशब्दात्तुमुंश्चेत् पौरजानपदानिति द्वितीया नोपपद्यते। तत्र सप्तम्या भाव्यम्**। **उपमानात्कर्तु: प्रातिपदिकादाचारे क्विब्विहित:। अपसर्प इवाचरतीत्यपसर्पति। केदलात्सृपे-स्तु तुमुनोऽ दुर्लभ:**।

—स्कृ (कृ विक्षेपे)। अपस्किरते वृषभो हृष्ट:। **हृष्ट: सन्भुवमुत्किरति। आलिखति। अपपूर्वो लेखने वर्तमानात्किरतेर्हर्षादिषु विषयभूतेष्वात्मनेपदं भवति, धातोश्च मुडागम:। सदपि स्वादिकर्म शब्दतो नोपादीयत इति व्यवहार: प्रायिक:**। रोधांसि धीरमपचस्करिरे महोक्षा: (शिशु० ५।६३)। **आलिलिखु:। हर्षाद्रुरुजुरित्यर्थ:**। अपस्करो रथाङ्गम् (पा० ६।१।१४६)। **अत्र चक्रभिन्नं रथस्याङ्गं ग्राह्यम्, इति स्वामी। मुकुटस्तु विप्रतिपद्यते। आह च—सामान्येन रथस्याङ्गमक्षयुगचक्रादिकमुच्यतेऽपस्कर इति। मोनियर् अप्येतन्मतम-नुप्रविष्ट:**।

—स्खल् (स्खल संचलने)। अपस्खल इव ह स हविषां यद् गार्हपत्ये श्रपयेयु: (श० ब्रा० १।७।३।२६)। **अपस्खल: खलादपभ्रष्ट: कण्डनीयोंश:**।

—स्तु (ष्टुञ् स्तुतौ)। नोत्सहन्ते महात्मानो ह्यात्मानमपस्तोतुम् (पञ्च०१)। **अपस्तोतुम् इत्यपपाठो भाति। उपस्तोतुमिति तु युज्यते। उपपूर्वस्य ष्टुञो बहुलं प्रयोगश्छन्दसि**।

—स्था (ष्ठा गतिनिवृत्तौ)। माप स्थातं महिषेवावपानात् (ऋ० १०।१०६।२)। **माऽपस्थातम्=दूरे मा स्थातम्**। यक्ष्मा अपतिष्ठन्तु (अथर्व० पि० १।४६।६)। **उक्तोर्थ:**। अप त्या अस्थुरनिरा अमीवा: (ऋ० ८।४८।११)। **अपाभूवन्नित्यर्थ:**। अपसव्यमपष्ठु च इत्यमर:। **अपतिष्ठतीत्यपष्ठु**।

—स्ना (ष्णा शौचे)। अपस्नात इवारिष्ट: प्रविवेश गृहोत्तमम् (रा०२।४२।२२)। **प्रियस्य बन्धोर्निधने सति और्ध्वदेहिकी: क्रिया: कर्तुं स्नातोऽपस्नात उच्यते। उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च (मनु०४।१३२)। अपस्नानं स्नानो-दकं स्नानशिष्टं जलम्**।

—**स्फुर् (स्फुर सञ्चलने)**। माप स्फरीः पयसा मा न आधक् (ऋ०६।६१।१४)। **स्फुरतिरेवात्र धातुः स्वरभेदेन। मा विचालीः, मा परागाः**। सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती (अथर्व० १२।१।४५)। **अपस्फुरन्ती=सहसोद्विजमाना=दोग्धुः सकाशादेकपदे प्रविचलन्ती। आ यत् पतन्त्येन्यः सुदुघा अनपस्फुराः** (अथर्व० २०।६२।७)। **उक्तोऽर्थः**।

—**स्मृ (स्मृ चिन्तायाम्)**। मुखाद् वमन् रुधिरमपस्मृतोऽसुरः (भा० पु० १०।१८।२६)। **अपस्मृतः=अन्यमनस्को मोहं गतो वा। अपस्मारः=भूतावेशः, उन्मादः, मूर्छा**।

—**हन् (हन हिंसागत्योः)**। रक्षो यत्सर्वं दुर्भूतं तत् तम इवापहन्मसि (अथर्व० ८।२।१२)। **दूरे कुर्मः**। अयं वामाद् येनेदं मनुष्याः पक्त्वाऽश्नन्त्यथ येन पुरुषं दहन्ति स (अग्निः) क्रव्याद्। एतावेवैतदुभावतोऽपहन्ति (श० ब्रा० १।२।१।४)। **अपहन्ति=पृथक् करोति**। ब्रह्मास्मदपहन्तु शमलं तमश्च (कौ० सू० ६७।८)। **उक्तोऽर्थः**। न तयोर्ज्ञानि शक्ति करोत्यपहन्ति वा (उत्तर०२।४)। **अपहन्ति= नाशयति**। रक्षांस्यपहन्त्वधिदूरमस्मत् (अथर्व० ८।७।१४)। **वैयाघ्रो मणिः प्रथमचरणोक्तोऽपहनः कर्त्ता। दूरमपहन्तु=दूरमपनयतु**। अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु (शा० ४।८)। **अपघ्नन्तः=नाशयन्तः=वारयन्तः**। न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति (छां० उ० ८।१२।१)। **अपहतिर्वारणं निवृत्तिर्वा**। अपहता असुरा रक्षांसि वेदिषदः (वा०सं०२।२६)। **अपहता दूरं गमिताः**। यः पाप्मानमपजिघांसुः स्यात् (ऐ० ब्रा० ४।४)। **अपजिघांसुः=अपनुनुत्सुः**।

—**हस् (हसे हसने)**। अवसरायत्तपेक्षो हासोऽपहासो भवति। त्वया यदपहास्यं मे श्रुत्वा (रा० २।२७।२)।

—**हा (ओहाक् त्यागे)**। यावद्ग्रामं सन्नयन्नस्कन्दयन्नापजिहीताऽपजिहीत वा (आप० ध० २।१६।५)। **नापजिहीत सव्येन पाणिना न मुञ्चेद् इत्युज्ज्वला। छान्दसमात्मनेपदम्। नेह ओहाङः प्रयोगः, अर्थासङ्गतेः**। स विललाप सगद्गदं सहजामप्यपहाय धीरताम् (रघु० ८।४३)। **अत्रापशब्दो विशेषकृन्न**।

—**हि (हि गतौ वृद्धौ च)**। भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः (भा० पु० १०।३३।४०)। **अपहिनोति=अपगमयति। अपपूर्वस्य हिनोतेरत्रैव प्रयोगः। ऋषिरिव नियोगपर्यनुयोगानर्हः स्वतन्त्र एष कविः**।

—**हृ (हृञ् हरणे)**। छायामपहरति कविरर्थं चौरः पदं कुकविः। **अपहरति=आदत्ते। स्तेनयति**। सूतस्य नृदतो वाहान् क्षुरेणापाहरच्छिरः (भा०

वन० २७१।२४) । **अपाहरत्** = **अच्छिनत्** । रुक्मदण्डां महाशक्तिं प्रेषितां सौमदत्तिना । शितेनोरगसंकाशां पत्त्रिणापजहार ताम् (भा० भीष्म० ६१।६) । **अपजहार** = **चिच्छेद, चकर्त** । शिरः कायादपाहरत् (भा०द्रोण० १६०।३०) । **उक्तोऽर्थः** । अपह्रिये खलु परिश्रमजनितया निद्रया (उत्तर० १) । **विधेयीक्रिये** = **विवशीक्रिये** । यथा नापह्रियसे सुखेन (का० शुकनासोपदेशे) । **अपह्रियसे प्रलोभ्यसे—विचाल्यसे** । योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते । स पापकृत्तमो लोके स्तेन आत्मापहारकः (मनु० ४।२५५) ॥ **आत्मापहारकः** = **स्वरूपप्रच्छादकः** । कथं वात्मापहारं करोमि (शा० १) । **उक्तोऽर्थः** । समित्कुशकुसुमापहारसंमार्जनलब्धविश्रमा । **अपहारः** = **आहरणम्** । **अस्थानेऽपशब्दप्रयोगः**। वदनमपहरन्तीं (गौरीम्) (कु० ७।६५) । **साचि कुर्वतीं तिरश्चीनं कुर्वाणमित्याह** । कर्णनासापहारेण भगिनी मे विरूपिता (रा०३।३६।१३) । **अपहारेण** = **छेदेन** । अपहारस्त्वपादानम् (वैजयन्ती) । अपहारस्त्वपचयः (अमरः) । **अपचयो हानिरिति स्वामी** । अन्नहर्ताऽऽमयाविवं मौक्यं वागपहारकः (मनु० ११।५१) । **वागपहारकः** = **वाचमपहरति स्तेनयति** = **अननुज्ञाताध्यायी, अध्ययनेऽनधिकृतः सन्यः शास्त्रं शृणोति** । अन्नमपहर्तरि आह्वरका भवन्ति श्राद्धे सिद्धे (पा० तृन् ३।२।१३५ सूत्रे वृत्तौ) । **अपहर्तारः** = **आच्छेत्तारः** = **अपलोप्तारः** ।

= **हनु** (**हनुङ् अपनयने**) । न ते सख्यमपह्नुवे (ऋ० १।१३०।४) । **अपह्नुवे** = **अपनयामि** = पराकरोमि । तेनाहिंसिषम्, इयं सुकन्या तया तेऽपह्नुवे (श० ब्रा० ४।१।५।७) । **अपह्नुवे निष्कृतिं करोमीत्यर्थः** । येन वाहनेन धावयेत् तद्विमुच्य ब्रूयात् पाययतैनत् सुहितं कुरुतेत्येष उ वाहनस्यापह्नवः (श०ब्रा० १।८।२।६) । **अत्रापह्नवेन तर्पणं प्रहर्षणमनुनयनं विवक्ष्यते** । ज्ञातं मया ते हृदयं सखे माऽपह्नवं कृथाः (कथा० १०।६२) । **माऽपलपीरित्याह** । **आत्मानं निर्वेदाय मा दा इत्येवं कथासरित्सागरस्यानुवादकोऽनुवदति** । अहं हि मात्रा जनितो भवान् स्वयं ममायुश्च वृत्तिरपह्नवस्तव (पञ्च०१।२५) । **अपह्नवः प्रेमा** । सापह्नवाः सदैवासन्पाण्डवाः पाण्डुपूर्वज (भा०भीष्म०६५।२२)। **सापह्नवाः** = **प्रच्छन्नपापाः** = **अप्रख्यातकिल्बिषाः** । तत्र तावदपह्नुते (सति) होतुरपचारादिला नाम कन्या बभूव (वि०पु०४।१।६) । **अपह्नुते** = **विपरीते संकल्पे** । कामदेवव्यपदेशेन सखीपुरतोऽपह्नुतः (रत्ना०२) । **कामोऽयमित्युक्त्वा स्वरूपापनयपुरःसरं सख्याः पुरः संनिधापित इत्यर्थः** ।

अपाङ् (अप + आङ्)

—**कृ** (**डुकृञ् करणे**) । अप द्वेषांस्या कृधि (अथर्व०१।२।२) । **अपाकृधि** = **अपाकुरु, अपगमय** । वायवः स्थोपायवः स्थेति षडवराध्यान् वत्सानपा-

करोति (आप० श्रौ० १।१।२।१)। **अपाकरणं मातृभ्यः पृथक्करणम् इति धूर्तस्वामी।** स वै पर्णशाखया वत्सानपाकरोति (तै० सं० २।५।५।५)। **अपाकरोति=उत्सारयति।** मानोन्नतिं दिशति पापमपाकरोति (भर्तृ० १)। **अपाकरोति=अपनयति=दूरं गमयति।** तन्नैश तिमिरमपाकरोति चन्द्रः (शा० ६।२०)। **तिमिरमपाकरोति=तमो हन्ति।** शिवा भुजच्छेदमपाचकार (रघु० ७।५०)। **अपाचकार=अपसारयामास।** मायामोहेन ते दैत्या वेदमार्गादपाकृताः (वि० पु० ३।१८।८)। **वेदमार्गादपाकृताः=श्रौतात्पथो दूरीकृताः।** हंसैर्यियासुभिरपाकृतमुन्मनस्कैः (मृच्छ० ५।१)। **अपाकृतम्=त्यक्तम्।** स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् (कि०२।२७)। **अपाकृता=त्यक्ता।** अपि तत् पूरयांचक्रे धनुर्धरवरो युधि। यत्तद्विनिहते भीष्मे कौरवाणामपाकृतम् (भा० द्रोण० १।५१)। **अपाकृतम्=हीनम्=न्यूनम्।** यत्स्वयमभियोगदुःखैरसाधारणैरपाकृतं तदेव राज्यं सुखयति (मुद्रा० १)। **अपाकृतम्=शून्यम्=विनाकृतम्।** अपाकृतकटीपटः (राजत० ५।४१६)। **अवरोपितकटीवस्त्र इत्याह।** ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् (मनु०६।३५)। **अपाकृत्य=विगणय्य, निर्गत्य, संशोध्य।** नाचार्यस्यानपाकृत्य प्रवासं प्राज्ञः कुर्वीत···(भा०उ०४४।१५)। **विद्याया निष्क्रयार्थमृणमर्थदानेनापरिहृत्येत्याह।** स (पुत्रः) कथं शक्यतेऽस्माभिरपाकर्तुं बलादितः (भा० आदि० १४२।६)। **उक्तोऽर्थः।** संसृज्य वत्सान् पुनरपाकरणम् (का० श्रौ० ४।२।३५)। **अपाकरणं पृथक्करणम्।** पुरा वत्सानामपाकर्तोरास्ते (पा० ३।४।१६ सूत्रवृत्तौ)। वर्णः स्वर्णमपाकरिष्णुः (भर्तृ० १।५)। **अपाकरणं हरणमाक्षेपो भवति। वर्णः स्वर्णवर्णं न्यक्करोतीति यावत्।**

—**कृष्** (**कृष विलेखने**)। विप्रकारमपाकृष्टुं राक्षसैर्भवतामिमम् (रा० ३।६।२३)। **विप्रकारः खलीकरणं कदर्थीकरणं वा। अपाकृष्टुमपनेतुम्।** तमशक्यमपाकृष्टुं निर्देशात् स्वर्गिणः पितुः (रा०)। न हि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात्। नरः शक्नोत्यपाकृष्टुम् (रा० २।१७।६)। **अपाकृष्टुम्=संहर्तुम्।** महान्तमप्यर्थमधर्मयुक्तं सन्त्यजत्यनपाकृष्ट एव (भा०उ० ४०।२)। **अनपाकृष्टः=परैरपकर्षमप्रापितः।**

—**कॄ** (**कॄ विक्षेपे**)। कुन्त्या त्वमपाकीर्णो यथा न कुशलं तथा (भा०उ० १५१।४)। **अपाकीर्णः=परास्तः, परित्यक्तः।** गता ह्यस्मानपाकीर्य सर्वे द्वैतवनात् (भा० वि० ४।५)। **अपाकीर्य=अनादृत्य=अतिहाय। अपाहायेति पाठान्तरम्।** अपाकीर्य स्वयं धर्मं शिष्येण निहतो गुरुः (भा० द्रोण० १६६।४३)। **अपाकीर्य=अवहेल्य=अवहेलया समुत्सृज्य।** षट्पदैर्नाप्यपाकीर्णस्त-

स्मिन्वै काननेऽभवत् (पादपः) (भा०आदि०७०।७) । **तदप्यपाकीर्णम्** (कु० ५।२८) । **तुच्छीकृत्य परित्यक्तमित्यर्थः** ।

—**क्रम्** (**क्रमु पादविक्षेपे**) । शरपातमपाक्रम्य तस्थतुः प्रेक्षिके (सेने) तदा (भा० कर्ण० २४।२८) । **शरपातादपेत्येत्याह** ।

—**दा** (**डुदाञ् दाने**) । अथापादत्ते (श० ब्रा० ७।८।२।६) । (ततो भस्मनः) किञ्चिद् उपादत्ते । **अपशब्दः पृथक्करणमाह** । अथ दर्भाणामपादत्ते (कौ०सू०) । **दर्भेभ्यः कियतश्चिदपोद्धरति** । तत्पाप्मानमपादत्ते (श० ब्रा० ५।३।१।१३) । **पापं वियुङ्क्ते वियौतीत्याह** । विष्णोः स्तूपोऽसीति कर्षन्निवाहवनीयं प्रति प्रस्तरमपादत्ते (आप० श्रौ० २।३।८।५) । **अपादत्ते उद्धहति=प्रणयति** । अपात्ताः प्रथमे पिण्डा भवन्त्यप्रतिहताः पाणयः (आप० श्रौ० ५।१।५।१०) । **अपात्ताः=गृहीताः** । स यत्र प्रस्वपिति अस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं निहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति (बृ० उ० ४।३।९) । **अपादाय=अपच्छिद्य गृहीत्वा** (शङ्करः) । मृत्पिण्डमपादाय महावीरं करोति (श० ब्रा० १४।१।२।१७) । **उक्तोऽर्थः** ।

—**धा** (**डुधाञ् धारणपोषणयोः**) । नेत् प्राणेभ्य आत्मानमपादधानि (शां० ब्रा० १७।७) । **अपवृक्तं वियुक्तं करोमीत्यर्थः** ।

—**नुद्** (**णुद प्रेरणे**) । अभिद्रवार्जुन क्षिप्रं, कुरून्द्रोणादपानुद (भा० द्रोण० १८९।६४) । **अपानुद=दूरे प्रेरय । वियोजयेत्याह । छन्दोवशादेवायमपाङोः सम्प्रयोग इत्यन्तर्वाणयः । अन्यथाऽपमेव केवलं प्रयुञ्जीत** । पुरन्दरस्य कर्ण त्वं बुद्धिमेतामपानुद (भा० वन ३०१।१५) । **अपाकुर्वित्याह** । गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत् (मनु० ११।१०२) । **गुरुस्त्रीगमननिमित्तं पापमेतैर्व्रतैर् निर्हरेदित्याह** ।

—**लम्ब्** (**लबि अवस्रंसने**) । अथ पश्चात् परिक्रम्य अपालम्बमभिपद्याह (श० ब्रा० ३।३।४।१३) । **शकटस्य पश्चाल्लम्बमानं काष्ठमपालम्बः । अपशब्दः पश्चाद्भावमाह** ।

—**वृ** (**वृञ् वरणे**) । राधो विश्वा शवसे अपावृतम् (ऋ० १।५७।१) । **अपावृतम्=विवृतम् । वेदे वृधातुप्रयोगेऽपशब्द एवान्यायाममापद्यते छन्दोवशादिति वेदवाक्कोविदाः** । आस्यादपावृतात् (भा० आदि० २९।२) । अहो अपावृतं द्वारमापदां मम वेधसा (कथा० २१।११८) । **उक्तोऽर्थः** । स्वतन्त्रोऽपावृतः स्वैरी (अमरः) । स ऊर्वस्य रेजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा (ऋ० ८।६६।३) । **अपावृतिः=गुप्तिस्थानम्** । काश्मीरदेशाय जगाम हृष्टः श्रीशङ्करो

द्वारमपावरीतुम् (शं० दिग्० १६।५।५८)। अपावृत्याक्षिपद् वक्त्रे शक्रं कोपसमन्वितः (भा० उ० ६।५२)। (मुखं) सम्प्रसार्येत्याह। हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये (ईश० उ० १५)। **उक्तोर्थः**। मञ्जूषां तामपावृत्य (रा० १।६७।१३)। **अपावृत्य=उद्घाटय**।

—वृत् (वृतु वर्तने)। अप चक्रा अवृत्सत (शां० श्रौ० ५।१३।३)। **अपावृत्सत=अपावर्तिषत=पराचीनानि पृथगभूवन्**। अपावृत्य गार्हपत्यात् क्रव्यादाः प्रेत (अथर्व० १२।२।३४)। **अपावृत्य=प्रतिनिवृत्य**। प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचित् (भा० वन० ८२।१०)। **अपावृत्तः=निवृत्तः, उपरतः**। तां तु मे सुकृतां बुद्धिं...। कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूम् (रा० २।१२।६४)॥ **अपावृत्ताम्=पराभूतां सतीं निवृत्ताम्**।

—श्रि (श्रिञ् सेवायाम्)। परस्परं केचिदापाश्रयन्ते (रा०)। **अपाश्रयन्ते=संश्रयन्ते। अत्रापशब्दोऽस्थाने भाति नः। अन्येऽप्येवं पश्यन्ति। परमेष व्यवहारः प्रतिष्ठितो भवति। न च सर्वो व्यवहार उपपत्तिमान्भवति, अनुपपन्नोपि कश्चिदस्तीति वस्तुस्थितिः**। अनपाश्रितीऽन्यत्र (आप० ध०१।६।१७)। **कुड्याद्याश्रितो नासीतेत्यर्थः**। अपाश्रितार्भकाश्वत्थम् (भा०पु०३।४।८)। **पृष्ठत आश्रितो बालोऽश्वत्थो येन तम्**। महात्मा सर्वतो दान्तः सर्वत्रैवानपाश्रितः (भा० शां०२७८।१६)। **अनपाश्रितः सङ्गमकुर्वाणः**। नीचापाश्रयविनिहितैकोपबर्हायां पर्यङ्किकायां निपत्य जोषमास्थात् (हर्ष० ६)। **अपाश्रयो नाम पर्यङ्कस्योर्ध्वदेशो यं शीर्षं श्रयते**। कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम्। मत्तालम्बोपाश्रयः स्यात् प्रग्रीवो मत्तवारणः॥ (इत्यमरोद्घाटने क्षीरोद्धृतः कोषः)। अपाश्रयस्तु विद्वद्भिः कथ्यते मत्तवारण इति हलायुधः। योपाश्रयः पाण्डवानाम् (भा० उ० ६०।३४)। **अपाश्रयः शरणम्**। कर्णे कृतापाश्रयः (वेणी० ५।१)। **अपाश्रयः=आश्रयः**। दुर्योधनापाश्रयजन्तदर्पः (भा० वि० ५४।५, कर्ण० ८५।३४)। तद्भुक्तास्तद्गृहा राजंस्तद्बलास्तदपाश्रयाः (भा० अनु० २३।५१)। **अपाश्रयः परलोकगमनसाधनम् इति नीलकण्ठः**। अपाश्रयो वितानमुल्लोच इति कोषः। आहारमनपाश्रित्य शरीरस्येव धारणम् (भा० आदि० २।३७)। **अनपाश्रित्य=अनाश्रित्य**।

अपाति (अप+अति)

—इ (इण् गतौ)। पुनर्मृत्युमपात्येति (गो० ब्रा० पूर्व० १।१५)। **नार्थोऽपेन**।

अपोद् (अप+उद्)

—इ (इण् गतौ)। इमान् यवानहिंसन्तो अपोदित (अथर्व० ६।५०।२)। **अपोदित=अपक्रामत=अपेत**।

—कृष् (कृष विलेखने)। मूलानि च प्रान्तानि चापोत्कृष्य (कौ० सू० १०)। **अपोत्कृष्य**=व्याकृत्य=पृथक् कृत्वा। यदनो वाह्यं स्यात्पूर्वं तं प्रवहेयुरप वोद्धरेयुः (आप०श्रौ०६।८।२८।४)। **अपोद्धरेयुः**=अन्यत्र स्थापयेयुः। तस्मा इदं सर्वमाद्यं करोति ब्राह्मणमेवापोद्धरति, तस्माद् ब्राह्मणोऽनाद्यः (श० ब्रा० ५।४।२।३)। **अपोद्धरति**=पृथक् करोति=व्यावर्तयति। अनपोद्धार्या आहुतयो भवन्ति। स यद्धैतासामपोद्धरेत् (श० ब्रा० ११।१।६।३४)। **हविषामनिर्वापोऽपोद्धारः, हविर्वानि प्रमाद इत्यर्थः**। द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधा ऽपि वा। ओद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् (वा०प०३।१।१)। **अपोद्धृत्य**=प्रविभज्य।

अपनि

—अस् (असु क्षेपे)। अपन्यस्तम् (भा० शल्य०५७।६६)। **परावृत्य पृष्ठतः कृतेन हस्तेन शत्रोस्ताडनमपन्यस्तमुच्यत इति नीलकण्ठः**।

—धा (डुधाञ् धारणपोषणयोः)। प्रह्लादो ह वै कायाधवो विरोचनं स्वं पुत्रमपन्यधत्त नेदेनं देवा अहनन्निति (तै० ब्रा० १।५।६।१)। **अपन्यधत्त**=अगोपायत्=प्राच्छादयत्। अथ ते शिरश्छित्त्वा ऽन्यत्रापनिधास्यावः (श० ब्रा० १४।१।१।२३)। **गूहिष्याम इत्याह**। अप त्वद् यक्ष्मं निदध्मसि (अथर्व० ८।१।२१)। **अपनिदध्मसि**=वारयामः। एवमु कृत्स्नमेवाग्निमपनिहितमाधत्ते (श० ब्रा० २।२।१।१५)। **अपनिहितो विसृष्टः**।

—ली (लीङ् श्लेषणे)। तदेवापि देवा अपन्यलयन्त (श० ब्रा० ४।१।३।१)। **न्यह्नुवतेत्याह**।

अपनिर्

—अय् (अय गतौ)। पराजितासो अपनिलयन्ताम् (अथर्व० ४।३१।७)। **अपक्रम्य प्रच्छन्नं वर्तन्ताम् इत्यर्थः**।

अपपरा

—इ (इण् गतौ)। अभागः सन्नप परेतो अस्मि (अथर्व० ४।३२।५)। **अपपरेतः**=अपक्रम्य परागतः।

अपपर्याङ् (अप+परि+आङ्)

—वृत् (वृतु वर्तने)। नाग्नेरपपर्यावर्तेत (आप० श्रौ० १०।४।१५।४३)। **पार्श्वेन पृष्ठतोऽग्नेः करणम् अपपर्यावर्तनम्**। नापपर्यावर्तेत गुरोः (आप० ध० १।२।७।२)। **प्रदक्षिणीकृत्यापेयात्, अपसव्यं न पर्यावर्तेत परिक्रामेदित्याह**।

अपप्र

—इ (इण् गतौ)। अपास्मात् प्रेयात् (ऋ० १०।११७।४)। **अस्मादपृणतः सख्युरपेयादर्थो। तत्सन्निधिं संत्यज्यान्यत्र गच्छेदित्याह।** तेऽसदमूषिवांसो ऽपप्रयन्ति (श० ब्रा० १२।४।४।७)। **दूरं प्रस्थिता भवन्तीत्यर्थः।** विश्वे देवा अग्निहोत्रं जुह्वतो गृहानागच्छन्ति स यस्यानुद्धृतमागच्छन्ति तस्माद् देवा अपप्रयन्ति (श० ब्रा० २।३।१।७)। **अपहाय प्रतिष्ठन्त इत्याह।**

—जन् (जनी प्रादुर्भावे)। स्त्रीणामपप्रजातानाम् (सुश्रुते उत्तर० ३६।७४)। **अपप्रजाता=अवतोका।**

अपव्याङ् (अप+वि+आङ्

—हृ (हृञ् हरणे)। अनपव्याहरन्तः प्रचरन्ति (आप० श्रौ० २।५।१६।१)। **मन्त्रादन्यस्य वचनमपव्याहारः। तमवदानादिप्रदानान्तं न ब्रूयुः प्रचरितारः।**

सम्

—अञ्ज् (अञ्ज गतिक्षेपणयोः)। क्षामेव नः समजतं रजांसि (ऋ० २।३६।७)। (हे अश्विनौ) **समजतम् युगपत् प्रेरयतम्।** समाजमिव तच्चित्रं प्रेक्षमाणा महारथाः (भा० द्रोण० १३२।३४)। **समाज इह रङ्गः। समजन्ति सङ्गच्छन्ते लोका अत्रेति। अधिकरणे घञ्। अन्यत्र समाजो ब्राह्मणादीनां समवायः, इह समवायिनामाश्रयविशेषो नाटचशाला।**

—अञ्च् (अञ्चु गतिपूजनयोः)। पशुरङ्गानि सं चाञ्चति प्र च सारयति (श० ब्रा० ८।१।४।७)। **समञ्चति संकोचयति।** अथातः समञ्चनप्रसारणस्यैव (श० ब्रा० ८।१।४।७)। **समञ्चनम्=संकोचनम्।** समक्नौ शकुनेः पादौ (८।२।४८ सूत्रे वृत्तावुदाहरणम्)। अङ्गुलीः समच्य (श० ब्रा० ३।३।२।१४ इत्यत्र भाष्ये)। **अङ्गुलीः समम् आभुज्येत्याह।**

—अञ्ज्(अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु)। अञ्जते व्यञ्जते समञ्जते(अथर्व० १८।३।१८)। **समञ्जते=समञ्जन्ति=सम्यग् अञ्जन्ति।** देवान्यजन्तावृतुथा समञ्जतः (ऋ० २।३।७)। समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ (ऋ० १०।८५।४७)। **समञ्जन्तु=संयुञ्जन्तु=सम्पृञ्चन्तु।** अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा समञ्जे (ऋ० १।६१।५, अथर्व० २०।३५।५)। **समञ्जे=संगतं करोमि।**

—अत् (अत सातत्यगमने)। अयमु ते समतसि कपोत इव गर्भधिम् (ऋ० १।३०।४)। **समतसि=संगच्छसि।**

—**अद्** (**अद भक्षणे**)। समदन्त्यामिषं गाः (भट्टि० १८।१२)। **समं भक्षयन्ति, साकमभ्यवहरन्तीत्याह**।

—**अन्** (**अन प्राणने**)। अद्या ममार स ह्यः समान (ऋ० १०।५५।५)। **समानेत्यनितेः समुपसृष्टस्य लिटि प्रथमैकवचने रूपम्। जिजीव, जीवितं लेभे श्वसनमापेत्यर्थः**।

—**अम्** (**अम गत्यादिषु, आदिशब्देन शब्दसम्भक्त्योर्ग्रहः**)। एतद्ध देवा भूयः समामिरे तथो एवैतत् सममन्त (श० ब्रा० ३।४।२।१३)। **सममन्त= ऐकमत्यमानशिर इत्यर्थः**।

—**अय्** (**अय गतौ**)। यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् (ऋ०७।८३।२)। **समयन्ते=संगच्छन्ते (युयुत्सया)। यज्ञस्य विद्वान् समये न धीरः** (अथर्व० २।३५।३)। **समयन्ते संगच्छन्ते योद्धारोऽत्रेति समयः सङ्ग्रामः**।

—**अर्थ्** (**अर्थ उपयाच्ञायाम्**)। अस्मभ्यं तद्वसो दानाय राधः **समर्थयस्व** (ऋ०२।१३।१३)। **समर्थयस्व=कल्पयस्व=घटय**। यदीये सम्प्रहारे स्मिन्वीरपानं समर्थ्यताम् (रा० ४।६।७२)। द्विषेतां समभिक्रुद्धावेतदेकं **समर्थयेः** (भा०आश्व०७।२०)। **समर्थयेः=चिन्तयेः**। अपत्योत्पादने यत्नमापदि **समर्थय** (भा० आदि० १२०।२७)। **उक्तोऽर्थः**। असिस्तव तपःस्थस्य न **समर्थयते** शमम् (कि० ११।१७)। **समर्थयते=संभावयति**। अनुपयुक्तमिवात्मानं समर्थये (शा०)। **मन्ये इत्यर्थः**। उभयमप्यपरितोषं समर्थये (=**मन्ये**)। स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा तथैव **समर्थितवान्** (पञ्चत०)। **तत्तथैवेत्यभ्युपगतवान् इत्यर्थः**। मम वृत्तं च शीलं च तेन सर्वं **समर्थितम्** (रा०६।१०१।१७)। **समर्थितं विमृष्टम्, साध्वालोचितम्**। यथा मन्त्रिभिः सह समर्थितं तथा परिणमति (स्वप्न० १)। **समर्थितम्=मन्त्रितम्**। कामचारश्च वतिनिर्देशे समर्थयितुम् (१।१।५६ सूत्रे भाष्ये)। **समर्थयितुम्=कल्पयितुम्**। तेन हि समर्थयितुमिच्छामि (पञ्चत० १)। समर्थनासु सर्वासु हितं च प्रियमेव च (भा०वि०४।२४)। **समर्थनासु कार्याकार्यपरीक्षासु**। समर्थनां मे पृष्टा त्वं प्रयच्छ शुचिलापिनि (हरि० २।६२।४३)। **समर्थनाम्=कार्यघटनोपायम्**। रात्रौ भवत्येषा नित्यमेव समर्थना (भा०द्रोण०१८२।२०)। **समर्थना=चिन्ता**। किं समर्थं जनस्यास्य (रा० २।)। **समर्थं युक्तम्**। **समर्थः पदविधिः** (पा० २।१।१)। **समर्थः संगतः संसृष्टः**। किं मे जीवितसामर्थ्यं प्रवेक्ष्यामि हुताशनम् (रा० २।७७।१७)। **सामर्थ्यम्=साफल्यम्**।

—अश् (अशू व्याप्तौ संघाते च) समश्नुते मे लघिमानमात्मा (रघु० १३।३७)। **समश्नुते=प्राप्नोति।**...पृच्छ्यमाना सखीयते। सं घीतमश्नुतं नरा...(ऋ० ८।४०।३)॥ **इतोभिमुखमागच्छतम् इत्याह।**

—अस् (असु क्षेपे)। मह्यं त्वा मित्रावरुणौ मह्यं देवी सरस्वती। मह्यं मध्यं भूम्या उभावन्तौ समस्यताम् (अथर्व०६।८६।३)। **समस्यताम्=संयुनक्तु। सम्पूर्वादस्यतेर्लोटि प्रथमैकवचने रूपम्। अस्यत्यूह्योर्वा वचनमित्यात्मनेपदम्। त्वेति जायामाह।** तं (रज्जुं) सप्तधा समस्यति (श० ब्रा० १०।२।३।८)। **सप्त समप्रविभागान्कृत्वा संयोजयति।** तस्मात्पुमानूरू समस्यति (ऐ०ब्रा०२।३५)। **पुमान् शयान उपरि स्वावरू श्लेषयति इति षड्गुरुशिष्यः।** प्रेदं ब्रह्म प्रेदं क्षत्रम् इत्येते एव समस्येद् ब्रह्मक्षत्रयोः संश्रित्यै (ऐ०ब्रा०३।११)। **समस्येत्=मेलयेत्।** न निविदः पदे समस्येत् (ऐ० ब्रा० ३।११)। **समासोऽनवसायोच्चारणमिति षड्गुरुशिष्यः।** समस्यन्तौ चापि शराननेकान् (भा० कर्ण० ६०।८)। **क्षिपन्ता-वित्यर्थः।** तत्र तत्र समासेन (हरि० १।१।१४)। उल्काविद्युत्समासे त्रिरात्रम् (व० ध० १३।६) **समासः=संनिपातः।** अनसूयासमस्यामप्यङ्गरागस्य चार्पणम् (रा० १।३।१८)। समस्या=सङ्गतिः।

—आप् (आप्लृ व्याप्तौ)। तं समाप्नोति जूतिभिः (अथर्व० १३।२।१५)। **समाप्नोति=आसादयति।** तत्र लोकान्तसमाप्नोति ये दिव्या ये च पार्थिवाः (अथर्व०६।५।१५)। अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ (याज्ञ०१।६४)। **उक्तोऽर्थः।** यस्माल्लोकात्परमेष्ठी समाप (अथर्व० १२।३।४५)। **सम्यगाप्तवान्।** न हि दुःखं समाप्नोपि सैरन्ध्री यदुपाश्नुते (भा० वि० २४।२२)। तां परित्यज्य सद्यो वा विघातं न समाप्नुयाः (अवदा० जा० १३।२७)। **समाप्नुयाः=प्राप्नु-याः।** देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु। अददद्धि समवाप्नोति किल्बिषं यस्य तस्य तत् (याज्ञ० २।३६)॥ **उक्तोऽर्थः।** सर्वं समाप्नोपि ततोसि सर्वः (गीता)। **समाप्नोषि=व्याप्नोषि।** यदि मे वक्ष्यति समाप्स्यामि (श०ब्रा० ११।८।४।२)। **समाप्स्यामि=आप्तकामः समृद्धमनोरथो भविष्यामि।** अहरहर्दद्यादोदपात्रात्तथैतं मनुष्ययज्ञं समाप्नोति (श०ब्रा० ११।५।६।२)। **समाप्नोति=समर्प्ति नयति।** ज्वलितां वा सूमिं परिष्वज्य समाप्नुयात् (आप०ध० १।२५।२)। **समाप्नुयात् =म्रियेत।** सैनं स्वर्गं लोकं समापयति (श०ब्रा०२।३।३।१६)। **प्रापयतीत्याह।** नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः। मदात्कपि ते कपयः... (रा० ५।६१।२४)॥ **समापयन्तो मृतकल्पं कुर्वन्तः।** स च राजा नरश्रेष्ठ यज्ञस्य समाप्तवान्। फलं बहुगुणं राम...(रा० १।६२।२७)। **समाप्तवान्= सम्यगाप्तवान्।** ईजे च क्रतुभिः पुण्यैः समाप्तवरदक्षिणैः (भा० द्रोण० ७१। १०)। ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणः (हरि० १।४१।५४)। **उभयत्र**

समाप्तशब्दः पर्याप्तवचनः। राद्धिः प्राप्तिः समाप्तिः (अथर्व० ११।६।२२)। **समाप्तिः सम्प्रगाप्तिः**। एतस्य लोकस्य समाप्तये (गो० ब्रा० पूर्व० २।२४)। **समाप्तये** = प्राप्तये। ओदनेन यज्ञवचः सर्वे लोकाः समाप्याः (अथर्व० ११।३।१६)। **यज्ञवचः** = **यज्ञे नोच्यमानाः**। **समाप्याः** = **प्राप्याः**।

—**आस्** (**आस उपवेशने**)। यत्रा नरः समासते सुजाताः (ऋ० ७।१।४)। **समासते** = **सह आसते**। इमे च ते सूर्यसमानवर्चसः समासते वृत्रहणः क्रतुं यथा (भा० आदि० ५५।८)। **उक्तोऽर्थः**। प्रत्युवाच समासीनं वसिष्ठम् (रा० २।१११।८)। **समासीनम्** = **आसीनम्**। **सम्शब्दोऽकिञ्चित्करः**। ते ह वैश्वानरे समासत। तेषां न समियाय (श०ब्रा०१०।६।१।१)। **वैश्वानर इति वैश्वानर-विषये विचारणां प्रवर्तयितुं समासीना न च तत्र निश्चयं गता इत्यर्थः**। सत्यं सन्तः समासते (भा० शां० १६३।१२)। **आसादयन्तीत्याह**। मत्समो यदि सङ्ग्रामे शरासनधरः क्वचित्। विद्यते तं समाचक्ष्व यः समासीत मां मृधे (भा० आश्व० २६।६)। **समासीत** = **मदभिमुखं तिष्ठेत्, मया विगृह्णीयात्**। एकैकश्चौघबलानिमान् पुरुषसत्तमान्। कोऽन्यः समासेत (=समासीत) कालान्तकयमादते (भा० वन० ३१३।२७)॥ **उक्तोऽर्थः**। कस्तान् युधि समासीत जरामरणवान्नरः (भा० वन० १०।२७)। **विरुन्धीत विगृह्णीतेत्याह**। न नागा न च गन्धर्वाः...तव राम रणे शक्ताः शरवेगं समासितुम् (रा० ५।३६।५०)। **समासितुम्** = **प्रतिग्रहीतुम्** = **रोद्धुम्**। यूयं सर्वे सुरसमा येन युद्धे समासिताः (भा०स्वर्गा० १।१४)। **समासिताः** = **समासन्नाः** = **कृतसमागमाः**। त्रिदशाऽपि समुद्युक्ता नालं भीमं समासितुम् (भा० भीष्म० ११७।२६)। **समासितुम्** = **अभिमुखे स्थातुम्**। **तं पर्यवस्थातुं वा**।

—**इ** (**इण् गतौ**)। त्वष्टा दुहित्रे वहतुं कृणोतीदं विश्वं भुवनं समेति (ऋ० १०।१७।१)। **समेति** = **समवैति** = **संवर्तते** = **एकीभवति**। रघुराप्तैः समियाय योगिभिः। **समियाय** = **संजग्मे**। ते ह वैश्वानरे समासत तेषां ह वैश्वानरे न समियाय (श०ब्रा०१०।६।१।१)। **न समियाय निश्चयो न बभूव। ते तत्र व्यवसितिं न लेभिरे**। पार्थाः समेष्यन्त्यथ याज्ञसेन्या (भा० वन० २६६।१६)। **सम्मेलिष्यन्तीत्याह**। नाहं त्वया समेष्यामि वृत्तो हेतुः समागमे (भा० शां० १३८।१७२)। **समेष्यामि** = **उपैष्यामि** = **उपसर्प्स्यामि त्वया सङ्गन्ताहे**। यथा कृतायविजितायाधरेऽयाः संयन्ति (छां० उ० ४।१।४)। **संयन्ति** = **सङ्गच्छन्ते** = **अन्तर्भवन्ति** = **मान्ति**। यद्ध क्षुमन्तः शवसा समायन्(ऋ० १०।३१।५)। **समायन्** = **समागच्छन्** = **सम्प्राप्ताः**। ततः सुमन्त्रेण गुहेन चैव समीयतू राजसुतावरण्ये (रा० २।६६।४१)। **समीयतुः** = **संजग्माते** = **संगतौ**। परं समगात्स्वधाम (भा० पु० ६।२४।६६)। ऐश्वरं समगात्पदम्

(भा० पु० ४।३१।२७)। **उभयत्र प्रापदित्यर्थः**। तस्मिन्निदं सं च वि चैति सर्वम् (वा० सं० ३२।८)। **समेति=अभिसंविशति=अप्येति**। काममङ्गानि मे सीते दुनोतु मकरध्वजः। न त्वामकामां सुश्रोणि समेष्ये (भा० वन० २८१।२७)। **त्वया मिथुनीभविष्यामि, त्वां संवेक्ष्यामि, त्वयि व्यवायी भविष्यामीत्याह। समेष्य इत्यत्रात्मनेपदमार्षम्**। तौ मिथुनं समैताम् (श० ब्रा० १४।४।३।१६)। **मिथुनीभावमगच्छताम्**। मार्जारा द्वीपिभिः सार्धं शूकराश्च इवभिः सह। विनर्यो राक्षसैश्चैव समीयुर्मानुषैः सह (रा० ६।११।४०)॥ **उक्तोऽर्थः**। यावतीभिश्च समियात्तावत्यो गर्भमाप्नुयुः (का० सं० कल्प० लशुन० श्लो० २४)। **समियात्=संगच्छेत, मैथुन्यमाचरेत्**। महित्वेभिर्यतमानौ समीयतुः (ऋ० १०।११३।७)। **समीयतुः=सङ्ग्रामयाञ्चक्राते। सम्पूर्वस्येणो योधनमर्थः समित्समितिशब्दयोस्तदर्थस्य दर्शनात्। आह चामरः—समित्याजिसमिद्युधः**। समीयतू रणे यत्तौ तावुभौ पुरुषर्षभौ (भा० भीष्म० १०२।१)। **उक्तोऽर्थः**। कम्बोजै हि समेष्यामि तीक्ष्णराशीविषोपमैः (भा० द्रोण० ११२।४८)। यान्समेष्यामि समरे न तु कुन्तीसुतान्नृप (भा० उ० १७२।२१)। **इहैतिः सोपसर्गकः सकर्मकः**। सिकता इव संयन्ति रश्मिभिः समुदीरिताः (तै० आ० १।२७।५)। **संयन्ति सम्पृक्ता भवन्ति, एकीभवन्तीत्यर्थः**। यं क्रन्दसी संयती विह्वयेते (ऋ० २।१२।८)। **संयती=संगच्छमाने युयुत्सया समवयत्यौ देवमनुष्यसेने। विह्वयेते विविधं ह्वयेते**। समीयतुस्तदाऽन्योन्यं परस्परवधैषिणौ (भा० शल्य० १४।२३)। **समीयतुः=युयुधाते**। अन्यत्र वधकालात्ते सदृशेन समीयुषः (भा० शां० ३।३१)। **समीयुषः=युध्यमानस्य। समिणः क्वसौ रूपम्**।

—**इङ्ग् (इगि गतौ)**। यथा वातः पुष्करिणीं समिङ्गयति सर्वतः। एवा ते गर्भ एजतु (ऋ० ५।७८।७)। **समिङ्गयति=मन्दमन्दं नुदति**।

—**ईक्ष् (ईक्ष दर्शने)**। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे (वा० सं० ३६।१८)। **इह समशब्दोऽर्थं विशेषं न करोति**। तव मुहृत्...तव मार्गं समीक्षमाणस्तिष्ठति (पञ्चत०)। **प्रतीक्षमाण इत्याह**। समीक्षध्वं महारण्ये देशम्...यत्रेमाः शरदः सुखं प्रतिवसेमहि (भा०)। **समीक्षध्वम्=अन्विष्यत, मृगयध्वम्**। भोजयन्ति किल श्राद्धे केचित्त्वानेव बान्धवान्। ततः पश्चात् समीक्षन्ते कृतकार्यान् द्विजर्षभान् (रा० २।६१।१२)॥ **समीक्षन्ते=विचारयन्ति भोजयितुम्**। न त्वां समीक्षते पार्थो नापि राजा युधिष्ठिरः (भा० उ० १६२।६३)। **समीक्षते=गणयति**। स हि राजगुणैर्युक्तो युवराजः समीक्षितः। (रा० २।४५।१९)। **समीक्षितः=निश्चितः**। अभिषेकं न जानामि योऽभूद्राज्ञः समीक्षितः (रा० २।७५।३)। **समीक्षितः=चिन्तितः**। समीक्षा यादृशी ह्यस्य पाण्ड-

वान्प्रति भारत (भा० वन० ८।८)। **समीक्षा विचारपूर्विका बुद्धिः**। तत्राप-राणि दारूणि संमृज्यन्ते परस्परम्। तृणकाष्ठकरीषाणि कदाचिन्न समीक्षया (भा० शां० २६२।२३)॥ **उक्तोऽर्थः**। यदि त्वरेत गुरोः समीक्षायां स्वाध्याय-मधीत्य कामं गच्छेत् (आप० ध० २।५।३)। **समीक्षायां सन्दर्शने**। **गुरुचक्षु-विषयमनतिक्रम्य स्थितः सन्नित्याह**। रत्नावतंसाः कुलटाः समीक्ष्य किमार्य-नार्यः कुलटा भवन्ति (**सुभाषितम्**)। **समीक्ष्य=दृष्ट्वा**। समीक्ष्य कामात् सुग्रीवं मन्दं धर्मार्थसङ्ग्रहे (रा० ४।२८।१)। **समीक्ष्य=उपलभ्य=विज्ञाय**। एवमार्य समीक्ष्य त्वं प्रीतो भवितुमर्हसि (रा०५।७३।६१)। **समीक्ष्य=परीक्ष्य=विमृश्य**। उचितमेवैतन्ममासमीक्ष्यकारिणः (हित०)। **असमीक्ष्यकारी=अवि-मृश्यकारी**। **कार्याकार्ये इष्टानिष्टे अगणयित्वा यः प्रवर्तते स एवमुच्यते। समीक्ष्यं साङ्ख्यं भवति तथा च माघे प्रयोगः**—फलभाजि समीक्ष्योक्ते बुद्धे-र्भोग इवात्मनि (५।५६)।

—**ईर्** (**ईर गतौ**)। ते होचुर्देवाः। म्लानोऽयं पिता मयोभूः। पुनरिमं समीर्योत्थापयामेति (गो० ब्रा० उ० ४।१२)। **समीर्य=वीजयित्वा**।

—**उक्ष्** (**उक्ष सेचने**)। समौक्षत गुडाकेशं शैलं नीलमिवाम्बुदः। अग्रहस्त-प्रमुक्तेन शीकरेण स नागराट् (भा० आश्व० ७६।७)। **समौक्षत=समौक्षत्=अभ्यषिञ्चत्**। समुक्षितं सुतं सोमम् (ऋ० ३।६०।५)। **उक्तोऽर्थः**।

—**उच्** (**उच समवाये**)। उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि (ऋ० ५।८१।४)। **समुच्यसि=संगच्छसे**। समन्धसा मदेषु वा उवोच (इन्द्रः) (ऋ० ७।२०।४)। **इन्द्रो मदेषु मदनिमित्तेष्वन्धसा सोम-लक्षणेनान्नेन समुवोच समवैति, समवायं सङ्गतिं कामयत इत्याह**।

—**उब्ज्** (**उब्ज आर्जवे**)। वरुणेन समुब्जितां मित्रः प्रातर्व्युब्जतु (अथर्व० ६।३।१८)। **व्युब्जतु=अपावृणोतु**।

—**उष्** (**उष दाहे**)। तदुभयतोऽग्निशिखे समोषन्त्यौ तिष्ठतः (श० ब्रा० १।६।३।२)। **समोषन्त्यौ ज्वलन्त्यौ**। **ओषतिरिहाकर्मकः**।

—**ऊह्** (**ऊह वितर्के**)। यद् गव्यन्ता द्वा जना स्वर्यन्ता समूहसि (ऋ० १।१३१।३)। यतस्तपः समूहसि। **उभयत्र समानयसि संगमयसीत्यर्थः**। **तपः समूहसीति तपः संहतं करोषीति वरीयो व्याख्यानम्**। समूहन्त्यग्न्यगारमुपलिम्प-न्त्यायतनानि (आप० श्रौ० १।२।६।१०)। **समूहन्ति संमृजन्ति। समूहनी संमार्जनी भवति**। पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजः (ईश० उ० १६)। **समूह=एकीकुरु=संहतं कुरु**। कर्णश्रवेऽनिले रात्रौ दिवा पांसु-

समूहने (मनु० ४।१०२)। **पांसुसमूहनेऽनिले=धूलिपटलोत्सारणसमर्थे वायौ।** समुह्य स्वां महामानी तदानीमेव येदिलः। पृतनां प्रेषयामास...(शि० भा० ८।३५)॥ **समुह्य=संनिपात्य।** समिद्धमग्निं पाणिना परिसमूहेन्न समूहिन्या (आप० ध० १।४।१८)। **समूहिनी=संमार्जनी।**

—ऋ (ऋ गतिप्रापणयोः)। तेन मा समरामहि (अथर्व० ११।२।७)। मा त्वया समरामहि (अथर्व० ११।२।२०)। **तेन त्वया वा मा संगस्महीत्याह। अर्तेर्लुङि रूपम्।** ऋतस्य योना समरन्त नाभयः (ऋ० १।७३।१)। समारन्त ममाभीष्टाः संकल्पास्त्वय्युपागते (भट्टि० ८।१६)। **उक्तोर्थः।** दभ्रेभिश्चित्समृता हंसि भूयसः (ऋ० १।३१।६)। **समृता=समृते=सङ्गते।** दिवः स्कम्भः समृतः पाति नाकम् (ऋ० ४।१३।५)। समर्पयेन्द्र महता वधेन (अथर्व० ६।६६।१)। **समर्पय=संयोजय=प्रहर=क्षिप्र=विध्य।** इदं धनुर्लक्ष्यमिमे च बाणाः शृण्वन्तु मे भूपतयः समेताः। छिद्रेण यन्त्रस्य समर्पयध्वं शरैःशितैर्व्योमचरैर्दशार्धैः (भा०आदि०१८५।३५)॥ **समर्पयध्वम्=विध्यत।** अपरे दन्तवेष्टेषु कुम्भेषु च कटेषु च। शरैः समर्पिता नागाः ... ... (भा०द्रोण०९०।१९)॥ **उक्तोऽर्थः।** स चिन्तयानो वैदेहीं कामबाणसमर्पितः (रा० ३।५५।२)। **पञ्चशरशराहत इत्याह।** देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् (वा० सं० १२।६६)। **समरे पथीनाम्=पथिवतां (पथिकानां) संगमस्थाने।**

—ऋच्छ् (ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु)। तस्मादनभिरूपाभिर्वाग्भिर्मां त्वं समर्च्छसि (=समृच्छसि) (भा० उ० ७६।४)। **विध्यसीत्यर्थः।** समार्च्छन्मामका युद्धे कथं सञ्जय शंस मे। भरद्वाजं जिघांसन्तो सव्यसाचिवृकोदरौ (भा० द्रोण० १८३।१७)॥ **समार्च्छन्=समासादयन्=अभिमुखमयुः। ताभ्यां संगता अभूवन्नित्यर्थः।** वायुना हीदं यतमन्तरिक्षं न समृच्छति (ऐ० ब्रा० २।४१)। **न समृच्छति न प्रलीयते न शीर्यत इति षड्गुरुशिष्यभट्टभास्करौ। यतं बद्धम्। यमेनिष्ठा।** वज्रो ह समृच्छेयातां तवोह वज्रौ न समृच्छेते (श० ब्रा० १।२।५।२०)।

—ऋध् (ऋधु वृद्धौ)। समिद्धहोमेन ह्येव समृद्धा आहुतयः (श० ब्रा० १।५।३।७)। **समृद्धा सम्पन्नाः सम्यङ् निरुप्ता निरूढा (भवन्ति)।** असमृद्धेन कामेन (रा० २।९२।१६)। **असमृद्धः=अपूर्णः=असिद्धः।** देवान् कुर्युरदेवांश्च कः क्षिण्वंस्तान् (ब्राह्मणान्) समृध्नुयात् (मनु० ९।३१५)। **समृद्धिं प्राप्नुयादित्याह।** अन्तःपुरसमृद्धं च क्रोशन्तं (राजानम्) पर्यदेवयन् (रा० २।४०।३८)। **अन्तःपुरसमृद्धमन्तःपुरसहितमिति यावत्।**

—ऋष् (ऋषी गतौ)। उभावन्तौ समर्षसि वत्सः संमातराविव (अथर्व० १३।२।१३)। **=समर्षसि=योजयसि।।** संमातरौ **=पुण्यात्मानौ मातरौ।**

मयैं इव युवतिभिः समर्पति (ऋ० ६।८७।१६) । **समर्षति=संगच्छते=सहचरो भवति** ।

—**कथ्** (**कथ वाक्यप्रबन्धे**) । त्वया संकथ्यमानेन महिम्ना सात्वतां पते । नातितृप्यति मे चित्तम् ··· ··· (भा० पु० ८।५।१३) ॥ **संकथ्यमानेन=संकीर्त्यमानेन=उपवर्ण्यमानेन=अभिष्टूयमानेन** । एवं संकथिते कृत्स्ने मोक्षधर्मे (भा० सभा०२२।३३) । **संकथिते=प्रोक्ते=निरुक्ते=व्याख्याते=उपविष्टे** ।

—**कम्प्** (**कपि चलने**) । अमर्षात्स्फुरमाणोष्ठः समकम्पत राक्षसः (रा०३।५७।२६) । **समकम्पत=बाढमकम्पत प्रावेपत** । अतिष्ठद् भ्रूणहा कोट्यां वार्धुषिः समकम्पत (व० ध० २।४२) ।

—**कल्** (**कल गतौ संख्याने च**) । तरुच्छिद्रप्रोतान् (शशिनः करान्) बिसमिति करी संकलयति (सुभा०) । **संकलयति=गृह्णाति । जानाति** । पत्तीन् सर्वान् अतिबलान् योत्स्यमानानवस्थितान् । एकः संकालयिष्यामि वज्रपाणिरिवासुरान् (भा०वि० ६१।३०) ॥ **विद्रावयिष्यामीत्याह** । गां दोग्ध्रीं समकालयन् (हरि० १।२१।२७) । **समकालयन्=वनमनयन्** । संकलयति कालयति वा भूतानीति कालः (सुश्रुते सूत्र० ६।२) । **संकलयति=संगृह्णाति** । न तु संकालनं राज्ञो विना पुत्रेण मन्त्रिणः (रा० २।६६।१५) । **संकालनं प्रेतनिर्हारम्** । संगूढः स्यात्संकलितः (अमरः) । **पिण्डीकृत इत्याह** ।

—**कस्** (**कस गतौ**) । **संकसुको** विसंस्थुलो भवति दुर्वृत्तो वा । संकसुकोऽस्थिर इत्यमरः । **श्मशानाग्निरपि संकसुक उच्यते** ।

—**काल्** (**काल क्षेपे**) । यथा पशूनां सङ्घातं यष्ट्या पालः प्रकालयेत् । तथा भीमो गजानीकं गदया समकालयत् (भा० भीष्म० ६२।६३) ॥ **समकालयत्=अक्षिपत्=प्राजत्** ।

—**काश्** (**काशृ दीप्तौ**) । ता वेपथुपरीताश्च राज्ञः प्राणेषु शङ्किताः । प्रतिस्रोतस्तृणाग्राणां सदृशं संचकाशिरे (रा० २।६५।१४) ॥ **संचकाशिरे=प्रतिबभुः** । असभ्याः सभ्यसङ्काशाः सभ्याश्चासभ्यदर्शनाः (भा० शां० १११।६५) । **सभ्यसङ्काशाः=सभ्यसन्निभाः=सभ्यसदृशाः** ।

—**कित्** (**कित निवासे रोगापनयने च**) । सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च (सा० द०) । **सङ्केतो रूढिः** । सङ्केतः कामिनोर्निश्चितपूर्वं संगमस्थानम् । नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम् (गीत० ५) । कान्तार्थिनी तु या याति संकेतं साभिसारिका (अमरः) ।

—**कुच्** (**कुच सङ्कोचने**) । न मे मनः संकुचति प्रदानात् (अवदा० श्रेष्ठि० १२) । **प्रदाने न विचारयति** । प्रत्यङ् जनान् संचुकोचान्तकाले (नि०१।१५।) ।

७)। **संकोचयतीति दुर्गः**। न श्रुतेन न दानेन न सान्त्वेन न चेज्यया। त्वयेयं पृथिवी लब्धा न सङ्कोचेन चाप्युत (भा०शां० १४।१८)॥ **सङ्कोचो याच्ञेति नीलः०**। न हि संकुचितः पन्था येन वाली हतो गतः। समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः (रा० ४।३०।२०)॥ **संकुचितः=संवृतः=निरुद्धः**। सङ्कुचितव्रणता (सुश्रुते १।३६।२)। **क्षतस्य तनूभाव इत्याह**।

—**कुल् (कुल संस्त्याने बन्धुषु च)**। **संस्त्यानं सङ्घातः। बन्धुशब्देन बन्धुव्यापारो लक्ष्यते**। अन्योन्यप्रतिघातसंकुलचलत्कल्लोलकोलाहलैः (उत्तर० २।३०)। **सङ्कुलमक्रमं यथा स्यात्तथा**। महतः पौरजनस्य संकुलेन विघटितायां तस्यामागतोस्मि (मालती० १)। **संकुलम्=संमर्दः=ओघः=जननिकायः**। अथ संकुलविलष्टे परस्परपराहते (अमरः)। **यावज्जीवमहं मौनी ब्रह्मचारी च मे पितेत्यादि संकुलं वचः**।

—**कृ (डुकृञ् करणे)**। समिन्द्र गोभिर्मधुमन्तमक्रन् (ऋ० ३।३५।८)। **समक्रन्=समकुर्वन्=समयुञ्जन्**। **भूषणाद्यर्थाभावात्सुडागमो न कृतः**। इषुं समस्कुर्वत (तै० सं० ६।२।३।१) **धनुषि समदधुरित्यर्थः**। पित्रे चिच्चक्रुः सदनं समस्मै (ऋ०१०।८२।४)। **संचक्रुः=निर्ममुः**। तस्यास्थिभिर्महाघोरं वज्रं संक्रियतां दृढम् (भा० वन० १००।१०)। **संक्रियताम्=निर्मीयताम्। भूषणाद्यर्थविरहादत्रापि सुडभावः**। सौवर्णानि च भाण्डानि संचक्रुस्तत्र शिल्पिनः (भा० आश्व०८।३५)। तस्मिन्संक्रियमाणे तु राघवस्याभिषेचने (रा०३।५३।५)। **संक्रियमाणे=निर्वर्त्यमाने**। फलमूलामिषं शाकं संस्कृतं यन्महानसे (भा० वन० ३।७३)। **संस्कृतम्=श्रपितम्**। असूर्ते सूर्ते रजसि निषत्तं ये भूतानि समकृण्वन्निमानि (ऋ० १०।८२।४)। असंस्कृताम्पशून्मन्त्रैर्नाद्याद्विप्रः कदाचन (मनु० ५।५६)। **असंस्कृतान्=अशोधितान्**। **मन्त्रवत्प्रोक्षणादिसंस्कारशून्यानित्यर्थः। सम्परिभ्यां करोतौ भूषणे**। (पा० ६।१।१३७)। ककुभं समस्कुरुत (शिशु० ९।२५)। **अभूषयदित्यर्थः**। सुसंस्कृतोपस्करया (स्त्रिया भाव्यम्) (मनु० ५।१५०)। **सुशोधितकुण्डकटाहादिगृहभाण्डयेत्याह**। एष सर्वान्महीपालान्करदान् समकारयत् (भा० वि० ७०।२२)। **समकारयत्=अकारयत्। नार्थः सम्**। दमघोषात्मजं वीरं संस्कारयत मा चिरम् (भा० सभा० ४५।३५)। **अग्निसंस्कारोऽस्य कार्यतामित्याह**।

—**कृत् (कृती छेदने)**। यानि मांसानि संस्कृत्य संन्यासुः (श० ब्रा० ३।१।३।४)। **संस्कृत्य=खण्डशः कर्तित्वा=छित्त्वा**।

—**कृष् (कृष विलेखने)**। इच्छन् पक्षपुच्छाप्ययेषु चतुरङ्गुलं चतुरङ्गुलं संकर्षति विकर्षत्यन्ते (का० श्रौ० १६।८।१५)। **संकर्षति=संकोचयति**।

विकर्षति=विस्तारयति। क्व चासौ पुरुषः श्यामो योऽसौ मां संचकर्ष ह (भा०वन०२६७।६५)। **संचकर्ष=साकं कृष्टवान्।** कोटीः शतसहस्राणि हरीणां समकर्षत (भा० वन० २८३।५)। **सेनानीः सन् सहानयदित्यर्थः।** यः परमः संकर्षः सामावस्या (गो०गृ० १।५।७)। **संकर्षः=सन्निकर्षः। निस्यक्तः। समैव सान्निध्यार्थ- लब्धेः। यावदर्थं शब्दप्रयोगः।**

—**कृ (कृ विक्षेपे)।** शतहस्त समाहर सहस्रहस्त संकिर (अथर्व० ३।२४।५)। **भूरि क्षिप। धनमस्मास्विति शेषः। धनवर्षं वर्षेत्याह।** सं दाशुषे किरतु भूरि वामम् (तै० सं० ३।३।११।५)। **उक्तोऽर्थः।** गामश्वं रथ्यमिन्द्र संकिर (ऋ० ६।४२।२)। सं सहस्रा कारिषच्चर्षणिभ्य आ (ऋ० ६।४८।१५)। ब्राह्मणाः क्षत्रिया वैश्याः सङ्कीर्यन्ते परस्परम् (भा० वन० १६०।१७)। **संमिश्रिता भवन्ति=व्यतिकीर्यन्ते=योनिसङ्करमापद्यन्ते।** संकीर्यन्ते ततः प्रजाः। न संकिरेत्तदन्नं च (भा० अनु० १३६।१३)। **उत्कृष्टं निकृष्टेन न मिश्रयेदित्याह।** यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र तिलैर्होमो गायत्र्या वचनं तथा (याज्ञ० ३।३०६)॥ **यत्र यत्र ब्रह्मवधादौ तज्जनितकल्मषजातेनात्मानं संकीर्णमभिभूतं मन्यत इति तदर्थ इति मिताक्षरा। अस्थिकङ्कालसंकीर्णा** (भूः) (भा०आदि०२१०।२४)। **संकीर्णा=आकीर्णा=परीता=परिक्षिप्ता=संकुला।** अनेकजनसंकर्णान् ग्रामान् (रात० ५।१०५)। **उक्तोऽर्थः।** मदोद्धतस्य नृपतेः संकीर्णस्येव दन्तिनः (हितोप० ४।१६)। **संकीर्णस्य=प्रभिन्नस्य। मत्तस्य=मदस्राविणः।** महीभुजो मदान्धस्य सङ्कीर्णस्येव दन्तिनः (हितोप० ३।१३४)। **उक्तोऽर्थः।** नाकाले नाति सङ्कीर्णे...(भुञ्जीत) (वि० पु० ३।११।८३)। **नातिसंकुचिते स्थाने (?)।** जागर्त्येव हि दुष्टात्मा संकरेऽग्निरिवोत्थितः (भा० शां० १०३।१२)। **संकरेऽवकरे।** सकर्दमं तु वर्षासु प्रविश्य ग्रामसङ्करम् (मिताक्षरोद्धृता यमस्मृतिः)। **ग्रामसङ्करः=ग्रामसलिलप्रवाहः।** (मिताक्षरा०३।३०)। संकरो नरकायैव कुलघ्नानां कुलस्य च (गीता१।४२)। **सङ्करः सङ्कीर्णता।**

—**क्लृप् (कृपू सामर्थ्ये)।** तस्मात्तेन (मनसा) उभयं संकल्पते संकल्पनीयं चासंकल्पनीयं च (छां०उ०१।२।७)। **संकल्पते=इच्छति=कामयते। संकल्पनीयम् एषणीयम्। असंकल्पनीयम् अनेषणीयम्।** कुमारास्ते विशाखं च पितृत्वे समकल्पयन् (भा० वन० २८८।३)। **समकल्पयन्=मनस्यकुर्वन्।** राजदुहितुर्विलासप्रायमाकारमात्माभिलाषमूलमिव यथा संकल्पयेत् (दशकु०)। **संकल्पयेत्=उत्प्रेक्षेत।** लोम लोम्ना संकल्पया त्वचा कल्पया त्वचम् (अथर्व० ४।१२।५)। **योजयेत्यर्थः।** यथासंकल्पितांश्चेह सर्वान् कामान्समश्नुते (मनु० २।५)। **संकल्पितान्=मनसा ध्यातान्।** अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया

(भैक्ष्यम्) (भा० आश्व०४६।१६)। अतीतमपि न स्मरन्नपि च भाव्यसंकल्पयन् (भर्तृ० ३।६३)। **उक्तोऽर्थः**। तेभ्यः संकल्पिता भागाः स्वयमेव स्वयम्भुवा (भा० अनु० ६१।२४)। **संकल्पिताः=निश्चिताः=निर्णीताः**। संकल्पितार्थे विवृतात्मशक्तिमाखण्डलः कामिमिदं बभाषे (कु० ३।११)। **चिकीर्षितेऽर्थ इत्याह**। तत्पुत्र शीघ्रं विधिना विधिज्ञैर्वसिष्ठमुख्यैः सहितो द्विजेन्द्रैः। संकल्प्य राजानमदीनसत्त्वमात्मानमुर्व्यामभिषेचयस्व (रा०२।७२।५३)॥ **संकल्प्य=अन्त्यामर्चामिस्मं प्रयुज्य**। असंकल्पयन् (कौ०सू०४२)। **अविचारयन्नित्याह**। संकल्पयित्वा वत्सं तु मनुं स्वायम्भुवं प्रभुम् (हरि० १।६।१०)। **प्रकल्प्येत्यर्थः**। संकल्प्य तेषां कुल्यानि (कीकसानि) (भा० आश्रम० ३६।२२)। **संकल्प्य=एकीकृत्य**। तत् संकल्पोपहितजडिमस्तम्भमभ्येति गात्रम् (मालती० १।३५)। **तत्संकल्पस्तच्चिन्ता, तत्प्रतिसन्धानम्**। वृथैव संकल्पशतैरजस्रमनङ्ग नीतोसि मया विवृद्धिम् (शा० ३।५ पाठभेदः)।

—क्रम् (क्रमु पादविक्षेपे)। स वा उत्तरामेवोपवसेत्। समिव वा एष क्रमते (श० ब्रा० १।६।३।३३) **संक्रमते=सङ्घट्टते=विरोधमुपैति=सङ्घर्षति**। सङ्क्रामतं मा जहीतं शरीरम् (अथर्व० ७।५३।२)। **सम्बद्धौ भवतमित्याह**। **समवस्थितौ भवतमित्यर्थः**। कस्माद्वक्सामयोः सङ्क्रामति (श० ब्रा० ८।१।३।५)। **ऋक्सामे सम्बध्नातीत्याह**। सम् अध्वानः क्रामेयुः (श० ब्रा० १३।२।४।२)। **सङ्गच्छेरन्=एकी भवेयुः**। अर्वाङ् यज्ञः संक्रामत्वमुष्मादधि मामभि (तै० सं०७।३।११।१)। **सङ्क्रामतु=इत आगच्छतु**। जीवः सङ्क्रमतेऽन्यत्र क्रमबन्धनिबन्धनः (भा० वन० २०६।२४)। **संक्रमते=संचरति=शरीरमन्यन्निगच्छतीति तात्पर्यार्थः**। (बर्हिणः) संक्रामन्त इवाभान्ति पुष्पिताः कमलाकराः (रा० ५।५२।१३)। एवं स संक्रमंस्तत्र स्वर्गलोके महायशाः। ततो ददर्श शक्रस्य पुरीम्...(भा० वन० ६६५५)। **सङ्क्रमन्=संक्रामन्=परिक्रामन्=विचरन्**। सङ्क्रामन्तौ बहून्देशान् शैलाच्छैलं वनाद्वनम्। ततः पुष्करिणीं रम्यां पम्पामासादयिष्यथः (रा० ३।७६।५)॥ **उक्तोऽर्थः**। पुत्रसङ्क्रान्तलक्ष्मीकैर्यद् वृद्धैरिक्ष्वाकुभिर्धृतम् (उत्तर० १)। अस्मिन् (अशोके) सङ्क्रान्तानीव कुसुमानि (माल०५।५)। **अशोकान्तरेभ्यः सङ्क्रम्य संचर्येहाशोके प्राप्तानि संनिविष्टानीत्याह**। रविसङ्क्रान्तसौभाग्यश्चन्द्रमा न प्रकाशते (रा०३।२।१३)। **इहोदाहृतिषु सम्शब्दः पूर्वस्थानप्रच्युतिपूर्वकं स्थानन्तरप्राप्तिं द्योतयति**। औपसर्गिकरोगाः सङ्क्रामन्ति नरान्नरम् (सुश्रुते निदान० ६।२६)। **संचारिणो भवन्तीत्यर्थः**। कालो ह्ययं सङ्क्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते (रघु० ५।१०)। **इहापि पूर्ववद् वेद्यम्**। अनड्वा वै सङ्क्रान्तयोर्यदीतरो वेतरमभिभवतीतरो वेतरम् (श० ब्रा० १।६।३।३३)। **सङ्क्रान्तयोः सङ्घट्ट-**

मानयोः=स्पर्धमानयोः=विरुन्धानयोः । जरां त्वेतां त्वमन्यस्मिन्सङ्क्रामय (भा० आदि० ८३।३६) । **स्वस्मान्निष्क्रमय्यान्यत्र पुरुषे प्रापयेत्याह** । विभीषणे सङ्क्रमय्य श्रियं वैरिणः (रघु० १२।१०४) । स तु तं (धनुर्वेदं) प्रतिगृह्यैव पुत्रे संक्रामयिष्यति (भा० अनु० ५६।८) । **स्वेन गृहीतां स्वस्थां धनुर्विद्यां पुत्रेऽर्पयिष्यतीत्याह** । कदाचिदयं पाप इदमकार्यं मयि संक्रामयेत् (मृच्छक०) **अन्यदीयं पापं मय्यारोपयेदित्याह** । इत्युक्त्वा समयं तत्र चक्राते तावुभौ नृप । अन्योन्यस्याभिसन्देहे तौ संक्रामयतां ततः (भा० उ० १६२।८) । **संक्रामयताम्=समचरताम्=साहचर्यमगच्छताम् इति कश्चित्** । **विन्यमयेतामित्यर्थ इति नीलकण्ठः** । **सन्देहे लिङ्गे इति च सः** । स ते दुहितरं...वृणुते । वरदः **शम्भुरस्मत्सङ्क्रामितैः** पदैः (कु० ६।७८) **श्रमासु निवेशितैर्वचोभिरित्यर्थः** । **रसातलं** सङ्क्रमिते तुरङ्गे (रघु० १३।३) सङ्क्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्विभुः (हरि० १।३२।१४) । **भारतस्य (नष्टपुत्रस्य) पुत्रत्वं प्रापितः (पुत्रोऽसन्) इत्यर्थः** । एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम् । उत्पाट्य सङ्क्रामयितुम् (रा० ६।१।४१) । **सङ्क्रामयितुम्=स्थानान्तरं प्रापयितुम्** । सङ्क्रमो दुर्गसंचर इत्यमरः । **स्वामी तु सङ्क्राम इति पठति** । संक्रमा भेदिताः सर्वे नावश्च प्रतिषेधिताः (भा०वन०१५।१५) । **सङ्क्रमा नदीसेतवः** । नदीमार्गेषु तथा सङ्क्रमानवसादयेत् (भा०शां०६६।३६) । **सङ्क्रमान्=अवतरणार्थान् सेतून्** । ततस्तैः सङ्क्रमः सर्वः प्रत्युक्तः शास्त्रकोविदैः (हरि० १।२०।६५) । **सङ्क्रम उपायान्तरेण शम इति नील०** । विद्यानुष्ठानसम्पन्नो यज्वा पण्डित एव वा । वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसङ्क्रमः (बौ०ध०२।३।५।१२ गोविन्दस्वामिधृतः शातातपश्लोकः) । **सङ्क्रमः=संचरः=मार्गः** । असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति । आत्मानं संक्रमं कृत्वा कृच्छ्रधर्मविदेव सः (भा०शां०१३२।४) ॥ **सङ्क्रमः=आगमनमार्गः** । मृजे वृद्धिः (७।२।११४) । अत्रेदं पठ्यते भाष्ये —इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते । तत्र कैयटीयं व्याख्यानम्—**संक्रामतो गुणवृद्धी अस्मादिति व्युत्पत्त्या गुणवृद्धिप्रतिषेधनिमित्तभूतः क्विप्प्रत्ययः सङ्क्रमशब्देनोच्यते, योगरूढेः** । सेतुमेव तं सङ्क्रमणं यजमानः कुरुते स्वर्गस्य लोकस्य समष्ट्यै (श० ब्रा० १३।२।१०।१) । **सङ्क्रामति पारं गच्छत्यनेनेति संक्रमणः, सेतुविशेषणम्** । यदि दुःखमकृत्वा तु मम संक्रमणं भवेत् (रा० २।१३।१२) । **सङ्क्रमणं स्वर्गं प्रति गमनम्** ।

—क्रीड् (क्रीडृ विहारे) । तस्य संक्रीडमानस्य महादेवस्य धीमतः । शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् । (रा० १।३६।६) ॥ **संक्रीडमानस्य=रममाणस्य=विहारमनुभवतः** । **नार्थः समा** । हरः संक्रीडमानश्च उमया सह पर्वते (रा० १।४७।१०) । चित्रं संक्रीडमानास्ताः क्रीडनैर्विविधैः (रा०

१।६।१४)। **उत्क्रोर्ध्यः**। संक्रीडन्ति शकटानि (पा० १।३।२१ सूत्रवृत्तौ)। **कूजन्तीत्यर्थः**।

—**क्रुध् (क्रुध क्रोधे)**। संक्रुध्यसि मृषा किं त्वं दिदृक्षुं माम् मृगेक्षणे (भट्टि० ८।७६)। **अनर्थकः सम् शब्दः**। धर्मराजो न संक्रुध्येत् (भा० वन० २३६।६)।

—**क्रुश् (क्रुश आह्वाने रोदने च)**। एवमुक्ते तु भीष्मेण ततः संचुक्रुशुर्नृपाः (भा० सभा० ४४।३५)। **समम् उच्चैश्चक्रन्दुः**। संक्रोशतामेनान् (अमित्रान्) द्यावापृथिवी (अथर्व० ८।८।२१)। **सक्रोधमभिसम्बोधयतामित्याह**। ऋतावरीरिव संक्रोशमानाः (ऋ० ४।१८।६)। **संक्रोशमानाः=संक्रोशन्त्यः=उच्चैः शब्दायमानाः**। जनयिष्यति सङ्क्रोशं रामस्य विवासनम् (रा० २।५८।३०)। **संक्रोशम्=हाहाकारम्**। **दुःखमिति तु तिलकः**।

—**क्षर् (क्षर संचलने)**। इन्द्रस्य सोम जठरे समक्षरः (ऋ० ६।८५।५)। **समक्षरः=समस्यन्दथाः**। तदश्रु संक्षरितमासीत् (श०ब्रा० ६।३।१।२८)।

——**क्षि (क्षि क्षये)**। पशून्त्संक्षिणाति (अथर्व० ३।२८।२)। **एषा विजाता यमिनी पशूनां हानये कल्पत इत्याह**। आदित्यस्य गतागतैरहरहः संक्षीयते जीवितम् (भर्तृ० ३।४४)। **हीयत इत्यर्थः**।

—**क्षिप् (क्षिप प्रेरणे)**। संक्षिप्य संरम्भमसद्विपक्षम् (भट्टि० २।५२)। **संक्षिप्य=उपसंहर**। महार्णवं विक्षिपेत्संक्षिपेच्च (भा० १४।११६१)। **संक्षिप्तं संकुचितं कुर्याद् इत्याह**। स यातस्तेजसा व्योम संक्षिपन्निव वेगितः। (रा०)। **उपसंहरन्निव, संकोचमापादयन्निव**। शरीरमत्यर्थं संक्षिप्य (रा०५।१।१६७)। **संक्षिप्य=तनूकृत्य**। विस्तीर्यैतन्महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत् (भा० आदि० १।५१)। संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि (मनु० ७।३४)। संक्षिप्येत क्षणमिव कथं दीर्घयामा त्रियामा (मेघ० १०७)। **उपसंह्रियेत**। धर्मपाशेन संक्षिप्तः प्रकाशं नाभ्युदैक्षत (रा० २।४०।३६)। **धर्मपाशेन बद्ध इत्याह**। संयुक्त इति पाठान्तरम्। (भृगवः) संक्षिप्तास्तस्य तेजसा (भा०पु० ८।१८।२५)। **मन्दीकृताः=मन्दीकृततेजस्काः**। **अभिभूताः**। भिन्दिपालान् कुठारांश्च ..... । युगपत् संक्षिपन्ति स्म वधार्थं कृष्णनन्दने (हरि० २।१०५।५७)॥ **समं क्षिपन्तीत्यर्थः**। **समा नार्थः**। **युगपच्छब्देन तदर्थगतेः**। ततो द्विजोत्तमास्तोयं संक्षिपन्ति महामुने (वि० पु०२।८।५१)। **क्षिपन्ति प्रक्षिपन्तीति वार्थः**। यावदूर्ध्वमधश्चैव ग्रीवां संक्षिपते पशुः (भा०शां०११२।१४)। **संकोचयतीत्यर्थः**। संक्षिपेच्च महामेरुम् (भा० आदि० ७१।३६)। **संक्षिप्तं संकुचितं कुर्यादित्याह**। कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः (भा० आदि० १।२४६)। **संक्षिपते=संहरते**। सत्त्वं संक्षिप्यते लोके नरैः पण्डितमानिभिः

(भा० वन० १६०।१४)। **उक्तोर्थः**।मम्लौ न गात्रं न मुमूर्च्छ चेतः संचिक्षिपे न क्षतजं क्षरद्वा (अवदा० ८।४२)। **न संचिक्षिपे=नोपरराम, न विराममाप। न तस्थौ**। संक्षिप्यतां जवनिका (स्वप्न०)। **संगृह्यतामित्याह। अपनीयतामिति त्वार्थिकोऽर्थः**। शुभाशुभान्वितान्भावान्विसृजन् संक्षिपन्नपि (भा० अनु० १४।७२)। **संक्षिपन्=संहरन्**। संमूढनिगमां सर्वां सक्षिप्तविपणापणाम् (अयोध्याम्) (रा० २।११४।१३)। **संक्षिप्ताः संवृता विपणापणाः पण्यवीथयो यस्यां ताम्**। न तत्र चन्द्रार्ककरैर्दिगङ्गना विभान्ति संक्षिप्ततमोवगुण्ठनाः (अवदा० ब्रह्म० २१)। **संक्षिप्तम्=अपनीतम्**। संक्षिप्तधैर्योपि मनोभवेन (अवदा० चूडू० ८)। **संक्षिप्तधैर्यः=संहृतधीरभावः**। संक्षिप्तनीवारासु (भूमिषु) (रघु० १।५२)। **संक्षिप्तो राशीकृतो नीवारस्तृणधान्यं यासु तासु**। मत्पराक्रमसंक्षिप्तराज्यभोगपरिच्छदः (भट्टि० ५।८६)। **मत्पराक्रमेण संक्षिप्तौ अपहृतौ राज्यभोगपरिच्छदौ यस्य सः**। एकप्राकारसंक्षिप्तं कोसलराज्यं कृत्वा (प्रतिमा०१)। **संक्षिप्तम्=परिक्षिप्तम्**। **अपूर्वः प्रयोगः समर्थनामपेक्षते**। एष ते त्रिषु लोकेषु संक्षिप्यापः पिबाम्यहम् (हरि० १।३२।४६)। इन्द्रियाणि च संक्षिप्य मनः संक्षिप्य चञ्चलम् (चरके शारीर० ३।२७)। **संक्षिप्य=प्रत्याहृत्य=व्यावर्त्य विषयेभ्य इति यावत्**। स्कन्दः सनत्कुमारश्च तेजः संक्षिप्य तिष्ठतः (हरि० १।३६)। **संक्षिप्य=निगृह्य**। सोहं भुजाभ्यां दीर्घाभ्यां संक्षिप्यास्मिन्वनेचरान् (रा० ३।७१।१४)। **संक्षिप्य=संगृह्य=गृहीत्वा**। समरव्यायामसंक्षोभितान् निरुपचारं संक्षिप्य केशान् (प्रतिज्ञा० १)। **संक्षिप्य=संहृत्य**। सग्रहं कृष्ण नक्षत्रं संक्षिप्यारिविमर्दन (हरि० २।४०।४४)। **संकोचं प्राप्येति नील०। दुःश्लिष्टपदमिदं पद्यम्**। प्रजासंक्षेपसमये दण्डहस्तमिवान्तकम् (भा० वन० १५५।२७)। **संक्षेपसमये=संहारकाले**। स्यात्पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके इत्यमरोक्तिं व्याचक्षाणः स्वाम्याह—**संक्षेपे क्षिप्रे यथा—पुलाककारी विपुलाशयः स्यात्। तेन संक्षेपः क्षिप्रवचनो भवतीति स मनुत इत्यनुमा**। संक्षेपो विक्षेपः कृतः (कौ० अ० २।८।२६)। **जनसमूहदेयः पिण्डकरः संक्षेपः। विक्षेपो विप्रकीर्णकरः कृतः, समूहिभ्यः प्रत्येकं विभज्य ग्राह्यः कृत इत्यर्थः**। द्वाविमौ पक्षिणौ नित्यौ संक्षेपौ चाप्यचेतनौ (भा० आश्व० ४७।१६)। **पक्षिणौ जीवेश्वरौ। संक्षिप्येते ययोस्तौ संक्षेपौ, तयोरुपाधी बुद्धिमाये (नील०)**।

—**क्षुद्** (क्षुदिर् संपेषणे)। बबन्धुर्बन्धनीयांश्च क्षोद्यान्संचुक्षुदुस्तथा। बिभिदुर्भेदनीयांश्च तांस्तान्देशांस्ततस्ततः (रा० २।८०।१०)। **संचुक्षुदुः सम्यक् पिपिषुः। नार्थः समा। धातुरेव केवलः सम्पेषणे पठितः**।

—**क्षुभ्** (क्षुभ तेजने)। संक्षणुत्येव गायेत् संक्षणुत्येव हि वाचं पुरुषो वदति

(षड्विंश० २।२)। **संक्षुण्य**=निशाय। तीव्रं तारं कृत्वेत्यर्थः। संक्षुण्वान इवोत्कण्ठाम् (भट्टि० ८।४०)। **संक्षुण्वानः**=तीव्रामुत्कण्ठां कुर्वाणः।

—**खाद्** (खाद भक्षणे)। असंखादन् निगिरेत् (लाट्या०श्रौ०४।११।१३) **असंखादन् अचर्वन् इत्यर्थः**।

—**खिद्** (**खिद परिघाते**)। समित् तान् वृत्रहाऽखिदत्स्ये अरौं इव खेदया (ऋ० ८।७७।३)। **समखिदत्**=**समयुनक्, संयुक्तान् अधात्**। अथ ह प्राण उच्चिक्रमिष्यन्त्स यथा सुहयः पड्वीशङ्कून् संखिदेदेवमितरान् प्राणान् समखिदत् (छां० उ० ५।१।१२)। **संखिदेत्**=**उद्धरेत्**।

—**ख्या** (**ख्या प्रकथने**)। समख्ये देव्या धिया (वा० सं० ४।२३)। **दिव्येन मनसा युक्तो दृश्येऽहमित्याह**। सोमः समादित्येभिरख्यत (ऋ० ६।६१।७)। **समख्यत**=**साहचर्येणादृश्यत**। **सोम आदित्यैः सहचरितः प्रकाशत इत्याह**। अथैनां सोमक्रयण्या संख्यापयति (श० ब्रा० ३।३।१।११-१२)। संख्याता अस्य निमिषो जनानाम् (अथर्व० ४।१६।५)। **संख्याताः**=**परिगणिताः**। वयमस्य यथा लोके संख्याताः सौम्य साधुभिः। भार्याः पुत्राश्च शिष्याश्च····· (रा० २।१०१।१६)॥ **संख्याताः**=**समाख्याता इच्छाविनियोगार्हतयेति तिलकः**। ततः संख्यातुमारेभे तद्वचो गुणदोषतः (भा० उ० ६०।१)। **संख्यातुम्**=**विमर्ष्टुम्**। संख्याने कुशलो गवाम् (भा०वि०३।८)। **संख्याने**=**परीक्षायाम्**। **अत एव संख्यावान् पण्डित उच्यते**। तथा चामरः पठति—**धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः**। अतएव च गोपनामसु गोसङ्ख्य इति पठितम्। **गाः संचष्टे गणयति गुणदोषतः परीक्षत इति तदर्थः**। निर्मन्युश्चाप्यसंख्येयः पुरुषः क्लीबसाधनः (भा०उ० १३३।६)। **असंख्येयः**=**अगणनीयः**। संचक्ष्या दुर्जनाः (पा० २।४।५४ सूत्रे वृत्तौ)। **वर्जनीया इत्याह**।

—**गम्** (**गम्लृ गतौ**)। संजग्मिरे पथ्या रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः (ऋ० ६।१६।५)। **एकीभूताः, एकायनं गता इत्याह**। यत्र देवाः समगच्छन्त विश्वे (ऋ० १०।८२।६)। **समवायन्नित्याह**। संगच्छध्वं संवदध्वम् (ऋ० १०।१६१।२)। **संगताः संघटिता भवतेत्याह**। सं श्रुतेन गमेमहि (मा श्रुतेन विराधिषि) (अथर्व० १।१।४)। **संगतो निरन्तरो नः स्वाध्यायोऽस्तु**। ये सिन्धुवितस्ते समगंसाताम् (रात० ५।६७)। एते भगवत्यौ कलिन्दकन्यामन्दाकिन्यौ सङ्गच्छेते। **उभयत्र संभेदमाप्नुत इत्यर्थः**। मर्यो न योषामभि निष्कृतं यन्त्सङ्गच्छते कलश उस्रियाभिः (ऋ० ६।६३।२)। **संगच्छते**=**मिथुनी भवति**=**संविशति**=**संभवति**। सङ्गच्छ पांसिन स्त्रैणं मां युवानं तरुणि शुभे (भट्टि० ५।६१)। **सङ्गच्छेत्यत्र सकर्मकत्वात्तङ् न**। वाक्यार्थो न संगच्छते (वे० सा०)। **न घटत इत्याह**। ग्रामं संगच्छति=**ग्रामं गच्छति**=**प्राप्नोति**।

सङ्गच्छस्व मया सार्धमेकेनैकः (भा०आदि०१५३।२८) । **सङ्ग्रामयस्वेत्याह ।** सृष्टप्राणो भृशतरं तेन चेत् सङ्गमो मम (भा०सभा०८०।४७)। **सङ्गमः=सङ्ग्रामः। सृष्टप्राणः=उत्सृष्टप्राणः=प्राणव्ययेनापि कृतः।** शस्त्राणां संगमश्चैव घोरस्तत्राभवत्पुनः (भा०शल्य० १४।२६) । **सङ्गमः=संघट्टः=प्रतिघातः ।** वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः । आत्मतुल्यानजनयत्सहस्र संशितव्रतान् (भा० आदि० ७५।५) ॥ **सङ्गम्य=संभूय=मिथुनीभूय ।** सा मया सह संगम्य पुनः कन्या भविष्यसि (भा० वन० ३०७१६) । **उक्तोऽर्थः ।** वलीसंगतगात्रस्तु दुर्दर्शो दुर्बलः कृशः (भा० आदि० ८४।६) । **वलीव्याप्तावयवः ।** खे संगतान्यवाद्यन्त देवतूर्याण्यनेकशः (हरि० २।३०।३८)। **संगतानि=निरन्तराणि ।** संगतं घृतं संगतं तैलमित्युच्यते एकीभूतमिति गम्यते (२।१।१ सूत्रे भाष्ये)। **एकीभूतं संशीनमित्याह ।** संगताः परमायत्ता रामेण सह संयुगे (रा० ३।३६।६) । **संगताः=युयुत्सयाऽभिमुखं गताः ।** कथं काश्यपदायादाः पुंश्चल्यो मयि संगताः (भा० पु० ८।९।९)=**मयि संगताः=मामाश्लिष्टाः, मां परिष्वक्तवत्यः ।** यस्य भार्या परसंगता (पञ्चतं०)। **पुमन्तरे बद्धभावा ।** दिष्ट्या मे संगतं त्वया (भा० वन० २१५।१४) । **संगतम्=समागमः ।** अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः (शा० ५।२४) । **रहः संगतम्=रहसि कृतं मैत्र्यम् ।** यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः (मनु० ३।१४०)। **संगतानि=सम्बन्धान् ।** विषयैः संगतं चास्तु त्यजेयं सङ्गतं यदि (भा०आश्व०७।२३)। अथ शुश्राव संगत्या वेदाध्ययननिःस्वनम् (भा०आदि० १७७।१२)। **संगत्या=समापत्त्या=यदृच्छया=दैवयोगात् ।** समीक्ष्य कृष्णा वरयेत्संगत्यैकतमं वरम् (भा० आदि० १८४।१८) । संगत्या तत्र भगवान् विष्णुरासीच्चतुर्भुजः (भा० (भा० उ० १०४।२३)। सकृज्जातिगुणोपेतः संगत्या गृहमागतः (भा० अनु० ११७।२८) । संगत्या जठरे न्यस्तं रेतोबिन्दुमचेतनम् (भा० शां० ३३१।२३) । **उक्तोर्थः ।**

—**गाह् (गाहू विलोडने)** । (सुग्रीवः) समगाहिष्ट चाम्बरम् (भट्टि० १५।५९) । **आकाशमाक्रान्तवानित्याह ।**

—**गुप् (गुपू रक्षणे)** । बालभावेन संगुप्तः शत्रुभिश्च न धर्षितः (भा० अनु० ५।२२) । **संगुप्तः सम्यग्रक्षितः** । न चैव तिष्ठामि तथाविधेषु नरेषु संगुप्तमनोरथेषु (भा० अनु० ५।१४) । **संगुप्तमनोरथाः=प्रच्छन्नकामाः ।**

—**गुह् (गुहू संवरणे)** । संगूढः स्यात्संकलित इत्यमरः । **सम्पिण्डित इत्याह ।**

—**गॄ (गॄ शब्दे, गॄ निगरणे)** । न सख्यमिन्द्रोऽसुन्वता संगृणीत (ऋ० ४।२५।७) । **अभ्युपगच्छतीत्याह ।** यददास्यन्नग्न उत संगृणामि (अथर्व० ६।११९।

१)। **संगृणामि**=प्रतिजाने दास्यामीति। यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि (अथर्व० ६।७१।३)। **उक्तोऽर्थः**। **संगृणामि निगिरामीति संस्कृतशास्त्रज्ञकोषकारौ**। **अयं च** तयोर्महितयोर्विभ्रमः। सम्पूर्वो गृणातिः **प्रतिज्ञाने रूढः**। **रूढिं च प्रत्यनादरो न युक्तः**। सायणोऽप्यत्रैव सूक्ते स्माह—**सम्पूर्वो गृणातिः प्रतिज्ञायां वर्तत इति**। नित्य शब्दं संगिरते (पा० १।३।५२ सूत्रवृत्तौ)। **प्रतिजानीत इत्याह**। वसूनि देशांश्च निवर्तयिष्यन्राजा नृपः संगिरमाण एव। तयाऽवजज्ञे·····(भट्टि० ३।८)॥ **उक्तोर्थः**। यथास्वं संगिरन्ते स्म गोप्तृषु स्वामिनो गुणान् (भट्टि० ८।३१)। **अभ्युपगच्छन्ति**=**संमनसः सन्तो वदन्तीति तात्पर्यम्**। मन्दाक्रान्ता ··· ··· तां संगिरन्ते (श्रुत०)॥ **ऐकमत्येन व्यपदिशन्तीत्याह**। **अत्र प्रतिज्ञानेऽर्थे** गिरतेस्तौदादिकस्य **प्रयोगो व्यवहारभ्रंशकृत इत्यस्माभिर्व्याकरणचन्द्रोदये तिङन्तप्रकरणे सप्रमाणमुपपादितमिति तत एवावसातव्यम्**। यद्गिरामि संगिरामि समुद्र इव संगिरः (अथर्व० ६।१३५।३)। **संगिरामि**=**सम्यग् गिरामि**=**निगिरामि**। सखा सख्युर्न प्रमिनाति संगिरः (अथर्व० १८।४।६०)। **सखा (सोमः) अभिषवस्तोत्राविना सखिभूतस्य यष्टुः संगिरः संगीयमानानि इदमेव फलं सोमादेव लभेयेत्येवं प्रतिज्ञायमानानि काम्यमानानि वस्तूनि** (सायणः)।

—**गै (गै शब्दे)**। पुराणैरिमं यजमानं राजभिः साधुकृद्भिः संगायतेति तं सथा संगायन्ति (श० ब्रा० १३।४।३।३)। **संगायन्ति**=**साकं गायन्ति**। वीणागाथिनो संशास्ति सोमं राजानं संगायेतामिति (आश्व० गृ० १।१४)। **उक्तोऽर्थः**। संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः (भा० पु० ३।२२।३३)। साम गायः (पा० ३।२।८८ सूत्रवृत्तौ)। **साम सुष्ठु गायतीति**।

—**ग्रन्थ् (ग्रन्थ सन्दर्भे)**। वि गुप्णस्य संग्रथितमनर्वा विदत् (ऋ० १०।६१।१३)। **संग्रथितम्**=**सन्नद्धम्**। **संदब्धम्**। **सम्बद्धम्**। तेन संग्रथिताः सुमनस आबध्नामि यशो मयि (पा० गृ० २।७)। **संग्रथिताः**=**गुम्फिताः**।

—**ग्रह् (ग्रह उपादाने)**। इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णाः काशिरित्ते (ऋ० ३।३०।५)। **संगृभ्णाः**=**समगृह्णाः**=**समं करेणाबधाः**। यथा हि गोवृषो वर्षं प्रतिगृह्णाति लीलया। तथा भीमो नरव्याघ्रः शरवर्षं समग्रहीत् (भा० द्रोण० १२८।१७)॥ **समग्रहीत्**=**अन्तराले प्रत्यरौत्सीत्**। यक्ष्मणा समगृह्यत (भा०आदि०१०२।७०)। राजयक्ष्मणाऽगृह्यत=**अभ्यसूयत**। **अत्र सम्शब्दो विशेषकृन्न**। **रुजां कर्तृतायां केवलस्य ग्रहो बहुलं प्रयोगदर्शनात्**—श्वेतकेतुं ह किलासो जग्राह (छां० उ०) इत्यादिषु। औषधानि च सर्वाणि मूलानि च फलानि च। चतुर्विधांश्चैव वैद्यान्संगृह्णीयाद् विशेषतः (भा० शां० ६६।५६)॥ **संगृह्णीयात्**=**समानयेत्**=**समाहरेत्**=**संनिपातयेत्**। संगृह्णीया-

दनुरूपान् सहायान् (भा० उ० ३७।२४)। **उपार्जयेदित्याह**। हालाहलं विषं घोरं संजग्राहामृतोपमम् (रा० १।४५।२६)। **अत्रापि समा नार्थः**। अलं वैरेण ते राजन् पुत्रः संगृह्यतामिति (भा०स्त्री० १।१४)। **संगृह्यताम्=नियम्यतां=वार्यताम्**। श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् (भा० पु० ६।२४।३६)। **भार्यां प्रत्यग्रहीदित्यर्थं**। **अस्थाने सम्शब्दः**। यदसौ भगवन्नाम म्रियमाणः समग्रहीत् (भा० पु०६।२।१३)। **उदचारयत्, अकीर्तयदिति विवक्षति। अत्रापि समा नार्थः**। मूर्ध्नां संजगृहे शापम् (भा० पु० ६।१०।३७)। **संजगृहे=आददे**। छन्दोरिरक्षिषया यत्र तत्र सममुपादत्तेऽर्थानपेक्षोऽवशः कविः। लोहितदर्शने यावतस्तत्प्रस्कन्द्य पांसून् संगृह्णीयात् (गौ० ध०३।३।२१)। **संगृह्णीयात्=पिण्डान्कुर्यात्**। शोणितं यावतः पांसून् संगृह्णाति महीतलात् (मनु० ४।१६८)। **संगृह्णाति=पिण्डी करोति**। अहं ते संग्रहीष्यामि शत्रुरथारुजान् (भा०वि०४५।१८)। **संयंस्यामि**। सारथ्यमास्थास्यामीत्याह। प्रोषितपतिकामपचरन्तीं पतिबन्धुस्तत्पुरुषो वा संगृह्णीयात् (कौ०अ०४।८६)। **नियम्य रक्षेदित्यर्थः**। अखिलमिह कमठः संजरीगृह्यते च। भृशं **संगृह्णाति संकोचयति स्वानि गात्राणि**। यन्मध्ये चपालस्य संगृहीतमिव भवति (श० ब्रा० ३।७।१।१२)। **संगृहीतम्=संकुचितम्**। मध्ये संगृहीतमिव हि शिरः (श० ब्रा० ७।५।१।२३)। **उत्क्रोर्ध्वः**। स संगृहीतो रथिभिर्गजो वै (भा०शल्य० २०।२०)। **संगृहीतः=रुद्धः**। आप इव काशिना (=मुष्टिना) संगृभीताः (ऋ०७।१०४।८)। **मुष्टावन्तर्धृता इत्याह**। सा कृपासंगृहीतेन हृदयेन मनस्विनी (भा०वन०१२।१०३)। **कृपासंगृहीतेन=कृपावशीकृतेन=कृपाविधेयीकृतेन**। मयि संगृभितात्मनाम्(भा०पु०३।२१।२४)। **मयि नियतमनसाम् इति विवक्षति। संगृभितमिति च्युतसंस्कृतिकम्। तमिमं कामतः कृतं शब्दविकारं पाणिनीया न सहन्ते। अयं च बहुलो भागवते। तथैव वृत्रस्य वधे संगृहीता हया मया** (भा०वन०१७१।१६)। **संगृहीताः=संयताः। अहमेषां क्षत्ताऽभूवमित्याह**। अर्जुनस्य तदानेन संगृहीता हयोत्तमाः (भा० वि० ३६।१८)। तम् (रथम्) आस्थितः केशवसंगृहीतं कपिध्वजो गाण्डिवबाणपाणिः (भा० भीष्म० २२।१०)। **उत्क्रोर्ध्वः**। सुसंगृहीतराष्ट्रः पार्थिवः (मनु० ७।११३)। **सुष्ठुवशीकृतदेश इत्याह**। प्रसह्यैव स्वसा तवामुना भुजङ्गमेन संगृहीता। **=वशेकृता**। वाग्यतः संगृहीतात्मा सर्वभूतदयान्वितः (भा०शां० १०४।५१)। **संगृहीतात्मा=यतमनाः**। संगृहीतमनुष्यश्च (रा०)। **सम्यक् पालनेनानुरञ्जितमनुष्यः**। संगृहीतलाङ्गूलः संयतचतुश्चरणः (तन्त्रा० १।१२)। **संगृहीतलाङ्गूलः=संक्षिप्तपुच्छः**। हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः (यो० सू० ४।११)। **सङ्गृहीता व्याप्ताः**। हन्त संगृहीतोऽधिकारः (मुद्रा० ३)। **संगृहीतः=प्रतिसंहृतः**। संगृभ्या न आ भरा भूरि पश्वः (ऋ० ३।५४।१५)।

संगृभ्य। **=संगृभ्य** (सांहितिको दीर्घः) । **संगृह्य समाहृत्येत्याह** । संगृह्य धनं सुबहु मणिरत्नमजाविकम् (रा० १।१७।१५) । **उक्तोऽर्थः** । स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्तरसंगृभ्य (अथर्व० ११।७।६) । **संगृभ्य=हस्ते धृत्वा । संग्राहो मुष्टिबन्धो भवतीति यतः** । क्षत्तारं चापि संगृह्य पृष्ट्वा कुशलमव्ययम् (भा०आश्व०५२।३१) । **संगृह्य=उपसंगृह्य पादग्रहणं कृत्वा** । संगृह्य तमलङ्कारं ताश्च तिस्रः सुरस्त्रियः (हरि० २।४१।३५) । **संगृह्य=प्रतिगृह्य=प्रतीष्य** । ततो मुहूर्तं संगृह्य स्यन्दनप्रवरं हरिः (भा०सभा०४५।६४) । **संगृह्य=निरुध्य** । गच्छ चाश्वं महाभाग संगृह्य पुरुषर्षभ (रा०१।४१।२१) । **संयम्य रश्मिष्वादायेत्याह** । सुयोधनमसंगृह्य न शक्या भूः ससागरा । केवला भोक्तुम् ··· ··· (भा० स्त्री०१५।७) ॥ **असंगृह्य=असंनियम्य** । तैस्तैरुपायैः सङ्गृह्य (मनु० ८ ४८) । **संगृह्य वशे कृत्वा** । प्रज्वाल्य तत्र चैवाग्निमकरोत्पाणिसङ्ग्रहम् (रा० ७।१२।२०) । **पाणिसङ्ग्रहम्=पाणिग्रहणम् । समा नार्थः** । धनैः कार्योऽस्य सङ्ग्रहः (मनु० ३।१३८) । सङ्ग्रहः=**सम्यग् ग्रहः** । पर्याप्तो राजसङ्ग्रहे (भा० शां० १२०।५०) । **राजसंग्रहे=सामन्तवशीकरणे** । एष वै परमो योगो मनसः सङ्ग्रहः स्मृतः (भा० पु० ११।२३।६१) । **संग्रहः=संयमः** । यक्षैः क्रियतेऽभीषुसङ्ग्रहः (वि० पु० २।१०।२१) । **अभीषुसंग्रहः=रश्मिसंयमनम्** । **संग्रहीता यन्ता भवतीति यतः** । न मन्याहनुसङ्ग्रहः (चरके सू० ५।८४) । कृतप्रकृतिमुख्यसङ्ग्रहैः (**अमात्यैः**) (रघु०१६।५५) । **कृतं प्रधानपौरजनसंनिपातनं यैस्तैरित्यर्थः** । तथा ग्रामशतानां कुर्याद्राष्ट्रस्य सङ्ग्रहम् (मनु० ७।११४) । **संग्रहम्=रक्षास्थानम्** । न सोस्ति कश्चित् त्रिषु सङ्ग्रहेषु (रा० ५।४८।५) । **सङ्ग्रहा लोकाः** । **भोक्तृभिः कर्मणा संगृह्यन्त इति सङ्ग्रहा लोका इति तिलकः** । विसृष्टस्य रणे तस्य परमास्त्रस्य सङ्ग्रहे (भा० सौ० १५।६) । **संग्रहे=संहारे=प्रतिसंहारे** । निग्रहेणापि पापानां साधूनां सङ्ग्रहेण च (मनु०८।३३२) । **संग्रहेण=समर्थनेन=परिपोषणेन** । भ्रातॄणां सङ्ग्रहार्थं सुखार्थं चापि लक्ष्मण (रा० २।९७।६) । **संग्रहार्थम्=सम्यक् पालनार्थम्** । न कुलं न कृतं विद्या न दत्तं नापि सङ्ग्रहः (रा०२।३९।२३) । **संग्रहः=दृष्टेपि दोषे स्वीकारः, अथवा संग्रहो बन्धनादिरिति तिलकः** । तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् (कठ० उ० १।२।१५) । **संग्रहेण=संक्षेपेण** । तत्ते पदं संग्रहेण प्रवक्ष्ये (गीता ८।११) । **उक्तोर्थः** । पुनर्ददौ सुरपतिर्मह्यं वर्म ससङ्ग्रहम् (भा० द्रोण० १०३।२०) । **ससङ्ग्रहम्=सोपदेशम्** । स्नेहसहितं द्रवत्वं सङ्ग्रहेपि हेतुर्भवति (यथा सक्तुकादौ) । **संग्रहः पिण्डीभावः** । आपः सङ्ग्रहात् (गौड० सां० का० ३९) । **पिण्डीभावकरणादित्याह** । संग्रहानुग्रहे यत्नः सदा कार्योऽनसूयता । निग्रहश्चापि ···(भा० शां० १४०।५३) ॥ लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि (गीता) ।

लोकस्येष्टे प्रवर्तनमनिष्टाच्च निवारणं लोकसंग्रहः । ग्रहो मल्लस्य संग्राहः (३।३।३६ सूत्रवृत्तौ) । **दृढमुष्टितेत्यर्थः** । किञ्चिदम्लं सङ्ग्राहि किञ्चिदम्लं भिनत्ति च (चरके सू० २६।५०) । **संग्राहि=कोष्ठबन्धकारि । अप्रत्तासु च** कन्यासु प्रत्तास्वेके हि कुर्वते । लोकसंग्रहणार्थं हि यदमन्त्रास्त्रियो मताः (बौ० ध०१।५।११।५) ॥ **लोकसंग्रहणं महाजनवशीकार इति गोविन्दस्वामी । आकाश-स्यावकाशदानं कर्म, वायोर्व्यूहनं विन्यासरूपं, तेजसः पाकोऽपां संग्रहणं पिण्डी-करणरूपम्** (मनु० १।८ इत्यत्र कुल्लूकः) । कनकभूषणसङ्ग्रहणोचितो **यदि** मणिस्त्रपुणि **प्रतिवाप्यते** (तन्त्रा० १।१।२६) । **संग्रहणोचितः=प्रतिवापस्यो-चितः** । कनकभूषणसङ्ग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते (पञ्चत० १।८५) **इत्यत्र पाठः** । **उक्तोर्थः** । अत्राह्मणस्य शारीरो दण्डः सङ्ग्रहणे भवेत् (बौ० ध० २।२।४।१) । **संग्रहणं पारदार्यम्** । स्तेयं च साहसं चैव स्त्रीसङ्-ग्रहणमेव च (मनु० ८।६) । **स्त्रियाः परपुरुषसम्पर्क इति कुल्लूकः । मूले च** (८।३५७) **मनुना स्वायम्भुवेन स्वयं सङ्ग्रहणं व्याख्यातम् । तद्यथा** स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा । परस्परस्यानुमते सर्वं सङ्ग्रहणं स्मृतम् इति । पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रियाः (याज्ञ० २।२८३) । **स्त्रीपुंसयो-र्मिथुनीभावः सङ्ग्रहणमिति मिताक्षरा** । वर्चसो द्यावापृथिवी संग्रहणी (अथर्व० १९।५८।३) । **संग्रहणी=संग्रहण्यौ=दात्र्यौ** । संगृहीता च मनुष्यान् (आप० ध० २।८।२०-२१) । **संग्रहीता=अर्थप्रदानप्रियवचनप्रयोगादिना वशे कर्ता । तृनि रूपम्** । मातलिं संग्राहकमित्युवाच (अवदा० शक्रजा०) । **सङ्ग्राहकः=क्षत्ता, सारथिः** ।

—घट् (घट चेष्टायाम्) । सान्द्रं लेढि रसामृतं विचिनुते तात्पर्यमुद्रां च यः । संघटते·····काव्यश्रमज्ञो जनः (का०मी०१।४) ॥ **संघटते=युज्यते** । सङ्जघटे लोकः (रात० ६।२४२) । **समियायेत्याह** । भेरीमृदङ्गवीणानां कोणसङ्घाटितः (शब्दः) (रा० २।७१।२६) । **संघाटितः=ताडनेनोत्पादितः** । तत्सर्वाः संघटयन्तां प्रजाः (कथा० १३।१८३) । सङ्घाटितासङ्ख्यचण्डाल-डामरमण्डल-(रात० ५।३२६) । सङ्घटय्याखिलान् स्थेयान् (रात० ६।२८) । **सङ्घटय्य=संगमय्य=संनिपात्य** ।

—घट्ट् (घट्ट चलने) । अन्योन्यमिश्रितैः शस्त्रैराकाशं संजघट्टिरे । बभञ्जुश्चिच्छिदुश्चैव तयोर्बाणाः सहस्रशः (रा० ६।६८।३०) । **संजघट्टिरे=चालयामासुः संजघृषुः सम्पिपिषुः** । संघट्टयति सैन्यानि द्रोणस्तु रथिनां वरः (भा० द्रोण० ९५।२२) । **संघट्टयति=संमेलयति=संगमयति** । संघट्टयन्द्विजान् सर्वान् (रात० ५।४५६) । **संनिपातयन्नित्याह** । संघट्टयन्नङ्गदमङ्गदेन (रघु० ६।७३) । **सङ्घट्टयन्=संघर्षयन्** । न्यवर्तत ततः कर्णः संघट्टित इवोरगः (भा० द्रोण० १८८।११) । **संघट्टितः प्रतिहतः** ।

—घुष् (घुषिर् अविशब्दने, विशब्दनं प्रतिज्ञानम्, ततोऽन्यस्मिन्नर्थे, शब्द इत्यन्ये)। द्विजसङ्घुष्टं सरः (भा० वन० १२५।११)। पक्षिनिनादितमित्याह। अष्टाध्याय्यां (७।२।२८) इत्यत्र वृत्तौ सङ्घुष्टं वाक्यमाह, संघुषितं वाक्यमाहेत्युदाहरणे। उच्चैरुदीरितमित्यर्थः।

—घृष् (घृषु सङ्घर्षे)। प्रयोगनिपुणैः प्रयोक्तृभिः सङ्जघर्ष सह मित्रसनिभौ (रघु० १६।३६)। सङ्घर्षः पराभिभवेच्छा। पस्पर्धे इत्यर्थः। धात्वर्थेन कर्मणा उपसङ्ग्रहाद् घृषिरत्राकर्मकः। सन्ति देवनिकायाश्च संकल्पाज्जनयन्ति ये। वाचा दृष्ट्वा तथा स्पर्शात् सङ्घर्षेणेति पञ्चधा (भा० आश्रम० ३०।२२)॥ सङ्घर्षेण=रत्या=मैथुनेन। तस्मिंश्च भ्राम्यमाणे ऽद्रौ संघृष्यन्तः परस्परम् (भा० आदि० १८।२२)॥ संघृष्यन्तः संघृष्यमाणाः। सम्मृद्यमाना इत्यर्थः।

—घ्रा (घ्रा गन्धोपादाने)। तमाहृतमग्निभिः संघ्रापयन्ति (श० ब्रा० १२।५।१।१३)। गन्धं ग्राहयन्तीत्यर्थः। शम्शब्दोऽत्र विशेषको न।

—चक्ष् (चक्षिङ् व्यक्तायां वाचि, छन्दसि तु दर्शनेपि)। यदमुष्मै स्वाहाऽमुष्मै स्वाहेति जुह्वत् संचक्षीत (श० ब्रा० १३।३।५।२)। संचक्षीत=गणयेत्। संचक्षाणो भुवना देव ईयते (ऋ० ६।५८।२)। गणयन् सम्पश्यन्वेत्याह। सं यूथेव जनिमानि चष्टे (ऋ० ७।६०।३)। उक्तोऽर्थः। न पततः सं संचक्षीत (आप० ध० १।११।३१।१७)। पतत्त्रिणो न गणयेदित्याह। यस्य त्रसन्ति शवसः संचक्षि शत्रवः (ऋ० ६।१४।४)। संचक्षि=दर्शने, चिन्तायाम्। घोरमुत्पातजं भयम्। संचचक्षेऽथ मेधावी शरीरे चात्मनो जराम् (रा० २।१।२७)। संचचक्षे=ददर्श। चक्षुभ्यां संचक्षाणो दहन्निव ग्रहनद् हरिम् (भा० पु० ३।१६।८)। उक्तोऽर्थः। मेरोरप्यन्तरं पार्श्वे पूर्वं संचक्ष्व संजय। निखिलेन महाबुद्धे माल्यवन्तं च पर्वतम् (भा० भीष्म०७।१)। संचक्ष्व=उपवर्णय, विस्तरेणाख्याहि। संचक्षे कं पृश्निमेतामुपाजे (अथर्व०५।१०।२)। संचक्षे परीक्षितुम्।

—चर् (चर गतिभक्षणयोः)। सर्वा दिशः समचरद् रोहितोऽधिपतिर्देवः (अथर्व०१३।२।४१)। समचरत्=आक्रामत्=व्याप्नोत्। सर्वा दिशः समचरत्सैन्यं विक्षोभयन्निव (भा० द्रोण० २१।३४)। उक्तोऽर्थः। उभौ लोकौ संचरसि इमं चामुं च देवल (समस्ततीयायुक्तात् १।३।५४ सूत्रे भाष्ये)। नान्तराग्नी (गार्हपत्याहवनीयौ) संचरति (आप० श्रौ० ६।१।२।७)। संचरिष्यति लोकांश्च देवगन्धर्वरक्षसाम् (भा० आश्रम० २०।३५)। क्वचित्पथा संचरते सुराणाम् (रघु० १३।१६)। संचरते=गच्छति। शिष्यो गुरोर्नृपश्रेष्ठ प्रतिकूलं न संचरेत् (वि० पु० ३।६।४)। संचरेत्=आचरेत्=व्यवह-

रेत् । अस्थाने सम्शब्दः । केवलेन चरतिनाऽऽचरतिना वैवमर्थं ब्रूयात् । चरन्तः संचरन्तश्च तत्र वातमजामृगाः (बृ०श्लो०सं०८।४२) । **संचरन्तः परिक्रामन्तः** । संचारयामास जरां तदा पुत्रे महामनि (भा० आदि०७५।४५) । **संचारयामास** = **संक्रमयामास** । सुहृदि वत्से वाङ्मयं समस्तमेव संचारयामास (हर्ष० कविवंशवर्णने) । **उक्तोर्थः** । ह्रस्वमासाद्य संचारं नासौ विनमते क्वचित् (भा० वन० ७५।६) । **सञ्चारम् द्वारम्** । यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः । अनभिज्ञास्तस्मिन्नाणां दुर्दिनेष्वभिसारिकाः (कु० ६।४३) । **संचरो मार्गः** । **संचरतेऽनेनेति व्युत्पत्तेः** । दक्षिणपश्चिमे अन्तरेण सञ्चरः (गो० गृ० ३।७।१०) । **सञ्चरः संचरणमार्गः** । तेषां पौर्णान्तानि पञ्च सञ्चराणि (आप० श्रौ० ८।१।२।३) । **संचरन्ति पर्वचतुष्टयमिति पर्वचतुष्टयसाधारणानि पञ्च हवींषि संचराण्युक्तानि** । दूती संचारिणी समे (अमरः) । दूतीसंचारिके समे इत्यपि पाठः । **संचारयति प्रापयति सन्देशमिति व्युत्पत्तेरिति स्वामी** ।

—चल् (चल कम्पने, चल विलसने) । ताः स्त्रियः स्वप्नशीलज्ञाश्चेष्टां संचलनाडिषु (रा० २।६५।१४) । **संचलनाडिषु**=हृदयकरमूलनाडिषु ।

—चेष्ट् (चेष्ट चेष्टायाम्) । संचेष्टन्ते शत्रवोऽस्माद्रणाग्रे (भा० उ० ४८।४७) । **इतस्ततो भ्रमन्तीत्यर्थः** । पाण्डवानां महत्सैन्यं यं दृष्ट्वोद्यतमाहवे । कालाग्निमिव दुर्धर्षं समचेष्टत नित्यशः (भा० भीष्म० १४।१३) । **समचेष्टत**= **अकम्पत** ।

—जन् (जनी प्रादुर्भावे) । दृष्टवत्यास्तु संजज्ञे शिबिरौशीनरो नृपः (हरि० १।३१।२७) । **दृष्टवत्या इति सप्तमीस्थाने पञ्चमीप्रयोगो व्यवहारव्यभिचारः क्वाचित्कः** । **जननक्रियायां मातुरधिकरणता स्थितेति प्रसाधितमस्माभिर्वाग्व्यवहारादर्शे** ।

—जल्प् (जल्प व्यक्तायां वाचि) । तस्मिन्पुरे जनपदे सञ्जल्पो भूच्च सङ्कुशः । **सञ्जल्पः**=**साधारणो जल्पः, समुदितो जल्पः** ।

—जि (जि जये, जि अभिभवे) । अहं धनानि संजयामि शश्वतः (ऋ० १०।४८।१) । **संजयामि**=**साकं जयामि** । न च सन्दर्शने किञ्चित्प्रवृत्तमपि संजयेत् (भा० वि० ४।२६) । **संजयेत्**=**स्वीकुर्यात्** । **अहम्पूर्विकयाऽनाकारितः सन्नित्यर्थः** । **सन्दर्शने समक्षम्** । सत्त्वं सुखे संजयति रजः कर्मणि भारत (गीता १४।६) । **सत्त्वं प्रकृष्टं सत्सुखदुःखकारणमभिभूय संजयति संश्लेषं जनयतीत्यर्थः** । इतो जयेतो विजय संजय जय (अथर्व ८।८।२४) ।

—जीव् (जीव प्राणधारणे) । संजीवाः स्थ संजीव्यासम् (अथर्व० १९।७०।३) । **संजीवाः सम्यग्जीवन्तः** । **जीवनकाल एकः क्षणो वैयर्थ्येन न**

नीयते यैस्ते (सायणः) । तेन सं जीवतु मम प्रिया (भा० आदि० ६।४) । **पुनः प्राणान्धारयन्तित्याह** । तवामृतरसप्रख्यं हस्तस्पर्शमिमं प्रभो । लब्ध्वा सं जीवितोऽस्मीति मन्ये कुरुकुलोद्वह । (भा० आश्रम० ३।७३) । **उक्तोर्थः** ।

—**जु (जु वेगितायां गतौ सौत्रो धातुः)** । सञ्जवनपुञ्जितोद्विग्नपरिजने (हर्ष० ५) । **सञ्जवनं चतुः शालम्** ।

—**ज्ञा (ज्ञा अवबोधने)** । सं जानते न यतन्ते मिथस्ते (ऋ० ७।७६।५) । **संजानते परस्परमानुकूल्येन ऐकमत्येन वर्तन्त इत्याह** । ते जानत स्वमोक्यं सं वत्सासो न मातृभिः (ऋ० ८।७२।१४) । सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् (ऋ० १०।१९१।२) । सं जानीध्वं सम्पृच्यध्वं सं वो मनांसि ज़ानताम् (अथर्व० ६।६४।१) । **उक्तोऽर्थः** । सं ह्यज्ञास्था वरुणः (वरुणेन—पिप्पलाद०) संविदानः (अथर्व० ३।४।६) । **समज्ञास्थाः सम्यग् जानासि, इतरैः साधारणं वा जानीषे त्वदाह्वानविषये** । सं जानीतां मे ग्रामः इति तस्य ह तत एव ग्रामः सं जज्ञे (श० ब्रा० ४।१।५।७) । **संजानीतां सम्यक् समं वर्तताम्, मिथ आनुगुण्येन वा व्यवहरतामित्याह** । **संजज्ञे=साधु संव्यवजहार**। द्विषद्भ्यो वै रघ्यामो हन्त सं जानामहा एकस्य श्रियै तिष्ठामहा इति (श० ब्रा० ३।४।२।२) । **संजानामहा=संजानामहै=संगता एकमतयो भवाम** । प्रजापतिः प्रजा असृजत ता नानोल्वा असृजत, ता न समजानत । सोऽकामयत सं जानीरन्निति ताः समानोल्बा अकरोत् (श० ब्रा० ७।१।१।७) । **उक्तोऽर्थः** । यदा वै द्यावापृथिवी सं जानाते अथ वर्षति (श०ब्रा० १।८।३।१२) । मात्रा सं जानीते । पित्रा सं जानीते (पा० २।३।२२ सूत्रवृत्तौ) । **मात्रैकमना वर्तते । पित्रैकमना वर्तत इत्येतयोरर्थः** । शतं सं जानीते । सहस्रं सं जानीते । **देयमित्यभ्युपगच्छति इति वारुचसङ्ग्रहे नारायणः** । **अवेक्षत इति दीक्षितः** । **अन्वेषत इति चापटेः** । मातुः संजानाति । पितुः सं जानाति । **सोत्कण्ठं स्मरतीत्यर्थः** । यन्नो भवान्सं जानीते तस्मिंस्तिष्ठामहे वयम् (भा० पु० ६।१६।३४) । **संजानीते=आज्ञापयति** । **अपूर्वः स्वकपोलकल्पितोऽर्थः** । **तदस्य शीलं पुराणकारस्य व्यासेतरस्य** । यद्वै त्वं (मनः) वेत्था ऽहं तद् विज्ञापयामि सं ज्ञपयामि (श० ब्रा० १।४।५।१०) । **सर्वस्य बोधविषयतां नयामीत्याह** । अथैनामुदगुत्सृप्य सं ज्ञपयन्ति (गो० गृ० ३।१०।२१) । **आलभन्ते घ्नन्तीत्याह** । ता (आपः) एतयर्चा समज्ञपयत् (ऐ० ब्रा० ८।२) । **सम्प्रतिपन्ना अकरोदित्यर्थः** । सं जानानाः सं मनसः सयोनयः (अथर्व० ७।२१।१) । **संजानानाः समानज्ञानाः** । **कार्यविषये परस्परमैकमत्यं प्राप्ता इत्यर्थः** । ईलिता हि शेरे सं जानानाः (श० ब्रा० २।३।१।३) । **संजानानाः=सन्तुष्यन्त इत्यर्थः प्रतिभाति** । **न चेदं कल्पनामात्रम्** । **मारणतोषणनिशामनेषु ज्ञा इति**

घटादिषु मित्त्वार्थं गणसूत्रम्। तत्र ण्यन्तस्य संज्ञपयतेस्तोषणमर्थो व्यक्तमुदितस्तेनाण्यन्तस्य संजानातेस्तुष्टिरर्थ इत्यनायासमायाति। ईलिता इति ईरयतेर्लत्वमापाद्य निष्ठायां रूपम्। मृदुमृद्वास्फालिता इत्यर्थः। तद्यत् तिस्रश्चैका चान्वाह संजानानावेवैनौ तत्संगमयति (ऐ० ब्रा० १।३०)। सञ्जानानौ सम्प्रतिपन्नाविति षड्गुरुशिष्यः। संजानाना ह्यस्यापो यज्ञं वहन्ति (ऐ०ब्रा० २।२०)। संजानानान् परिहरन्रावणानुचरान्बहून् (भट्टि० ८।५६६)। संजानानान्=चेतयमानान्=जागृतः=जागरूकान्। मयि संज्ञानमस्तु वः (अथर्व० ३।१४।४)। संज्ञानं सम्प्रीतिरिति सायणः। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानम् (ऐ० उ० ३।४)। संज्ञानं प्रबोधसामान्यलक्षणमिति गोपाल०। संज्ञानं संज्ञप्तिश्चेतनभाव इति शङ्करः। संज्ञानं न स्वेभिः संज्ञानमरणेभिः (अथर्व० ७।५४।१)। संज्ञानमैकमत्यम्, अविसंवादः। वेदेऽरणशब्दः परवचनः। तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः (अथर्व० ३।३०।४)। संज्ञानं समानज्ञाननिमित्तम्। ऐकमत्यापादकम्। इतद्वै संज्ञानं सन्तनि सूक्तं यत्कयाशुभीयम् (ऐ० ब्रा० ५।१६)। संज्ञानं परस्परैकमत्यसाधनमिति सायणः। ऐक्यहेतुभूतमिति षड्०। क्षुद् धर्मसंज्ञां प्रणुदत्यादत्ते धैर्यमेव च (भा० वन० २६०।२४)। संज्ञां बोधम्। अहिते हितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः (भा० शां० ३२६।२७)। हितसंज्ञः=हितं सम्यग् जानातीति। संज्ञामेबाभ्यामेतत्करोति (श० ब्रा० ७।१।१।३८)। संज्ञाम्=समन्वयम्। सशर्यातेभ्यश्चुक्रोध। तेभ्योऽसंज्ञां चकार। पितैव पुत्रेण युयुधे भ्राता भ्रात्रा (श० ब्रा० ४।१।५।३)। असंज्ञा=विरोधः।

—ज्वर् (ज्वर रोगे)। किमिच्छन् कस्य कामाय शरीरमनु संज्वरेत् (बृ० उ० ४।४।१२)। ईश्वरत्वं पृथिव्याश्च वसुमत्तां च तादृशीम्। यज्ञं च तादृशं दृष्ट्वा मादृशः को न संज्वरेत् (भा० सभा० ४७।३४)। संज्वरेत्=सन्तप्येत। सन्तापः संज्वरः समाधित्यमरः। दिष्टं बलीय इति मन्यमानो न संज्वरेन्नापि हृष्येत्कथंचन (भा० आदि० ८६।८)। उक्तोऽर्थः।

—डी (डीङ् विहायसा गतौ)। संडीनम् (भा० कर्ण० ४१।२६)। ललितं गतमित्यर्थः।

—तक्ष् (तक्षू त्वक्षू तनूकरणे)। निस्त्रिंशाभ्यां सुतीक्ष्णाभ्यामन्योन्यं संततक्षतुः। सम्यक् ततक्षतुरित्यर्थः।

—तन् (तनु विस्तारे)। डुवप बीजसन्ताने इति धातुपाठः। बीजसन्तानो बीजविकिरणम् (=बीजविकरणम्)। सं रश्मिभिस्ततनः सूर्यस्य (ऋ० ७।२।१)। संततनः संयुङ्ग्धि। अध्वर्युं निष्क्रामन्तं प्रस्तोता सन्तनुयात् (लाट्या० श्रौ० १।११।२)। तमनु बध्नीयात्। अनुपदमनुगच्छेदित्याह।

यज्ञेन यज्ञं सन्तनोति सन्ततं ह्येवास्यैतद् व्रतं भवति (श० ब्रा० ३।२।२।७)। **सन्तनोति सम्बध्नाति, अविच्छिन्नं करोति**। अभोजनेन सन्तनुयादित्येके (द्रा० गृ० २।२।६)। **अविच्छिन्नं कुर्यादित्यर्थः**। अद्भिरेवास्या एतत्क्षतं विलिष्टं सन्तनोति (श० ब्रा० ६।४।३।१)। **सन्तनोति सन्दधाति**। माल्यैश्च विविधैः·····सन्तता शुशुभे भूमिः (रा० ५।१४।४६)। **सन्तता व्याप्ता=आकीर्णा**। अपरोप्यवलप्राणः कृशो धमनिसन्ततः (भा० वन० ६।१२)। **धमनिसन्ततः=सिराव्याप्तः**। **छातत्वान्निर्मांसप्रायत्वात्सन्दृष्टधमनीकः, धमनील इति यावत्**। अर्थसन्ततिकामश्च रक्षेदेतानि नित्यशः (भा० उ० ३६।३८)। **अर्थसन्ततिः=अर्थानामविच्छेदेन वृद्धिः**।

—**तप् (तप सन्तापे)**। तानथर्वणः ऋषीनाथर्वणांश्चार्षेयानभ्यश्राम्यद् अभ्यतपत् समतपत् (गो० ब्रा० १।१।५)। **सुष्ठ्वतापयदित्यर्थः**। संमा तपन्त्यभितः सपत्नीरिव पर्शवः(ऋ० १०।३३।२)। **सन्तपन्ति=बाधन्ते=निपीडयन्ति**। ऋतस्य द्वारौ मा मा सन्ताप्तम् (वा० सं० ५।३३)। दिवापि मयि निष्क्रान्ते सन्तप्येते गुरू मम (सावित्र्यु० ५।८३)। **सन्तप्येते=दूयेते=दुःख्यतः**। उरसा हि समिव तप्यते (श० ब्रा० ११।५।२।४)। न सन्तापयितुं शक्यं सागराम्भस्तृणोल्कया (हितोप० १।८१)। **सन्तापयितुम्=उष्णीकर्तुम्**। यदतप्तं प्रणमति न तत्सन्तापयन्त्यपि। यच्च स्वयं नतं दारु न तत्सन्तापयन्त्यपि॥ इति च तत्रैव पाठान्तरं मातृकासु। सन्तप्तानां त्वमसि शरणम् (मेघ० ७)। **दुःखितानाम्, आर्तानां घर्मार्तानाम्**। सन्तप्तायसि संस्थितस्य पयसो नामापि न श्रूयते (भर्तृ० २।६७)। **सन्तप्तम्=अत्युष्णम्=प्रज्वलत्**। सन्तप्तपद्माः पद्मिन्यो लीनमीनविहङ्गमाः। **सन्तप्तपद्माः=म्लानाम्बुजाः**।

—**तम् (तमु काङ्क्षायाम्)**। चिरं चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु सन्ताम्यति (गीतगो० ४।२१)। **सन्ताम्यति संक्षीयते उपदीयते**।

—**तर्ज् (तर्ज भर्त्सने)**। ततस्तं वाग्भिरुग्राभिः संरब्धः समतर्जयत् (हरि० २।११६।७७)। **समतर्जयत्=समतर्जयत=अभर्त्सयत। नार्थः समा**।

—**तिज् (तिज निशाने)**। वृकोदरम्। सन्तेजयंस्तदा वाग्भिर्मातरिश्वेव पावकम् (भा० उ० ७५।३)॥ **सन्तेजयन्=सम्प्रहर्षयन्, वर्धयन्, क्रोधं जनयन्**।

—**तुद् (तुद व्यथने)**। आतोदिनौ नितोदिनावथो सन्तोदिनावुत (अथर्व० ७।१००।३)। **सन्तोदिनौ सम्भूय व्यथाकारिणौ**।

—**तुल् (तुल उन्माने)**। आकिञ्चन्यं च राज्यं च तुलया समतोलयत् (भा० शां०२७६।१०)। उत्कृत्योत्कृत्य मांसानि तुलया समतोलयत् (भा०अनु०३२।२४)। **सम्-शब्द इह धातुना साहचर्यमेव प्रयोगेषु दर्शयति नार्थान्तरं किमपि द्योतयति**।

—तुष् (तुष प्रीतौ)। सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च (मनु० ३।६०)। **प्रीत इत्यर्थः**। इहापि **सम्शब्दो नार्थे वैशिष्ट्यं किमपि करोति**। सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः (मनु० ४।१२)। संनिहितसाधनादधिकस्यानादित्सा सन्तोष इति योगाः।

—तृद् (उतृदिर् हिंसानादरयोः)। तान् (गर्तान्) अक्षण्या सन्तृन्दन्ति ···तस्मादिमे प्राणाः परः सन्तृण्णाः (श० ब्रा० ३।५।४।१४)। **सन्तृण्णाः=सन्दृब्धाः=तिरश्चीनेन च्छिद्रेण संयुक्ताः**। त्रीणि पलाशपलाशानि सन्तृद्य (शां० श्रौ० ४।१८।५)। **सन्तृद्य=सम्भिद्य**। **यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णान्येवमोङ्कारेण सर्वा वाक् सन्तृण्णा** (छां० उ० २।२३।४)। **सन्तृण्णा=विद्धा**।

—तृप् (तृप प्रीणने)। यावन्तः कामाः समतीतृपस्तान् (अथर्व० १२।३।३६)। **या तृप्तिः सैव सन्तृप्तिः, तेन सम्शब्दो धात्वर्थानुवादी नार्थोपजनाय। धातुपाठेऽर्थनिर्देशो व्यामोहकः। धातुरेष प्राचीने साहित्ये सर्वत्राकर्मको न केवलं दैवादिकः सौवादिकोपि। अत एव प्रकृते समतीतृप इत्यत्र प्रीणने णिच्प्रयोगः**।

—तॄ (तॄ प्लवनतरणयोः)। यदङ्ग त्वा भरताः सन्तरेयुः (ऋ० ३।३३।११)। **सन्तरेयुः=तरेयुः=उत्तरेयुः**। चिन्ताशोकमहाह्रदम्··· ···प्रज्ञया सन्तरन्ति (भा० शां० ३०१।६४-६५)। सं पूषन्ध्वनस्तिर (ऋ० १।४२।१)। **अध्वनोऽतिक्रामेत्याह**। ऋक्सामाभ्यां सन्तरन्तो यजुर्भिः (वा० सं० ४।१)। स कृत्वा प्लवमात्मानं सन्तारयति तावुभौ (मनु० ११।१६)।

—त्यज् (त्यज हानौ)। यजस्व देहि दीक्षस्व तपस्तप्यस्व सन्त्यज (रा० २।१०८।१६)। **सन्त्यज=प्रव्रज**। **सम्शब्दस्त्यागस्य परिपूर्णतामाह, दत्तस्याप्रत्यापत्तिम्**।

—त्वर् (त्वित्वरा सम्भ्रमे)। यद्ध वा इदं पूर्वयोः सवनयोरसंत्वरमाणाश्चरन्ति (ऐ० ब्रा० ३।४४)। **असन्त्वरमाणाः=असम्भ्रान्ताः=अव्यग्राः**। त्वं प्रापयाशु मां रामं प्राणाः सन्त्वरयन्ति माम् (रा० २।५९।२३)। **सन्त्वरयन्ति=त्वरां कारयन्ति**।

—दंश् (दंश दशने)। व्याघ्रीव च हरेत् पुत्रान्सन्दशेन्न च पीडयेत् (शिक्षा)। **दशनैर्गृह्णीयात्**। सन्दश्य दशनच्छदम् (भा० आदि० १६३।८)। **ओष्ठौ निपीड्य**। **अधरोष्ठौ उपपीड्य**। सन्दष्टकुसुमशयनानि गात्राणि (शा० ३।१८)। **सन्दष्टवस्त्रेष्वबलानितम्बेषु** (रघु० १६।६५)। **सन्दष्टवस्त्रेषु=संश्लिष्टाम्बरेषु**।

—दह् (दह भस्मीकरणे)। यं त्वमग्ने समदहस्तमु निर्वापया पुनः (अथर्व० १८।३।६)।

—दा (डुदाञ् दाने)। सर्वाः संगत्य वीरुधो ऽस्यै संदत्त वीर्यम् (ऋ० १०।९७।२१)। संदत्त=सम्भूय दत्त। समस्मे इषं वसवो ददीरन् (ऋ० ७।४८।४)। उत्कोऽर्थः। अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः (अथर्व० १२।१।५३)। उत्तरात्त्वा सोमः सं ददातै (अथर्व० १२।३।२४)। सन्धारयतित्यर्थः। मा वामन्ये नियमन् देवयन्तः सं यद् ददे नाभिः पूर्व्या वाम् (ऋ० ४।४४।५)। सन्ददे=स्वसविधे धारयामि। आत्मानमपि सन्दत्ते पात्रे दाता स उच्यते (शुक्र० १।३२४)। अनर्थकः सम्शब्दः।

—दा (दाप् लवने)। बहिर्देवसदनं सन्दामीति (का० श्रौ० भाष्य उद्धरणम्)। अवदाय संगृह्णामीत्यर्थः।

—दिश् (दिश अतिसर्जने)। वाल्मीकये च ऋषये सन्दिदेशासनं ततः (रा० १।२।२९)। सन्दिदेश=ददौ। इदमासनं समाध्यतामिति निवेदयामासेत्यर्थः। तौ सन्दिदेशेतिकर्तव्ये (भा० वन० २८६।२८)। उपदिदेशेत्याह। अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् (कु० ६।१)। सन्देशेन प्रजिघायेत्यर्थः। इह दिशिरुच्चारणक्रियो न, नाप्यतिसर्जनार्थः, किन्तर्हि वक्तव्योच्चारणपूर्वके विसर्जने वर्तते। अत एव सखीम् इत्यत्र द्वितीयोपपन्ना भवति। विश्वात्मन इत्यत्र च क्रियाग्रहणमपि कर्तव्यमिति वचनाच्चतुर्थी च। फाल्गुनं चापि सन्दिदेश हयान्प्रति (भा० १४।२१०४)। सन्दिदेश=उपदिदेश। अभिदूति काचिदिति सन्दिदिशे (शिशु० ९।५६)। दूतीषु मध्ये काचिद् वक्ष्यमाणलक्षणं सन्देशमुक्तेत्यर्थः। न त्वां सन्देष्टुमर्हामि भर्तृन्प्रति (भा० सभा० ७९।५)। सन्देष्टुम्=उपदेष्टुम्=अनुशासितुम्। सन्दिष्टश्चासि यानर्थांस्तांस्तान् ब्रूयास्तथा तथा (रा०२।५२।५९)। सन्दिष्टः=उपदिष्टः। तव सन्दिष्टवान् इदम् (कथा० १४।२)। तुभ्यमिमं सन्देशमुक्तवानित्यर्थः। आदिशत्सर्वं यथासन्दिष्टमिष्टवत् (रा० २।८२।२२)। यथासन्दिष्टम्=यथादेशम्। सन्दिष्टस्याप्रदाता च (याज्ञ० २।२३२)। सन्दिष्टस्य=प्रतिश्रुतस्य। दूतैर्मधुरसंभाषैर्नैतदस्तीति सन्दिशन् (भा०उ० १९०।२)। ततः शार्ङ्गेण सन्दिष्टश्चित्रसेनो ममान्तिकम् (भा० वन० ३६।३१)। सन्दिष्टः=प्रेषितः=विसृष्टः (सन्देशेन सहेति गम्यते)। किं नु खलु दुःष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम् (शा० ४)। सन्देशवचः प्रापणीयं हारणीयमित्यर्थः।

—दिह् (दिह उपचये)। सा (निर्ऋतिः) पृथिव्या सन्दिह्यते (नि०२।७)। सन्दिह्यते=व्यतिकीर्यते, व्यामिश्र्यते। योऽयं संवत्सरे यज्ञः स सन्दिह्यते (मै०

१७।४७ सूत्रे शा० भा०)। **तद्विषये सन्देहो भवतीत्यर्थः**। करोतिकिरती सन्दिग्धौ वर्षकर्मणा (नि०२।६)। **सन्दिग्धौ=सन्देहस्य विषयः**। तस्य सन्दिदिहे बुद्धिस्तां दृष्ट्वा तद्विनिर्णये (रा० ५।१८।१७)। **सन्देहवत्यजायतेत्यर्थः**। धूपैर्जालविनिःसृतैर्वलभयः सन्दिग्धपारावताः (विक्रम० ३।१०)। **उक्तोऽर्थः**। पान्तु त्वामकठोरकेतकशिखासन्दिग्धमुग्धेन्दवः (जटाः) (मालती० १।२)। **उक्तोऽर्थः**। सन्दिग्धसाध्यवान् पक्षः (तर्क०)। पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः (तर्कभाषा)। **सन्दिहानः सन्देहं कुर्वाणः**। तन्मे सन्देहयद् दिशः (भा०आदि० १३१।५१)। **सन्देहयत्=समदेहयत्=अमोहयत्**। अथ सं देहयानानां दृष्ट्वा स्पृष्ट्वा च पार्थिवम्। यत्तदाशङ्कितं पापं तस्य जज्ञे विनिश्चयः (रा०२।६५।१५)॥ **सन्देहयानानाम् इति स्वार्थे णिच्**। **आगमशास्त्रस्यानित्यत्वान्मुङ्न कृतः**। सोऽयं मुगभावः **क्वाचित्को णिङन्तस्य कमेर्ण्यन्तानां च केषांचिच् शानचि दृष्टो नेतरत्र**। तस्य क्षतजसन्दिग्धं जातरूपपरिष्कृतम्। विमुच्य कवचम्·····(भा० स्त्री० २०।८)। **अत्र सन्दिग्धं दिग्धमेवाह**। **सम्शब्दो धात्वर्थानुवादी**। रक्तचन्दनसन्दिग्धौ···बाहू (भा० कर्ण० ६२।२०)। **इहापि पूर्ववत्**। लोमानि जतुना सन्दिह्य (कौशिक० १३।२६)। **सन्दिह्य=उपलिप्य**। सन्देहस्त्वेव आत्मन इति होवाच (छां० उ० ५।१५।२)। **सन्देहः=त्वगादिरुपचयहेतुः**।

—**दीप् (दीपी दीप्तौ)**। अग्निं न मा मथितं सं दिदीपः (ऋ०८।४८।६)। **प्रज्वलय प्रकाशय भासयेत्याह**। सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः (भर्तृ० ३।७७)। **सन्दीप्ते=दग्धे**।

—**दुष् (दुष वैकृत्ये)**। यदि यास्यति सन्दुष्टा रामस्याक्लिष्टकर्मणः। नेयं स्वस्तिमती सेना गङ्गामद्य तरिष्यति (रा० गोरे० सं० २।६१।११)। **सन्दुष्टा=विकृतमनाः=अनिष्टसङ्कल्पा**। **समा नार्थः, यथा प्रदुष्टविप्रदुष्टयोर्विप्राम्यां नार्थः**।

—**दुह् (दुह प्रपूरणे)**। अहन्यहनि सन्दुह्यान्महीं गामिव बुद्धिमान् (भा० शां०१२०।३३)। **दुह्यादित्येवार्थः सम्शब्दो धात्वर्थानुवर्ती**। य इमे रोदसी मही सं मातरेव दोहते (ऋ० ६।१८।५)। **सन्दोहते=सम्भूय दुग्ध इत्याह**। **सम्पिवत इति तात्पर्यम्**। सर्वघोषस्य सन्दोहो गृह्यतां मा विचार्यताम् (वि० पु० ५।१०।३६)। **समुदितो दोहः सन्दोहः**। **अन्यत्र समूहवचने सन्दोहशब्द इव नात्र दोहशब्दोऽत्यन्ततिरस्कृतार्थः**। सर्वघोषस्य सन्दोहः क्रियतां किं विचार्यते (हरि० २।१६।११)। **उक्तोऽर्थः**। त्रिरात्रं चैव सन्दोहः सर्वघोषस्य गृह्यताम् (हरि० २।१७।१४)।

—**दृभ्** (**दृभी ग्रन्थे**)। वायुना वै गौतम सूत्रं यस्मिन्नयं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दब्धानि भवन्ति (श० ब्रा० १४।६।७।२)। **सन्दृब्धानि=सङ्ग्रथितानि**।

—**दृश्** (**दृशिर् प्रेक्षणे**)। एवं या इष्टा देवता भवन्ति ताः सम्पश्यत्यसौ हविरजुषतासौ हविरजुषतेति (श० ब्रा० १।६।१।१०)। मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह (रा० १।१।५५)। **सन्ददर्श=आलुलोके**। **अत्र समा न किञ्चिदर्थान्तरमुपजन्यते**। भुवना सं च पश्यति (अथर्व० ६।३४।४)। **ऐकध्यरूपेण पश्यतीति सायणः**। ध्यानयोगेन सम्पश्येत्सूक्ष्म आत्मात्मनि स्थितः (याज्ञ० ३।६४)। **सम्पश्येत्=सम्यक् पश्येत्**। इन्द्रेण सं हि दृक्षसे (ऋ० १।६।७)। **इन्द्रेण साकं समानकाले समानदेशे वा दृश्यस इत्याह**। समिव वा इमे लोका ददृशिरे (पञ्च० ब्रा० १२।२) **उक्तोऽर्थः**। तदिदमेकमेव रूपं समदृश्यताप एव (श० ब्रा० ६।१।१।१२)। **सम्शब्दोऽत्र दर्शनस्य साम्यमाह**। संदृष्टव्ययकर्मवित् (रा० २।१।२६)। **संदृष्टः सम्यक् चिन्तितो व्ययो येषु तानि कर्माणि सन्दृष्टव्ययानि**। कवीँरिच्छामि संदृशे सुमेधाः (ऋ० ३।३८।१)। **कविभिः सुमेधस्त्वेन समानो दृश्येयेतीच्छामीत्याह**। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्धया कंचिदर्थं सम्पश्यति, सन्दृष्टे प्रार्थना···। (१।३।१४ सूत्रे भाष्ये)। विपाकोऽयं दशग्रीव सन्दृष्टोऽनागतो मया (भट्टि० १८।३)। **सन्दृष्टः=सम्यगुपलब्धः**। मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरम्। श्रीगोविन्दपदारविन्दम्···(गीत० ७।४२)। **सन्दर्शितेन्दीवरम्=आभासितरोलम्बम्। इन्दीवरशब्द इह भ्रमरमाचष्टे**।

—**दो** (**दो अवखण्डने**)। सं परमान्समवमानथो सन्द्यामि मध्यमान् (अथर्व० ६।१०३।२)। **सन्द्यामि बध्नामीत्यर्थः**। **सम्पूर्वो द्यतिर्बन्धने वर्तत इति सायणः**। सन्दानं वो बृहस्पतिः (अथर्व० ६।१०३।१)। **सन्दानं बन्धनम्**। उत्तिष्ठतमारभेथामादानसन्दानाभ्याम् (अथर्व० ११।६।३)। **सन्दानं बन्धनरज्जुः**। विमृळीकाय ते मनो रथीरश्वं न सन्दितम्। गीर्भिर्वरुण सीमसि (ऋ० १।२५।३)। **सन्दितम् बद्धम् (स्वस्थाने स्यन्दने वा)। विसीमसि=विसिनुमः=विधितं कुर्मः**। सन्दिताय स्वाहा। वल्गते स्वाहा (वा०सं०२२।७)। असन्दितानां सन्दाता सन्दितानां च मोक्षकः (मनु० ८।३४२)। **सन्दाता बन्धा। सन्द्यतेस्तृ चि रूपम्। असन्दितानामबद्धानामश्वादीनाम्**।

—**द्युत्** (**द्युत दीप्तौ**)। सं सूर्येण दिद्युतद् उदधिनिभिः (वा० सं० ३८।२२)।

—द्रु (द्रु गतौ)। यत्रा नरः सं च वि च द्रवन्ति (वा० सं २९।४८)। **सन्द्रवन्ति**=संगच्छन्ते। अन्वर्थं खल्वपि निर्वचनम्—गुणसन्द्रावो द्रव्यम् (५।१।११९ सूत्रे भाष्ये)। **गुणसमूह इत्यर्थः**।

—धा (डुधाञ् धारणपोषणयोः)। ब्रह्मा च गिरो दधिरे समस्मिन् (ऋ० ६।३८।४)। **सन्दधिरे**=**संनिहितवन्तः**। सं सौभगानि दधिरे पावके (ऋ० ६।५।२)। **उक्तोऽर्थः**। यन्मामेकं समधत्ताहिहत्ये (ऋ० १।१६५।६)। **प्रासञ्जयदित्याह**। हस्तेषु खादिश्च कृतिश्च संदधे (ऋ० १।१६५।६)। **सन्दधे**—**कर्मणि प्रत्ययः**। खादिश्च कृतिश्च निहिते इत्यर्थः। यथा नकुलो विच्छिद्य सं दधात्यहिं पुनः (अथर्व० ६।१३९।५)। **सन्दधाति**=**संहितं करोति पुनर्योजयति**। यथा सूच्या वासः सन्दधद् ह्यात् (ऐ० ब्रा० ३।१८)। **सन्दधत्**=**सीव्यत्**। यज्ञस्य विरिष्टं सन्दधाति (छां० उ० ४।१७।४)। **सन्दधाति**=**समादधाति**। अद्भिरेवास्या एतत्क्षतं विलिष्टं सन्तनोति सन्दधाति (श० ब्रा० ६।४।३।१)। **उक्तोऽर्थः**। तद्यथा लवणेन सुवर्णं सन्दध्यात्सुवर्णेन रजतम् (छां० उ० ४।१७।७)। **संयोजयेत्**=**सम्पृञ्च्यात्**। मुखेन मुखं सन्धाय (श० ब्रा० १४।९।४।९)। **उक्तोऽर्थः**। तेषां सन्दध्मो अक्षीणि यथेदं हर्म्यं तथा (अथर्व० ४।५।५)। **सन्दध्मः**=**निमीलयामः**। व्रणं कषाये सन्धत्ते (सुश्रुते १।४७।७)। **व्रणं व्रणमुखं सन्धत्ते सङ्गतं करोति**। कृष्णं च वर्णतरुणं सं धुः (ऋ० १।७३।७)। **संधुः**=**समधुः**। अडभावश्छान्दसः। धाञो लुङि रूपम्। उभयोर्वर्णयोर्मेलनमकुर्वन्नित्याह। धनुष्यमोघं समधत्त बाणम् (कु० ३।६६)। **समधत्त समयोजयत्**। शतमेकोपि सन्धत्ते प्राकारस्थो धनुर्धरः (पञ्चत० १।२२९)। **सन्धत्ते**=**अविचलः सन्विरोधमाचरति**। शतं विरुणद्धीत्यर्थः। हीयमानाः किल रिपोर्नृपाः सन्दधते परान् (वेणी० ५।६)। **सन्धिबन्धं बध्नन्तीत्यर्थः**। शत्रुणा न हि सन्दध्यात्मुश्लिष्टेनापि सन्धिना (हितोप० १।८८)। सन्धेयानभिसन्धत्स्व विरोध्यांश्च विरोधय (भा०शां० १५७।४)। **सन्धत्स्व**=**अनुकूलय**। सत्यधर्मव्यवेतेन न सन्दध्यात् (का० नी० सा० ९।४१)। **न सन्धिं कुर्यात्**। सन्दधे दृशमुदग्रतारकाम् (रघु० ११।६९)। **सन्दधे**=**ससञ्ज**। सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते। वाङ्मात्रेणापि साहाय्य मित्रादन्यो न सन्दधे (पञ्चत० २।१३)॥ **न सन्दधे**=**विधत्ते**। **लडर्थे लिट्**। तस्माद् बलं च कोपश्च नीतिश्चापि विधीयताम्। यथा कालोदये प्राप्ते सम्यक् तैः सन्दधामहे (भा० वि० २९।८)॥ **सन्दधामहे**=**सन्दध्महे**=**व्यवहरामः, सम्यक् तान्युपयुञ्ज्महे**। न तत् परस्य सन्दध्यात्प्रतिकूलं यदात्मनः (भा० अनु० ११४।८)। सन्धत्ते भृशमर्तिं हि सद्भियोगः (कि० ५।५१)। सन्धत्ते=**जनयति**। यस्यावाच्यं न लोकेस्ति नाकार्यं चापि किंचन। वाचं तेन न सन्दध्यात्···(भा० शां०

११४।११)। **वाचं न सन्दध्यात्, तद्वचोभिः स्ववचांसि न मिश्रयेत्, न तेन संभाषेतेत्याह**। कथं कामं न सन्दध्यात् सा त्व विप्रेहि तिष्ठ वा (भा० आदि० १६७।३८)। **सन्दध्यात्=साधयेत्**। रहस्यं शृणु भो राजन्'''''चोदितः सन्दधासीदम् (यो० वा० ६(२) १५७।२)। **सन्दधासि=रक्षसि**। असन्दधानो मानाद्यः समेनापि हतो भृशम् (पञ्चत० ३।१३)। **सन्धिमकुर्वाण इत्याह**। न सन्दधानं ददृशे नाददानं च तं तदा। किरन्तमेव स शरान् ददृशे पाकशासनिः (भा० आश्व० ७४।१८)॥ **सन्दधानं (शरान्) धनुषि योजयन्तम्**। शीघ्रमभ्यस्यतो बाणान् सन्दधानस्य चानिशम्। नान्तरं ददृशे किञ्चित् कौन्तेयस्य यशस्विनः (भा० आदि० १३८।४१)॥ न गृह्णतोः शरान्घोरान्न च सन्दधतोस्तयोः (हरि० ३।५६।६७)। सर्वमेतदशेषेण मन्त्री सन्धातुमर्हति (का० नी० सा० १३।६०)। **सन्धातुम्=समाधातुम्, साधूकर्तुम्, व्यवस्थापयितुम्**। सकृद् दुष्टं हि मित्रं पुनः सन्धातुमिच्छति (चाणक्य० १६)। सन्धातुम्=अनुकूलयितुम्। न सन्धातुमनीकानि न चैवाथ पराक्रमे। आसीद् बुद्धिर्हते कर्णे'''(भा० शल्य० २।४)॥ **सन्धातुम्=एकीकर्तुम्**। सहदेवस्तु सन्धाय रथेन गजयोधिनः। पातयामास नाराचैः'''(भा० वन०२७१।११)॥ **सन्धाय=समीपमित्वा, संनिकर्षं प्राप्य। संयायेति पाठान्तरम्**। संसृष्टं ब्रह्मणा क्षत्रं क्षत्रेण ब्रह्म संहितम् (भा०आदि०८१।१६)। **संहितम्=सखिभावेन सम्बद्धम्**। पृथक् चरन्तः सहिता बभूवुः (भा०वन०२६६।१)। **सहिताः=संगताः**। **समो हिततयोरिति समो मकारस्य वैकल्पिको लोपः**। मन्त्रयेते ध्रुवं किञ्चिदभिषेचनसंहितम् (रा० २।१६।१५)। **अभिषेचनसंहितम्=अभिषेचनसम्बद्धम्**। यत्र संहिता रात्रीर्वसेत् (आप० श्रौ० ६।८।२८।५)। **संहिताः=वास्त्वन्तरवासेनाव्यवेताः** (रुद्र०)। सत्यसंहिता वै देवाः, अनृतसंहिता मनुष्याः (ऐ० ब्रा० १।६)। **उक्तोऽर्थः**। यदि संहिता यतिष्यध्वे। **सहिताः=समेताः**। शन्नोदेवीयं संहितयाधीष्वेत्युक्तः स तत्र परमसंनिकर्षमधीते। यामिन्द्रेण सन्धां समधत्था ब्रह्मणा च बृहस्पते (अथर्व० ११।१०।६)। **सन्धां प्रतिज्ञाम्**। **सन्धानं स्यादभिषव इत्यमरः**।

—**धाव् (धावु गतिशुद्ध्योः)**। प्रतिघ्नानाः सं धावन्तूरः पदूरावाघ्नानाः (अथर्व० ११।६।१४)। **सन्धावन्तु—त्वरितं गच्छन्तु**। सङ्क्रुद्धाः समधावन्त (भा० वन० १०७।३१)। **उक्तोऽर्थः**। मत्ताविव महानागावन्योन्यं समधावताम् (हरि०२।४३।६४)। **वेगेन परस्परम् आपतताम्**। पाणिभिः सन्धावेरन् (लाट्या० श्रौ० ४।४।११)। **प्रक्षालयेरन्नित्याह**। प्रक्षाल्य सन्धाव्य (कौशिक० ३४, ४६ ५८)। **अत्र सन्धावनेन निर्णेजनार्थं मर्दनमुच्यते**।

—**धुक्ष् (धुक्ष धिक्ष सन्दीपनक्लेशनजीवनेषु)**। मनश्च्युता मन एवोपपन्नाः

सं धुक्षध्वम् (भा० अनु० ७६।१३)। **संजीवतेत्यर्थः**। सन्दुधुक्षे तयोः कोपः (भट्टि० १४।१०६)। निर्वाणभूयिष्ठमथास्य वीर्यं सं धुक्षयन्तीव वपुर्गुणेन (कु० ३।५२)। **संधुक्षयन्ती = सन्दीपयन्ती**।

—धू (धू विधूनने)। स गा अस्मभ्यं धूनुहि (ऋ० १।१०।८)। गाः स-**गनव्येतः प्रेरयेत्याह**। समिन्द्रो रायो बृहतीरधूनुत स क्षोणी समु सूर्यम् (ऋ० वालखिल्येषु ४।१०)। **समधूनुत = संमार्जन्येव समगृह्णात्**।

—धृ (धृञ् धारणे)। अरैः सन्धार्यते नाभिः (पञ्चत० १।८१)। **धार्यत इत्येवार्थः। नार्थः समा**। गतासूनपि संशुष्कान्भूमिः सन्धारयिष्यति (भा० अनु० ८५।३२)। कथं मा कुशचीराणि गात्रैः सन्धारयिष्यति (रा० गोरे० सं० २।६२,१५)। **सन्धारयिष्यति = सहिष्यते**। यः सतत परिपृच्छति शृणोति सन्धारयत्यनिशम् (पञ्चत० ५।७८)। **सन्धारयति = प्रतिसन्धत्ते = स्मरति**। यावत् सन्धारयाम्यहम् (मार्क० पु० ८।५२)। **यावद् ध्रिये, यावज्जीवामीत्याह**। यथा हि गोवृषो वर्षं सन्धारयति खात्पतत्। भीमस्तथा द्रोणमुक्तं शरवर्षमदीनवत् (भा० भीष्म० ६६।३२)॥ **सन्धारयति = सहते**। द्रौपदीमार्ष्टिषेणाय सम्प्रधार्य (भा० वन० १६१।३)। **सम्प्रधार्य = समर्घ्य, दत्त्वा**। सन्धारयितुमात्मानं न शशाक नरोत्तमः। सीतावियोगजे दुःखे मग्नः···(रा० ३।६७।३)॥ **आत्मानं सन्धारयितुम् = ऋजुना कायेनावस्थातुम्**। अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणम्। सम्प्रधार्याब्रवीद् धाता न समौ नासमाविति (मनु० १०।७३)॥ **सम्प्रधार्य = तोलयित्वा, तयोर्गुरुलाघवं विचिन्त्य**। सम्प्रधार्य महाराज यत्क्षेमं तत् समाचर (भा० सभा० ४६।२४)। **सम्प्रधार्य साधुत्वासाधुत्वे, बलाबलचिन्तां कृत्वा। इदमिह सम्प्रधार्यम् इति व्याकरणमहाभाष्येऽनेकत्र। अर्थस्तु पूर्वोक्तादभिन्नः**।

—धृष् (धृष प्रसहने)। एवं सन्धर्षिता साध्वी कथं जीवितुमुत्सहे (हरि० २।११८।११)। **सन्धर्षिता = बलाद् दूषिता, हठात्परामृष्टा**।

—ध्मा (शब्दाग्निसंयोगयोः)। ब्रह्मणस्पतिरेता स कर्मार इवाधमत् (ऋ० १०।७२।२)। **समधमत् = समतपत् = समम् अद्रावयत्**। उद्धमाधमं संधम (तै० आ० १।१२।१) **उक्तोर्थः**।

—ध्यै (ध्यै चिन्तायाम्)। मुहूर्त्तमिव सन्दध्यौ किमयं चोद्यतामिति (भा० सभा० १।८)। **सन्दध्यौ = चिचिन्त प्रणिहितमनाः**।

—नद् (णद् अव्यक्ते शब्दे)। सिंहवत्सन्ननाद (भा० १७६।१३)। **सन्ननाद = उच्चैर्ननाद**। उवाच कं इहेत्युच्चैर्वचं सन्नादयन्निव (भा० आदि० ७१।२)। **सन्नादयन् = संरावयुक्तं कुर्वन्**।

—**नम्** (णम प्रह्वत्वे शब्दे च)। यूने समस्मै क्षितयो नमन्ताम् (ऋ० ५।३६।६)। **क्षितयः प्रजा यूनेऽस्मा इन्द्राय संनमन्ताम् सन्नताः प्रवणा वचने स्थिताः समानमतयः स्युरित्याह**। सत्या एषामाशिषः सं नमन्ताम् (वा० सं० ३५।२०)। **संनमन्ताम्=समृध्यन्तु**। एतं यज्ञस्य रसं संनमन्ति (श० ब्रा० ३।६।३।२४)। **संनमन्ति=प्राप्नुवन्ति**। सं वो मनांसि सं व्रता समाकूतीर्नमामसि (अथर्व० ३।८।५)। **सम्प्रतिपन्नानि कुर्म इत्यर्थः**। कृत्वाप्युच्चसंबन्धं पश्चाज्ज्ञातिषु सन्नमेत् (का० सू० टी०)॥ **ज्ञातिषु सन्नमेत्=ज्ञातिगृहे गच्छेत्**। यूपं प्राचीं संनमति (षड्विश० ४।४)। **संनमति=संनमयति**। पत्नी मन्त्रं संनमयति (कौशिक० ६०।६३)। **ऊहत इत्यर्थः**। **विनियोगविशेषाय मनाक् परिवर्त्य पठति**। आत्मनि मन्त्रान्संनमयेत् (आश्व० गृ० ३।६।८)। **मन्त्रानात्माभिमुखानूहेदित्याह**। अपो अन्नादा अन्नाद्यायेति मन्त्रं संनमयति (आप० श्रौ० ८।२।८।२)। ये के च देवसंयुक्ता मन्त्रा देवेभ्यः पितृभ्य इति तान्सन्नमति (=सन्नमयति) (आप०श्रौ०८।४।१३।६)। **उक्तोऽर्थः**। यथार्थं विभक्तीः सन्नमयेत् (नि० २।१।४)। **सन्नमयेत्=विपरिणमयेत्**। अमी ये विव्रता स्थन तान्वः संनमयामसि (अथर्व० ३।८।५)। **एकविषयप्रह्वान् अविसंवादिनः कुर्म इत्याह**। तामस्मै देवा आशिषं संनमयन्ति (श० ब्रा० १।६।१।३)। **दत्तामाशिषं मानयन्तीत्यर्थः**। इषूः संनममानः (ऋ० १०।८७।४)। **सन्नमय्य यथास्थानं निवेशयन्नित्याह**। अग्निश्च पृथिवी च संनते (वा० सं० २६।१)। **संनते=समानचित्ते, एकमनसौ**। (वेदिः) मध्ये सन्नततरा (का० श्रौ० ६।८८।१७ सूत्र टी०)। **सन्नततरा=संकुचिततरा**। महावीरं करोति.....मध्ये सन्नतं वायव्यप्रकारम् (आप० श्रौ० १५।२।१४)। **उक्तोऽर्थः**। अपि ते सन्नताः सर्वे सामन्ता रिपवो जिताः (रा० १।२०।१२)। **सन्नताः प्रणता वचने स्थिताः**। सन्नताः फलभारेण पुष्पभारेण च द्रुमाः (रा० ३।१६।५)। **सन्नताः=आवर्जिताः**। संनतगात्रि...सख्यं साप्तपदीनमुच्यते (कु० ५।३६)। **उक्तोऽर्थः**। ज्योत्स्नावासरगर्भा त्वं ज्ञानगर्भासि सन्नतिः (वि० पु० ५।२।१०)। **सन्नतिः=गुरुशुश्रूषा**। त्यागश्च सन्नतिश्चैव शिष्यते तप उत्तमम् (भा० शां० २२१।५)। **सन्नतिः=भूताराधनमिति नील०**। गुणोदितानेव परैति सन्नतिः (अव० जा० २२।६५)। **संनतिर्विनयः**। **गुणसमुदितानेव विनयो विन्दतीत्याह**।

—**नस्** (णस कौटिल्ये)। सं जामिभिर्नसते रक्षते शिरः (ऋ० ६।६८।४)। **संनसते=संगच्छते=संभवति**।

—**नह्** (णह बन्धने)। सं मा कृतस्य धारया धनुः स्नान्नेव नह्यत

(अथर्व० ७।५०।६)। **संनह्यत**=वेष्टयत। इहाक्षाः सम्वोध्यन्ते। कवचेन महाहवेण समनह्यद् बृहन्नाम् (भा० वि० ३७।२५)। **समनह्यत्**=पर्यधापयत्। सन्नह्यमानेषु वाजिषु (पञ्चत०)। आरोप्यमाणपर्याणादिषु। उत्तिष्ठत संनह्यध्वं मित्रा देवजना यूयम् (अथर्व० ११।६।२)। **सन्नद्धाः सज्जा भवतेत्याह**। समनात्सीत्ततः सैन्यम् (भट्टि० १५।१११)। **रणोद्युक्तमकरोदित्यर्थः**। समनह्यंश्च वर्मभिः (भट्टि० १७।४)। छेत्तुं वज्रमणीन् शिरीषकुसुमप्रान्तेन सन्नह्यते (भर्तृ० २।६)। संनह्यध्वं सर्व एवेन्द्रकल्पा महान्ति चारूणि च दंशनानि (भा० वन २६८।१८)। **संनह्यध्वम्**=बध्नीत। संग्रामे समुपोढे राजानं सन्नाहयेत् (आश्व० गृ० ३।६।१)। **सन्नाहयेत्**=संनाहवन्तं कुर्यात्। **संग्रामे समुपोढे**=युद्धे समुपस्थिते। तथा संनहनान्येषां परिमुच्य समन्ततः (भा० वि० ४१।६)। संनहनानि धनुषां बन्धनानि। अतिष्ठद्युगमध्ये स युगसंनहनेषु च (भा० द्रोण० ६७।२६)। **युगसंनहनेषु**=युगबन्धेषु। तत्कार्मुकं सन्नहनोपपन्नम् (भा० आदि० १८७।१८)। **अत्यन्तं काठिन्येनोपपन्नं युक्तमित्याह**। अथ संनहनं विस्रंसयति (श० ब्रा० १।३।३।६)। **बर्हिष्पूलीमुद्ग्रथ्नाति (उत्कचते) इत्याह**। निष्यः सन्नद्धो मनसा चरामि (ऋ० १।१६४।३७)। आस्तां बालस्य सन्नद्धे धात्र्यौ तस्य वृद्धये (राज० १।७७)। **सन्नद्धे उद्युक्ते**=कार्यपरायणे=कर्तव्योन्मुखौ। सर्वं पर्वतसन्नद्धं सौवर्णमभवद् वनम् (रा० १।३८।१)। **पर्वतसन्नद्धम्**=पर्वतसम्बद्धम्=गिरिपरिक्षिप्तम्। कुसुमभिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् (शा० १।२१)। **सन्नद्धम्**=व्याप्तम्=अनुविद्धम्। संनह्य काञ्चनं वर्म (भा० आश्व० ७६।१४)। संनह्य=सम्बध्य। **सन्नाह्यो रथः**=युद्धार्थं सज्जीकृतः।

—**नी** (णीञ् प्रापणे)। सं चेन्नयाथो अश्विना (अथर्व० २।३०।२)। **मत्समीपं प्रापयतमित्याह**। यथ ऋणं सं नयामसि (ऋ० ८।४७।१७)। **सम्प्रदानेन गमयाम इत्यर्थः**। यस्मिन्नृणं संनयति (मनु० ६।१०७)। **यस्मिञ्जाते सति ऋणं शोधयतीत्याह**। **संक्रमयतीति वा**। यदीदहं युधये सं नयान्यदेवयून् (ऋ० १०।२७।२)। **सन्नयानि**=संगृह्णानि=समेतान्करोमि। यः संग्रामान्नयति सं युधे वशी (अथर्व० ४।२४।७)। सं पूषन्विदुषा नय (ऋ० ६।५४।१)। **संनय**=संगमय। इति दक्षः कविर्यज्ञं भद्ररुद्रावमर्शितम्। ···सन्निन्ये (भा० पु० ४।७।४८)। युवं मित्रेमं जनं यतथः सं च नयथः (ऋ० ५।६५।६)। **सन्नयथः**=सत्पथेन नयथः। सं यन्नून रोदसी निनेथ (ऋ० ७।२८।३)। **उक्तोऽर्थः**। भद्रान्नः श्रेयः समनैष्ट देवाः (तै० सं० ५।७।२।४)। **श्रेयः समनैष्ट**=कल्याणं प्रापयत। समिन्द्र णो मनसा नेषि सं गोभिः सं सूरिभिर्हरिवः सं स्वस्ति (ऋ० ५।४२।४)। **संनेषि**=संयुङ्ग्धि। तदु समेव नयेत (श० ब्रा० १।६।४।११)।

स सान्नाय्यं हविर्दद्यादित्याह । समितां मर्त्येदाज्यैर्जलेनापि च सन्नयेत् । **मिश्रयेदित्यर्थः** । नासोमयाजी सन्नयेत् (आप० श्रौ० १।४।१४।८)। **सान्नाय्येष्टि कुर्यादित्याह** । अवदानैः सह यूपेण सन्नयेत् (गो० गृ० ३।१।७) । **सन्नयेत्=एकीकुर्यात् संमिश्रयेत्** । इमौ वै लोकौ सहास्तां तौ व्यैतां नावर्षन्न समतपत् । ते पञ्चजना न समजानत । तौ देवा समनयन् (ऐ० ब्रा० ४।२१) । **समनयन्=समानयन्=समयोजयन्** । यावद्ग्रासं सन्नयन् (आप० ध० २।८।१९।५)। **संवर्तयन्=पिण्डीकुर्वन्नित्याह** । परे भगवति ब्रह्मणि आत्मानं सन्नयञ्जहौ (भा० पु० ६।१०।११) । **सन्नयन्=लयं गमयन्** । सन्नीतात्तृतीयमात्रमवदाय (गो० गृ० ४।१।६) । **सन्नीतात्=सम्मिश्रितात्** । मन्थं सन्नीय जुहोति (श० ब्रा० १४।६।३।१) । **सन्नीय=संमिश्र्य** । सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा (मनु० ३।२४४)। **सर्वप्रकारकं भोज्यमन्नं व्यञ्जनादिभिरेकीकृत्येत्याह** । अथ दधि मधु घृतं सन्नीयानन्तर्हितेन जातरूपेण प्राशयति (बृ० उ० ६।४।२५)। **सन्नीय=संमिश्र्य** । लोहितद्रप्सेन सन्नीय (कौ० सू० ३६) । **उक्तोऽर्थः** । कंसे पृषदाज्यं सन्नीय (बृ० उ० ६।४।२४) । पश्चादवस्थायि बलं समवायश्च संनयौ (अमरः) । **सन्नयो मेल इति स्वामी** । अस्मिन्राजसमवाये देवानामिव संनये (भा० आदि० १८६।६) । **संनयः=समवायः=समाजः** । तेषां समुपविष्टानां देवानामिव संनये (भा० आदि० २२०।१५) ।

—**नु (णु स्तुतौ)** । समङ्गिरसो नवन्त गोभिः (ऋ० ४।३।११) । **वाश्यमानाभिर्गोभिः सममाक्रोशन् इत्याह** । सोमे अर्कास्त्रिष्टुभः संनवन्ते (ऋ० ९।९७।३५) । **संनवन्ते=सङ्गच्छन्ते** ।

—**नुद् (णुद प्रेरणे)** । अमूं च मां च सं नुद (अथर्व० ६।१३९।३) । **बलात्संगमय** । इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती (अथर्व० १४।२।६४) । **उक्तोऽर्थः** । अहं संनोदयाम्येनं यः कार्यं साधयिष्यति । **इतोऽभिवर्तयामीत्याह** । हयोत्तमान्·····संनोदयामास (भा० वन० ७२।४२) । **संनोदयामास=संचोदयामास** ।

—**नृत् (नृती गात्रविक्षेपे)**। यदीमे केशिनो जना गृहे ते समनर्तिषुः (अथर्व० १४।२।५९) । **समं नृत्यमकार्षुरित्यर्थः** ।

—**पठ् (पठ व्यक्तायां वाचि)** । वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु सम्पठेत् (मनु० ४।९८) । सम्पठेत्=पठेत् । **नार्थः समा** ।

—**पत् (पत्लृ गतौ)** । तान् सम्पातैः समपतत् (ऐ० ब्रा० ४।३०) । **समपतत्=प्राप्नोत्** । **प्राप्त्यर्थः सम्पतिरिति षड्गुरु०** । समश्वपर्णाः पतन्तु नो नराः (अथर्व० ६।१२६।३) । **अश्वपर्णाः=अश्वपतनाः=अश्वारूढाः** ।

सम्पतन्तु=रिपून् आपतन्तु । आस्कन्दन्तु । इतस्ततो गच्छन्त्विति तु सायणः । एते यज्ञोपनिमन्त्रिताः पुत्रदारैः सह दिगन्तरेभ्यो महर्षयः सम्पतन्ति (महावीर० १)। **सम्पतन्ति**=**समापतन्ति**=**समागच्छन्ति**=**समवयन्ति** । यत्र बाणाः सं पतन्ति कुमारा विशिखा इव (ऋ० ६।७५।१७)। **सम्पतन्ति**=**सञ्चरन्ति** । यानानि मार्गेषु न सम्पतन्ति (रा०) । **उक्तोऽर्थः** । विजयस्य ह्यनित्यत्वाद् रभसेन न सम्पतेत् (का० नी० सा० १०।३४)। **न सम्पतेत्**=**नास्कन्देत्, न विगृह्णीयात्** । शितिपदी सं पतत्वमित्राणाममूः सिचः (अथर्व ११।१०।२०) । दीप्यमानाश्च सम्पेतुर्दिवि सप्त महाग्रहाः (भा० भीष्म० १७।२) । **सम्पेतुः**=**संजग्मिरे** । पक्षान्सन्तत्य सम्पतेत् (भा० सनत्सु०) । सम्पतेत्=**उत्पतेत्** । शृङ्गीनां क्षीरमभिनवं पय आज्येन संसिञ्चामि गवां क्षीरमाज्येन **सम्पातयामि** (अथर्व० २।२६।४ इत्यत्र सायणः)। **व्यक्तं संमिश्रणेऽर्थे भाष्यकारस्य प्रयोगः सम्पातेः** । तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः। सम्पतद्भिरयोध्यायां न विभान्ति महापथाः (रा० २।११४।१३) ॥ **सम्पतद्भिः**=**सञ्चरद्भिः, गमागमौ कुर्वद्भिः** । इतो द्रक्ष्यामि वैदेहीम्'''इतश्चेतश्च दुःखितां सञ्चरन्तीं यदृच्छया (रा० ५।१५।५०) । **उक्तोऽर्थः** । विकारैर्बहुभिः प्राप्तैः सम्पतद्भिर्महाबलैः (हरि० ३।१६।१०) । सम्पतद्भिः स्थितैश्चापि नानारत्नविभासितैः (विमानैः) (भा० वि० ५६।१७) । एषा मया सम्पतता वारुणी भरतर्षभ । दृष्टपूर्वा सभा रम्या (भा० सभा० ६।३०) । **सम्पतता**=**समागच्छता** । दृष्टपूर्वः स बहुशो राजन् सम्पतता मया (भा० आश्रम० २०।६) । **सम्पतता**=**भ्राम्यता**=**पर्यटता** । **निर्वार्यः** कार्यकर्ता यः सम्पतन्सत्त्वसम्पदा (अमरः) । **संगच्छमानः, संयुक्त इत्यर्थः । तथा च सम्पन्न इति पाठान्तरम्** । आसीत् सुभीमः सम्पातो वज्रपर्वतयोरिव (भा० वि० १३।२५) । **सम्पातः**=**संघर्षः**=**संघट्टः** । भवति ! उरभ्रसम्पातं पश्यामः (माल०) । **उक्तोऽर्थः** । सम्पातेष्वभिघातेषु निपातेष्वसिचर्मणोः । न तयोरन्तरं कश्चिद् ददर्श नरसिंहयोः (भा० द्रोण० १४।६६) ॥ **सम्पातः** संभेदो नद्योः (व० बृ० सं०)। खड्गप्रहरणे युक्ताः सम्पाते चासिचर्मणोः (भा० द्रोण० ११२।२२) । **सम्पातो विहरणम्** । निर्मलानामजिह्मानां नाराचानां विशांपते । निर्मुक्ताशीविषाभानां सम्पातोऽभूत् सुदारुणः (भा० द्रोण० ६८।२१-२२) ॥ **सम्पातः संघर्षः, सन्ताडनम्** । स दारकस्य कारणाद् दूतसम्पातं करोति (स्वप्न०१)। **दूतसम्पातं दूतसम्प्रेषणं करोति** । उत्पपाताथ वेगेन मनःसम्पातविक्रमः (रा० ५।१।१८६) । **सम्पातो मनोगतिः** । धारासम्पात आसारः (अमरः) । **धाराणां सम्भूय पतनं धारासम्पातः** । निःसम्पातः कृतः पन्थास्तेन (हरि० २।२४।१४) । **निःसम्पातः**=**निर्जनसंचारः** । सम्पातानवनयन् मूर्धनि वध्वाः (खा० गृ० १।४।३)। **आहुत्यनन्तरं स्रुवलग्नान् आज्य-**

बिन्दून्। आहुतेराहुतेश्च सम्पातमुदपात्रेऽवनयेत् (गो० गृ० २।५।५)। **सम्पात आहुतिशेषः**। इत्यृषभं सम्पातवन्तमतिसृजति (कौ० सू० २४।१६)। तस्मिन्यावत् सम्पातमुपित्वा अथैनमेवाध्वानं पुनर्निवर्तन्ते यथेतम् (छां० उ० ५।१०।५)। **सम्पतन्त्यनेनामुं लोकं फलभोगायेति सम्पातः कर्म**। महिषशतसम्पातसदृशोऽहो बलवानन्धकारः (बाल० १)। **महिषशतसम्पातः=महिषशतसङ्घातः**। सन्नमुसले व्यङ्गारे निवृत्तशरावसम्पाते भिक्षेत (बौ० ध० २।६।११।२४)। **सम्पातः सम्मार्जनम् इति गोविन्द०**। भक्तं सुरां प्रपां सम्पातवत् करोति (कौ० सू० १२।६)। **संनिहितं करोति**। आदिशब्दः सम्पातायातः (२।१२ सां० सू० भा०)। **प्रयोजनमन्तराऽनुवृत्त आहुतो वा**। तथानेन सूक्तेन दधिमधुनी सम्पात्याभिमन्त्र्य वर्चस्कामं ब्राह्मणमाशयेत् इति अथर्व० ३।१६ इत्यत्रोपक्रमे सायणः। **सम्पात्य (ऋजीषेण) प्रोक्ष्य**। **असम्पातं करिष्यन्ति पतन्तः कङ्कवाससः** (इषवः) (रा० ५।२१।२६)। **असम्पातोऽनवकाशः**।

—**पद् (पद गतौ)**। अश्वान्यं रथमास्थाय हार्दिक्यः समपद्यत (भा० शाल्य० २१।३७)। **समपद्यत=सज्जोऽभवत्**। यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा (हरि० १।३०।४१)। **ब्रह्म सम्पद्यते=ब्रह्मत्वमाप्नोति**। श्रमव्यायामकुशलाः समपद्यन्त यौवनम् (भा० आदि० १०६।१८)। **समपद्यन्त=आपद्यन्त=आप्नुवन्**। **इह समा नार्थः**। सर्वस्य जगतो धात्री शर्वरी समपद्यत (भा० सौप्तिक० १।२४)। **समपद्यत=प्राप्ता=अवतीर्णा**। ब्रह्मशापाभिभूता सा मानुषं समपद्यत (हरि० १।२६।१३)। **समपद्यत=समगच्छत्**। **सम्पदिरिह सकर्मकः**। तिस्रः सतीरुपसदो द्विद्विरेकैकामुपायंस्ताः षट् समपद्यन्त (ऐ० ब्रा० १।२३)। **संख्यया षडभवन्नित्यर्थः**। तद्धास्य शतं गावः सहस्रं सम्पेदुः (पञ्चविंश० २५।१०।१८)। **सन्तानवृद्ध्या सहस्रसंख्याका अभूवन्नित्याह**। **इत्यादिषु सम्पदिः परिणामार्थकः**। अस्माभिश्च परित्यक्तं पुरं सम्पद्यतां वनम् (रा० २।३३।२२)। **वनरूपेण परिणमतामित्यर्थः**। तीक्ष्णांशुः शिशिरांशुत्वं भयात्सम्पद्यते रविः (रा० ३।५४।१२)। **उक्तोऽर्थः**। सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः (मेघ०)। सम्पेदे श्रमसलिलोद्गमो विभूषणम् (कि०७।५)। **विभूषणतामापेत्यर्थः**। व्याहताः पञ्च पञ्चदश सम्पद्यन्ते (=**भवन्ति**)। **व्याहताः त्रिभिरभ्यस्ताः**। सम्पद्यते स डकारो ऌकारः (ऋक्प्राति० १।११)। स सर्वदमनो नाम कुमारः समपद्यत (भा०आदि०७४।८)। **समपद्यत=अभवत्**। अष्टौ रथसहस्राणि नागानामयुतं तथा। अर्बुदं पत्तिसङ्घानां तद्बलं समपद्यत (भा०)॥ **तद्बलं सम्पन्नं सम्पूर्णं सकलमकुर्वन् इत्यर्थः**। **एतत्प्रमाणं तद्बलमभूदित्याशयः**। साधोः शिक्षा गुणाय सम्पद्यते नासाधोः (पञ्चत०)। **सम्पद्यते=कल्पते=अलम्भवति**। पुरूरवास्ततो विद्वानिलायां समपद्यत (भा० आदि०)। **अजायतेत्यर्थः**। धृष्राश्वतनयश्चापि सृञ्जयः समपद्यत

(रा० १।४७।१४)। **उक्तोऽर्थः**। स हि स्वर्भानुदौहित्रः प्रभायां समपद्यत (हरि० १।२८।९)। ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत (रा० १।२।१३)। सुबीजं चैव सुक्षेत्रे जातं सम्पद्यते यथा (मनु० १०।६९)। **सम्पद्यते=समृध्यति, समृद्धं भवति**। तन्मे सर्वं सम्पद्यताम् (अथर्व० १०।९।२७)। **सम्पद्यताम्=घटताम्, पूर्यताम्, सिध्यतु**। मा तत्सम्पादि यदसौ जुहोति (अथर्व० ७।७३।२)। **उक्तोऽर्थः**। यत्कामयेत तदश्नीयाद् यद्वा सम्पद्येत (श० ब्रा० ३।१।२।१)। **सम्पद्येत=लभ्येत**। प्रियः कामो न ते सम्पत्स्यते क्वचित् (भा० आदि० ८४।२०)। **सम्पत्स्यते=समर्धिष्यति। सेत्स्यति**। सम्पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम् (कु० २।५४)। प्रयत्नस्तेन कर्तव्यो नैष सम्पत्स्यते तव (भा० उ० ११९।३)। **न सम्पत्स्यते=न फलवान् भविष्यति**। पुरुषस्य प्रयतो वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् (छां० उ० ६।८।६)। **समपद्यते=समाविशति**। एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहा इति (छां० उ० ४।२)। सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले (भा० पु० १।९।४४)। **उक्तोर्थः**। उभे हि तेजसी सम्पद्येते (तै० ब्रा० २।१।२।९)। **सम्पद्येते=एकीभवतः**। अथ यदि द्विमात्रेण मनसि सम्पद्यते (प्रश्न० उ० ५।४)। **सम्पद्यते=अभिसंविशति=लीयते**। दण्ड्यः पुरुषः।...दण्डेन सम्पद्यते (नि० २।२।११)। **सम्पद्यते=संयुज्यते**। अशोक यदि सद्य एव कुसुमैर्न सम्पत्स्यसे मुधा वहसि दोहदं ललितकामिसाधारणम् (माल० ३।१७)। **सम्पत्स्यसे=संगंस्यसे=संगतो भविष्यसि**। यदि सम्पत्स्यसे पुत्रैः सहामात्यैर्नराधिप (भा० उ० ९५।२७)। **उक्तोऽर्थः**। वाणी सम्पद्यतामेषा कर्मणा मा चिरं कृथाः (भा० शल्य० ५६।४१)। **सम्पद्यताम्=युज्यताम्**। गगनालिङ्गिभिर्भीमा (नदी) तरङ्गैः समपद्यत (राज० ८।३०८५)। **समपद्यत=समयुज्यत**। मयूरचन्द्रकाङ्केव वितस्ता समपद्यत (राज० १।२६०)। **समपद्यत=अशोभत। वेषेण सम्पद्यते शोभत इति वेष्यो नटः** (पा० ५।१।९९ सूत्रवृत्तौ)। सम्पादयन्तौ सह लोकमेकम् (अथर्व० १२।३।३९)। **आसादयन्तौ**। पन्नगाशनमाकाशे पतन्तं पक्षिसेविते। अभिभूय जवेनाशु लङ्कां सम्पादये ध्रुवम् (रा० ५।३।४०)॥ **उक्तोर्थः**। उत्पिञ्जभीतया राज्ञ्या त्यक्त्वा परिभवत्रपाम्। ते यत्नात् समपद्यन्त (=समाधीयन्त) (राज० ६।२८)॥ वाचा देवेभ्यो हव्यं सम्पादयति (ऐ० ब्रा० २।५)। पिप्पलीलवणाभ्यां च मत्स्यान् सम्पादयिष्यथ (रा० ३।७६।२४)। **सम्पादयिष्यथ=संस्करिष्यथ, अभ्यवहाराय सज्जयिष्यथ**। दश ता आहुतीः सम्पादयेत् (श० ब्रा० ११।१।२।२)। **पूरयेदित्याह**। देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन् (ऐ० ब्रा० २।२५)। **न समपादयन्**

=एकमतयो नामूवन् । सर्वं पण्यमर्वाक् पणन्ते परः सम्पादयन्ति (श० ब्रा० ३।३।३।४) । **पूर्वं क्रयमूल्ये परिभाषन्ते पश्चात्तत्र संवादमुपयन्ति** । ममैवायं पुत्रोऽस्त्विति तान्ह न सम्पेदे । ते (ऋत्विजः) सम्पादयामासुः (व० धर्म० १७।३५) । ते ह सम्पादयाञ्चक्रुः । उद्दालको वै भगवन्तोऽयमारुणिः सम्प्रतीममात्मानं वैश्वानरमध्येति (छां० उ० ५।११।२) । ते होचुः । हन्तेदं जुहवामहा इति कस्मै न इदं प्रथमाय होष्यन्तीति मह्यमिति हैवाग्निरुवाच मह्यमिति योऽयं पवते । ते न सम्पादयाञ्चक्रुस्तेऽसम्पाद्योचुः प्रजापतिमेव पितरं प्रत्ययाम (श० ब्रा० २।२।४।१६) । **न सम्पादयाञ्चक्रुः=निश्चयमधिगन्तुं न शेकुः** । कस्य न भविष्यतीति ते मम ममेत्येव न सम्पादयाञ्चक्रुः । ते हासम्पाद्योचुराजिमेवास्मिन्नजामहै (श० ब्रा० ५।१।१।३) । ते सम्पादयन्तोऽब्रुवन् (ऐ० ब्रा०२।१५) । **सम्पादयन्तः सम्प्रतिपत्तिमन्त इति भट्टभास्करः** । भीमं सम्पादयामास रथेन रथसारथिः (भा० भीष्म० ५४।७१) । **रथेन सम्पन्नमकरोत् रथवन्तमकरोदित्यर्थः** । एवं सम्पादयन्तस्ते तदान्योन्यं महारथाः (भा० वि० १३।१२) । **सम्पत्तिभिर्विभवैर्योजयन्त इत्याह** । तं रथेन नरश्रेष्ठं सम्पादय महारथम् (भा० द्रोण० १३४।१७) । **सम्पादय=संयोजय** । स्नातैः (वाजिभिः) सम्पादयामासुः सम्पन्नैः सर्वसम्पदा (भा० उ० ८३।१६) । **सम्पादयामासुः=सज्जीकृतवन्तः** । रश्मिनैवाश्वं सम्पादयति (श० ब्रा० १३।२।७।६) । **सम्पादयति=शोभयति** । श्वः सम्पादयिता क्रीडा या वः सा कथ्यतामिति (वृ० श्लो० सं० ८।२६) । **कामं वः सम्पादयिता=इष्टं वः साधयिष्यति** । विज्ञानेनात्मानं संपादयेत् । सम्पादितात्मा जितात्मा भवति (चाणक्य० १।८,६) । **सम्पादयेत्=समग्रं कुर्यात्** । मत्या परीक्ष्य मेधावी बुद्ध्या सम्पाद्य चासकृत् (भा० उ० ३६।४२) । **सम्पाद्य=सम्प्रधार्य** । इति स्वमुर्भोजकुलप्रदीपः सम्पाद्य पाणिग्रहणं स राजा (रघु० ७।२६) । **सम्पाद्य निर्वर्त्य** । सता सोम्य तदा सम्पन्नो भवति (छां० उ० ६।७।१) । **सम्पन्नः=एकत्वं गतो भवति** । स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो भवति । **सम्पन्नः=संगतः** । सुवर्णशृङ्ग्यः सम्पन्नाः सवत्साः कांस्यदोहनाः (रा० १।७२।२३) । **सम्पन्नाः=बहुदुग्धाः** । प्राप्तकामा जनपदाः सम्पन्नयवगोरसाः (रा० ३।२२।७) । **सम्पन्ना बहुलाः प्रभूताः** । एकः सम्पन्नमश्नातु यस्ते हरति पुष्करम् (भा०अनु०६४।२१) । **सम्पन्नं स्वादु** । सम्पन्नतरमेवान्नं दरिद्रा भुञ्जते सदा । क्षुत् स्वादुतां जनयति...(भा० उ०३४।५०) ॥ **उक्तोऽर्थः** । संभाव्यं गोषु सम्पन्नं संभाव्यं ब्राह्मणे तपः (रा०५।८८।६) । **सम्पन्नम्=मधुरं पयः** । त्वयि विक्रमसम्पन्नमिदं वचनमीदृशम् (भा० आदि० २०२।२३) । **विक्रमसम्पन्नम्=विक्रमसुन्दरम्** । यो मामदत्त्वा पितृदेवताभ्यो भृत्या-

तिथीनां च मुहूर्जनस्य । सम्पन्नमश्नन् विषमत्ति मोहात्...(बौ० ध० २।३।५।१८)॥ **सम्पन्नम् = मृष्टम्** । सन्तानवर्धनं पुत्रं युक्तं च पितृकर्मणि । देवब्राह्मण-सम्पन्नमभिनन्दन्ति पूर्वजाः(शङ्खलिखितौ)॥ **देवब्राह्मणसम्पन्नः = देवब्राह्मणपूजनपरः** । अपराह्णस्तथा दर्भा वास्तुसम्पादनं तिलाः (मनु० ३।२५५)। **वास्तुसम्पादनं श्राद्धदेशसंशोधनम्** । ध्यानेनोपरमं कृत्वा विद्यासम्पादितं मनः (भा० शां०२४६।६) । **विद्यासम्पादितम् = विद्यया संस्कृतम्** । ता द्वादशानुष्टुभः स्युर्गायत्र्यः षोडशैव हि । कथं स्यादेवमिति चेत् सम्पत्तिः श्रूयतामियम् (ऐ० ब्रा० २।३७ इत्यत्र षड्गुरुशिष्यवचनम्) ॥ **सम्पत्तिर्निरूढिः** । सम्पत्तिरिव वित्तानामध्रुवा स्थितिरायुषः (अवदा०अविपह्य जा०,२५) । **सम्पत्तिः = प्राप्तिः** । न च शोचत्यसम्पत्तौ (कर्मगः) (मनु०१२।३६) । **असम्पत्तौ = असिद्धौ** । पदक्रमविभागज्ञो वर्णक्रमविचक्षणः । स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम् (ऋ० प्रा० १।८) । **आचार्यसंसदमिति पाठान्तरम्** । अवसाययितुं क्षमाः सुखं विधेयेषु विशेषसम्पदः (कि० २।२६) । **विशेषसम्पदः = अवान्तरभेदभूमानः** । तथा ह्येव सम्पत् सम्पद्यते (श० ब्रा० ३।४।४।२१) । **पूर्णता जायत इत्याह** ।

—पा (पा पाने)। मं यज्ञेषु पिबध्वम् (ऋ० ७।३७।२) । **सह पिबतेत्यर्थः** । यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः (ऋ० १०।१३५।२) । **उक्तोऽर्थः** । त उभये देवमनुष्याः पितरः सं पिबन्ति (श० ब्रा० ३।६।२।२६) । तव वा इमेऽन्तेवासाः । त्वमेवैभिः सम्पिबस्व (ऐ० ब्रा० ३।३०) । यत्पिबामि सं पिबामि समुद्र इव सं पिवः (अथर्व० ६।१३५।२) । **शत्रुमेव संगृह्य तदीयं रसं पिबामीत्याह** ।

—पिष् (पिष्लृ संचूर्णने) । वज्रेणान उषसः सं पिपेष (ऋ० २।१५।६) । सम्पिष्टदग्धविध्वस्तं तव सैन्यं किरीटिना (भा० कर्ण० ८०।१६) । **सम्शब्दः पेषणस्य सम्पूर्णतामाह** । **अपि वा सम्पूर्णताया धात्वर्थेनैवोपसङ्ग्रहादनर्थकः** ।

—पीड् (पीड अवगाहने) । तास्तं पयोधरोत्तानैरुरोभिः समपीडयन् (हरि० २।२०।२३) । **समपीडयन् = अबाधन्त** । द्वावपि निक्षेपौ सम्पीड्य दापनीयः (मनु० ८।१८४ इत्यत्र कुल्लूकः) । **सम्पीडय = संकलय्य** । सम्पीडिते जन्मभे (व० बृ० सं० ९७।११) । **सम्पीडिते = ग्रस्ते = ग्रहगृहीते** ।

—पृच् (पृची सम्पर्के) । सम्पृचः स्थ सं मा भद्रेण पृङ्क्त (श० ब्रा० १२।७।३।२२) । **सम्पृङ्क्त = योजयत** । द्रुहो रिपः सम्पृचः पाहि सूरीन् (ऋ० २।३५।६) । **सम्पृचः = सम्पर्कात्** । स्यन्दनौ समपृच्येताम् (भट्टि) । **वागर्थाविव सम्पृक्तौ** (रघु० १।१) । **सम्पृक्तौ = नित्यसम्बद्धौ** । तेजसा सम्पिपृग्धि मा (तै० ब्रा० २।७।७।३) । **संयुक्तं कुर्वित्याह** ।

—पृ (पृ पालनपूरणयोः)। यथाऽसौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न सम्पूर्यते (श० ब्रा० १४।६।१।२)।

—प्लु(प्लुङ् गतौ)। तस्य प्रमादाद्यदि वाप्यमान्नैध्याद्यथा भिन्ना नौरगाधे महत्युदके सम्प्लवेत (गो०ब्रा०उत्तर० २।५)। **सम्प्लवेत**=**विप्लवेत**=**विदिशि प्लवेत**। मेघो यत्सम्प्लवते (छां०उ०२।४।१)। **इतस्ततश्चलतीत्यर्थः**। महोल्कानां च सम्प्लवे (मनु० ४।१०३)। **इतस्ततः पाते सतीत्याह**। हृतस्वा हृतदाराश्च ये विप्रा देशसम्प्लवे (भा० अनु० २३।५४)। **देशसम्प्लवे**=**राष्ट्रविप्लवे**। करुणप्रेक्षणीयेषु सम्प्लवः सुखदुःखयोः। यथानुभवतः सिद्धस्तथैवौजःप्रमादयोः (काव्यालं० सूत्रवृ० ३।१।८ उद्धरणम्)॥ **सम्प्लवो मिश्रीभावः**। न मही याति सम्प्लवम् (वि० पु० १।४।४६)। **सम्प्लवं न याति**=**न निमज्जति**। आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते। त्रैलोक्यस्थितिकालोऽयमपुनर्मार उच्यते (वि०पु०२।५।६६)॥ **भूतसम्प्लवः**=**महाप्रलयः**। **आभूतसम्प्लवम्**=**आब्रह्माहपर्यन्तम्**। आभूतसम्प्लवात्ते स्वर्गजितः (आप० ध० २।२४।५)। **उक्तोऽर्थः**। तयोर्धाय्यौ मुसंवीते कृत्वा ते गर्भसम्प्लवे (भा० सभा० १७।३८)। **गर्भसम्प्लवः**=**गर्भभ्रंशः**। विवृद्धि निम्नगा याताः प्लवगा सम्प्लवं गताः (हरि० २।१८)। **संप्लवः प्रवाहः**। वारणानां रवो जज्ञे मेघानामिव सम्प्लवे (भा० द्रोण० २०।४१)। **सम्प्लवः**=**समागमः**। स्थापयन्ति ममादेशाद्यावदाभूतसम्प्लवम्। (कूर्म० पूर्वा० १२।२७२)। **उक्तोऽर्थः**। शारदाभ्रैरिवाकीर्णं गगनं हंससम्प्लवैः (रा०१।४३।२३)। **हंससम्प्लवैः**=**कादम्बकदम्बैः**। अपस्मारं पुनः स्मृतिबुद्धिसत्त्वसम्प्लवाद् बीभत्सचेष्टमावस्थिकं तमःप्रवेशमात्रमाचक्षते (चरके निदा० ८।५)। **स्मृतिबुद्धिसत्त्वानां सम्प्लवात् विकृतिगमनात्**। अक्रान्तिव्याघातः पुनरुक्तमपशब्दः सम्प्लव इति लेखदोषाः (कौ० अ० २।१०।२८)। **अवर्गे वर्गकरणं वर्गे चावर्गक्रिया गुणविपर्यासः संप्लवः**। सम्पूर्णयोजनशतं क्षिप्तः सागरसम्प्लवे (रा० १।३०।१८)। **सागरसम्प्लवे**=**समुद्रमध्ये**।

—**बन्ध्** (**बन्ध बन्धने**)। मनोज्ञगन्धं सहकारभङ्गं पुराणशीधुं नवपाटलं च। सम्बध्नता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः (रघु० १६।५२)॥ **सम्बध्नता**=**समं सन्निधापयता**। (तपोवनानि) सम्बद्धवैखानसकन्यकानि (रघु० १४।२८)। **सम्बद्धाः कृतसख्या वैखानसानां कन्यका येषु तानि**। कर्माण्यकुहकार्थानि येषां वाचश्च सूनृताः। येषामर्थाश्च सम्बद्धा दुर्गाण्यतितरन्ति ते (भा० शां० ११०।१२)। **सम्बद्धाः**=**निरन्तराः**। अवादयन्त गन्धर्वा वादित्रं सुमनोहरम्। जगुश्चाप्सरसो राज्ञो यशः सम्बद्धमेव च (भा०)। **सम्बद्धमिति क्रियाविशेषणम्**। **अविराममित्यर्थः**। सम्बद्धाविमौ दम्पावुच्येते

यावन्योन्यं न जहीतः (पा० २।१।१ सूत्रभाष्ये)।

—बाध् (बाधृ लोडने, लोडनं प्रतिघातः)। मा त्वा वृक्षः सं बाधिष्ट (अथर्व० १८।२।२५)। **मा संबाधिष्ट = मा सम्पिपीडत्**। पीतमात्रे तु पानीये न मां संबाधते क्षुधा (६।८२।१५५)। त्रिदण्डतूणसम्बाधम् (भा० वि०४५।७)। **सम्बाधम् = संकटम् = दुष्प्रवेशम्**। समम्बाधेव शिशुता संचुकोच शनैः शनैः (शि० भा० २।३८)। **ससम्बाधा = ससंकटा**।

—बुध् (बुधिर् बोधने, बुध अवगमने)। न सं बुबुधिरे चैनं देवास्तं भुवनेश्वरम् (भा०द्रोण०२०२।६४)। **न संबुबुधिरे = न प्रत्यभिजज्ञुः = न परिचिक्युः**। लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः (योगभाष्ये)। **सम्बोधयेत् = जागरयेत्**। तस्य वृत्रार्दितस्याथ मोह आसीच्छतक्रतोः। रथन्तरेण तं तत्र वसिष्ठः समबोधयत् (भा० शां० २८१।२१)॥ **प्रबुद्धमकरोदित्याह**। निर्वेदादात्मसम्बोधः (भा० शां० २९५।१२)।। **सम्बोधः = सम्यग्ज्ञानम्**। विरुद्धमलसम्बोधात्। (यो० वा० ६।३२।३२)। **सम्बोधः प्रकोपः = आरोपः = वृद्धिः**। धृतराष्ट्रात्मजेति ··· सम्बोध्य (= आहूय) (भा० सभा० ५०।३५)।

—बृह् (बृहू उद्यमने)। स समबृहत् स न कञ्चनाहिनत् (श० ब्रा० १।७।३।४)। **समबृहत् = (शस्त्रम्) उदहरत् = उदयच्छत् = उदगृह्णात्**।

—ब्रू (ब्रूञ् व्यक्तायां वाचि)। यद्ध यन्ति मरुतः सं ह ब्रुवतेऽध्वन्ना (ऋ० १।३७।१३)। **सम्ब्रुवते = सम्भाषन्ते = संलपन्ति**। वृक्षच्छायोपविष्टास्ते दृष्ट्वान्योन्यं समब्रुवन् (रा० ४।५०।४)। उक्तोऽर्थः। समन्येषु ब्रवावहै (ऋ० १।३०।६)। **सम्ब्रवावहै** (अहं च शतक्रतुश्च) **मतसंवादेन ब्रवावहै**। सं नु वोचावहै पुनर्यतो मे मध्वाभृतम् (ऋ० १।२५।१७)।

—भज् (**भज सेवायाम्**)। समभक्त विप्रः सुमतिं नदीनाम् (ऋ० ३।३३।१२)। **समभक्त = अवृत**। सुमतौ भागी बभूवेत्यर्थः। अध्ययनदोषैर्न संभक्ष्यामहे (नि० १।२।५ इत्यत्र दुर्गः)। **संयोक्ष्यामह इत्यर्थः**। यच्च भूतं संभजते (भा० शां० ६१।१३)। **दुर्बलमन्नादिना सेवत इत्यर्थः**। सत्सव्रता ये तु नराः कृतज्ञा धर्मे रतास्तैः सह सम्भजन्ते (भा०शां०२९६।३७)। **(सुखं) विभज्य सेवन्त इत्याह**। ऋत्विजो वृणीते (आश्व० गृ० १।२०।१) **इत्यस्य व्याख्यायां वृणीते कर्मार्थं परिगृह्णातीति हरदत्तः**। स वै वो वरं वृणा इति (ऐ० ब्रा० ३।३३)। अत्र वृणै संभजामीति षड्गुरु०।

—भाष् (भाष व्यक्तायां वाचि)। यथासंभाषितं च कृत्यपक्षमुपग्राहयेत (कौ० अ० १३।५।१७६)। **कृतपूर्वसंविदम् इत्याह**।

—भिद् (**भिदिर् विदारणे**)। न हि सा तेन सम्भेदं पत्नी नीता महात्मना

(भा० शां० २६६।६२) । स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः (सा० द० तृतीये परि०) । **सम्भेदः**=स्पर्शः । अनादिकर्मक्लेशवासनाविशयप्रत्युपस्थितविषयजाला चाशुद्धिर्नान्तरेण तपः सम्भेदमापद्यते (यो० सू० २।१ भाष्ये) । सम्भेदो विनाशः । य एवं मनुष्यः सम्भिन्नबुद्धिर्भवति स पश्यति नेदं किञ्चिद् धर्मी नाम, नैतं करिष्यामीति (योगभाष्ये) । **सम्भिन्नबुद्धिः पुण्यापुण्ययोः संमिश्रितबुद्धिर्नास्तिकः** । यद्वा उर्वरयोरसंभिन्नं भवति खिलमिति वै तदाचक्षते (कौ० अ० ३०।८) । **उर्वराभ्यां भूभागाभ्यामसंयुक्तम्** (असम्बद्धम्) इत्याह । तथा सम्भिन्नसर्वाङ्गकूर्म स्थल इवोद्धृतम् (भा० वि० २३।२) । **सम्भिन्नसर्वाङ्गम्**=संलीनसकलगात्रम्, **प्रतिसंहृतसर्वावयवम्** । अन्योन्यमभिन्नदशां सखीनाम् । **परस्परं संसृष्टनेत्राणामित्यर्थः** । द्विपाः संभिन्नवर्मणो वज्रायनिसमैः शरैः (भा०कर्ण० १६।१३) । **संभिन्नानि भिन्नानि विदीर्णानि वर्माणि येषां ते** । **अत्र सम्शब्दोऽर्थान्तरं न करोति** । असम्भिन्नार्यमर्यादः पण्डिताख्यां लभेत सः (भा०उ०३३।२६) । **इहापि पूर्ववत्** । असम्भिन्नार्यमर्यादाः साधवः पुरुषोत्तमाः (भा०आश्रम०१२।२) । तीक्ष्णा संभिन्नमर्यादा तीक्ष्णकर्मणि वर्तते (रा० २।४६।५) । असंभिन्दन् मांससंहिताभ्यामङ्गुष्ठेन च पुरोडाशस्यावद्यति (आप०श्रौ० २।६।१८।११) । **यथा द्वयोरवदानयोरसङ्गमः स्यात्तथाऽवद्यति** (भा०) । **अवदानदेशावसंकिरन्निति रुद्रदत्तः** ।

—**भुज्** (**भुज पालनाभ्यवहारयोः**) । संभोजनी साऽभिहिता पैशाची दक्षिणा द्विजैः (मनु० ३।१४१) । **संभोजनी सह भुज्यते यया, गोष्ठी, बहुभोजनात्मिका** ।

—**भू** (**भू सत्तायाम्**) । सम्भवत्यव्ययाद् व्ययम् (मनु० १।१६) । **संभवति**=**जायते**=**उत्पद्यते** । कुमारस्य रेतः सिक्तं न संभवति (श०ब्रा० ११।४।१।७) । **आत्मा हि प्रथमः सम्भवतः सम्भवति** (श०ब्रा० १०।१२।४) । **आत्मा**=**शरीरम्** । **सम्भवतः**=**उत्पद्यमानस्य** । **सम्भवति**=**उत्पद्यते** । चक्षुः पुरुषस्य प्रथमं सम्भवतः सम्भवति (ऐ० ब्रा० ३।२) । स सात्त्वत्यामतिरथः सम्बभूव धनञ्जयात् (भा० आदि० २२१।८६) । **उक्तोऽर्थः** । तथा स राक्षसश्रेष्ठः शरैः कृत्तः पुनः पुनः । सम्बभूव समवाप च यौवनम् (भा० भीष्म० ६०।६४-६५) । **सम्बभूव**=**संजिजीव** । ता अस्य प्रजाः सृष्टाः स्तनावेवाभिपद्य सम्बभूवुः (श० ब्रा० २।५।१।३) । **अधियन्त, जीवा अवतस्थिरे** । असदेवेदमग्र आसीत्, तत्सदासीत्, तत्समभवत् (छां० उ० ३।१९।१) । **समभवत्**=**समवर्धत**=**व्यक्तिमापद्यत** । न मे हस्तः समभवद् वसु तत् प्रतिगृह्णतः (भा० सभा० ५०।२४) । **समभवत्**=**प्राभवत्** । **तथा बृहन्नासीद्यथा वसु गृह्णीयाद् इत्याह** । न यन्नियन्तुं समभावि भानुना (शिशु० १।२७) । **न समभावि**=**न शेके** । **सम्भवते-**

भवि लुङ्। पक्वेन सह संभवेम (अथर्व० ६।११६।२)। **संभवेम=संबद्धा भवेम**। सं ते मज्जा मज्ज्ञा भवतु (अथर्व० ४।१२।३)। **संभवतु=संसृज्यताम्**। सम्भूयाम्भोधिमभ्येति महानद्या नगापगा (शिशु० २।१००)। **संभूय=संगत्य**। अधा मृताः पितृषु संभवन्तु (अथर्व०१८।४।४८)। **पितृभिः सङ्गच्छन्तामित्याह**। अथ पुनर्लोष्टं न्यस्यति पृथिव्या संभवेति (श० ब्रा० ३।२।२।२१)। **पृथिव्या संसृज्यस्वेत्याह**। काममा विजनितोः संभवाम इति स्त्रीणामिन्द्रदत्तो वरः (तै० सं० २।५।१।५)। **संभवनं मिथुनीभावः**। ताविह संभवाव प्रजामाजनयावहै (अथर्व०१४।२।७१)। **उक्तोऽर्थः**। स विवस्वानादित्य आश्वमेव रूपं कृत्वा तामनुसृत्य सम्बभूव (नि० १।२।१०।२)। दिवं वा उपसं वा। मिथुन्येनया स्यामिति तां सम्बभूव (श० ब्रा० १।७।४।१)। **अत्र संभवतेः प्रयोगे द्वितीयाश्रुत्यामवधातव्यम्। अन्यत्र प्रायेण तृतीया श्रूयते**—प्रजावती पत्या संभवेह (अथर्व० १४।२।३२)। महर्षिः संविदं कृत्वा संबभूव तया सह (भा० आदि० १७७।४४)। संबभूव तया सार्धं मातुः प्रियचिकीर्षया (भा० आदि० १०६।६)। स तथेति प्रतिज्ञाय तया समभवन्मुनिः (भा० वन० ६६।२३)। संभवेद् गर्भं धेहीति (द्रा० गृ० १।४।१६)। **मिथुनी भवेदित्यर्थः**। अथ कालेन महता स मत्स्यः सुमहानभूत्। अलिञ्जरे यथा चैव नासौ समभवत् किल (भा० वन० १८७।१३)॥ **न समभवत्=नामात्**। प्रस्थं संभवति स्थाली प्रास्थिकी (पा० ५।१।५२)। **संभवतिरिहाधारादाधेयस्यानतिरेके वर्तते**। खार्यां द्रोणः संभवति। द्रोण आढकं संभवति। सहस्रे शतं संभवति। **खार्यां द्रोण इत्यादिषु संभवतिः समाविशतीत्यनेन समानाभिधेयः**। स (स्तोमः प्रजापतिः) इदं सर्वं युत इदं सर्वं सम्भवति (श० ब्रा० ४।२।५।६)। **संभवति=स्वस्मिन्नन्तर्धत्ते समावेशयति**। सं देवत्रा बभूवथुः (ऋ० १।६३।६)। **देवेषु मध्ये स्थानं प्राप्नुथेत्याह**। वाजस्य नु प्रसवे संबभूविमेमा विश्वा भुवनान्यन्तः (अथर्व० ३।२०।८)। **सम्बभूविम=प्राप्ताः**। क्रमात्ते संभवन्त्यचिरहः शुक्लं तथोत्तरम् (याज्ञ० ३।१६३)। **संभवन्ति=प्राप्नुवन्ति**। अस्य द्विषन्भ्रातृव्यो वणिज्यया वा केन चिद्वा संभवति (श० ब्रा० १।६।४।२०)। **संभवति=समृध्यति**। **भूतिमान् भवतीति यावत्**। वालैः शृङ्गेण पादेन संभवत्येव गौर्मखम् (भा० शां० २६८।२८)। **संभवति=संभावयति=वर्धयति**। स च तस्मिन्महेष्वासः कृपः समभवत्तदा (भा० आश्रम० १।१३)। **समभवत्=समीपेऽभवत्**। त्वरितः काम्यके पार्थान्समभावयदच्युतः (भा० वन० ५१।१६)। **समभावयत्=समगच्छत्**। वत्स उच्यतां भागुरायणो यथा त्वरितं संभावय (मुद्रा० प्रथमेऽङ्के)। **संगच्छ,आसादयेत्यर्थः**। संभावयति चान्नेन स विप्रो गुरुरुच्यते (मनु० २।१४२)। **संभावयति=संवर्धयति**। भवितमान् भृशमर्हाभिर्भार्गवं समभावयत् (शि० भा० २६।७६)। **समभावयत्=**

सदकरोत्। तदेन पुनः संभावयन्ति पुनराप्याययन्त्युपसदो रूपेण (ऐ० ब्रा० ३। ३२)। **संभावनं सजीवत्वं वृद्धिराप्यायनं तथेति षड्गुरु०**। एकाङ्गेनापि सम्-भूतः शत्रुर्दुर्गमुपाश्रितः (भा० शां० ५८।१८)। **संभूतः सम्पन्नः**। **एकाङ्गेनापि हस्त्यश्वरथपादातानामन्यतमेनापि**। गिरिनिर्झरसंभूता गिरिनिर्दरिवासिनाम्। सिंहानां निनदा दुःखाः··· (रा०२।२८।७)॥ **संभूताः=प्रभूताः=वृद्धि गताः**। **समिह प्रेण तुल्यार्थम्**। स्वतेजोविषसम्भूतः (रा० ४।३१।३०) **सम्भूतः=व्याप्तः**। यथा पञ्चसु भूतेषु संभूतत्वं नियच्छति (भा० आश्व० १७।२१)। **सम्भूतत्वम्=संहतत्वम्**। स चायमभिनिवेशः स्वरसवाही...प्रत्यक्षानुमानागमैरसंभावितः (यो०सू०२।९ व्यासभाष्ये)। **असम्भावितः=असम्पादितः**। तया संभाविता चास्मि स्निग्धया मातृसौहृदात् (रा० २।११८।३३)। **संभाविता=संवर्धिता**। बुद्धिमोहं समास्थाय त्वरासंभावितोऽनघ। गच्छ रुद्रसकाशं त्वम्... (भा० आदि० २२३।३५)॥ **त्वरासंभावितः=त्वरायुक्तः**। संभाविता जातबलास्ते दद्युर्यदि नः सुखम् (भा० शां० ७।१५)। **संभावितः=पोषिताः, संवर्धिताः**। वीराः संभावितात्मानो न दैवं पर्युपासते (रा० २।२३। १६)। **शौर्यादिगुणैर्लोकस्य वन्दितस्वरूपा इत्याह**। संभावितस्य चाकीर्तिर्मरणादतिरिच्यते (गीता० २।३४)। **संभावितस्य=महितस्य**। बद्धुं न सम्भावितः केशपाशः (रघु० ७।६)। **संभावितः=चिन्तितः**। चिरप्रबोधान्न सम्भावितमस्माभिरद्य धर्मासनमध्यासितुम् (शा० ६)। **धर्मासनाध्यासनस्य मया करिष्यमाणस्य संभवो नाभूदित्याह**। असम्भावितातिथिसत्कारं लज्जेऽहमार्यं विज्ञापयितुम् (शा०)। **असम्भावितोऽकृतोऽतिथिसत्कारो यस्य तम्**। अर्थप्रत्ययो हि वर्णैर्नियतक्रमतया परस्परमसंभवद्भिरशक्यः कर्तुम् (३।१७ यो० भा० वाचस्पतिः)। **असंभवद्भिः=अयुज्यमानैः**। क्षीरसंभावनार्थाय कृत्तिकाः समयोजयन् (रा० १।३७।२३)। **क्षीरसंभावनार्थाय=क्षीरपानप्रयोजनसिद्धये। संभावनं संयोजनं प्रापणम्**। पितरं कर्कटो हन्ति मातरं हन्ति पुत्तिका। हन्ति सर्वं तु कायस्थः कृतघ्नः प्राप्तसंभवः (राज० ८।८९)। **प्राप्तसंभवः=अवाप्तभूतिकः**। निःश्वासायाससंभवः (वियोगाग्निः) (रा० २।२४।७)। **संभवः=वृद्धिः**। ऊर्ध्वं त्रिरात्रात्सम्भव इत्येके (गो० गृ० २।५।७,८)। **समभवः=मिथुनीभावः, मैथुन्यम्**। स प्रेत्य पशुतां याति संभवानेकविंशतिम् (मनु० ५।३५)। **संभवान् जन्मानि**। श्रुतर्षयस्तु भवन्ति केचित् कर्मफलशेषेण पुनः संभवे (आप० ध० १।५।५)। **संभवो जन्म**। **पुनः सम्भवः=पुनर्भवः=प्रेत्यभावः**। स एवं विद्वांश्छन्दोमयो देवतामयो ब्रह्ममयः सम्भूय देवता अप्येति (ऐ० ब्रा० २।४२)। **संभूय=सम्यग् भूत्वा**। सम्भाव्य चटकान्मूर्ध्नि (भा० शां०२६१।४१)। **संभाव्य=वर्धयित्वा**। संभाव्य पुत्रान्कालेन (भा०शां०२८८।

८)। **संभाव्य=संवर्ध्य**। विलोचनं दक्षिणमञ्जनेन संभाव्य (कु० ७।५६, रघु० ७।८)। **संभाव्य=सत्कृत्य=अलङ्कृत्य**। येन सम्भाव्यमानेन प्रपन्नान्धं तमः प्रभो (भा० पु० ३।२५।७)। **सम्भाव्यमानेन=पूर्यमाणेन**। तानसंभाव्य पराभावयत् (ऐ०ब्रा०३।३६)। **पुनः समृद्धिः संभाव्यं तद्रहितं यथा स्यात्तथा**। संभावना हि लोकस्य मम पार्थस्य चोभयोः (भा० द्रोण० ११०।६६)। **संभावनाऽस्तितां ज्ञानं कुलशीलश्रुतादिषु इति नील०**। सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः संभावनागुणमवेहि तमीश्वराणाम् (शा० ७।४)। **संभावना=गौरवम्, समादरः**। सम्भावनमथोत्प्रेक्षा प्रकृतस्य परेण यत् (सा० द० १०।४०)। सम्भूतिं तस्य तां विद्याद् यद्योनावभिजायते (मनु० २।१४७)। **सम्भूतिर्जन्म**।

—भृ (भृञ् भरणे, डुभृञ् धारणपोषणयोः)। एवं वा एष यज्ञꣳ संभरति यो दीक्षते (श० ब्रा० ३।२।२।३)। **संभरति=संगृह्णाति**। एवं देवता अग्रे यज्ञं समभरन् (श०ब्रा०१२।७।३।६)। यज्ञसंभारान् कृतवन्त इत्यर्थः। देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरन् (ऐ० ब्रा० ४।१)। **प्रथमाहसम्पाद्येन सोमेन वज्रं समभरन् वज्रं कर्तुं प्रकृतिद्रव्यं समानयन् इत्याह**। तस्मात्सुभाषितमधूनि च संबिभर्मि (अवदा० ३१।१७)। **संबिभर्मि=संगृह्णामि=समाहरामि**। वालैः शृङ्गेण पादेन संभरत्येवं गौर्मखम् (भा० शां २६३।३८)। **संभारान्सम्पादयति**। साहित्योदयसंभृतो विजयते संभूय सारस्वतः, सारः (महावीर०७।२१)। **सम्भृतः=सम्पादितः**। असम्भृतं मण्डनमङ्गयष्टेः (कु०१।३१)। **असम्भृतमसम्पादितमकृतकमित्यर्थः**। प्रविश्यैकाकिनैवाथ द्रष्टव्यः संभृतो मया (सरिदुत्तरणोपायः) (राज०४।५७२)। **संभृतः=सज्जीकृतः, निर्मित इति वा**। सम्भृत्य महतीं सेनां चतुरङ्गां युधिष्ठिर (भा०आदि०१०२।१६)। **संभृत्य एकीकृत्येत्यर्थः**। संभृता चैव विद्येयं तपसेह मया पुरा (भा० आदि १७०।४१)। **संभृता=अर्जिता**। त्यागाय सम्भृतार्थानाम् (रघु० १।७)। सम्भृते शिखिनि गूढमादधुः (रघु० १६।५४)। **सम्भृते शिखिनि=समिद्धे हुतवहे**। ते च स्युः संभृताः सर्वे वसुभिर्भोजनेन च (रा० १।१३।१५) **सम्भृताः=पूर्णाः**। **ये स्युः संपूजिता इति पाठ.न्तरम्**। मधुसंभृतां कमलिनीम्। **मधुना सम्यक् पुष्टाम्**। सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः (रघु० ६।३०)। **संभृतः=जनितः**। कथं यास्यन्त्येते विरहदिवसाः संभृतरसाः (भर्तृ० २।६३)। संभृतरसाः=उपचितरसाः। पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः। कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना (याज्ञ० ३।६)॥ **संभृतो निर्मितः**। कच्चित्ते संभृता भृत्याः कच्चित्तिष्ठन्ति शासने (रा० १।५२।८)। **संभृताः=वेतनदानादिना पुष्टाः**। नियुङ्क्ष्व मां महातेजस्त्वं ब्रह्मबलसंभृताम् (रा० १।५५।१६)। **उक्तोऽर्थः**। तपसा संभृते चैते ब्रह्मरूपे भविष्यतः (रा० १।२२।

२१)। **संभृते=पूर्णे**। वय तदस्य संभृतं वसु (अथर्व०७।६०।२)। **सम्भृतम्=एकत्र सम्पादितम्**।...नरपतयः सम्भृताश्चीनहूणैः (मुद्रा० ५।११)। **सम्भृता=परिपुष्टाः**। संभृत्वा नाम यो देवः (अथर्व० ३।२४।२)। **संभृत्वा=संभर्ता**। **भृञः क्वनिप्**। मधुकरवत्सारांशस्य सङ्ग्रहीतेत्यर्थः। सविशेषमद्य पूजासम्भारो मया सन्निधापनीयः (मालती०५)। **पूजासंभारः=पूजायामुपयोक्ष्यमाणमर्थजातम्**। बहुकरणा यज्ञा नानासंभारविस्तराः (भा० वन० ८२।१४)। पर्यायसेवामुत्सृज्यपुष्पसंभारतत्पराः (कु० २।३६)। **पुष्पसंभारः=कुसुमसमाचयनम्**। उत्सृजेत्कृतार्थान्संभारान् (गो० गृ० ३।६।५)। **गतप्रयोजनान्संगृहीतार्थांस्त्यजेदित्याह**। सम्भाराः सम्भ्रियन्तां ते तुरगश्च विमुच्यताम् (रा० १।८।११)। **सम्भ्रियन्ताम्=सम्पाद्यन्ताम्**।

—**भ्रम् (भ्रमु अनवस्थाने)**। परावरज्ञास्तु न संभ्रमन्ति (भा० शां २२६।१४)। **सदसद्वस्तुविदो न त्रस्यन्तीत्याह**। नासंभ्रमत्तदा पार्थः (भा०द्रोण०१००।५)। **असम्भ्रमत्=समभ्रमत्=पर्याकुलचित्तोऽभूत्**। त्यज शोकं च मोहं च संभ्रमं दुःखजं तथा (रा० २।६०।५)। **सम्भ्रमश्चिन्ता**। न तौ भयं सम्भ्रममभ्युपेयतुः (रा० २।५३।३५)। **भयकार्यमितस्तत ईक्षणरूपं सम्भ्रम इति तिलकः**। सम्भ्रमेण समुदाचारो विस्मृतः (दूत० १)। **सम्भ्रमेण=सम्भ्रान्तेन (त्वया)**। गृहमुपगते सम्भ्रमविधिः (भर्तृ० १।५७)। **सम्भ्रमः=आदरः=सत्क्रिया**। दग्ध्वा संभ्रान्तपौरद्विजगणरहितान्नन्दवंशप्ररोहान् (मुद्रा० १।११)। **सम्भ्रान्ताः=संभाविताः समाहृताः**। दृष्ट्वा हनूमतो वर्ष्म संभ्रान्तः पवनात्मजः (भा० वन० १५०।१०)। **संभ्रान्तः=क्षुभितः, संमूढः**। ततः परमसंभ्रान्ताः सर्षिसङ्घाः सुरासुराः (रा० १।६०।२४)। **परमसम्भ्रान्ताः=अत्यन्तं पर्याकुलचित्ताः**।

—**मद् (मदी हर्षे)**। प्रमदा हतसम्मदाः (भट्टि० १०।६)। **सम्मदो हर्षः**। प्रमदसम्मदौ हर्षे (पा० ३।३।६८)। **सम्यङ् मदस्तु सम्मादः**। प्रमत्तसंमत्तश्वेडितोत्कृष्टसङ्कुलः (भा० आश्व ५६।१०)। **संमत्तो हृष्टः**।

—**मन् (मन ज्ञाने)**। कच्चिदग्निमिवानाय्यं काले संमन्यसेऽतिथिम् (भट्टि० ६।६५)। **संमन्यसे=मानयसि=संभावयसि**। गुरुरनुगन्तव्योऽभिवादयितव्यश्च। वृद्धवयाः प्रत्युत्थेयः संमन्तव्यश्च (मी० ६।२।२ सूत्रे शा० भा०)। वाहीकः सौमदत्तिश्च ये चान्ये वृद्धसंमताः (भा० वन० २४६।१५)। **वृद्धा इति मता इत्यर्थः**। द्वेष्योपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् (रघु० १।२८)। **संमतः=प्रियः**। प्रणाय्योऽसम्मतौ (पा० ३।१।१२८)। **सम्मतिः प्रीतिविषयीभवनम्**। प्रणाय्यश्चौरः, **प्रीत्यनर्हः**। **अभिलाषोपि संमतिरुच्यते**। प्रणाय्योऽन्तेवासी। निरभिलाषः, **निष्कामो विरक्त इत्यर्थः**।

—**मन्त्र्** (**मंत्रे गुप्तपरिभाषणे**)। द्वौ सं निपद्य यन्मन्त्रयेते (अथर्व० ४। १६।२)। **संमन्त्रयेते**=**मिथः परिभाषेते**।

—**मा** (**मा माने, माङ् माने**)। एभिरेवैनं (यजमानं) लोकैः सम्मिमीते (ताण्ड्य० ७।१।१)। **समानं कृतवान्भवतीति सायणः**। मृणालसूत्रमपि ते न संमाति स्तनान्तरे (सुभाषितम्)। **न संमाति अवकाशं न लभते**। कान्तासंमिततयोपदेशयुजे (का० प्र० १)। न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे (भा० पु० १।१८।४२)। **संमातुम्**=**तुलयितुम्**=**समीकर्तुम्**। दर्भसम्मितं ब्रह्मवर्चसकामस्य (गो० गृ० ४।७।७)। **दर्भसम्मितं दर्भबहुलम् इति सामश्रमी**।

—**मूर्च्छ्** (**मुर्छा मोहसमुच्छ्राययोः**)। संमूर्च्छितेव कौरव्य प्रजज्वाल च तेजसा (भा० वि० १७।१०)। **संमूर्च्छिता**=**व्याप्ता**। **सम्मूर्छनमभिव्याप्तिरिति कोष इत्यर्जुनमिश्रः**।

—**मृज्** (**मृजू शुद्धौ**)। ग्रहं सम्मार्ष्टि। शोधयतीत्यर्थः।

—**मृश्** (**मृश आमर्शने, आमर्शनं स्पर्शः**)। सपवित्रेण पाणिना पात्राणि संमृश्य (आप० श्रौ० १।५।१६।१०)। **संमृश्य**=**संस्पृश्य**। ये तत्र ब्राह्मणाः सम्मर्शिनः (तै० उ० १।११।४)। **संमर्शिनः कर्तव्याकर्तव्यविवेकवन्तः**।

—**यज्** (**यज देवपूजासंगतिकरणदानेषु**)। यद् ब्राह्मणाः संयजन्ते सखायः (ऋ०१०।७१।८)। **संयजन्ते**=**सम्भूय यजन्ते**। अवप्रुषो विप्रुषः संयजामि (तै० ब्रा० ३।७।६।२१)। **साकं जुहोमीत्यर्थः**। ते वै पत्नीः संयाजयिष्यन्तः प्रतिपरायन्ति (श० ब्रा० १।६।२।१)। **पत्नीसंयाजं करिष्यन्त इत्याह**। **प्रतिपरायन्ति**=(**गार्हपत्यं प्रति**) **निवर्तन्ते**।

—**यत्** (**यती प्रयत्ने**)। सं भानुना यतते सूर्यस्य (ऋ०५।३७।१)। **संयतते**=**संगच्छते**। **सम्पूर्वको यतिरिहाकर्मकः**। सं रश्मिभिर्यतते दर्शतो रथः (ऋ०६।१११।३)। **संयतते**=**युज्यते**। सं...जनाञ्छुधीयतश्चिद् यतथो महित्वा (ऋ०६।६७।३)। **संयतथः**=**संगमयथः**। **संयतिर् इह सकर्मकः**। सं शूरणासो दिव्यासो अत्याः। हंसा इव श्रेणिशो यतन्ते (ऋ० १।१६३।१०)। **संयतन्ते**=**इतरेतरमनुगच्छन्ति**। सं यन्महो मिथती स्पर्धमाने तनूरुचा शूरसाता यतेते (ऋ०७।६३।५)। **संयतेते संयतेते**=**युध्येते**। देवासुराः संयत्ता आसन् (तै० सं० १।५।१।१)। **संयत्ताः**=**विगृह्णानाः**। संग्रामं संयतिष्यमाणः (ऐ० ब्रा० ८।१०)। **युद्धं करिष्यमाण इत्यर्थः**। सङ्ग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा सङ्ग्रामं जयति (तै० सं० २।२।८।२)। **संयत्तः**=**सन्नद्धः**। संयत्ताः समरे सर्वे पालयध्वं पितामहम् (भा० भीष्म० ८२।६)। **संयत्ताः**=**प्रयत्नाः**। तथा बुध्येत संयत्तो विजयेत रिपून् यथा (भा०७।२००)। **संयत्तः सावधानः**=**जागरूकः**=**प्रबुद्धः**=

सावेक्षः। उप प्रेत संयतध्वं मान्तर्गत भागिनं भागधेयात् (आप०श्रौ०६।८।१)। संजानते न यतन्ते मिथस्ते (ऋ० ७।७५।५)। संयतन्ते=स्पर्धन्ते=विरुध्यन्ते। देवासुरा वा एषु लोकेषु समयतन्त (ऐ० ब्रा० ३।३)। **समयतन्त=अस्पर्धन्त**। **असंयत्तो व्रते ते क्षेति** (अथर्व० २०।२५।३)। **असंयत्तः=अप्रयत्तः**। **प्रयत्नमकुर्वाणः**। द्रोणकर्णौ तु संयत्तौ पश्य युद्धे महारथौ (भा० द्रोण० १८३।३५)। **संयत्तौ=सन्नद्धौ=सज्जौ**। धनुर्भृतः संयति लब्धकीर्तयः (कि०१।१६)। **संयद्युतम्**। तथा चामरः—**संयत् समित्याजिसमिद्युधः**।

—**यम् (यम उपरमे)**। व्याप्तं न संयमत् (अथर्व० ६।५६।१)। **न संयमत्=संश्लिष्टं मा भूत्**। **अत्र संयमिरकर्मकः**। वोळ्हुर्न रश्मीन् समयंस्त सारथिः (ऋ० १।१४४।३)। **समयंस्त=समधारयत्=करयोरगृह्णात्**। संयच्छ मामकानश्वान् (भा० वि० ३८।४६ पाठभेदः)। **प्रग्रहेषु गृहीत्वा प्रचोदयेत्याह**। देवबर्हिर्मा त्वाऽन्वङ् मा तिर्यगिति संयच्छति (आप० श्रौ० १।२।३।११)। **संयच्छति गृह्णाति सव्येन हस्तेनेति धूर्तस्वामी**। संयच्छामि ह्यानेष युध्यतो वै कर्पदिनः (भा० कर्ण० ३४।७६)। **संयच्छामि=संगृह्णामि, क्षत्तृत्वं कुर्वे**। स्वं व्रीहिं संयच्छति (१।३।७७सूत्रे प०म०)। **संक्षिपति=संगृह्णाति**। न संयतस्तस्य बभूव कश्चन विसर्जयेद्यं सुतजन्महर्षितः (रघु० ३।२०)। **अत्र पश्चात्कृता दैत्या वायुना संयतास्तदा** (भा० उ०११०।५)। **संयताः सन्नद्धाः सन्तः**। दानाध्ययनशीलाश्च संयताश्च परिग्रहे (रा० १।६।१३)। **संयताः=सङ्कुचिताः**। तेषां संयच्छतां संख्ये परस्परमजिह्मगैः। (भा० द्रोण० ९२।५)। **संयच्छताम्=विधारयताम्**। संयच्छन्दः (वा० सं० १५।५)। **संयच्छति व्यापारान्निवर्तयति जन्तूनिति संयद् रात्रिः**। उभे वृतौ संयती संजयाति (ऋ० ५।३७।५)। **संयच्छब्दो रात्रिवचनो नपुंसकम्**। **तस्य द्विवचनं संयती, अत एवोभे इति विशेषणान्वयः**। **द्विवचनान्तेन संयच्छब्देन राज्यहनी उच्येते**। **वृतौ वर्तमाने**। यत्संयमो न वियमो वियमो यन्न संयमः (अथर्व० ४।३।७)। **संयमो मन्त्रेण व्याघ्रादीनां नियमनम्**। अमोघक्रोधहर्षश्च त्यागसंयमकालवित् (रा० २।१।२३)। **संयमः=न्यायेनार्जनम्**। संयमे विश्वमखिलं बीजभूते तथा त्वयि (वि०पु०१।१२।६५)। **संयमे=प्रलये**। अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः (वि० पु० १।२।२६)। **अन्तसंयमः=महाप्रलयः**। **जगन्निरोधः, सर्वप्रपञ्चसंहारः**। संयम्य गृहीतो मलयकेतुः (मुद्रा०६)। **संयम्य=परिवार्य=उपरुध्य**। संयम्य ततो राज्ञे दस्यूंश्चैव न्यवेदयन् (भा० आदि० १०७।११)। **संयम्य=बद्ध्वा**। किन्तु त्वया न तावद्धि संयम्याः सर्वमानवाः (वामन० ६०।५६)। **संयम्याः उच्छेद्या नाश्याः**।

—**या (या प्रापणे, प्रापणमिह गतिः)**। यद् यद् राघव संयाति

महाजनसपर्यया दिनम् (यो० वा०) । **संयाति=अत्येति=अतिक्रामति । पापान्** संयाति संसारान् (मनु०१२।५२) । **संयाति=गच्छति=प्राप्नोति ।** तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही (गीता) । **उक्तोऽर्थः ।** नाराजके जनपदे हृष्टैः परमवाजिभिः । नराः संयान्ति सहसा रथैश्च प्रतिमण्डितैः (रा० २।६७।२५) ॥ **संयान्ति=संचरन्ति=परिक्रामन्ति ।** यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः (भा० पु० ८।३।२३) । **संयान्ति=समेता भवन्ति ।** पश्य मे हयसंयाने शिक्षां केशवनन्दन (भा० वन० १६।५) । **हयसंयानम्=अश्वसंयमनम्** (?) । प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् (रा० २।७६।२) । **संयानम्=प्रेतनिर्हारम् ।** अथोत्तरत ऊर्णाविक्रयः शीधुपानम्... समुद्रसंयानमिति (बौ० ध० १।१।२।४) । **समुद्रसंयानम्=नानाद्वीपान्तरगमनम् ।** सांयात्रिकः पोतवणिक् इत्यमरः । **सम्पूर्वस्य यातेर्देशान्तरगमने वृत्तिरित्याहुः ।** एता उ एव संयान्यः (श० ब्रा० ८।७।१।१४) । **संयान्यः=निःश्रेणयः । सहदेवस्तु संयाय** रथेन गजयोधिनः (भा० वन० २७१।११) । **संयाय=समेत्य=समागम्य ।**

—यु (यु मिश्रणामिश्रणयोः) । जनयत्यै त्वा संयौमि (वा०सं० १।२२) । **मिश्रयामीत्याह ।** यामेव मृदं तत्र संयौति (श० ब्रा० ६।५।१।३) । **उक्तोऽर्थः ।** जनयत्यै त्वा संयौमीति संयुत्य (आप० श्रौ० १।८।१४।५) । **संयुत्य=पिष्टमपश्च मेलयित्वा ।** प्रणीताभिर्हवींषि संयौति (श० ब्रा०) । **प्रणीतापात्रस्थाभिरद्भिः पुरोडाशपिष्टं** मेलयति । संयदोजो युवते विश्वमाभिः (ऋ० ५।३२।१०) । **संयुवते=संयुनक्ति ।** न च काञ्चन काञ्चनसदृशचिति न कपिः **शिखिना** शिखिना समयौत् (भट्टि० १०।५) । **समयौत्=समयोजयत्=समबध्नात् ।** मुदा संयुहि काकुत्स्थम् (भट्टि० २०।१६) । **उक्तोऽर्थः ।** अश्वं रथरश्मिसंयुतम् (रघु०३।४२) । **संयुतम्=संयुक्तम् ।**

—युज् (युजिर् योगे) । स नो बुद्ध्या शुभया संयुनक्तु (श्वे० उ० ३।४) । रघुना थोऽप्यगस्त्येन ··· संययुजे शरत्काल इवेन्दुना (रघु० १५।५४) । **स्पष्टोऽर्थः ।** संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः (भा० पु० ६।१५।३) । यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि (मनु० ६।२२) । **विवाहसम्बन्धेन सम्बध्येतेत्याह ।** अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा (मनु० ६।२३) । **उक्तोऽर्थः ।** वेदये न च संयुक्तान् शब्दस्पर्शरसानहम् (रा० २।६४।६७) । **संयुक्तान् समग्रान् इति कश्चित् । इन्द्रियसंयुक्तान् इति तिलकः ।** संयुक्तांश्च वियुक्तांश्च सर्वोपायान्सृजेद् बुधः (मनु० ७।२१४) । **संयुक्तान्=समस्तान् । वियुक्तान् व्यस्तान् ।** संयोगो नाम स भवति इदं कृत्वा इदमवाप्यत इति (भाष्ये) । संयोगा विप्रयोगान्ताः (भा०शां० २७।३१) ।

इन्द्रोपि हि न पार्थेन संयुगे योद्धुमर्हति (भा० वि० ४८।१२)। **संयुगः=समागमः=संपातः=सन्निपातः**। मा स्मैवं साहसं तात पुनः कार्षीः कथं चन। भीष्मेण संयुगं गन्तुं क्षत्रियेण विशेषतः (भा० उ० १८५।१०)॥ **संयुगं गन्तुम्=समासत्तुम्=समागन्तुम्**। ज्यामिमां चापि गाण्डीवे समयोजयत् (भा० वन० १२०६७)। **समयोजयत्=असज्जयत्**। स विप्रो वैष्णवं सत्रं पुत्रार्थं समयोजयत् (हरि० ३।१०४।७)। **समयोजयत्=प्राकल्पयत्**। बुद्धया संयोजयन्ति तम् (पञ्च० २)। **संयोजयन्ति=सम्पादयन्ति**।

—**युध् (युध सम्प्रहारे)**। तेन चाहं न शक्तोस्मि संयोद्धुम् (रा० १।२२।२२)। **संयोद्धुम्=सह योद्धुम्**। यदा प्रहृष्टः सम्राट् त्वां संयोधयति कुञ्जरैः (भा० वि० १६।५)।

—**रक्ष् (रक्ष पालने)**। संरक्षामि विलुम्पामि ददाम्यहमथाददे (भा० शां० २२४।४३)। **संरक्षामि=सम्यग् रक्षामि। विलुम्पामि=विशेषेण छिनद्मि। संरक्षतो मुनिगणान् निघ्नतो राक्षसान्मम** (रा० ३।१०।२५)। **उक्तोऽर्थः**। भगवञ्छ्रोतुमिच्छावो यस्मिन्काले निशाचरौ। संरक्षणीयौ तौ ब्रूहि नातिवर्तेत तत्क्षणम् (रा० १।३०।२)॥ **संरक्षणीयौ यज्ञसंरक्षणाय निवारणीयौ**।

—**रञ्ज् (रञ्ज रागे)**। चिताधूमेन नीलेन संरज्यन्ते च पादपाः (भा० शां० १५३।९९)। **संरज्यन्ते=वर्ण्यन्ते। चिताधूमो रागस्तेन तद्वर्णाः क्रियन्ते**। संरक्ततरमत्यर्थं मधुरं नावगायताम् (रा० श्लेगल सं० १।४।१७)। **संरक्ततरम्=रञ्जकतरम्, चेतोहरम्**। संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः (मेघ० ५७)। **संरक्ताभिः=रक्तकण्ठीभिः, अतिनिर्हारिणीभिः**।

—**रभ् (रभ राभस्ये)**। समिन्द्र राया समिषा रभेमहि (अथर्व० २०।२१।५)। **सरभेमहि**। संयुज्येमहि। रयिमन्त इष्वन्तश्च स्यामेत्याह। क्षत्रेणाग्ने स्वेन संरभस्व (अथर्व० २।६।४)। **उक्तोऽर्थः**। अग्ने सर्वास्तन्वः संरभस्व (अथर्व० १९।३।२)। **संरभस्व=संकलय**। तत्र तत्र विभक्तास्तनूरेकश्च संमेलयेत्याह। यदा वै द्वौ संरभेते अथ तौ वीर्यं कुरुतः (श० ब्रा० १४।१।१।३)। **संरभेते=इतरेतरमालम्बेते**। तद्योक्त्रे भृत्याः संरभन्ते (अथर्व० १४।२।५३)। **संरभन्ते=कर्षन्ति**। **तद्गृहीतये वा संयतन्ते। तद्योक्त्रे=तस्या वध्वा योक्त्रे**। इत्युपादेयवर्गेस्मिन् यदर्थं प्रतिभा कवेः। सम्यक् संरभते तस्य गुणः सौभाग्यमुच्यते (वक्रोक्ति० १।५५)॥ **संरभते सम्यक् सावधानतया व्यवस्यति**। मिथिलेश्वर किमिति संरभसे (बा० रा० १)। **अत्यन्तमुत्सहसे**। युद्धैकरुचे मा निर्भरं संरभस्व (बा० रा० २।१६)। **मातिमात्रमुत्सहिष्ठाः**। रमणीयान् बहुविधान् पादपान्कुसुमोत्कटान्। सीतावचनसंरब्ध **आनयामास**

लक्ष्मणः (रा० २।५३।३०) ॥ **संरब्धः**=त्वर्य्यमाणः । न मामन्येन संरब्धं प्रमत्तं वेद्धुमर्हसि (रा० ४।१७।२१) । **अन्येन संरब्धमन्येन संयुक्तम्, युध्यमानमित्यर्थः** । सरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः (रा० १।५३।१७) । **संरब्धतरमत्याग्रहयुक्तम्** । नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति (रघु०१६।१६) । **संरब्धः**=**कुपितः** । कवचोत्सेधसंरब्धकण्ठायास० (राज० ५।३४४) । **संरब्धः**=**समेधितः** । संरब्धमानः (=**वृद्धदर्पः**) (भा० उ० २।१२) । **संरम्भमाण इति पाठान्तरम्** । **हठं कुर्वाण इति तदर्थः** । संरब्धनेत्र० (रा०गोरे०सं० २।७६।३२) । **उच्छूननयन० इत्यर्थः** । संरब्धव्रण० (सुश्रुत २।६।११) । **उक्तोऽर्थः** । प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् (रघु० ४।६४) । **संरम्भः कोपः** । संरम्भो हि सपत्नीत्वाद् वक्तुं कुन्तिसुतां प्रति (भा० आदि० १२४।६) । **संरम्भः**=**अभिमानः, दर्पः** । संरम्भ-भययोगेन विन्दते तत्स्वरूपताम् । (भा० पु० ७।१।२८) । **संरम्भो द्वेषः** । **अन्यत्र दुर्लभोऽयमर्थः पुराणकारस्य स्वस्योपज्ञा** । त्वयापि तस्मिन्संरम्भो न कार्यः (दशकु०) । **तदर्थविघातका उपाया नास्थेया इत्याह** । न संरम्भेण सिध्यन्ति सर्वेऽर्थाः सान्त्वया यथा (भा० पु० ८।६।२४) । **त्वरया हिंसया वेत्याह** । **सान्त्वमिति विदितं सान्त्वनेति च** । **सान्त्वेति स्त्रीलिङ्गं तु परोक्षप्रियस्यास्य कवेरेव** । अवृष्टिसंरम्भमिवाम्बुवाहम् (कु० ३।४८) । **संरम्भः**=**क्षोभः** । अन्योन्यजयसंरम्भो ववृधे वादिनोरिव (रघु० १२।९२) । **संरम्भः**=**औत्सुक्यम्, समुत्साहः** । हन्त वर्धते ते संरम्भः (शा० ७) । यतश्च जातसंरम्भो न च शत्रुवशं गतः (भा० वि० ३४।१३) । **संरम्भो भयम्** । तत्र शुश्राव वै शब्दं तोयसंरम्भवर्जितम् (रा० १।२४।५) । **तोयसंरम्भेण**=**तरङ्गसंघट्टजन्मना क्षोभेण** । संरभमाणो विजितः प्रसह्य (भा० उ० २।१२) । **संरभमाणः**=**क्रुध्यन्** । **हठं कुर्वाण इति नील०** । प्रवृत्तं रज इत्येव तन्न संरभ्य चिन्तयेत् (भा० शां० १९४।३२) । संरभ्य=भीत्वा ।

—**रम्** (**रमु क्रीडायाम्**) । भक्तस्य तत्र समरमन्त ममापि वाचः (महावीर० १।७) । **समरमन्त**=**नन्दिमाप्नुवन्** । संरंसीष्टाः सुरमुनिगते वर्त्मनि प्राज्यधर्मे (भट्टि० १९।३०) । **उक्तोऽर्थः** ।

—**राज्** (**राजृ दीप्तौ, छन्दसि तु ऐश्वर्ये**) । सम्राजन्तमध्वराणाम् (ऋ० १।२७।१) । **सम्राजन्तम्**=**ईशानम्** ।

—**राध्** (**राध साध संसिद्धौ**) । संराधयन्तः सधुराश्चरन्तः (अथर्व० ३।३०।५) । **संराधयन्तः**=**ऐक्यम् ऐकमत्यं गताः** । **परस्परमनुकूलाः** । तस्यां न समराधयन् (तै० सं० २।१।०।४) । **तस्यां तस्या विषये न मतिसंवादमुपायन्नित्याह** ।

—री (री गतिरेषणयोः)। आपस्वा समरिणन् (श० ब्रा० ३।८।३।२०)। **समरिणन्=संसृजन्तु**।

—रुच् (रुच दीप्तावभिप्रीतौ च)। यदुषो यासि भानुना सं सूर्येण रोचसे (ऋ० ८।६।१८)। **संरोचसे=समकालं रोचसे दीप्यसे**।

—रुध् (रुधिर् आवरणे)। तृणमिव लघुर्लक्ष्मीर्नैव तान् संरुणद्धि (भर्तृ० २।१७)। **संरुणद्धि=सन्दानयति**। कच्चिन्न लोभान्मोहाद्वा विश्रम्भात्प्रणयेन वा।...आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणत्सि वै (भा० सभा० ५।६२)॥ **संरुणत्सि प्रत्याचक्षे**। मेघैश्च गगनं नीलैः संरुद्धमभवद् घनैः (भा०अनु०१४८।१)। **संरुद्धमावृतम्**। यो मोचयति संरुद्धमिदं प्रवहणं मम (कथा०१८।२६६)। **संरुद्धम्=उपरुद्धम्**। अजाविके तु संरुद्धे वृकैः पाले त्वनायति (मनु० ८।२३५)। **संरुद्धे=परिवृते**। **आस्कन्ने**। खं च भूमिं च संरुद्धां मेनिरे क्षत्रियर्षभाः (भा०द्रोण०१२६।१६)। **संरुद्धामेकतामापन्नाम्**। एवमुक्त्वा ततो रामं संरुध्य भ्रुकुटिं ततः (रा० ३।३०।१६)। **संरुध्य=संनिबद्ध्य**।

—रुह् (रुह बीजजन्मनि)। प्रेमोद्गमाः संरुरुहुः प्रियाणाम् (भट्टि०११।५)। **संरुरुहुः=ववृधिरे=उपचिच्यिरे**। तस्माद् विधृता अध्वानोऽभवन्न पन्थानः समरुक्षन् (तै०सं०२।५।११।२)। **समरुक्षन्=प्रकृतिस्था अभूवन्**। संरोहतीषुणा विद्धं यथा परशुनाऽग्निना। न तु ज्ञानाग्निनिर्दग्धं प्रबोधविशदं मनः (यो०वा०६।१२।५०)॥ **संरोहति=पुना रोहति=प्रकृतिस्थं भवति**। **संरूढव्रणः=संजातकिणं क्षतम्**। षष्टिवर्षगते काले यद्रोषोऽभून्ममानघ। स संरूढोऽसकृत्...(हरि० १।३६।३७)॥ ततो मामतिविश्वस्तं संरूढशरविक्षतम् (भा० वन० १७४।१)। **संरूढा देहे निमग्नाः शराः**। संरोपितेष्वात्मनि धर्मपत्नी त्यक्ता मया—(शा० ६।२३) **संरोपिते=बीजरूपेणाहिते**। संरोहत्पुलका० (सा० द०)। **उदञ्चद्रोमाञ्चा**।

—लक्ष् (लक्ष दर्शने)। हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा (रघु० १।१०)। **यो लक्ष्यतेरर्थः स एव संलक्ष्यतेः। शब्दोपजनः, नार्थोपजनः**। आश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः (शा० ७)। संलक्ष्यते न च्छिदुरोपि हारः (रघु० १६।६२)। **हारश्छिन्न इति न दृक्पथं याति**। विद्धेव पुष्पचापेन तत्क्षणं समलक्ष्यत (कथा० १४।२६)। **स्फुटोऽर्थः**। रिरंसां तस्य संलक्ष्य (राज० ३।५०३)। **संलक्ष्य=विज्ञाय=अनुमाय=विभाव्य**।

—लप् (लप व्यक्तायां वाचि)। वितण्डालापसंलापैः (भा० द्रोण० ८५।१३)। संलापो भाषणं मिथः (अमरे)। **संलापो नाटकेषु संभाषणविशेषे पठ्यते यो दर्पणकारेणेत्थं लक्ष्यते**—संलापः स्याद् गभीरोक्तिर्नानाभावसमाश्रयेति।

—लिख् (लिख अक्षरविन्यासे)। अजैषं त्वा संलिखितमजैषमुत संरुधम् (अथर्व० ७।५०।५)।

—ली (लीङ् श्लेषणे)। अन्योऽन्यं समलीयन्त पलायनपरायणाः (भा० २२।१५)। **इतरेतरं समश्लिष्यन् इत्यर्थः**। यथा राजन्हस्तिपदे पदानि संलीयन्ते सर्वसत्त्वोद्भवानि (भा० शां० ६३।२५)। **संलीयन्ते=निमज्जन्ति=परिक्षिप्तानि संवृतानि भवन्ति**। संलीनमपि दुर्गेषु निन्यतुर्यमसादनम् (भा० आदि० २१०।२०)। **संलीनम्=प्रच्छन्नम्**। स यथा दर्तिर्निष्पीत एवं संलीनः शिष्ये (श० ब्रा० १।६।३।१६)। **संलीनः=संकुचितः**। श्रवणे शिरोधरायां संलीने (हरि० २।३१।८)। **उक्तोऽर्थः**। संलीय तस्मिन्निषसाद वृक्षे (रा० ५।१६।३३)। **संलीय=संकोचमापद्य**। किसलयसंलयः=**पल्लवसंकोचः**। विश्रान्तः संहत्य पक्षौ संलयायैव ध्रियते (बृ० उ० ४।३।१६)। **संलयः=कुलायः**।

—लुड् (लुड विलोडने)। यत्र संलोडिता लुब्धैः प्रायशो धर्मसेतवः (भा० शां० २८७।४४)। **संलोडिताः=चालिताः=धूनिताः**।

—लुभ् (लुभ विमोहने, विमोहनमाकुलीकरणम्)। ऐक्षव्यौ विधृती। नेद् बर्हिश्च प्रस्तरश्च संलुभ्यातः (श० ब्रा० ३।४।१।१८)। **न संलुभ्यातः=संलुब्धे आकुले व्यामिश्रे न भवतः**। संलोभयन्तो दुरिता पदानि (अथर्व० ६।२८।१)। **दुरितानि पदानि=दुरितनिमित्तानि पदानि** (कपोतस्य)। **संलोभयन्तः=व्याकुलीकुर्वन्तः प्रमार्जयन्त इत्यर्थः**। **ऋक्संहितायां तु संयोपयन्त इति पाठः। साञ्ज्यायान्**।

—लोक् (लोकृ दर्शने)। ते एते ज्योतिषी उभयतः संलोकेते (ऐ० ब्रा० ४।१५)। **संलोकेते=परस्परमवलोकयतः**। गृहद्वारं (तथा कुर्वीत) यथा न संलोकि स्यात् (गो० गृ० ४।७।१३)। **गृहान्तर्वर्तिजनादिदर्शकं न स्यादित्याह**।

—वद् (वद व्यक्तायां वाचि)। उत स्वया तन्वा संवदे तत् (ऋ० ७।८६।२)। **स्वीयेन शरीरेण संभाष इत्यर्थः**। **तदित्यग्निमेण चरणेनान्वेति**। देवा वै ब्रह्म समवदन्त, तत् पर्ण उपाशृणोत् (मै०सं ४।१।१)। **ब्रह्मविषये संवादमकुर्वतेत्याह**। कुमारं जातं संवदन्त उप वै शुश्रूषते (ऐ० ब्रा० ३।२)। **कुमारं शिशुं सद्योजातम् अधिकृत्य मिथो भाषन्तेऽयं शृणोतीति**। अथाग्नयः समूदिरे (छां० उ० ४।१०।४)। **समूदिरे=मिथः संबभाषिरे**। इन्द्र त्वं मरुद्भिः संवदस्व (ऋ० १।१७०।५)। **संमन्त्रयस्वेत्याह**। मा मैतस्मिन्संवदिष्ठाः (श० ब्रा० १४।५।१।२)। **इह समा नार्थः**। यदि ज्ञास्यामि वक्ष्यामि अजानन्न तु संवदे (भा० अनु० ४।८०)। **इहापि**। स वै न सर्वेण संवदेत। देवान् वा एष उपावर्तते

यो दीक्षते...न वै देवाः सर्वेणैव संवदन्ते (श० ब्रा० ३।१।१।१०)। **उक्तोऽर्थः**। श्रेयस्सदात्मनो दृष्ट्वा परं राज्ञा न संवदेत् (=**संवाद्येत्**) (भा० वि० ४।४३)। **तुल्यं न दर्शयेदित्यर्थः**। यत्राघाटाः कर्कयः संवदन्ति (अथर्व० ४।३७।५)। **संवदन्ति=समानं ध्वनन्ति**। अस्य मुखं सीताया मुखचन्द्रेण संवदति (उत्तर० ४)। **संवदति=सारूप्यं भजते**। अहो संवदन्त्यक्षराणि (मुद्रा० ५)। **सरूपाणि भवन्ति, तुल्यसन्निवेशानि भवन्ति**। दैवं न संवदति किं न कृतं त्वयाद्य (मृच्छ० १०।३१)। **नानुकूलं भवतीत्यर्थः**। न संवदत्यश्रु च तच्च कर्म ते (बुद्ध० ८।३३)। **न संवदति=न सङ्घटते**। संवादयैनं देवैः (श० ब्रा० १।८३।२०)। **संवादं संभाषां कारयेत्यर्थः**। संवादयन्निव (कथा० १०७।७६)। **संवादमैकमत्यं ग्राहयन्निव**। ते सर्वमविदुस्ते सहैवाविदुस्तेऽग्निहोत्रमेव न समवादयन्त (गो०ब्रा०पूर्व० ३।१५)। **अग्निहोत्रविषय एव समानाचारा नाभूवन्नित्याह**। तेषामेकः सकृदग्निहोत्रमजुहोत् द्विरेकस्त्रिरेक इत्याचारविसंवाद इति सायणः। संवाद्य रूपसंख्यादीन्स्वामी तद् द्रव्यमर्हति (मनु० ८।३१)। **संवाद्य=रूपसंख्यादिभिः समानं प्रख्याप्य**। **रूपसंख्यादिविषये संवादमानुरूप्यं दर्शयित्वेत्यर्थः**। अस्मदर्थमपत्यमिति संवाद्य (गौ० ध० ३।१०।१६)। **संवाद्य=संवादमभ्युपगमं कारयित्वा**। दक्षिणास्वेव न संवदितव्यम् संवादेनैवंविधजोऽलोकाइति। **न संवदितव्यम्=नैकमत्यमास्थेयम्**। रूपसंवादाच्च संशयादनया पृष्टः (दशकु०)। **रूपसंवादः=रूपसादृश्यम्**। यदृच्छासंवादः किमु किमु गुणानामतिशयः (उत्तर ५।१६)। **संवादः समागमः**। (नादः) चित्ताकर्षी परिचित इव श्रोत्रसंवादमेति (माल० ५।२०)। श्रवणयोः **सुखो भवति**। **सुश्रवो भवतीति यावत्**। अपि च कृतिनमेनं शक्तिदेवं स्वनाम्ना व्यधित समुदितेषु विद्याधरेषु (कथा० २६।२७६)। **समुदितेषु=प्रायशः कीर्तितेषु**। संवदान्याम् (भाष्ये संवदन्याम्) (भा० गृ० ३।१३)। **कवाटदेशे इत्यर्थः**।

—**वन् (वन षण संभक्तौ)**। गावो घृतस्य मातरोऽमूं संवानयन्तु (अथर्व० ६।६।३)। **संवानयन्तु=वशी कुर्वन्तु**। कोशसंवनने दाने भृत्यानां चान्ववेक्षणे (भा० उ० १४८।६)। **कोशसंवनने=कोशस्यात्मीयताकरणे**। वशक्रिया संवननम् इत्यमरः। न हीदृशं संवननं त्रिषु लोकेषु विद्यते। दया मैत्री च भूतेषु दानं च मधुरा च वाक् (भा० आदि० ८७।१२)।

—**वप् (ड्डुवप बीजसन्ताने)**। पवित्रवति संवपति (श० ब्रा० १।२।२।१)। **संवपति=निक्षिपति**। **आवपति**। **पिष्टं हविरिति शेषः**। असंवपन्ती पिषाणूनि कुरुतात् (आप० श्रौ० १।६।२१।७)। **असंवपन्ती=सहवपनमकुर्वती**।

—**वृज् (वृजी वर्जने)**। प्राधान्येन हि सर्वत्र सर्वाः संवर्जयेत्प्रजाः (का० नी० सा० ८।५३)। संवर्जयेत्=**संश्लेषं नयेदिति जयमङ्गला**। **संसर्जयेदित्यु-**

पाध्यायनिरपेक्षा ।

—**वर्ण्** (**वर्ण वर्णक्रियाविस्तारगुणवचनेषु**) । राजानं राजपुत्रं वा **संवर्णयति** यः सदा (भा० ४।३६) । **संवर्णयति**=**स्तौति** । **अत्रार्थे समानार्थः** । **संवर्तयतीति पाठेऽनुसरतीत्यर्थः** ।

—**वर्मय्** (**वर्मन्**+**णिच्**) । तत्तादृशेन वपुषाङ्ग मदङ्गमेतत् **संवर्मय** स्मरभराः प्रतियान्तु मोघाः (रा० च० ५।६५) । **संवर्मय**=**वर्मणा संनह्य**=**साधु परित्रायस्व** ।

—**वल्** (**वल वल्ल संवरणे संचरणे च**) । तां वल्लभां रहसि **संवलितां** स्मरामि (चौर०१३) । **संवलिताम्** **संगताम्**=**समापन्नाम्** । संवलितं निषादैर्विप्रम् (शिशु० ५।६६) **संवलितम्**=**परिगतम्**=**परिवेष्टितम्** । यथा भूमिरुप्तबीजमात्रा तदैव प्रचुरपचेलिमफलव्रीहिस्तबकसंवलिता न भवति (मनु० ४।१७२ इत्यत्र कुल्लूकः) । **संवलिता**=**आकीर्णा** ।

—**वस्** (**वस निवासे, वस आच्छादने**) । आभिः प्रजाभिरिह **संवसेय** (तै० ब्रा० १।२१।२।१) । **संवसेय**=**साकं वसेयम्** । न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः (मनु० ४।७९) । **उक्तोऽर्थः** । सं वसाथां स्वर्विदा समीची (वा० सं० ११।३१) । **आच्छादयतमित्याह** । **समा नार्थः** । तथा **संवसतस्तस्य** मुनीनामाश्रमे सुखम् (रा० ३।१५।२८) । **संवसतः कञ्चित् कालं स्थितिं कुर्वतः** । तां समुष्य निशां कृत्स्नां प्रभाते प्रत्यबुध्यत (रा० ३।१२।१) । **निशां समुष्य**=**रात्रिं क्षपयित्वा** । प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते (पञ्चत० १।२५०) । **संवासः** । **संसर्गः** । शृण्वन्वाचो मनुष्याणां ग्रामसंवासवासिनाम् (रा० २।४९।४) । **संवासः**=**सन्निवेशः**=**निकर्षणः**=**पुरादेर्बहिर्विहरणभूः** ।

—**वस्त्रय्** (**वस्त्र**+**णिच्**) । न संवस्त्रयेत (लौ० गृ० १।१७) । **न समानं वस्त्रं कुर्यात्** । आचार्यपरिहितं वस्त्रं न परिदधीतेत्याह । मुण्डमिश्रेति सूत्रे वस्त्रात् समाच्छादन इति गणसूत्रम् । वस्त्रं समाच्छादयति **संवस्त्रयतीत्युदाहरणं** वृत्तौ स्थितम् । विशेषस्तु कोपि नोक्तः । **न च सम्शब्दस्यार्थवत्ता प्रोक्ता** । **गृह्यगृहीतोऽर्थस्तु युक्तो भाति** । **सम् शब्दश्चार्थवान्भवति** ।

—**वह्** (**वह प्रापणे**) । स्वस्ति मा **संवह** (अथर्व० ६।४८।१) । **संवह सम्यक् प्रापय** । चत्वारस्त्वां गर्दभाः **संवहन्तु** (भा०) । तत्सर्वे भरतश्रेष्ठाः समूहुर्योगमुत्तमम् (भा० वन० १८२।१७) । **योगं वाहनाविकमारोपितभारं कृतवन्त इति नील०** । **सम्पूर्वो बहिः शकटादौ भाराधाने वर्तते** । अङ्के निधाय करभोरु...**संवाहयामि** चरणावुत पद्मताम्रौ (शा० ३।२०) । **संवाहयामि**=**उद्वर्तयामि**=**मृद्नामि** । पृष्ठं दुःखायमानं मे चण्डि **संवाह्यतामिति** (बृ० श्लो० सं० ४।१२२) । **मृद्यतामित्यर्थः** । क्षिप्रं **संवाह्यतां** व्रजः (हरि० २।८।२१) ।

अशुद्धिपरिशुद्धिः

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
vii	२०	अचिक्लृपम्	अचीक्लृपम्
		उपोद्घाते	
४	१६	विविरहिसो	विविरहितो
,,	२०	जुषाणाः	जुषाणा
२३	२८	-स्पन्दन-	-स्यन्दन
४०	१७	व्यवसना-	व्यसना-
४२	२७	पुरा	परि
४४	१२	व्यूपे	व्यूहेन
		उपोद्घातात्परम्	
१२	१६	प्रक्षणी-	प्रक्षीण-
१७	२६	गोष्ठम्	गोष्ठमित्यपाठ्यम्
२५	२	व्यससावित्यर्थः	व्यवससावित्यर्थः
३२	११	प्रसृति-	प्रस्मृति-
३८	१६	प्रयुपिश्लेषे	प्रयुविश्लेषे
,,	२१	गुच्छ	युच्छ
३६	६	अभिनद्यमाना	अभिनन्द्यमाना
४५	२७	वुष्परिहरः	दुष्परिहरः
५०	११	नेढृशतया	नेदशृतया
५३	३२	दुरत्यां	दुरत्ययां
७७	११	वाजस्यनं	वाजस्यैनं
७६	२६	अपकर्षणाथ	अपकर्षणार्थः
१२८	१०	न	नः
१३४	१७	वर्णतरुणं	वर्णमरुणं
१५५	२३	इष्वन्तः	इड्वन्तः